१०८ श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दखण्डः ।।

तत्त्वचिन्तामण्यालोकः - शब्दखण्डः[१]

शब्दप्रामाण्यवादः

अथ शब्दो निरूप्यते।

शब्दप्रामाण्यवादालोकः

न जाने श्रीजाने विचरितुमिह ग्रन्थगहने

समर्था नैवार्थानधिगमयितुं निर्मतिरपि ।

तथाप्येतावत्यामपि किल विगत्यामहमिह[२]

प्रवृत्तो यत्तस्मिंस्तव चरणसेवैव शरणम् ।।

अथेति। इहाथशब्दस्यानन्तर्यवचनत्वेन तत्र चावधित्वेन उपस्थितोपमाननिरूपणस्यैव प्राप्तत्वात् तस्य सिद्धत्वोपस्थितौ वर्तमानार्थकलट्प्रत्ययान्तत्वेन साध्यतयोपस्थिते शब्दनिरूपणे सिद्धसाध्यसमभिव्याहारलभ्यस्य हेतुहेतुमद्भावस्य उपमाननिरूपणानन्तरं प्रतिबन्धकजिज्ञासापगमे [३] अवसरस्य वा सङ्गतित्वं सूच्यते। उद्देशेऽपि तत्सङ्गतेरेव बीजत्वादिति। न चोपमानशब्दयो-रुपजीव्योपजीवकभावात् नियमः। समानविषयकशब्दस्य उपमानोपजीवकत्वात्। न तूपमाने तथा[४]। तस्य भिन्नविषयकशब्दोपजीवकत्वात्। अतिदेशवाक्यस्योपमानविषयीभूतगवयत्वविशिष्टागोचरत्ववात्।

---

[1] Copied from ADYAR LIBRARY Manuscript - Acc No. 1599, Paper Manuscript, Devanagari, Folios. 1-72. (Lines per folio 8) & Compared with ADYAR LIBRARY Manuscript. - Acc. No. 1600, Paper Manuscript. TELUGU, Folios. 2-24. (1st fol. Missing.) (Lines per folio 17).

[2] T. - तथाप्येतावत्यामहमिह जगत्यामपि किल

[3] T. निरूपणमप्रतिबन्धकापगमे

[४] अपि तदा

प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणम्।

यत्तु कीदृग्गवय इति प्रश्नानन्तरं यत्र चित्रलेखादिना तादृशपिण्डप्रदर्शनं तत्रैव शब्दापेक्षाव्यभिचारान्नोपमाने शब्द उपजीव्य इति, तन्न। (१) अन्यतः शक्तिग्रहे उपमानापेक्षाया अपि व्यभिचारात्। तत्रापीदृग्गवय इति आभिप्रायिकशब्दापेक्षा नियमाच्च शाब्दीति न्यायादिति। वस्तुतः उपमानस्य मानतावच्छेदकधर्मावच्छेदेन शब्दोपजीव्यता शब्दस्य[१] त्ववान्तरधर्मावच्छेदेन उपमाने तथात्वम्। अत उपमानोपजीव्यतामादृत्य क्रमनियमः। मानतावच्छेदकस्य विभाजकतयोपस्थितत्वात् न त्वविभाजकशब्दत्वावान्तरधर्मस्येति सारः ।

प्रयोगेति। प्रयोगे वाक्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्जन्यः शब्दाप्रामाणशब्द इत्यर्थः।

काकाक्षिन्यायात्। कीदृशशब्दः प्रमाणमिति जिज्ञासायामुक्तविशेषणस्य विधेयतया तादृक्शब्दत्वस्य[२] लक्षणत्वालभाच्च व्युत्पत्तिबलात्। वस्तुतस्तु अर्थतत्त्वज्ञानमित्यत्र[३] अर्थशब्दोर्प्यमाणमात्रपरतया तत्तद्वाक्यजप्रतीतिविषयपरतया व्याख्येयः[४] । तेन पदार्थतत्त्वज्ञानमादाय अयोग्येऽतिप्रसङ्गो मा भूदिति भूतपर्यन्तं विशेषणम्। तेन भूतपदमहिम्ना वाक्यार्थपर्यन्तपरत्वलाभादर्थपदस्य भूतपदेनेतरनैरपेक्ष्यव्युत्पत्तेः न सजातीयनैरपेक्ष्यस्यात्र (२) विवक्षितत्वेन यत्प्रसङ्गे[५] प्रतिपाद्यज्ञानं प्रयोगे कर्तव्ये प्रयोगप्रतिपाद्यज्ञानान्तरं नापेक्षत इत्येतावत्पर्यन्तस्य भूतपदप्रयोगाल्लाभेन अर्थपदस्य वाक्यार्थपरतया वाक्यार्थतत्त्वज्ञानजन्यत्वपर्यत्वसानात्। न हि वाक्यार्थज्ञानवत् पदार्थज्ञानमपि अर्थज्ञानानपेक्षं[६] प्रयोगहेतुः, वाक्यार्थज्ञानस्यैवापेक्षणात्। अन्यथा अर्थपदस्य साक्षादेव वाक्यार्थपरत्वे भूतपर्यन्तविशेषणवैयर्थ्यापातात्। एवं सति शब्दपदस्य लक्ष्यलक्षणयोरन्यतरत्र[७] प्रवेशेऽतिव्याप्त्यव्याप्तिप्रसङ्गात्। अध्याहारादिनोभयत्र

---

[१] शब्दे

[२] तादृशशब्दस्य

[3] T omits अर्थतत्त्वज्ञानमित्यत्र

[4] T. व्याख्यातव्यः

[5] T. यत्प्रयोगे

[6] A2 - अर्थज्ञानन्तरानपेक्षं

[7] A2 - अप्रवेशे

शब्दपदप्रवेशः[१] क्रियते। तद्वरं भूतपदमहिम्ना सामग्रीसहकृतत्वमेव लभ्यताम्[२]। तेन प्रयोगहेतुभूतत्वं प्रयोगजनकसामग्रीसहकृतत्वं लभ्यते । न च तादृशार्थतत्त्वज्ञानेन प्रयोगातिरिक्तं किमपि जन्यते। अन्यसामग्र्या अन्यत्राजनकत्वात्। तथा च प्रयोगाभासमात्रं[३] प्रावर्तयितुमवशिष्यत इत्यर्थः[४]। तत्त्वज्ञानजन्यत्वेन तद्वारणे अव्याप्त्यतिव्याप्त्योर्निराकरणे क्वान्यत्र[५] प्रसङ्गो येन लक्षणेऽपि (३) शब्दपदमनुषञ्जनीयमिति तदनन्तर्भाव्यैव[६] लक्षणं समञ्जसम्। एवं चात्र प्रयोगपदं वाक्यसामान्यपरमि-त्येतावतैव सामञ्जस्ये यदाकाङ्क्षासत्तिमत्परमेव[७] वर्णितम्, तत् किमर्थमिति न जानीमः।

न चानाकाङ्क्षादिवारणाय तत्। तथा हि - द्विविधम् अनाकाङ्क्षम्, स्वरूपयोग्यम् अन्यथा वा। तत्राद्ये स्वप्रतिपाद्यवाक्यार्थाप्रसिद्धिरेव प्रसङ्गः। द्वितीये संग्राह्यत्वादेव प्रथमा स्वरूपयोग्यस्यैव लक्ष्यत्वात्। एवमनासन्नेऽपि प्रमास्वरूपयोग्यतासत्त्वात् न कश्चिद्दोषः। यदि च प्रमोपहितस्वरूपमेव लक्ष्यं, तदा स्वप्रतिपाद्यत्वमेव स्वजन्यप्रतिपत्ति[८] विषयत्वेन विवक्ष्यतामिति किमनुपपन्नम्। स्वजनितत्वस्वरूपयोग्यत्वाभ्यां प्रतीतेः विशेषणेन[९] उभयत्र पक्षे दोषाभावात्। सहकार्यभावप्रयुक्तकार्याभाववत एव[१०] स्वरूपयोग्यतया अजनितप्रतीतेरपि[११] स्वरूपयोग्यत्वात्। करणापाटवजन्यत्वे एवं सति अतिप्रसङ्ग एव नास्ति। घटोऽस्तीति प्रतीत्या अपटोऽस्तीत्युच्चारणे तत्प्रतिपाद्यपटास्तित्वज्ञानाजन्यत्वात्। घटास्तित्वस्य तदप्रतिपाद्यत्वात्। भिन्नविषयतया तदजन्यत्वाच्च। एतच्च विसंवादिपक्षे । (३)

---

[1] A2 - तत्प्रवेशः

[2] T. वाच्यताम्

[3] A2 . T. - व्यावर्तयितुं

[4] A2. T. - इति अर्थ०

[5] T. क्वानति०

[6] A2 - तदन्तर्भाव्यैव

[7] A2. T. - यदाकाङ्क्षादिमत्परतया

[8] T. ०प्रतीति०

[9] A2 - विशेषणत्वेन

[10]. T. omits ०स्वरूप०

[11] . T. omits ०स्वरूप०

ननु शब्दो न प्रमाणं तथाहि करणविशेषः प्रमाणं, करणाच्च तत् यस्मिन् सति क्रिया भवत्येव। न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणं(१)। न च शब्दो न प्रमाणमिति(२)

संवादे तु - शुकादिवाक्यादिवत् ईश्वरीयज्ञानजन्यतया लक्षणसत्त्वात् संग्राह्यत्वमेव। न चार्थतत्त्वज्ञानजन्यतावच्छेदकं प्रयोगे योग्यजन्य[१]शब्दत्वाद्यवगतं[२] यदि तदा तदेव लक्षणमस्तु[३]। अन्यथा हेतुत्वाग्रहात् लक्षणाग्रहणं दोषः। प्रयोगत्वावच्छेदेन वाक्यार्थज्ञानजन्यत्वग्रहे तत्र च ज्ञाने तत्त्वज्ञाने[४] तत्त्वज्ञानत्वग्रहेणैव विशिष्टवैशिष्ट्यनिर्वाहात्। वस्तुतस्तु - पक्षतावच्छेदकत्वेनैव तस्योपक्षयात्[५] न लक्षणत्वम्, अवच्छेदकत्वेनैवात्र लक्षणे प्रवेशात् न हेतुतावच्छेदकरूपेणोपस्थितिरेतत् क्रोडान्तर्गतेति न व्यर्थत्वशङ्कापि। न चार्थतत्त्वज्ञानजनकत्वमिति फलद्वारकमेव[६] लक्षणं कुतो न कृतमिति वाच्यम्। तस्यैव लक्ष्यतावच्छेदकत्वादिति दिक् ।

अर्थतत्त्वज्ञानं वाक्यार्थतत्त्वज्ञानम्, तच्च घटोऽस्तीति वाक्यार्थतत्त्वज्ञानस्य ईश्वरीयस्य न जन्यमन्यदप्ययोग्यम्। तत्प्रत्ययस्यैकत्वादिति अतिप्रसक्तमिति प्रयोगहेतुभूतेति विशेषणम्। तदर्थश्च प्रयोगहेतुतावच्छेदकावच्छिन्नत्वं, तच्च स्वसमानविषयकत्वमिति स्वसमानविषयकवाक्यार्थतत्त्वज्ञानजन्यत्वं[७] पर्यवसितम्। न चैवं सति उक्तातिप्रसङ्गः। स्वान्तर्भावादित्यपि वदन्ति।

सौगतः प्रत्यवतिष्ठते - **नन्विति**[८]। **न च न शब्द** इति। एतदप्रामाण्ये एतद्विषयीभूत-शब्दाप्रामाण्यबाधेन[९] शब्दप्रामाण्याभ्युपगमात्। एतत्प्रामाण्ये तु साक्षादेवेत्युभयथापि व्याघात इत्यर्थः।

---

1 T. omits ० जन्य०

2 T. ०शब्दत्वाद्यवच्छेदकमवगतं

3 T. omits ० अस्तु

4 A2. T. omit

5 T. अपेक्षणात्

6 A2 - फलघटितमेव

7 A2 - ०जन्य०

8 T. अथेति

वाक्यस्य प्रामाण्याप्रमाण्ययोर्व्याघातः, अस्याप्रामाण्येऽपि एतदुत्थाप्यमाना-विसंवादादिति(१)चेत् - न, आकाङ्क्षादिमतः पदार्थस्मरणादिव्यापारवतः प्रमाणत्वेन तथाभूतात् प्रमोत्पत्तेरावश्यकत्वात् अतथाभूतत्वे च फलाजनकत्वस्य करणान्तरसाम्यात्(१)। तथापि शब्दो न प्रमाणान्तरं पदार्थ-संसर्गस्यानुमानादेव सिद्धेः।

द्विविधं ह्यप्रामाण्यं - प्रमाऽजनकत्वम्, अप्रामाजनकत्वं च । तत्र द्वितीयाभ्युपगमस्य विषयबाधा-नान्तरीयकत्वेऽपि प्रथमे न तथेत्याह - **एतदिति।**

न च प्रमाऽजनकत्वे प्रमाणोत्थापकत्वमपि [२] कथमिति वाच्यम्। शब्देन पदार्थमात्रस्मरणे तदसंसर्गाग्रहेण उक्तानुमानावतार [३] संभवादिति भावः। अनुमानं च शब्दो न प्रमाणतया व्यवहर्तव्य इत्याकारकम्, अन्यथा प्रमाऽयोगव्यवच्छिन्नत्वस्यैव प्रमाकरणत्वरूपतया [४] साध्याविशेषात् [५]। न च शब्देन स्वगोचरप्रमाजननादसिद्धः। तदन्यप्रमाऽयोगव्यवच्छिन्नत्वाभावस्यैव हेतुत्वात् ।

ननु न क्रियाऽयोगव्यवच्छिन्नस्वरूपत्वं [६] लक्षणम्, अपि तु सव्यापारस्य सपरिकरस्य यत्र क्रियायोगव्यवच्छेदः तत्त्वम्। तच्चात्राप्यस्तीत्यत आह - **आकाङ्क्षेति।** न चैव कारकान्तरातिप्रसङ्गः। (४) उपधेयसङ्करेऽपि निमित्तासङ्करात्। अत एव नानानिमित्तसमावेशात् विवक्षातः कारकपदप्रयोगः। न च क्रियायाः करणजन्यत्वेन मनोऽनुमानानुपपत्तिरात्मादिना सिद्धसाधनादिति वाच्यम्। असाधारणकरण-जन्यत्वेन तत्सिद्धेरित्याद्यन्यत्र विस्तरः।।

वैशेषिकः प्रत्यवतिष्ठते - **तथापीति। न प्रमाणेति** [७]। क्लृप्तप्रमाणान्तर्गत इत्यर्थः।

अनुमानत इति। अनुमानमात्रसिद्धार्थकत्वादित्यर्थः।

---

[1] T. ०शब्दाप्रामाण्येन प्रायेण

[2] T. ०उत्थापनमपि

[3] T omits . ०अवतार०

[4] T. ०करणत्वेन

[5]. T. ० अविशिष्टत्वात्

[6] T. ०स्वरूपत्वात् न करण०

[7] A2 - प्रमाणान्तर०

तथाहि गामभ्याज दण्डेनेति पदानि वैदिकपदानि वा तात्पर्य्यविषयस्मारितपदार्थसंसर्गज्ञान-

---

यद्वा अनुमानत एवेति धर्मपरो निर्देशः। तत्सिद्धिश्च तृतीयान्तात्। तथा चानुमानादिनैव तस्यार्थसाधकत्वादित्यर्थः।

मीमांसकाद्[1] व्यवच्छिनत्ति - **वैदिकेति।**[2] **तात्पर्येति।** अत्र [3] संसर्गज्ञानपूर्वकत्वेन साध्ये तात्पर्य[4]विषयीभूतक्रियाकर्मभावेन अर्थान्तरं मा भूदिति तात्पर्यविषयप्रकारकत्वं संसर्गे विशेषणम्। न चैवं स्मारितपदार्थस्य गोः कर्मत्वे तात्पर्यविषयत्वे तत्करणत्वेनार्थान्तरसंभव इत्यपव्याख्यानम्। तथा सत्यपि ब्राह्मणे विद्येत्यधिकरणत्वे प्रकारितात्पर्यविषयीभूते[5] सत्यपि संभवो[6] नियमादिभेदभिन्नसंसर्गस्य बहुविधतया बहुविधतया एकत्र प्रयोगेऽतात्पर्यविषयीभूते पदार्थान्तर [7] तादवस्थ्यात्। एवं विशिष्टवैशिष्ट्यमेकत्र द्वयमित्यादिसंसर्गभेदे द्रष्टव्यम्। न च तत्र बाधादेव न प्रसङ्गः। तदप्रतिसन्धानविशेषणानुसन्धानात्। अन्यथा प्रकारविशेषणस्याप्यनौचित्यात्। उभयोः संसर्गयोः युगपद्भावेन तात्पर्यवशादेव अन्यतरज्ञानस्य वाक्यजनकत्वेन तात्पर्यविषयत्वं विना बाधाभावाच्च। न च तात्पर्यविषयत्वम्, एवं सति संसर्गविशेषणं वाच्यम्। तथा सति संसर्गस्य बहुप्रकारकत्वेऽपीत्याद्यग्रिमग्रन्थविरोध इति युक्तम्। तत्र बहुप्रकारकत्वस्य[8] बहुविधार्थकत्वात् । न चैवं [9] संसर्गाभावानुपपत्तिः, तात्पर्यविषयत्वग्रहस्य संसर्गविशेषणोपस्थिति-निबन्धनत्वेन प्रागेव तदुपस्थितेरिति वाच्यम्। घटकर्मतेव [10] आनयनक्रियात्वे तात्पर्यमित्यादि प्रत्येकं [11]तात्पर्यग्रहसंभवात्।

---

[1] A2 - व्यावर्तयति
[2] A2 - omits
[3] T. adds स्मारित०
[4] A2 - अतात्पर्य०
[5] T. ०विषये
[6] T. सम्भव०
[7] T ०विषयीभूतेनार्थान्तर०
[8] T. ०प्रकारकत्वेऽपीत्यस्य
[9] T संसर्गानुमान०
[10] T. ०कर्मत्वे
[11] T. omits तात्पर्य०

पूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेतिवत्।

वस्तुतस्तु - तदपि न घटपदार्थकर्मत्वे तात्पर्यमित्यादिनैव ग्रहसंभवात्[१] । अत एव सैन्धवपदार्थकर्मत्वतात्पर्यमिति तात्पर्यग्रह एव - परेणार्थान्तरं[२] मा भूदिति स्मारितत्वं पदार्थविशेषणम्। तदर्थस्तु न तत्कारणस्मृतिविषयत्वमात्रम्, अपि तु तदुच्चारणतात्पर्यविषयत्वम्। अतो विशकलितयोरेकपदार्थतत्संसर्गयोः तात्पर्यग्रह इति तु विशिष्टो[३] तात्पर्यग्रह इति न तदर्थमनुमानपूर्वं विशिष्टोपस्थितिरूपेणेति न किञ्चिदनुपपन्नम् ।

धूमोस्तीति वाक्यस्य वह्निपरस्यापि वह्निसंसर्गज्ञानपूर्वकत्वमाह - **सैत्सीदिति।** पदार्थपदोपादानं तस्य पदवृत्तिविषयाभिधायकत्वेन (४) धूमपदस्य वह्नौ शक्तिलक्षणयोरन्यतरस्य अभावेन प्रसङ्गाभावात्। ज्ञानपदं च प्रमापरम्, अन्यथा अर्थासिद्धावप्रवर्तकत्वप्रसङ्गात् परस्परपदं च पूरणीयम्[४] । अन्यथा अर्थान्तरतादवस्थ्यात् । अत एव हेतुस्थकदम्बपदं[५] युक्तमिति वक्ष्यति। एतच्च साध्यं यद्यपि सर्वत्र नापेक्ष्यते, क्वचित् संसर्गज्ञानसाध्यत्व[६] एवार्थसिद्धेः। तथाविधं साध्यं सर्वत्र संभवतीत्यभिसन्धायोक्तमिति। तदयं निर्गळितसाध्यार्थः - तात्पर्यविषयपदार्थप्रतियोगिकतात्पर्यविषयतदुभयपरस्परसंसर्गप्रमापूर्वकाणीति सर्वं सुस्थम् ।

आकाङ्क्षेति। अत्रायमेतीत्यादौ राज्ञः पुरुष इत्यादिपदकदम्बे व्यभिचारवारणाय आकाङ्क्षावत्त्वम्। न च वह्निना सिञ्चतीत्यादौ तद्वारणायावश्यं योग्यतालिङ्गविशेषणम्। तथा चोदाहृते यदि सा तदा भगवत्संसर्गप्रमासत्त्वादेव न व्यभिचारः[७]। अपरथा हेत्वभावादेव न व्यभिचार इति वाच्यम्। तत्र

---

[1] T. ०ग्रहात्

[2] A2 - पदार्थान्तरं

[3] A2 - विशिष्टे

[4] T. चापरमपूरणीयम्

[5] T. adds अपि

[6] T. ०ज्ञानपूर्वकत्वमात्रसाध्य०

[7] T. omits न व्यभिचारः

संसर्गप्रमायामपि तात्पर्याभावेन विशिष्टाभावात्। न हि तदुच्चारयितुः तेन पुत्रान्वयपरतया राजपदाभिलापात्। नापि भगवतः तदिच्छायाः सन्मात्रविषयत्वेन राजपुरुषसंसर्गस्वरद्वाक्यतो[१] प्रतीतिः तद्गोचरतदिच्छाया अभावात्। न चाकाङ्क्षायास्तत्र सम्भवः। राजपदस्य पुरुषपदव्यतिरेकेणा-न्वयाननुभावकत्वाभावात् । इत्थमेव[२] घटः कर्मत्वमानयनं कृतिरित्यादावपि व्यभिचारोऽस्तीति[३] तद्वारणायापीदं विशेषणं द्रष्टव्यम्। [४]आदिपदादासत्तिरपि द्रष्टव्या। सा चाव्यवहितान्वप्रतियोग्युपस्थितिरूपा। तेन नीलं घटो द्रव्यं पट इत्यादौ नीलपटयोराकाङ्क्षायोग्यतासत्त्वेऽपि आसत्यभावेनैव (५) [५]अर्थप्रत्यायकत्वाभावे नोक्तरीत्या भागवतस्तात्पर्याभावेन वक्तुश्च नीलघटयोरेव अन्वये तात्पर्याद्विशिष्टाभावे तात्पर्याद्विशिष्टाभावे सत्त्वेऽपि न व्यभिचारः। न चात्राकाङ्क्षैव नास्तीति वाच्यम्। तथासति आसत्तेरहेतुतापत्तेः। किं बहुना नीलमित्यनन्तरं अचिरेण घटपदाभिधाने[६] शुकेनान्येन वार्यते। तत्र[७] का गतिः। तत्र नीलस्यान्यानन्वितत्वेन आकाङ्क्षासत्त्वस्य[८] अवश्यंवाच्यत्वात् । तात्पर्यमपि हेतौ प्रवेशनीयम्। तेन शुकोदीरिता प्रत्यायकयोग्यवाक्ये न व्यभिचारः। तात्पर्यगर्भहेत्वभावात्। कदम्बग्रहणं च परस्परप्रतियोगिकत्वमाकाङ्क्षादीनां प्रापयितुम्[९] । तेनान्यान्यप्रतियोगिकाकाङ्क्षादिमता पदेन तात्पर्यविषयान्योऽन्यसंसर्गप्रमापूर्वकेण व्यभिचारो न भवति। पदपदं च स्वरूपाख्यानपरम्। अन्यत्राकाङ्क्षादेरभावादिति। वस्तुतस्तु तात्पर्येति साध्ये[१०] विशेषणप्रवेशात् अनैकान्तिकं मा भूदिति हेतावाकाङ्क्षाविशेषणम्। संसर्गप्रमागर्भसाध्ये व्यभिचार इति हेतौ योग्यताविशेषणम्। स्मारितस्याव्यवहितस्मारितार्थकतया अनासन्ने व्यभिचारवारणाय आसत्तिविशेषणमित्येव रमणीयम्[११]।

---

[1] T. ०संसर्गे तद्वाक्यतो

[2] . T. ०अननुभावकत्वायोगादित्यर्थमेव

[3] T. omits व्यभिचारोऽस्तीति

[4] T. द्रव्यादि०

[5] T. अर्थ०

[6] T. ०अभिलापे

[7] T. शुकेन कृते

[8] T. ०वत्त्वस्य

[9] T. ०प्रतिपादयितुम्

[10] T. तात्पर्यविषयेति

[11] T. वारणीयम्

शुकवाक्यस्याप्रत्यायकस्य तात्पर्यगर्भाकाङ्क्षाविरहादेव न तत्र व्यभिचारः। एवं सति आकाङ्क्षादित्रयं साध्ये विशेषणं प्रवेशनीयमित्यपव्याख्यानम्। उक्तक्रमेणैव तत्प्रवेशे पृथक् प्रवेशान्तरा [१] नौचित्यात्। यद्वा घटमानयेति वाक्ये येनोक्त [२] सकलविशेषणगर्भसाध्येऽ-पटानयनसंसर्गधीपूर्वकत्वेनार्थान्तरम्। (६) पदार्थपदस्य प्रकृतपदार्थपरत्वाभावात्। तथा च स्वसमानविषयकेति विशेषणं पूरणीयम्। न चानाकाङ्क्षादिषु स्वसमानविषयसंसर्गधीरस्ति। स्वस्याबोधकत्वेन तद्विषयाप्रसिद्धेरिति तत्र व्यभिचारवारणाय **आकाङ्क्षादीति** [३]। न च साकाङ्क्षादिष्वप्याकाङ्क्षाद्यज्ञानेनार्थाबोधकेषु व्यभिचारः। स्वार्थं हीदमनुमानम्। तथा च हेतुग्रहे [४] साध्यसत्त्वात् अन्यथा व्यभिचाराग्रहेण उभयथाप्यनुमित्युत्पत्त्यप्रतिबन्धात्। न च व्यभिचारिलिङ्गजन्यत्वेनाभासतापत्तिः। साध्यवति साध्यानुमितेः विषयाबाधेनानाभासत्वादिति [५] युक्तः पन्थाः। एतदुभय [६] संसर्गप्रतीत्युद्देश्यकमेतदित्याकारकः तात्पर्यग्रहः। न चाकाङ्क्षादिमत्त्वज्ञानमन्तरेण तथाग्रहः संभवति। यदि वक्ता यत्साकाङ्क्षं यदासन्नमुच्चरितं विषयावबाधेन [७] तत्तत्संसर्गप्रमापूर्वकमिति [८] ज्ञातुं शक्यते। न त्वन्यथा। यत्साकाङ्क्षादिकं वाक्यमुच्चार्यते तत्संसर्गे ततस्तात्पर्यानुमानात्। तथा चैतावद्विशेषणेन (७) विना व्याप्तेरेवाग्रहात् न तदौपयिकत्वेन [९] सार्थकत्वम्। अन्यथा तात्पर्यविषयसंसर्गबाधकप्रमाविरहरूपयोग्यतामात्रस्य हेतुविशेषणत्वे क्व व्यभिचारशङ्का। येन विशेषणान्तरमनुस्रियेत। व्याप्तिग्राहकत्वे तु भवति सर्वसाधकता इत्यपि कश्चित्।

---

[1] A2 - प्रवेशा०

[2] A2. T. - यथोक्त०

[3] A2, T. add - विशेषणम्

[4] T. adds प्रतीतिसत्त्वेन

[5] T. ०आभासताऽसंभवादिति

[6] T. ०हेतुसंसर्ग०

[7] A2. T. - विषयाबाधेन

[8] T. ०पूर्वकत्वं

[9] T. तदौपाधिकत्वेन

योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् तत्परसन्निधिमत्त्वाद्वेति न हेतुः, संसृष्टो हि योऽर्थस्तत्परत्वं तत्परसन्निधिमत्त्वं वा असिद्धं संसर्गस्य प्रागप्रतीतेः। संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारक-प्रतीतिपरसन्निधिमत्त्वं वा अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारि। संसर्गस्य बहुप्रकारकत्वेऽपि नानभिमतसंसर्गसिद्धिस्तस्य तात्पर्य्याविषयत्वात्। अन्यथा शब्दादप्यभिमतान्वयबोधो न स्यात्। अत एव विशेषण-विशेष्यभाववदर्थकानि तद्बोधपूर्व्वकाणि वेति न स्याध्यम्।

यत्तु स्मारितार्थसंसर्गवन्तीति साध्यम्,

घटमानयेति। न च तत्रापि कथं साध्यसिद्धिः दृष्टान्तान्तरसत्त्वात् । इत्थमनादित्वस्येष्टत्वात्[1]।

तत्परेति। न चात्रापि योग्यतावत्त्वेन पूरणीयम्। तत्र संसृष्टार्थाभावादेवेति भावः।

संसृष्टत्वस्य अर्थविशेषणत्वे दोषमाह - **संसृष्टो हीति।**

असिद्धम् अनुमितेः पूर्वमप्रतीतम्। तस्य प्रतीतिविशेषणत्वे दोषमाह - **संसृष्टत्वं चेति।**[2]

अत्र यदि योग्यतान्वयप्रयोजकरूपवत्त्वं तत्राह - **अनाप्तेति।**

यदि बाधकाभावस्तत्राह - **अनाकाङ्क्षेति।**

ननु किं तात्पर्यविषयत्वेन साध्यविशेषणेन इत्यत आह - **संसर्गस्येति।**[3]

स्मारितेति। अर्थो हेतुश्च पूर्ववदेवेति मन्तव्यम्।

ननु मत्वर्थो नेह संयोगादिरित्यत आह - **यत्विति।**

---

[1] A2 adds - इति भावः ; T. इत्यर्थमनादित्वस्येष्टत्वादिति भावः।

[2] T. omits three sentences संसृष्टत्वस्य --- संसृष्टत्वं चेति।

[3] . T. ० तात्पर्येति।

मत्वर्थश्च लिङ्गतया ज्ञापकत्वम्। न चान्योन्याश्रयः, पूर्व्वपूर्व्वानुमितिहेतुत्वेन अनादित्वात्। तन्न। ज्ञापकत्वमात्रेणार्थासिद्धेः। प्रमापकत्वे तेनैव व्यभिचारात्। ज्ञानावच्छेदकतया च संसर्गसिद्धिः

लिङ्गतयेति। अत्र ज्ञापकत्वमात्रं साध्यं लिङ्गतयेति (७) पर्यवसिततन्मतोपन्यासः। न च तावति साध्ये सिद्धसाधनम्। न हि शब्दपार्थक्यविवादे इदमनुमानम्। किं नाम प्रवर्तकम्। तथा च शब्दोऽत्र न शब्दविधया अर्थप्रत्यायकः। किन्तु प्रकृतानुमानविधयेति[1] न स्वतन्त्रः प्रमाणं शब्द इति किं तत्र सिद्धसाधनेनेति भावः। एवमग्रेऽप्यनुमितिग्रहणं स्वरूपकथनाय। न चैवमन्योऽन्याश्रयशङ्कानवकाशः। ज्ञापकत्वं साध्यं यत्रोपलक्षितं तत्र न स्वातन्त्र्येणेति वस्तुगत्या लिङ्गतयैव तत्संभवात्। यद्वा ज्ञापकत्वसाध्य एवेयमन्योऽन्याश्रयशङ्का साध्यसत्त्वे तदनुमितेरनुमितेरेव साध्यमिति। तत्तद्धीजनकत्वं न साध्यम्, अपि तु धीमात्रजनकत्वम्।[2] तच्च पूर्वपूर्वप्रसिद्धमेवेति पूर्वपूर्वानुमितीत्याद्युत्तरार्ध इति।

अर्थासिद्धेरिति । तथा चार्थबोधकः शब्द एव मानान्तरमिति[3] भावः। यद्यप्यर्थसिद्धिः अर्थज्ञानमेवेति ज्ञानविशेषणीभूतार्थानुमितिरर्थसिद्धिर्भवत्येव। तथाप्यर्थज्ञानानुमित्या वास्तवोऽयमर्थ ईदृश इत्यवधारणाभाव एवार्थसिद्धिर्द्रष्टव्या। तस्यैव निष्कम्पप्रवृत्त्यङ्गत्वादिति[4]। **तेनैव** - अनाप्तोक्तेनैव ।

यद्यपि बाधकाभावरूपयोग्यतागर्भोऽत्र न हेतुरिति (८) न तत्र व्यभिचारः, तथाप्यन्वयप्रयोजकत्वरूपवत्त्वयोग्यताभिप्रायेणेदं द्रष्टव्यम्। **आचार्याणां** तस्या एव योग्यताया[5] अभ्युपगमात्। अस्य चानुमानस्य तदीयत्वात्। यदि चोक्तयोग्यतालिङ्गविशेषणं तदा प्रमापकत्वस्य प्रमास्वरूपयोग्यत्वस्य साध्यतायां तावत एव व्याप्यतया आकाङ्क्षादिविशेषणोपादानानुपपत्तिः।[6] फलोपधानसाध्ये व्यभिचारात्। अनुमितेरेव साध्यत्वात् तत्सिद्धौ साध्यप्रसिद्धिस्तस्यां च सेत्यन्योऽन्याश्रयाच्चेत्यपि तात्पर्यम्।

---

[1] A2 - प्रकृतानुमानेनेति

[2] T. धीजनकत्वमात्रम्।

[3] A2, T. - मानमिति

[4] A2 - प्रवृत्त्यौपयिकत्वादिति ; T. - तदौपाधिकत्वेन

[5] T. योग्यतात्वा०

[6] T. ०अनुपपत्तेः।

ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात्। संसर्गे च सम्बन्धिन एव विशेषकत्वात्। पक्षधर्म्मताबलात् व्यापकत्वेनागृहीतस्यापि संसर्गविशेषस्य सिद्धिः।

अथैवं भ्रान्तिज्ञानमपि भ्रमः स्यात्। न चेष्टापत्तिः, ईश्वरस्यापि भ्रान्तत्वापत्तेः। इदं रजतमिति भ्रमादिव शुक्तौ रजतज्ञानवानयमिति भ्रमस्य ज्ञानात् भ्रान्तिज्ञाप्रवृत्त्यापत्तेश्च।

ननु संसर्गादि[१] सिद्धिरुभयत्रापि समानेत्यत आह - **ज्ञानेति।** प्रमारूपज्ञानेऽवच्छेदकतया - विशेषणतयेत्यर्थः।

ननु संसर्गविशेषधीः प्रवर्तिका। न चातोऽनुमानात् सेति तदर्थं शब्दो मानमङ्गीकर्तव्य[२]मित्यत आह - **संसर्गे चेति**। तथा च स्मारितपदार्थविशेषितसंसर्गस्यैव संसर्गविशेषत्वात्[३] अनुमानत एव तत्सिद्धिरपीति भावः।

ईश्वरस्येति। तस्य भ्रामाज्ञानेऽसार्वज्ञतदुपशमहेतुतत्त्वज्ञानाद्यनुपदेशकत्वं चेति भ्रमज्ञत्वे भ्रमविषय[४] विषयकज्ञानवत्त्वेन भ्रमवत्त्वा[५] पत्तिरित्यर्थः। ननु ईश्वरे किं भ्रान्तत्वमापाद्यते। यद्यसद्विषयकज्ञानवत्त्वादि[६] (८) तदेष्टापादनम्। अथ व्यधिकरणप्रकारकज्ञानवत्त्वादि तदा बाध इत्यरुचेर्दोषान्तरमाह - **इदमिति।** न च शुक्तित्वाद्यदर्शने[७] इष्टापत्तिः। तद्दर्शने तदेव प्रतिबन्धकमिति वाच्यम्। विशेषदर्शनेनापीष्टप्रवृत्तिविषयवैशिष्ट्यावगाहिनः प्रवर्तकज्ञानस्याविघटनेन प्रवृत्त्यप्रतिबन्धादिति भावः।

---

[1] T. omits ०आदि०
[2] T. अङ्गीकर्तव्यम्
[3] T. ०विशेषणत्वात्
[4] A2. T. omit ०विषय०
[5] A2. T. - भ्रान्तत्वा०
[6] A2 - ०विषयकत्वादि
[7] A2 - ०विशेषादर्शने

यत्तु भ्रमविषयविषयकत्वेन च भ्रमत्वं भ्रमविषयाणां सिद्ध्यसिद्धिपराहतत्वात् इति, तत्र वक्ष्यामः। मैवं, अस्मदविषयकत्वेन न भ्रमत्वं भ्रमविषयाणां सत्त्वात्। किन्तु व्यधिकरणप्रकारकत्वेन। न च भ्रमस्य ज्ञाने व्यधिकरणं प्रकारः, रजतत्वप्रकारकत्वस्य भ्रमेऽपि सत्त्वात् । अन्यथा भ्रन्त्युच्छेदः प्रमाणाभावात्।

ननु प्रतारकवाक्ये व्यभिचारः विशेषदर्शनेन तत्र संसर्गज्ञानाभावात्। न च संसर्गमप्रतीत्य वाक्यरचना न सम्भवतीत्याहार्य्यं तस्य संसर्गज्ञानं सम्भवतीति वाच्यम्। तावत्पदज्ञानादेव शुकस्येव वाक्यरचनोपपत्तेः।

सिद्धीति। भ्रमविषयत्वं तावत् भ्रमविषयविषयकज्ञानत्वं वाच्यम्। तस्यैवानुमितिहेतुत्वात्। तथा च तेन भ्रमत्वं न साध्यम्, उभयतो व्याघातात्। यदि भ्रमविषयः सन् तदा तद्विषयत्वं विरुद्धम्, अथासन् तदा यदपि लिङ्गज्ञानं तदपि भ्रम एवेति तेन कथं भ्रमत्वं साध्यम्। भ्रमत्वसिद्धेर्यथार्थायाः सिषाधयिषितत्वादित्यर्थः। भ्रमत्वं भ्रमव्यवहारः।

भ्रमेति। शुक्त्यादीनां[1] पारमार्थिकत्वादित्यर्थः। तथा चासद्विषयत्वमप्रसिद्धमिति भावः।

किन्त्विति। प्रवर्तकमपि तत्तत्प्रकारकमिति नोक्तातिप्रसङ्गःशङ्कापीति भावः। व्यधिकरणं किञ्चिदिति शेषः।

अन्यथेति। भ्रमानुव्यवसायादेरपि व्यधिकरणप्रकारकत्व[2] इत्यर्थः। यद्वा असद्विषयत्वेन भ्रमतया विषयव्यवस्थापकत्वादित्यन्यथार्थः।

भ्रान्त्युच्छेद इति। भ्रमावगाहने (९) भ्रान्तत्वात् । अन्यथा तदविषयकत्वादुभयथापि तद्गोचरप्रमित्यप्रसिद्धेः भ्रमोच्छेद इत्यर्थः।

---

[1] A2. T. add - सर्वेषां

[2] T. ०प्रकरणप्रकारकत्वेऽपि

अन्यच्चापि तस्यैव तन्त्रत्वादिति चेत्, न, एतद्वाक्यमेतस्य पदार्थसंसर्गं बोधयिष्यतीत्याशयेन वाक्यप्रयोगात् तस्यापि संसर्गज्ञानात् योग्यताविरहाच्च। अत एव विसंवाादिवाक्ये शुकवदुच्चरिते न व्यभिचारः। शब्दात् संसर्गप्रत्ययस्तु योग्यताभ्रमात्।

अथ संसर्गज्ञानं विना शुकस्यान्यस्य वा सम्बादिवाक्ये भ्रान्तप्रतारकवाक्ये च व्यभिचारः कथं वा तच्च संसर्गप्रमा वक्तृज्ञानानुमानासम्भवादिति चेत्। न। यदि तत्र संसर्गप्रमा तदा वेदतुल्यतेत्युक्तम्। आकाङ्क्षा योग्यतासत्तिश्च ज्ञातोपयुज्यते,

---

ननु संसर्गज्ञानमात्रं न साध्यम्, अपि तु तत्प्रमेत्यत आह - **योग्यतेति।** साध्याभावसत्त्वेऽपि हेत्वसत्त्वात् न व्यभिचार इति भावः।

अत एवेति। यत्र विशेष्याभावादेव संसर्गप्रमाविरहो विसंवादिनि तत्रापि हेत्वभावादेव न व्यभिचार इत्यर्थः। न च वक्तृज्ञानवाक्यार्थावबोधे योग्यता। न चैवं तत्र हेतुरस्ति, येन व्यभिचारः स्यादित्यत आह - **कथं वेति**[१]**।** भवदुक्तस्य ज्ञानावच्छेदकतया संसर्गसिद्धिरूपस्य प्रकारस्य तत्राभावात्। अत एवोक्तं - **वक्तृज्ञानानुमानासम्भवादिति**। तथा च तत्र संसर्गप्रमानुरोधेन शब्द एव मानमङ्गीकर्तव्य इति भावः। ननु यत्र शब्दः प्रमाणं त्वयाऽभिमतं तत्र तदनुमानत्वं[२] मया वाच्यम्। तथा च यदीदृशस्थले शब्दस्य प्रामाण्यं तदा वक्तृज्ञानेति योग्यताविशेषणं न वक्तव्यम्[३]। योग्यतागर्भहेतुसत्त्वात्[४] ईश्वरप्रमारूपसाध्यसत्त्वाच्चानुमानमक्षतम्। यदि च न प्रमाणं तदा उक्तविशेषणगर्भयोग्यताघटितहेत्वभावात्[५]अनुमानसामग्र्यभावादेव नानुमानमित्याह - **यदीति।**

आकाङ्क्षेति। अतो न लिङ्गविशेषणत्वानुपपत्तिरिति भावः।

---

[1] A2 – चेति

[2] A2 - तदनुमानं

[3] A2 omits.

[4] T. ०हेतुकत्वात्

[5] T. ०हेत्वभावे

अन्यथा शाब्दभ्रमानुपपत्तेरिति। उच्यते। अर्थज्ञानं प्रवृत्तकं न तु तज्ज्ञानज्ञानं गौरवात् व्यभिचाराच्च। अतो रजतज्ञानवानयमिति ज्ञानं न प्रवर्त्तकं किन्त्विदं रजतमिति ज्ञानम्। इदमपि ज्ञानं रजतविषयकमिति चेत्, सत्यम्। न तु रजतत्वप्रकारकं प्रवर्त्तकञ्च तथा, अन्यथा भ्रान्तस्येव भ्रान्तिज्ञस्यापि प्रवृत्तिप्रसङ्गः तदुभयसङ्करापत्तिश्च। एतेन लक्षणाद्यनुरोधात्तात्पर्य्यग्रहो वाक्यार्थधीहेतुः तात्पर्य्यञ्च पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वम्। तथा च तद्ग्राहकानुमानादेव तात्पर्य्यज्ञानावच्छेदकतया संसर्गसिद्धिरित्यपास्तम्।

शाब्देति। अनाकाङ्क्षानासन्नायोग्यविषयकशाब्दबोधानुपपत्तेरित्यर्थः। ननु मा भूदर्थज्ञानज्ञानत्वेन प्रवर्तकता, किन्त्वर्थज्ञानत्वेनैव। तच्च यद्यर्थज्ञानज्ञानेऽपि तदा तत्प्रवर्तकत्वमक्षतम्।[१] न च[२] भ्रान्तिज्ञ[३]प्रवृत्त्यापत्ति[४]रिष्टतावच्छेदकधर्मप्रवृत्तिविषयवैशिष्ट्यावगाहिज्ञानत्वेन लाघवेन प्रवर्तकत्वात्[५]। ननु तद्विशेषतत्प्रकारकत्वादिना, गौरवात्। न च ज्ञानविशेषणतया रजतत्वावगाहिनो भ्रमानुव्यवसायस्य स्वातन्त्र्येण विषयविशेषणतया तदवगाहनमस्ति। मनसो बहिरस्वातन्त्र्यात्। अन्यथा स्वतःप्रमाणस्य[६] ग्रहापत्तेः।[७] अत एव रजतत्वमित्यपि धीः प्रवर्तिका। न च तदसिद्धम्, अनुभवयुक्तिभ्यामानीयमानस्या-नभ्युपगममात्रेणानपवादात्। अस्ति चेह प्रमापूर्वकत्वे साध्ये प्रमात्वस्य वस्तुसत्तादृशार्थकत्वपर्यवसायिनो रजतत्वाश्रयत्वपर्यन्तावगाहिनो ज्ञानस्य प्रवर्तकरूपवत्तेति शब्दापेक्षा न प्रवृत्त्यर्थमपि। (९) यथा च प्रमात्वग्रहो न प्रवर्तकः, किन्त्वर्थविशेष्यकं तदुत्तरज्ञानमेवेति प्रागुक्तं न विरुद्ध्यते। तथा च तद्व्याख्यावसर एव प्रपञ्चितम्। अत एव एतेनेति गतार्थम्। तत्रापि प्रवर्तकत्वानुरोधेन प्रमोद्देश्यकत्वपर्यन्तस्य विविक्षितत्वादिति पूर्वापरितोषादाह[८] - **किञ्चेति।**

---

[1] T. adds ०एव

[2] A2 adds एवं

[3] T. ०ज्ञान०

[4] A2 adds - स्वतन्त्र्येण

[5] A2. T. - प्रवृत्तिजनकत्वात्

[6] A2 - प्रमाण्य०

[7] T. ०प्रामाण्यापत्तेः।

[8] A2 - पूर्वोक्तापरितोषादाह

किञ्च व्यापकतावच्छेदकप्रकारिकानुमितिरतः स्मारितपदार्थसंसर्गज्ञानपूर्व्वकाणीत्यनुमितिः स्यात् न तु रजतज्ञानपूर्व्वकाणीति तस्मात् प्रवर्त्तकं ज्ञानं शब्दादेव। अत एव प्रवृत्त्यर्थमनुवादकता शब्दस्येत्यपास्तम्। शाब्दानुमित्योर्भिन्नप्रकारकत्वात् एकविषयत्वाभावेन अननुवादकत्वात् तस्यैव प्रमाणत्वात्।

नन्वेते पदार्थास्तात्पर्य्यविषयमिथःसंसर्गवन्तः आकाङ्क्षादिमत्पदस्मारितत्वात् योग्यतासत्ति-मत्त्वे सति संसर्गपरपदस्मारितत्वाद्वा, अनाप्तोक्ते योग्यताविरहात् न व्यभिचारः, तत्र बाधकसत्त्वात्,

---

भवदुक्तप्रवर्तकसामग्र्यपि नास्ति। इष्टतावच्छेदकानुपस्थितेरिति भावः।

तस्यैवेति। य एव प्रकारः शब्दानुमानाप्रत्यायितः प्रतीयते तत्रैव शब्दप्रामाण्यादित्यर्थः। इदं च समाधिसौकर्यादुक्तम्। वस्तुतस्तु तत्रानुवादकत्वेऽपि सार्वत्रिके तादृशानुमानावताराभावात्[1] यत्रैव नैवं पूर्वकता तत्रैव तत् मानत्वस्यावश्याभ्युपेयत्वात्। न हि **गुरूणा**मिवास्माकमपि उक्तानुमानं सामग्रीनिविष्टम्। येन तत्पूर्वकतानियमः स्यात्। न च तात्पर्यग्रहस्य हेतुत्वात् तथैवेति वाच्यम्। तल्लिङ्गप्रकरणादिनैव अन्यथासिद्धतया तद्बोधाहेतुत्वस्यैव वाच्यत्वादिति। नन्विष्टतावच्छेदकप्रकारेण पक्षतावच्छेदकेन विशिष्टे पक्षे साध्यसिद्धिरस्त्विति नोक्तदोषावकाश इति मनसिकृत्य अनुमानान्तरमाशङ्कते - **नन्विति**। रजतानयनादयो विशेषोपस्थिता इत्यर्थः। (१०)

तात्पर्येति। तात्पर्यविषयः संसर्गो घटसंसर्गाञ्ज्ञानयनसंसर्गः पटसंसर्गो दर्शनसंसर्गश्चेति। घटमानय पटं पश्येति वाक्ये घटानयनपटदर्शनपरे[2] वैपरीत्येनार्थान्तरं मा भूदिति मिथ इति विशेषणम्[3]। ते न ययोराकाङ्क्षादिकं तत्संसर्गः पर्यवस्यति। न च प्रमेयत्वे प्रमेयत्वमित्यत्र मिथोऽर्थाप्रसिद्धिः।

---

[1] T. ०अनवतारात्

[2] T. ०दर्शनसंसर्गपरे

[3] T. वदन्ति

तज्जन्यज्ञानस्य भ्रमत्वात् एकाकारवाक्यस्यापि बाधकसत्त्वासत्त्वाभ्यां योग्यायोग्यत्वात्।

अथ प्रतिपत्तुर्जिज्ञासां प्रति योग्यता सा च श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावरूपाकाङ्क्षा बाधकप्रमाविरहो योग्यता अव्यवहितसंसर्गप्रतियोगिज्ञानमासत्तिः । ताश्च स्वरूपसत्यो हेतवो न तु ज्ञाताः गौरवात् तद्बोधं विनाऽन्वयानुभवे विलम्बाभावात् संसर्गनिरूप्यत्वेन प्रथमं दुरवधारणत्वाच्चेति न तानि लिङ्गविशेषणानीति चेत्, न । योग्यतादिशून्यत्वेऽपि तदभिमानेन संसर्गप्रत्ययादन्यथा शाब्दाभासोच्छेदप्रसङ्गः।

---

[१]तत्पदार्थपक्षकानुमानेऽस्यानुत्पादात्। वस्तुतो यन्निरूपिताकाङ्क्षादिकं यत्र तत्र तत्संसर्ग इत्येव सामान्यतो व्याप्तिः मिथःशब्देन सूच्यत इति भावः।

आकाङ्क्षेति। अत्रोक्तरीत्या अर्थाप्रत्यायक[२]निराकाङ्क्षानासन्नशुकवाक्यादौ[३] तात्पर्यगर्भसाध्याभावेन मा भूत् व्यभिचार इत्याकाङ्क्षादिकं विशेषणं पूर्ववदिति भावः।

ननु योग्यतासत्ती न शब्दधर्मौ इत्यतो हेत्वन्तरमाह - **योग्यतेति।**

ननु बाधकसत्त्वेऽपि तद्वाक्यं योग्यमेव, अन्वयप्रयोजकरूपवत्त्वादित्यत आह - **तज्जन्येति।** तत्र योग्यतासत्त्वे तज्जन्यज्ञाने प्रमात्वापातादित्यर्थः।

तदुत्पाद्येति। जिज्ञासाविषयज्ञानानुत्पत्तिरूपेत्यर्थः।

बाधकेति। संसर्गाभावप्रमाविरह इत्यर्थः।

अव्यवहितेति। तदुपस्थितिप्रतिकूलोपस्थित्यन्तरानन्तरितेत्यर्थः। (१०)

---

[1] T. तत्पक्षकानुमानस्य

[2] T. omits अर्थाप्रत्यायक०

[3] A2 - ०वाक्ये

राजा पुत्रमाकाङ्क्षति पुरुषं वेति संशये विपर्य्यये च वाक्यार्थधीप्रतिबन्धाच्च, योग्यतायाश्च संशयसाधारणं ज्ञानमात्रं हेतुः, स्व-परबाधकप्रमाविरहः क्वचित् निश्चीयतेऽपि यथेह घटो नास्तीत्यत्र स्वयोग्यानुपलब्ध्वा घटाभावनिश्चयेनान्यस्यापि घटप्रमाविरहो निश्चीयते। क्वचिद्बाधकप्रमामात्रविरहसंशयेऽप्यन्वयबोधः, बाधसंशयस्यादूषणत्वात्।

अन्यथा एकपदार्थोपस्थित्यनन्तरम् अव्यवधानेनापरपदार्थानुपस्थितेरसम्भवः। अपरपदार्थोपस्थितेः तदुस्थापकपदोपस्थित्यादिभिर्व्यवधानादिति। तद्बोधमित्याद्युपलक्षणम्। विशिष्टज्ञानमात्रं प्रति तत्प्रागभावात्मकाकाङ्क्षाया असंसर्गग्रहरूपाया योग्यताया[१] विशेषणज्ञानात्मिकाया आसत्तेश्च सामान्यत एव एव स्वरूपसत्त्वेन जनकत्वकल्पनाच्चेत्यपि द्रष्टव्यम्।

विपर्यय इति। व्यतिरेकनिश्चय इत्यर्थः। तेन यत्संशयो तद्व्यतिरेकनिश्चयो[२] यत्प्रतिबन्धकः तन्निश्चयः तद्धेतुरित्याकाङ्क्षानिश्चयः कारणमिति[३] भावः। एवमासत्तिरपि अर्थोपस्थापकपदाव्यवधानरूपा। तथा च व्यवहितोच्चरितेऽप्यव्यवधानभ्रमात् यत्रान्वयबोधः तत्रासत्तिरप्यवश्यं ज्ञाने प्रयोजकमित्येव तासां लिङ्गविशेष एतदिति[४] द्रष्टव्यम्।

ननु योग्यता निश्चेतुमशक्या, तत्कथं लिङ्गविशेषणमित्यत आह - **योग्यताया इति।** योग्यताया बाधाभावरूपाया अनुमाने सन्देहसाधारणमेव ज्ञानं प्रयोजकम्, साध्याभावसन्देहात्मिकायास्तस्याः पक्षतारूपत्वादिति[५] भावः। ननु साधारणेन रूपेण [६]यदा हेतुता यदि निश्चयोऽपि कदाचित् तद्धेतुः न चैवमित्यत आह - **स्वपरेति।** न च तन्निश्चये शब्दात् कथमर्थप्रत्ययः स्यादिति वाच्यम्।

---

[1] T. ०रूपायाः

[2] A2. T. add - यश्च

[3] T. तद्धेतुरिति

[4] A2. - ०विशेषणता इति; T. विशेषिता इति

[5] A2 - पक्षतावच्छेदकत्वादिति

[6] T. यदा हेतुता यदि निश्चयोऽपि कदाचित् :: हेतावनिश्चयोऽपि

किञ्च तवापि योग्यतादिकं प्रामाण्ये प्रयोजकं आप्तोक्तत्वस्य तथात्वे गौरवात् अनाप्तोक्तेऽपि संवादेन प्रामाण्याच्च।

प्रत्यक्षावगतेऽप्यनुमित्सावच्छब्देन [१] जानीयामितीच्छाया: सुलभ्यत्वेन [२] आकाङ्क्षासत्वे हेत्वन्तराभावस्य दुर्वचत्वात् । अत एव द्वितीयटीकायां स्वोक्तशब्दस्य स्वं प्रति अर्थप्रतिपादकत्वं[३] सिद्धान्तितम्। यत्तु - कथं योग्यतासंशयोऽपि कोट्यह्यप्रमितेरित्याशङ्कायां प्रकृतफक्किकावतरणम्। तन्न, सन्दर्भविरोधात्। क्वचिदित्याद्यग्रिमग्रन्थविरोधाच्च।

नन्वाकाङ्क्षादित्रयं स्वरूपसदेव प्रमाजनने तन्त्रम्, न तु ज्ञायमानम्। शब्दाभासस्थले स्वरूपसद्बाधाभावाभावादेव प्रमानुत्पादात्। यत्संशय इत्यादिनियमश्चाव्यभिचार[४] ज्ञानप्रतिबध्ये[५] व्याप्तिग्रह एव व्यभिचारी। अव्यभिचारसंशयस्य व्यभिचारसंशयात्मन: तद्व्यतिरेकनिश्चयस्य च व्यभिचारनिश्चयात्मनो व्याप्तिज्ञाने प्रतिबन्धकत्वात्। अव्यभिचारनिश्चयस्य च तत्राहेतुत्वात्।[६] (११) ग्राह्याभावत्वा[७] नवगाहित्वविशेषणे यत्संशय इति व्यर्थम्। तद्वारणाय[८] योग्यतासन्देहस्यापि ग्राह्याभावावगाहित्वादित्यपरितुष्यन्नाह - **किञ्चेति।** यदि तत् त्रयं प्रमाजनने तन्त्रं[९] तदा तत एव तद्ज्ञानमावश्यकमिति भाव:। न तु तत् त्रयं न तथा, गौरवात्। किं चाप्तोक्तत्वमेवेत्यत आह - **आप्तोक्तत्वस्येति**। गौरवात्, पटुकरणत्वादिप्रवेशात्। इदमपि वस्तुगतिमनुरुद्ध्योक्तम्। वस्तुतस्तु तत्प्रामाण्यप्रयोजकत्वे तदेव ज्ञानं तन्त्रमिति तादृशपदस्मारितत्वादेव संसर्गसिद्धेरित्येतावतापि सिद्ध्यत्येव तदभिमतमिति मन्तव्यम्[१०]।

---

[1] T. ० बोधनीयम्
[2] A2 - सौलभ्येन
[3] T. ०प्रत्यायकत्वं
[4] T. adds ० व्यतिरेक०
[5] T. ०प्रतिबन्धे
[6] T. omits two sentences
[7] A2 - ०भावा०
[8] A2 - तद्व्यावर्तनीय०
[9] T. तथा च यदि तत्रेदं
[10] T. द्रष्टव्यम्

एवञ्च ज्ञायमानकरणे प्रामाण्यप्रोजकतया ज्ञानमावश्यकमिति तासां ज्ञानं हेतुः, तच्च समभिव्याहारविशेषादिनेति। मैवम्। यत्र विमलं जलं इत्यश्रुत्वैव नद्याः कच्छे महिषश्चरतीति शृणोति तत्राकाङ्क्षादिकमस्ति। न च नदी-कच्छयोः संसर्ग इति, व्यभिचारात्।

ज्ञायमानेति। प्रामाण्यप्रयोजकत्वं प्रमोपधानप्रयोजकत्वम्, तत्तु मलिताकाङ्क्षादीनां मिलितव्याप्तिपक्षधर्मतादीनाम् इव । तथा च तद्दृष्टान्तेन मिलितानामाकाङ्क्षादीनां ज्ञानं हेतुः। एतच्च भूयोऽवयवे इन्द्रियसन्निकर्षसमुदायेऽपि गतमतो ज्ञायमानेत्यादि। परामर्शस्तु न तन्निष्ठः। यद्वा ज्ञानविशिष्टकरणसहकारित्वं विवक्षितम्। न च ज्ञानविशिष्टे ज्ञानं सहकारि। स्वस्य स्वासहकारित्वादित्यर्थः।

ननु संसर्गस्य दुर्निरूपतयैव तासामपि तथात्वमित्यत आह - **तच्चेति**। सामान्यतः संसर्गज्ञानात् समभिव्याहारादिनाऽऽकाङ्क्षादिज्ञानं, विशेषतः संसर्गसिद्धः फलम्[1]।

न चेति। संसर्ग इत्यनन्तरं तात्पर्य[2] इति शेषः। तेन विशिष्टाभावसत्त्वात् संसर्गसत्त्वेऽपि व्यभिचार व्यभिचार इति भावः।

न च नदीकच्छयोः संसर्गे यदि तात्पर्यं तदा साध्यमेवापरथा[3] आकाङ्क्षैव नास्ति। तात्पर्यगर्भत्वात् तस्य। तदगर्भत्वे वावश्यं[4] स्वातन्त्र्येण हेतौ प्रवेशनीयं तात्पर्यम्। स्मारितत्वस्यैव तथा व्याख्यानादिति क्व व्यभिचार इति वाच्यम्। परस्पराकाङ्क्षाविरहेऽपि अन्यान्याकाङ्क्षादिसत्त्वेन हेतुसत्त्वात् । साध्यस्य परस्परगर्भत्वेन तत्राभावादिति भावः। अत्र च यद्यपि परस्परगर्भहेतुकारणे पदार्थोऽयमपरपदार्थसंसर्गी तदा आकाङ्क्षादिमत्पदार्थस्मारितत्वाद्वेति वा निर्दोषम्। तथाप्यग्रे वाच्येन योग्यताया अविशेषणत्वेन तदपि प्रत्याख्येयमिति मनसिकृत्य नाशङ्कितमिति स्मर्तव्यम्।

---

[1] A2 adds इत्यर्थः

[2] A2 adds ०विषय

[3] T. अन्यथा

[4] T. वा तात्पर्य

अत एव न तन्मात्रं प्रयोजकं प्रमाण्ये।

अथ यावत्समभिव्याहृतेत्यपि लिङ्गविशेषणं कतिपयपदस्मारिणास्तु संसर्गप्रत्ययो लिङ्गाभिमानादिति चेत्। न। तत्सन्देहेऽपि वाक्यार्थावगमात्। तत्र संसर्गभ्रान्तिरिति चेत्। न। अन्यारणाभावेन पदमेव भ्रान्तिजनकं तथाचादुष्टं सत्तदेवाभ्रान्तिं जनयत् केन वारणीयम्। असंसर्गाग्रहस्तत्रेति चेत्। न। संसर्गे बाधकाभावात्।

अथाप्तोक्तत्वं लिङ्गविशेषणं तदेव वा लिङ्गम्। न च नदी - कच्छयोः संसर्गे आप्तोक्तत्वं, आप्तोक्तत्वञ्च प्रामाण्ये तन्त्रमिति तद्वत्तया ज्ञायमानस्य हेतुत्वेन तव ज्ञानमावश्यकं व्याप्तिमत्तया ज्ञातस्येव लिङ्गस्य, तदवगमश्च लोके भ्रमाद्यमूलकतया महाजनपरिग्रहेण वेदे स्मृतौ चेति चेत् - न। यत्र कुत्रचिदाप्तत्वमनाप्तस्यापि सर्व्वत्राप्तत्वमग्रमितं, भ्रान्तेः पुरुषधर्म्मत्वात् प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वञ्चाप्तत्वं प्रथमं दुर्ग्रहं, भ्रमाद्यमूलकत्वस्य प्रवृत्तिसंवादादेश्च तद्ग्राहकस्याज्ञानात् प्रवृत्तिश्च सन्देहादपि।

ननु तवाप्याकाङ्क्षादिकं प्रामाण्ये तन्त्रम्। अन्यस्य गौरवादिति उक्तम्। तत् कुतो (१२) व्यभिचारः। प्रामाण्यप्रयोजकरूपवत्त्वं च व्यभिचारश्चेति[१] परस्परव्याहतमित्यत[२] आह - **अत एवेति।** तथा च तदपि त्वयैवोक्तम्, न तु ममाप्यनुमतमिति भावः। एवं चाज्ञानरूपासिद्धिरपीति हृदयम्।[३]

यावदिति। [४] समभिव्याहृतान्तररहितेति पदविशेषणमित्यर्थो यथाश्रुते [५] तु यावत् समभिव्याहृतपदस्मारितत्वं नैकस्यापि प्रत्येकस्य प्रत्येकपदस्मारितत्वादित्यसिद्ध्यापत्तेरिति।

अन्येति। ज्ञानसामान्यसामर्थ्यं भ्रमजननादेव सिद्धमिति दोषरूपविशेषसामग्र्यां भ्रमसम्भवे तद्विरुद्धसामग्र्यां प्रमाजननमशक्यप्रतिक्रियमिति भावः।

---

[1] T. व्यभाचारस्येति
[2] T. व्याघाताम् इति
[3] T. omits इति हृदयम्।
[4] T. यो वदति ।
[5] T. यथाश्रुतं न

किञ्च प्रकृतसंसर्गे अयमभ्रान्तो यथार्थज्ञानवान्वेति संसर्गमप्रतीत्य ज्ञातुमशक्यं वाक्यार्थस्यापूर्व्वत्वात्।

वयन्तु ब्रूमः - बाधकप्रमाणाभावो योग्यता स्म च न लिङ्गविशेषणं बाधकप्रमाण-मात्रविरहस्य सर्व्वत्र निश्चेतुमशक्यत्वात्, तत्संशयेऽपि शब्दादन्वयबोधाच्च, शब्दप्रामाण्ये तु योग्यतायाः संशय-निश्चयसाधारणं ज्ञानमात्रं प्रयोजकमिति शब्दः प्रमाणमिति।

ननु हेतुदर्शनशून्यत्वादिनाऽभ्रान्तत्वं यथार्थज्ञानवत्त्वं वा गृह्यतामित्यतो दोषान्तरमाह - **किं चेति**। वाक्यार्थगर्भस्य साध्यस्याप्रसिद्ध्या व्याप्तिनिश्चय एव दुर्लभः। किं स्वरूपतो हेतुग्रहणेनेति भावः।

ननु परस्परगर्भः पूर्वो हेतुः। अयं पदार्थोऽपरपदार्थसंसर्गी, तदाकाङ्क्षादिमत्पदस्मारितत्वादिना[१] अनुमानं स्यात्। न हि तत्र [२]फलदोषावकाश इत्यपरितुष्यन्नाह - **वयं त्विति।**

योग्यतासंशयोऽपि। यद्यपि बाधसंशयतया अनुमाने पक्षतापर्यवसन्नतयानुगुण एव। तथापि तत्र तदानुगुण्यं यत्रानुमितिसामग्री इह तु सा लिङ्गविशेषणीभूता सन्दिग्धा पक्षधर्मता सन्देहमेवापादयन्ती नानुमित्यै पर्याप्तेति भावः।

वस्तुतस्तु शब्दस्यानुमानान्तर्भावे मानाभावः। घटः कर्मत्वमानयनमित्यादिपदपदार्थयोः [३] पक्षीकृतयोः संसर्गज्ञानसंसर्गसिद्धावपि अन्वयाबोधात् । न चाकाङ्क्षाभाव [४] स्तत्रेति हेत्वभावादनुमानासिद्धिरेवेति वाच्यम्। निराकाङ्क्षे व्यभिचारदर्शनदशायाम् अन्यथा वा लिङ्गाभासजन्यत्वेऽपि अनुमितेः विषयाबाधेन समीचीनतया [५] उत्पत्तेः। न हि साध्यसत्त्वे वास्तवे [६] व्यभिचाराद्यस्फुरणवशात्[७] लिङ्गाभासजन्याया अनुमितेः सल्लिङ्गजन्यानुमितितः कश्चिद्विशेषो[१] येन भेदः[२]

---

[1] A2 ०स्मारितत्वादिति च

[2] A2 adds पुनरुक्त०

[3] पक्षीकृतयोः संसर्गज्ञानसंसर्गसिद्धावपि अन्वयाबोधात् । :: A2 - र्यासंसर्गज्ञानसंसर्गयोरनुमितावपि वाक्यार्थबोधात् ।

[4] A2 -०विरहः

[5] A2 - समीचीनायाः

[6] साध्यसत्त्वे वास्तवे :: A2 - वास्तवसाध्यसत्त्वे

[7] T. ०दशायां

स्यात्। शब्दप्रामाण्ये तु तत्रासमर्थत्वात्। फलानुदयो न त्वनुमितेरपि व्याप्त्यादिप्रतिपत्तौ सत्यां [३] स्वभावनिबन्धनसामर्थ्यात् विलम्बमीक्षामहे। न च तत्र तादृशसंसर्गविशेषे तात्पर्यग्रहे सति इष्टापत्तिः। (१३) अन्यथा [४] साध्यानुमितिरेव तत् स्यात् इति वाच्यम्। विशिष्य संसर्गविशेषे तात्पर्यग्रहस्य क्वापिअस्वीकारात्। अन्यथानुमानानुपपत्तेः। सामान्यतः तत्र तद्ग्रहेण तात्पर्यविषयसंसर्गसिद्धावपि वाक्यार्थविशेषाबोधात् । किं च वस्तुगत्या पदोपस्थाप्ये पदार्थे अपरपदार्थनिष्ठात्यन्ताभावादिगर्भ-योग्यताप्रतिसन्धानं वाच्यम्। एवं च पदस्मारितो वस्तुगत्या पदार्थोऽन्वयबोधविषयो न तु पदस्मारितत्वमपि तस्य ज्ञातम्। तथा च तदुभयगर्भस्य हेतोः कथमनुमापकत्वम् अज्ञातस्य लिङ्गविशेषणत्वानुपपत्तेरिति यावदाकाङ्क्षादि प्रतिसन्धाने सति तदुभयप्रतिसन्धानम् तावत् शब्दस्य पूर्णत्वात् तद्भानाभावेन लिङ्गासम्भवादनुमानेनान्यथासिद्ध्यभावाच्छब्द एव मानम्, अनन्यगतिकत्वात्। अपि च परस्पराकाङ्क्षादिमत्त्वं हेतूकर्तव्यम्। अन्यथा व्यभिचारादित्युक्तम्। न चायं हेतुः सर्वत्र संभवति। लाक्षणिकपदगर्भवाक्यवर्तिपदानां च [५] पक्षतायां परस्पराकाङ्क्षाविरहात्। आकाङ्क्षा [६] पदान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकता। सा च न स्वभावतोऽननुभावके लाक्षणिकेऽस्ति। न चैवमनुभवं प्रति न सा आकाङ्क्षा हेतुः, तत्रैवानैकान्तिकत्वादिति [७] वाच्यम्। अनुभावकस्याकाङ्क्षा सहकारिणीति। तदभावात् तस्य तदनुभावकत्वाभावात् [८]। न च यत्पदोपस्थाप्यस्यार्थस्य येन पदेन विना नान्वयानुभवविषयत्वं तस्य तस्य तदपर्यवसानमाकाङ्क्षेति निरुच्यतया [९] हेतुर्विशेषणीय इति वाच्यम्। एतस्य विशेषणत्वसंभवेऽपि उक्ताया ज्ञानेन यत्रान्वयधीः तत्र शब्दप्रामाण्यसम्भवस्य वज्रलेपत्वात्। एतदपेक्षया तस्या लघुत्वाच्च। अपि च घटमानयतीत्यादिवाक्ये घटानयनविषयककृतिमानित्याद्यन्वयबोधे पदार्थे [१०] पदार्थो विशेषणम्,

---

[1] A2 - कश्चन भेदो
[2] A2 - विशेषः
[3] A2 - व्याप्तिप्रतिपत्त्यादौ सति
[4] A2 - अपरथा
[5] T. adds ०तदर्थानां च
[6] T. तथा हि
[7] A2, T. - व्यभिचारादिति०
[8] T. ०अभावनियमात्
[9] T. निरुच्यमानया तया
[10] T. adds अपर०

जरन्मीमांसकास्तु लोके वक्तृज्ञानानुमानात्तदुपजीविसंसर्गानुमानाद्वा वाक्यार्थसिद्धौ शब्दस्यानुवादकत्वं वेदे तु तदभावात् स्वातन्त्र्येण प्रामाण्यमिति वदन्ति। तन्न। वेदे क्लृप्तसामाग्रीतो लोकेऽपि संसर्गप्रत्ययादन्यथानुवादकतापि न स्यात् लिङ्गस्य पूर्वत्वेऽपि व्याप्तिस्मृतिविलम्बेन तद्विलम्बात्। अनाप्तोक्तौ व्यभिचारात् वेदतुल्यापि सामग्री न निश्चायिकेति चेत्। न। चक्षुरादेस्तथात्वेन तच्छङ्कायामपि प्रमापकत्वात्।

तदुभयसंसर्गः संसर्गमर्यादया भासत इत्यनुभवः। पदार्थपक्षके पदपक्षके वा [१] नुमानेनैकपदार्थस्यापरपदार्थो विशेषणतया भासते। किन्तु साध्यतया संसर्ग एवेति प्रत्ययवैचित्र्यादेव शब्दो मानमिति सङ्क्षेपः।

अन्यथेति। तत्सामग्रीविरह इत्यर्थः। अनुवादकत्वमपि प्रमाणत्वविशेष एव। स च (१४) सामान्यासामग्र्यभावे न स्यादिति भावः। ननु तत्सामग्रीसमावेशेऽपि युगपत् अन्यत्र क्लृप्तोभयसामग्री [२] समावेशे सति शाब्दप्रत्यय एव स्यात्। नानुमितिरित्यत्र किं विनिगमकमत आह - **लिङ्गेति**। तथा च न यौगपद्यम्, किन्तु शाब्दज्ञानसामान्य [३] एव प्राथम्यमिति [४] भावः।

अनाप्तोक्ताविति। अनाप्तोक्ते आकाङ्क्षादिमच्छब्दत्वज्ञानरूपाया वेदतुल्यायाः सामग्र्याः संभवेऽपि व्यभिचारदर्शनात् भ्रमजनकत्वदर्शनात् अत एव समानधर्मदर्शनादिदं भ्रमजनकत्वमन्यथा वा इत्याकारकव्यभिचारसन्देहात् न निश्चयः स्यादित्यर्थः। न त्वनाप्तोक्ते तादृशसामग्र्या अन्वयव्यभिचारेण तदतिरिक्तसहकार्यन्तराभावेन न निश्चायकत्वमिति ***फक्किकार्थः***। तथा सति चक्षुरादेरित्युत्तरासङ्गतिः। न हि तत्रा वा तवोक्तान्वयव्यभिचारः सहकार्यन्तराभावे शक्यसमर्थनः। तत्र योग्यताभ्रमादेः तादृशसहकारिणः

---

[1] A2, T. omit - पदपक्षके वा

[2] A2 omits - सामग्री

[3] A2, T. - शाब्दसामग्र्या

[4] A2, T. - प्राथमिकत्वमिति

संभवाद्वेदतुल्यसामग्र्येव नानाप्तोक्ते न हि तन्मत [1]एवान्वयप्रयोजकरूपवत्त्वं योग्यता। न वा बाधकाभावः[2]।

ज्ञायमानं करणं सन्देहे न निश्चायकं लिङ्गवदिति चेत् - न। संशयो हि न वाक्ये तस्य निश्चयात्, न तज्जन्यज्ञानप्रामाण्ये तस्य तदुत्तरकालीनत्वात्, नप्तोक्तत्वे तन्निश्चयस्यानङ्गत्वात्।

ननु लोके आप्तोक्तत्वसन्देहे वाक्यार्थधीर्नेति तन्निश्चयो हेतुः तथा च वाक्यार्थगोचरयथार्थज्ञानजन्यत्वग्राहकात् तदुपजीविनोऽनुमानात् वाक्यार्थधीरिति चेत् - न। वेदे तद्रहितस्यापि सामर्थ्यावधारणात् तदनिश्चयेऽपि वेदानुकारेण पठ्यमानमन्वादिवाक्येऽ-पौरुषेयत्वाभिमानिनो गौडीमीमांसकस्यार्थनिश्चयात्। न चासौ भ्रान्तिः, बाधकाभावात् पौरुषेयत्वनिश्चयदशायामपि तस्य तथात्वात्।

स्वरूपसन् हेतुरिति[3] निगर्वः। संशयसामान्ये व्यभिचारात्। स्वसन्देहे स्वजन्यधीप्रामाण्यसन्देहे वा निश्चीयमानस्वाङ्गसन्देहे वेत्यादि वाच्यम्। तत्र क्रमेण सिद्धिमाह - **नेत्यादि।** तस्येत्याद्युपलक्षणम्। वस्तुतः तत्सन्देहस्य ग्राह्यविरह[4]सन्देहपर्यवसानात् न प्रतिबन्धकत्वमिति ध्येयम्।

वेद इति। तथा च व्यभिचारान्न तद्धेतुतेति भावः। ननु लौकिकशब्दे तद्धेतुत्वमिति न सामान्यव्यभिचारो दोषायेत्यस्वरसात् विशेषतोऽपि व्यभिचारमाह - **तदिति।**

ननु प्रमां प्रति हेतुत्वं विचार्यते। तच्च भ्रमसंभवेऽपि तदभावे प्रमाविरहात् अक्षतमिति मनसिकृत्य प्रसञ्जितं[5] निषेधति[6] - **न चेति**। विषयावबाधेन प्रमात्वमेव तस्येत्याह - **बाधकेति।**

---

[1] A2 - इति

[2] A2 - बाधकमानाभावः

[3] A2 - स्वरूपसद्धेतुरिति

[4] T. ०प्रामाण्य०

[5] T. adds ०भ्रमं

[6] A2 - प्रतिषेधति

ननु तत्र बाधकमस्त्येव। ततः [१] प्रमासामग्र्यभावेऽपि प्रमित्यभावनिश्चये तदुपादानस्य तत्राविद्यमानव्यक्तिविषयकत्वेनाप्युपपत्तेरित्यरुचेर्दोषान्तरमाह - **पौरुषेयेति।** तथा सति प्रतीत्योर्वैलक्षण्य-मनुभूयेतेति भावः।

न चासंसर्गाग्रहमात्रं तत्, अर्थस्य तथाभावेऽपि असंसर्गाग्रहत्वे संसर्गोच्छेदापत्तेः। न चाप्तोक्तत्वनिश्चयरूपकारणबाधात् संसर्गज्ञानबाधः, व्यभिचारेण हेतुतायामेव बाधात् लौकिकत्वेन ज्ञाते तदङ्गमिति चेत्। न। मानाभावात् वाक्यार्थस्यापूर्व्वत्वेन लिङ्गाभावेन तद्ग्रहासम्भवात्।

ननु अनाप्तोक्तत्वशङ्काव्युदासोऽङ्गं स च वेदेऽपौरुषेयत्वनिश्चयात् लोके चाप्तोक्तत्वा-वधारणादिति चेत्। न। तस्याशक्यत्वात्। यदि चापौरुषेयत्वनिश्चये सत्येव वेदादर्थप्रत्ययः तदा दोषवत् पुरुषाप्रणीतत्वे सत्याकाङ्क्षादिमत्पदस्मारितत्वेन वेदे पदार्थसंसर्गसिद्धिरस्त्विति वेदोऽप्यनुवादकः स्यात्। तदुक्तम् -

'व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीतेव वेदस्यापि न तत् कुतः।।'
न चैवं शब्दस्य प्रमाणत्वमपि, अनुमानादेव वाक्यार्थप्रमोत्पत्तेरिति।

प्राभाकरास्तु व्यभिचारिशब्दव्यावृत्तमव्यभिचार्य्यनुगतप्रमाप्रयोजकमुपेयं यदभावादनाप्तोक्त

मानेति। सामान्यसामग्रीत एव कार्यसंभवादिति भावः। नन्वन्वयाद्यनुविधानमेव मानमित्यत आह - **वाक्येति।** तथा च (१५) तदेव नास्तीति भावः।

न चैवमिति। वेदे क्लृप्ताया सामग्र्याः लोकेऽपि अनुमानानन्तरभावादनुवादकत्वम्। वेदे च तदा सामग्र्यन्तरकल्पनं यदि सोऽर्थः प्रमाणान्तरागोचरः स चेदुक्तानुमानगोचरस्तर्हि सामग्र्यन्तरमेव

[1] A2 - अन्ततः

दुष्कल्प्यमित्यर्थः।

व्यभिचारीति। प्रमित्यजनकव्यावृत्तमित्यर्थः। न त्वप्रमाजनकव्यावृत्तम्। तैस्तदनभ्युपगमात्। यदभावादनाप्तवाक्यात् अप्रमा प्रमाविरहः कार्यवैचित्र्यं क्वचित् प्रमा क्वचित्तदभाव इत्येवंरूपमित्यर्थः। तच्च शब्दवृत्तिप्रमाप्रयोजकमित्यर्थः।

वाक्यादप्रमा अन्यथा कार्य्यवैचित्र्यं न स्यात्, तच्च ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगि-

---

ज्ञायमानेति। ज्ञायमानकरणे उपयोगिसहकारीत्येतावन्मात्रे कृतिज्ञायमानसामर्थ्यम्[१]। कारणस्य शब्दस्य स्वगोचरज्ञानोपयोगीभूतेन्द्रियगुणादौ व्यभिचार इति ज्ञानोपयोगीत्युक्तम्। तदर्थस्तु ज्ञायमानत्वप्रयुक्त-करणजन्यज्ञानोत्पत्तिविषये ज्ञानविशिष्टकरणसहकारित्वम्। तेन सल्लिङ्गपरामर्शेऽपि न व्यभिचारः। तस्या ज्ञायमानासहकारित्वात्। यस्मिन् सति यदभावात् कार्याभावः तस्यैव तत्सहकारित्वेन स्वविशिष्टे स्वासहकारित्वात्। एतावच्चात्ममनोयोगादिसाधारणम्। अतो व्यभिचारिवैलक्षण्यत्वादित्युक्तम्। तदर्थस्तु प्रमित्यजनकव्यावृत्तत्वादिति। प्रमित्यजनकज्ञानजनकसामग्र्यप्रविष्टत्वादिति यावत्। न त्वप्रमाणव्यावृत्तत्वात् तन्मतेऽप्रसिद्धेः। अत एव व्याप्तिवदित्युक्तम्। अन्यथा व्याप्तेरप्याभाससाधारण्येन साध्य[२] वैकल्यात्। न हि व्याप्तिमत्पक्षधर्मेनाभासत्वम्। यथा विवक्षितं, तत्तु तत्राप्यस्ति व्याप्तेस्तत्सामग्र्यप्रवेशात्। तद्विरहेऽपि तत्सम्भवात्। न च तन्मते यद्याभासाप्रसिद्धिः तर्हि ज्ञायमाने[३] करणसहकारित्वमात्रस्यैव हेतोः पूर्वप्रतीकात् लब्धस्य साधुत्वे कृतमन्यविशेषेनेति[४] वाच्यम्। प्रवृत्तिनिवृत्तिक्षमज्ञानस्य ज्ञायमानकरणजन्यस्य विवक्षितत्वात्। तस्य च प्रमित्यजनकेऽपि भावादिति । यद्वा ज्ञायमानकरण इत्येतावति कृते तद्वृत्तिव्यभिचारिव्यावृत्तमनौपाधितकत्वादि। तच्च न साध्यवदिति व्यभिचारो मा भूदिति ज्ञानोपयोगित्वमुक्तम्। एतदुभयमात्रे[५] वास्य प्रमित्यजनकस्य ज्ञानजनकत्वमेव नास्ति। तथा च स्वप्रयुक्तज्ञानरूपफलगोचरज्ञायमानकरण (१६) बाधितत्वासत्प्रतिपक्षितत्वादौ व्यभिचार

---

[1] A2, T. omit सामर्थ्यम्

[2] A2, T. - साधन०

[3] A2, T. add - ज्ञायमानकरणस्य प्रमित्यजनकस्य ज्ञानजनकत्वमेव नास्ति। तथा च स्वप्रयुक्तज्ञानरूपफलगोचरज्ञायमान०

[4] A2 - ०विशेषणेनेति

[5] A2, T. omit - वास्य प्रमित्यजनकस्य ज्ञानजनकत्वमेव नास्ति। तथा च स्वप्रयुक्तज्ञानरूपफलगोचरज्ञायमानकरण०

इति व्यभिचारित्वं [१] विशेषणम्। तदर्थस्त्वाभासव्यावृत्तत्वमेव न च तन्मते तदप्रसिद्धिः विसंवादिप्रवृत्त्यादिजनकज्ञानजनकमानस्यैव तन्मते तथाभावात्। न चाबाधितत्वादि तथा बाधस्य विपरीतनिश्चयस्य सद्भावे ज्ञानमात्रप्रतिबन्धेन[२] तदभावस्य ज्ञानमात्रप्रयोजकत्वात्।

व्यभिचारिवैलक्षण्यत्वात् प्रमाहेतुत्वाद्वा व्याप्तिवच्छब्दशक्तिवच्चेति, अन्यथा शब्दाभासोच्छेद-प्रसङ्गः।

न च सकलबाधकप्रमाविरहे व्यभिचारः, तस्य ज्ञानोपयोगित्वाभावात्। तदभावेऽपि ज्ञानोत्पत्तेः । न हि स्वस्य बाधानवतारदशायां न ज्ञानम्, तथा च ज्ञानोपयोगिताप्रकारेण व्यभिचारिव्यावृत्तत्वं विवक्षितम्। तच्च न तत्रेति भावः। न च ज्ञानोपयोगीत्यादिकमेवास्तामिति वाच्यम्। भूयोवयवेन्द्रियसन्निकर्षादौ व्यभिचारप्रसङ्गात्[३]। ननु व्यभिचारिव्यावृत्तत्वं सर्वं तद्व्यावृत्तत्वम् अन्यथा वा । आद्ये व्याप्तेः दृष्टान्तस्य साधनवैकल्यम्। अन्त्ये बाधाभावादावतिप्रसङ्गः। व्यक्तिविशेषस्य तथाभावादिति, मैवम्। यत्किञ्चित् व्यभिचारिव्यावृत्तत्वमेव वार्थः। तच्च ज्ञानोपयोगितावच्छेदकावच्छेदेन । न च बाधाभावत्वावच्छिन्ने तथात्वम्। यद्वा यावद्व्यभिचारिव्यावृत्तत्वमेव वार्थः। पक्षधर्मतादिसहकृतव्याप्तेः [४] दृष्टान्तत्वम्। एवमन्यत्रापीति भावः।

प्रमेति। स्वसहकारिकज्ञायमानकरणजन्यप्रमामात्रहेतुत्वादित्यर्थः। तेनाद्यविशेषणात् [५] भूयोऽवयवेन्द्रियसन्निकर्षे तृतीयविशेषणात् आत्मनो योगादौ न व्यभिचार इत्यर्थः। यथाश्रुते त्वमीषु व्यभिचारवारणादिति भावः। विपक्षे बाधकमाह - **अन्यथेति।**

शब्दाभासेति [६] । अन्यतात्पर्यके शब्दे तात्पर्यभ्रमात् अन्यविषयकयथार्थज्ञानजनक एव शब्दाभास[१]प्रयोग इति स्मर्तव्यम्। न तु बाधिते। तन्मते तस्य ज्ञानाजनकत्वेन स्वरूपम्, अत[२] एवास्य

---

[1] T. व्यभिचारव्यावृत्तत्वं

[2] A2, T. - ज्ञानमात्राभावेन

[3] A2 - व्यभिचारात्

[4] A2 - पक्षधर्मतासहकृतादिविशिष्टव्याप्तेः

[5] A2, T. add - सल्लिङ्गपरामर्शे द्वितीयविशेषणात्

[6] A2 - शब्दाभासेति

प्रमाजनकत्वे ज्ञानजनकत्वे वा व्यभिचारानुपन्यासात्। एनं चार्थमग्रे अन्यपरादन्यान्वयबोधो न स्यादिति शाब्दाभासोच्छेद इति ब्रुवन् **ग्रन्थकृदेव** प्रकटयिष्यति।

न चाप्तोक्तत्वं तथा, संवादात् प्रमाणे शुकोदीरिते भ्रान्तप्रतारकसंवादिवाक्ये वेदे च तदभावादाप्तोक्तत्वानुमाने व्यभिचारिव्यावृत्तलिङ्गाभावाच्च। भावे वा तद्वत एव शब्दस्य प्रत्यायकत्वात्।

एतेनाप्रमाहेतुत्वं न भ्रम-प्रमाद-विप्रलिप्ता-करणा-पाटवानां परस्परं व्यभिचारात् मिलितस्याव्यापकत्वात्। किन्त्वाप्तोक्तत्वाभावस्याप्राहेतुत्वं तदभाव आप्तोक्तत्वं प्रमाहेतुरित्यपास्तम्। आप्तोक्तत्वस्य प्रथमं लिङ्गाभावेन ज्ञातुमशक्यत्वात्।

अत एव व्यभिचारशङ्काविरहो हेतुः सा च लोके भ्रमादिमूलेत्याप्तोक्तत्वानुमानादुच्छिद्यते, वेदे चापौरुषेयत्वनिश्चयेनेति निरस्तम्। अभिमतवाक्यार्थस्यापूर्व्वत्वेन साध्याप्रसिद्धेः वेदे सदोषपुरुषाप्रणीतपदस्मारितत्वेन संसर्गसिद्धेरनुवादकतापत्तेश्च।

नापि दोषाभावः भ्रान्तप्रतारकवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे तदभावात्। दोषाभावस्य हेतुत्वात् तत्र वाक्यं मूकमेव व्यवहारस्तु प्रत्यक्षादिति चेत् -न। अनुभवापलापापातात् तद्धेतुत्वे विवादात् वेदेऽप्यनुवादकतापत्तेश्च।

यद्वा शब्दाभासो[३] विसंवादिप्रवृत्त्यादिहेतुः शब्दः। तथा च यदीदं स्वरूपसदेव सामग्री तर्हि तादृशासंसर्गाग्रहस्याप्यभावेन तदुच्छेदापत्तेः। न हि सामान्यसामग्र्यपि नाभासस्थले ज्ञानम्, तस्य यदि सामान्यसामग्री तर्हि तत्राप्यस्तीति युक्तः शब्दाभास[४] इति भावः। (१७)

---

[1] A2 - शब्दाभासेति

[2] A2 - स्वरूपसत

[3] A2 - शाब्दाभासो

[4] A2 - शाब्दाभासो

शुकोदीरितदावस्त्येव ईश्वरमुपादायाप्तोक्तत्वमित्यस्मदाशङ्काम् अनुसृत्य दोषान्तरमाह - **आप्तेति**।

ननु दोषप्रभावत्त्वे [१] सत्यर्थज्ञानजन्यत्वमेव तदनुमापकमस्त्वित्यत आह - **भावे वेति**। अत्रेष्टापत्तिमाशङ्क्य निषेधति - **नापीति।** नन्वनुभवानुरोधाच्चेद्यवस्थितिरायातस्तर्हि सिद्धार्थादप्य-न्वयानुभवः कारणाभावात् तदन्यथासिद्धिरिहापि समानेत्यत आह - **तद्धेतुत्व** इति।

किञ्च दोषाभावस्य प्रमाहेतुत्वेऽप्रमायां दोषः कारणं तस्य च प्रत्येकं हेतुत्वे व्यभिचारः मिलितस्य तत्त्वे एकस्मादप्रमा न स्यात् भ्रमादीनां प्रत्येकं दोषत्वेऽननुगमः मिलितस्य तु तत्त्वे एकस्मादप्रमानुदयप्रसङ्गः। तस्मात् लाघवात् यथार्थतात्पर्य्यकत्वं शाब्दप्रमाप्रयोजकं तच्च यथार्थवाक्यार्थप्रतीतिप्रयोजनकत्वं लोक-वेदसाधारणं तदभावादप्रमा स एव दोषः।

तत्राद्यव्युत्पत्तिबलात् हेतुभाव आवश्यक इति भावः। ननु दोषाभावव्यभिचारो नास्ति। उक्तस्थले प्रतारणाविरहात् अविद्यमानप्रतिपिपादयिषायास्तथात्वात्। न त्वप्रतीतिप्रतिपिपादयिषायाः प्रतारणापदा [२]-प्रतिपाद्याया अपि तस्या एव [३]दोषत्वाभ्युपगमेनात्र तस्याविवक्षितत्वाद्वा। न च भ्रम एव तत्र दोषः। तस्य भिन्नविषयत्वादित्यरुचेराह - **किं चेति।** तथा च नाप्रमायां दोषो हेतुः। अतो दोषाभावोऽपि न प्रमायामिति भावः।

ननु नाननुगमसंभवौ दोषत्वावच्छिन्नाभावस्यानुगमादित्यत आह - **भ्रमादीनामिति**। दोषत्वं यदवच्छेदेन तदवच्छिन्नाभावो हेतुः। तच्च प्रत्येकधर्मावच्छेदेनान्यथा वा। उभयथापि तद्दोषतादवस्थ्यमिति भावः। वस्तुतो दोषत्वं न जातिः। अपि तु भ्रमत्वावच्छिन्नकार्यताप्रतियोगिकहेतुतावच्छेदकावच्छिन्नत्वम्। तच्च न भ्रमजनकतावच्छेदकम्। आत्माश्रयादिति दूषणं [४] द्रष्टव्यम्। [५] ननु यथार्थतात्पर्यकत्वं यदि यथार्थपदार्थप्रतीतिपरत्वं तदा न शाब्दाभासव्यवच्छेद इति तदर्थमाह - **यथार्थेति।**

---

[1] A2 - दोषाप्रभवत्त्वे
[2] A2 - ०पदार्थ०
[3] T. दोषत्वेन
[4] T. omits
[5] T. मन्तव्यम्।

लोकेति। नन्विदमिच्छागर्भं यदि तदा न वेदसाधारण्यम्, ईश्वरानङ्गीकारात्[1] तदगर्भं यदि तदा अत एवेत्यादिग्रन्थविरोध इति, मैवम्। स्वविरोध्यभिप्रायापूर्वकवाक्यप्रतिपाद्ययथार्थप्रतीतिप्रयोजकत्वस्य विवक्षितत्वात्। स च विशिष्टाभाव उभयथापि तात्पर्यसामान्याभावे तद्विरुद्धविषयकतात्पर्याभावे चाविशिष्टः।

यद्वा यथार्थवाक्यार्थ[2] प्रतीतिप्रयोजकत्वं लोकवेदसाधारणम्। लोके तु वाक्यार्थप्रतिपादनेच्छाविशेषसामग्री। अत एवेत्यग्रिमग्रन्थस्तु सामान्यसामग्र्यां सत्यामपि विशेषसामग्र्यभावे कार्याभावपरः।

वस्तुतस्तु यथार्थवाक्यार्थप्रतीतिप्रयोजकत्वं प्रतीत्युद्देश्यकत्वमेव। लोकवेदसाधारणम्, न चेदेश्यस्येच्छायाः कथं वेदे सम्भवः। पूर्वपूर्वाध्यापकपरंपरीयस्य तस्याभावात्। अनादिस्तात्पर्यपरंपरेति वक्ष्यमाणत्वात्। न चैवमिच्छाधीनत्वेन न्यायानपेक्षिततयालोकाविशेषः। लोकेच्छायाः स्वातन्त्र्यात्, न्यायाविषयेऽपि भावात् । वेदे तस्याः परतन्त्रपुरुषपरम्परापारतन्त्र्येण न्यायनियन्त्रितत्वात्। न चैवमाप्तोक्तत्वमेव सम्यगिति वाच्यम्। गौरवात्। स्वतन्त्रस्य च तथाभावादिति सर्वं सुस्थम्।

अप्रमा प्रमाभावः। नन्वत्र प्रमादोषादित्यत आह - **स एवेति।** प्रमाजनकाभावादेव हि प्रमित्यभावः। न तु गुरुमतेऽपि[3] दोषो नाम कश्चिदन्यो अप्रमाजनकप्रमाप्रतिबन्धको वा। आद्येऽप्रसिद्धेः, द्वितीये प्रतिबन्धकाभावस्य हेतुतापत्तेः। न चैवं न्यायमतादविशेषः, प्रमाजनकतावच्छेदकावच्छिन्नाभावात् तत्प्रमाभावः। स च भ्रमजनकतावच्छेदकावच्छिन्नविरहात् अन्यो गुणात्मैवेति वाच्यम्। गुरुनये[4] भ्रमजनको नास्त्येव। प्रमाजनकस्तु न प्रमात्वावच्छिन्नजनको ज्ञानस्येव प्रमात्वेन ज्ञानत्वावच्छिन्नजनकाभावात् प्रमाविरह इति निगर्वः। न त्वेवं न्यायनय इति परमभेतात्। न तु योग्यतादिकमावश्यकमेव। तथास्तु तदभाव एव दोषोऽस्तु। मैवम्। तन्मतेऽन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वेन आप्तोक्तघटानयनवाक्यात् प्रमोत्पत्त्यापत्तेः। न ह्यस्मन्मत इव तन्मतेऽपि बाधकमानाभावो योग्यता। क्रियायाः[5]

---

[1] T. omits
[2] A2 omits वाक्यार्थ०
[3] A2 - ०नयेऽपि
[4] T. गुरुमते
[5] A2 omits

स्वर्गान्वययोग्यत्वेनापूर्ववाच्यतानुपपत्तेः वक्ष्यमाणत्वात्। योग्यतावच्छेदकधर्मः स एव। यो योग्यवृत्तित्वेन न ज्ञायत इति न तदनुरोधादपि तन्मते बाधकप्रमाणाभावज्ञानं कारणमिति। ननु पित्तादिदोषो व्यवह्रियते लोके,[1] न त्वन्यदित्यत आह - **न हीति**। न हि जातिनियतदोषत्वं मा भूत्। स्वप्रमायामपि पित्तादेस्तथात्वम्, अपि तु प्रमाऽजननाधीनं तदिहापि समानमिति भावः।

न हि जात्यैव कश्चिद्दोषः, तद्विघातकत्वाच्च भ्रमादीनां दोषत्वम्।

अत एव भ्रान्तप्रतारकवाक्यं शुकादिवाक्यञ्च प्रमाणं संवादात्। अत एवान्यघटाभिप्रायेणा गेहे घटोऽस्तीत्युक्ते यत्र घटान्तरं दृष्ट्वा तमानयति । तत्रान्यपरत्वाच्छब्दो न प्रमाणम्। व्यवहारस्तु प्रत्यक्षादेव। यष्टीः प्रवेशयेति च मुख्यार्थबोधे न प्रमाणम्। यत्परः शब्दः स शब्दार्थ इति न्यायात्। तच्च तात्पर्य्यं ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवैलक्षण्याद्व्याप्तिवच्छक्तिवच्च।

नन्वेवं भ्रमप्रमादादिषु[2] दोषव्यवहारस्तान्त्रिकाणां विरुद्ध्येतेत्यत आह - **तदिति** । औपचारिको व्यवहारस्तेषामिति भावः।

अत एवेति। यत एव दोषसत्त्वेऽपि उक्तसामग्रीत्यर्थः। ननु शुकादिवाक्ये प्रकारद्वयेन उक्तसामग्रीसत्त्वेऽप्युद्देश्यत्वगर्भतत्सामग्र्यभाव इति, मैवम्। अर्थानभिज्ञाध्यापकोक्तवेदवत्तत्तात्पर्यक-जातीयत्वस्य सम्भवात्। तादृशवाक्यश्रवणपूर्वकत्वात् तस्य क्वचिदतथाभावेनाप्रामाण्ये तु (१९) पक्षतेरभावादन्यघटाभिप्रायकवाक्यवदिति।

अत एवेति। यत एवोद्देश्यकत्वगर्भतात्पर्यमित्यर्थः। नन्विदमयुक्तम्। तथा हि उक्ततात्पर्यं यदि स्वरूपसद्धेतुस्तदैवं यदि तु ज्ञानं तदा अत्रापि शाब्द[3]सामग्र्यस्त्यैवेति कुतः प्रत्यक्षाद्व्यवहारोपपादनमिति। मैवम्। अन्यस्यान्यथाभानासम्भवेन तात्पर्यके तत्तत्तात्पर्यकत्वज्ञानासंभवेन शाब्दसामग्र्यसंभवात्। न च

---

[1] A2 omits

[2] A2 - भ्रमादिषु

[3] T. adds ०ज्ञान०

तदसंसर्गाग्रह एव शाब्दधीहेतुः, गौरवात्। अन्यथाख्यात्यापत्तेश्च। एवं सति व्यवहारस्तु प्रत्यक्षादिति समाधिसौकर्यादुक्तम्।

वस्तुतस्तु तत्तात्पर्यासंसर्गाग्रहात् तद्घटासंसर्गग्रहस्यापि भावालिङ्गासंसर्गाग्रहालिङ्गयसंसर्गाग्रहवत् ।

अन्यथा अन्यपरादन्यान्वयबोधो न स्यात् इति शब्दाभासोच्छेदप्रसङ्गः। तद्भ्रमाच्च शाब्दभ्रमः। अत एव यष्टीः प्रवेशयेत्यत्र लक्षणा नानार्थे विनिगमना च तयोस्तात्पर्य्यग्रहमूलकत्वात्।

यदि च यत्र वास्तवं तात्पर्य्यं तं शब्दोबोधयति तदा लक्षणायां मुख्यार्थान्वयानुपपत्त्युपयोगो न स्यात्। अत एव पचतीत्युक्तेऽन्योक्तेन स्वयं स्मृतेन वा कलायपदेनोपस्थिते कलायं पचतीत्यन्वयबोधो न भवति तात्पर्य्यानिश्चयात्। न च तात्पर्य्यग्राहकस्य प्रकरणादेः प्राथम्यादावश्यकत्वाच्च शब्दसहकारिता न तु तात्पर्य्यग्रहस्येति वाच्यम्। तेषामननुगतत्वेन परस्परव्यभिचारादहेतुत्वात् तात्पर्य्यग्राहकतात्वननुगतानामपि व्याप्यत्वात् धूमादीनामिव। तच्च तात्पर्य्यं वेदे न्यायगम्यम्,

---

अत एव वक्ष्यति - **अन्यथा अन्यान्वय**[1] **परेत्यादि**। न हि तस्यापि शाब्दाभासत्वं अतात्पर्यविषयीभूत-प्रत्यायनादन्यत्। नापि तत्प्रत्यायनं स्मर्यमाणं संसर्गाग्रहादन्यत्। तन्मतेऽसतोऽभानात्। तात्पर्यसंसर्गाग्रहस्याहेतुत्वाच्च। अन्यथा प्रकृतस्थले शाब्दज्ञानोत्पत्तेः वज्रलेपत्वादिति अलमनेन।

[1] A2 omits ०अन्वय०

यष्टीरित्यत्रापि अत एवेत्यनुषज्यते इति। तद्भ्रमात् तात्पर्यासंसर्गाग्रहात् शाब्दभ्रमः[१]। शाब्दासंसर्गाग्रहः। [२] विद्यमानासंसर्गाग्रहात् भ्रमत्वं पूर्वस्माद्विशेषः। अन्यथेत्यादौ वासत एव वासंसर्गस्याग्रहात् मुख्येत्युपलक्षणम्। कदाचित् मुख्यान्वयबोधश्च न स्यादित्यपि द्रष्टव्यम्।

न्यायगम्यमिति। न्यायस्तर्कः। कपिञ्जलानालभेत इत्यत्र प्रथमोपस्थितत्वात् त्रित्वमर्थ इत्येवमादिरूपः। नन्वेवं पदार्थमात्रेऽन्याय[३] प्रवृत्तावपि वाक्यार्थे तदसंभवादिति, मैवम्। त्रित्व[४]विशिष्टवाक्यार्थबोधजनकत्वस्यापि समभिव्याहाररूपन्यायादवधारणीयत्वादिति भावः।

यत्र न्यायात् तात्पर्य्यमवधार्य्यते स एव वेदार्थः, लोके च न केवलं न्यायानुसारि तात्पर्य्यं इति न न्यायगम्यम्। किन्तु पुमभिप्रायनियन्त्रितम्। न्यायाविषयेऽपि पुरुषेच्छाविषये प्रतीतिजनकत्वात् पुंवचसाम्। वक्ता च परकीयवाक्यार्थज्ञानोत्पादनेच्छया वाक्यमुच्चारयति सा चेच्छा यदि वक्तुर्यथार्थवाक्यार्थज्ञानपूर्व्विका भवति, तदैव परं तदुच्चारणस्य पुमभिप्रेतयथार्थ-वाक्यार्थज्ञानपरत्वं यथार्थज्ञानेच्छाव्याप्यं निर्व्वहतीति वक्तुर्यथार्थवाक्यार्थज्ञानवत्तामविज्ञाय यथार्थप्रतीतिपरत्वं ज्ञातुं न शक्यत इति प्रथममाप्तवाक्यद्वक्तृज्ञानानुमानपूर्व्वकमर्थतथात्वमनुसन्धाय यथार्थतात्पर्य्यनिश्चयः।

नन्वेवं लौकिकस्मृत्यादिवाक्यार्थस्यान्यतस्तात्पर्यग्रहे तदर्थकवेदस्यापि अनुवादकतेत्यत आह - **यत्रेति**। न वेद एव न्यायावधार्यं तात्पर्यं भ्रमः।[५] अपि तु न्यायावधार्यतात्पर्य एव वाक्यार्थे वेदार्थो वेदार्थतुल्योऽननूद्य[६] इत्यर्थः। तथा चान्यत्रापि स्मृत्यादौ न्यायावधार्यं तात्पर्यमिति नोक्तदोषावकाश इति भावः। ननु लोकेऽपि तत एव तदवधार्यतामित्यत आह - **लौकिकेति**[७]।

---

[1] A2 omits शाब्दभ्रमः ०

[2] T. अविद्यमान०

[3] T. अन्याय०

[4] T. वाच्यम्। बहुत्व०

[5] T. ब्रूमः।

[6] T. नानूद्यते।

[7] A2 - लोके चेति

न केवलमिति। श्रवणात् कदाचित् न्यायावतारेऽपि न ततः तात्पर्यावधारणम्, अनुमापकाभावादित्यर्थः। ननु भवतु इच्छानियन्त्रितं तादृशमपि [१] वाक्यार्थ (२०) प्रतीत्युद्देश्यकत्वं वेदवत् प्रकारान्तरादवधार्यताम्। सामान्यतो नैतावता लौकिकस्यानुवादकता इत्यत आह - **वक्तेति**। द्वयं ग्राह्यम्, यथार्थे वाक्यार्थः। तत्प्रसतीत्युद्देश्यकत्वं च तत्र विशेषतो वाक्यार्थोपस्थितिं विना न यथार्थत्वं ज्ञातुं शक्यम्। वाक्यार्थस्य बाधितत्वसंशयात् । न हि वेदवदिहापि सामान्यतो यथार्थ्यं सुग्रहम्। तत्र वेदार्थत्वेनैवाबाधित [२] निश्चयात् । तथा च वाक्यार्थाबाधप्रकरणाद्युपस्थित्यर्थं विशेषतो वाक्यार्थोपस्थितिः । तत्प्रतीत्युद्देश्यकत्वं च तादृशज्ञानपूर्वकताज्ञानं विना न सुग्रहमिति तादृशज्ञानपूर्वकत्वमनुमेयमिति आखण्डलकतात्पर्यार्थः। वाक्यत्वात् - वाक्यार्थज्ञानजन्यवाक्यत्वात्।

अनुमानञ्चेदं वाक्यं - भ्रमादि-विशिष्टज्ञानयोरन्यतरजन्यं वाकयत्वादिति। ततो भ्रमादिनिरासे सति परिशेषाद्वाक्यार्थज्ञानानुमानम्, अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात् अहमिव, न त्वाप्तत्वात् साध्यादिशेषात्।

अतो न वेदे[३] शुकवाक्ये[४] तन्मते व्यभिचारः।

भ्रमेति। नायमत्र भ्रान्तः प्रमादी वा स्वभ्यस्तवाक्यार्थत्वात्। न प्रतारकः। साधुत्वात्। नापटुकरणः। अवहितत्वात् [५]।

परिशेषादिति। [६] प्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यत्वादिति व्यतिरेकिण इत्यर्थः। तदेव प्रयोगारूढमाह - **अयमति।** ननु प्रकृतवाक्यार्थयथार्थज्ञानवानिति विशेषतः सामान्यतो वा साध्यम्। आद्ये

---

[1] T. adds यथार्थ०

[2] T. ०अबाध०

[3] A2 omits

[4] T. omits

[5] A2 adds इति शेषः

[6] A2 - भ्रमादि०

व्यभिचारः। अन्त्ये प्रयोक्तृत्वमेव हेतुः। व्यर्थमधिकम्। हेतावपि प्रकृतपदप्रक्षेपेऽहमिति दृष्टान्तासङ्गतिः। शुकादौ व्यभिचारश्चेति।

अत्राहुः - यो भ्रमाद्यजन्यशक्यार्थ[1]ज्ञानवानिति सामान्यतो व्याप्तौ अहंदृष्टान्तः । सामान्यतो व्याप्त्या व्याप्त्या च व्यतिरेकी प्रवर्तते । सामान्यतोऽन्वयी वेत्यन्यपदे तत्। तथा च प्रकृतपदप्रक्षेपो हेतावपीति न व्यभिचारः। शुकादिवारणार्थं च वाक्यार्थज्ञानजन्यत्वेनापि हेतुर्विशेषणीय इति भावः। अन्ये तु प्रकृतानुमानस्येदं यथार्थवाक्यार्थधीजन्यं भ्रमाद्यजन्यवाक्यार्थज्ञानजन्यवाक्यादिति[2] वाक्यपक्षके तात्पर्यम् इति वदन्ति।

तत एते पदार्था यथोचितसंसर्गवन्तः यथार्थज्ञानविषयत्वात् आप्तोक्तपदस्मारितत्वाद्वा मदुक्तपदार्थवदिति।

ननु वक्तुर्ज्ञानविशेषोऽनुमेयः ज्ञाने चार्थ एव विशेषः न त्वर्थ आधीनोऽन्यः अर्थेनैव विशेषः इत्यौपचारिकी तृतीया तथा च वाक्यार्थज्ञानविशेषोऽनुमेयः तस्य चाप्रसिद्ध्या न व्याप्तिग्रहः।

अत एवास्मिन् वाक्यार्थे अयमभ्रान्त आप्तो वेति ज्ञातुमशक्यमिति शब्द एव तमर्थं बोधयेदिति चेत् - न। तात्पर्य्यावधारणार्थं त्वयाप्यशाब्दग एव संसर्गविशेषप्रतीतेरवश्याभ्युपेयत्वात् अन्यथा क्व तात्पर्य्यनिरूपणम्।

तत इति। न च पूर्वानुमानादेव संसर्गसिद्धेः व्यर्थमनुमानमिदमिति वाच्यम्। कार्येण कारणानुमानेऽकारणीभूतसंसर्गस्याविषयत्वादिति स्मृत्यधिकरणीयतत्सिद्धान्तावष्टम्भेनानुमानान्तराव-

[1] A2 - यद्वाक्यप्रयोक्ता स यथार्थतद्वाक्यार्थ०

[2] A2 - ०वाक्यत्वात्

तारात्। अत एव सिद्धान्तभेदेनोपसंहारे विकल्पेनाभिधानम्। वक्तृज्ञानावच्छेदकतया तदुपजीविसंसर्गानुमानाद्वेति न काप्यनुपपत्तिरिति भावः।

यथोचितेति। प्रकृतज्ञानविषयेत्यर्थः। यथार्थज्ञानविषयत्वात्[१] यथार्थसंसर्गज्ञानविषयत्वात्। साकाङ्क्षधर्मधर्मिविषयकैक[२] ज्ञानविषयत्वाद्वेत्यर्थः। (२१) नन्विदमसुग्रहम्[३]। सामान्यतो वक्तरि यथार्थधीमत्वज्ञानादिति हेत्वन्तरमाह - **आप्तेति।**

औपचारिकीति। ननूपचारः सुब्विभक्तावव्युत्पन्नोऽन्यथाव्यत्ययानुशासनवैयर्थ्यादिति। मैवम्। औपचारिकपदसम्बन्धमात्रेण[४] औपचारिकपदप्रयोगात्। तथा चार्थज्ञानपरोऽथशब्दो विशेषज्ञानपरो वा [५]व्यर्थविशेषशब्द इति भावः।

अत एव आप्तोक्तत्वभ्रमाद्यजन्यत्वनिरूपणमपि सुकरम्। शाब्दन्तु संसर्गज्ञानं प्रथमं न भवति ज्ञानान्तरन्तु भवत्येव।

न चैवं शब्दो न प्रमाणं तदर्थस्य प्रागेव सिद्धेरिति वाच्यम्। तवापि तुल्यत्वात्। ननु तथापि कथमर्थविशेषसिद्धिः विशेषेण व्याप्त्यग्रहादिति चेत् - न। यथा यो यत्र प्रवर्त्तते स तज्ज्ञानातीति सामान्यतोव्याप्तिज्ञाने पाकादौ प्रवृत्तिदर्शनात् पाकविषयककार्य्यताज्ञानानुमानं, यथा च चेष्टाविशेषदर्शनात् दशसंख्याभिप्रायमात्रज्ञाने घटे तच्चेष्टादर्शनात् घटे दशत्वज्ञानं तथा सामान्यतोव्याप्त्यत्रापि विशेषसिद्धिः।

यद्वा इदं वाक्यं साकाङ्क्षै..तदविषयकैकज्ञानहेतुकं आप्तोक्तत्वे सति एतदर्थप्रतिपादकत्वात्

---

[1] T. संसर्गज्ञानुनमानात्

[2] A2 omits - एकैक०

[3] A2, T. - दुर्ग्रहम्

[4] A2 omits औपचारिकपदसम्बन्धमात्रेण

[5] A2 omits व्यर्थ० ; T. - विशेषशब्दोऽपि

अत एवेति। तथा च हेत्वसिद्धिरपीति भावः। ननु पाकविषयककार्यताज्ञानं पाकपक्षकप्रवृत्ति-विषयत्वहेतुनापि संभवतीति न तदर्थमुक्तप्रकाराश्रयणमित्यरुचेर्दृष्टान्तान्तरमाह - **यथा वेति।** पुरुषभेदेन व्यवस्थितिविकल्पमाह - **यद्वेति।**

स्वाकाङ्क्षेति। अगृहीतासंसर्गे तदर्थविषयैकज्ञानहेतुकमित्यर्थस्तन्मते तादृशज्ञानमेव विशिष्टज्ञानं तदेव प्रमेति भावः। अत्र यदा आप्तोक्तत्वे सति यदर्थप्रतिपादकं तत्तदर्थविषयकोक्तरूपज्ञानहेतुकमिति सामान्यतो व्याप्तिः। तेन मद्वाक्यं दृष्टान्तः। न चैवमाक्तोक्तत्वमेव समर्थमिति व्यर्थमधिकम्। आप्तोक्तत्वं हि नोक्तरूपज्ञानवदुक्तत्वं साध्याविशेषात् । अपि तु भ्रमाद्यजन्यत्वमात्रपरम्। तावन्मात्रं च शुकादिवाक्ये व्यभिचारीति विशेषणान्तरमुपात्तम्। तदपि यथाश्रुतम्। यद्यपि शुकवाक्याव्यावर्तकम्। तथापि तदर्थप्रतिपिपादयिषाप्रयुक्तत्वादित्यर्थकतया व्याख्येयमिति न काप्यनुपपत्तिः।

एकेति। न च शुक्तिरजतत्वे इत्यादिसमूहालम्बनविषयैर्व्यभिचारः। न हि तत्रासंसर्गग्रहनियमः। कदाचिदसंसर्गग्रहकालेऽपि समूहालम्बनसम्भवादिति वाच्यम्। धर्मधर्मिविषयकैकज्ञानविषयत्वस्य विवक्षितत्वात्। यथा चैतत् तथोक्तं ***प्रत्यक्षपरिच्छेदे*** इति भावः।

मद्वाक्यवत्, तत एते पदार्थाः परस्परसंसर्गवन्तः साकाङ्क्षत्वे सत्येकज्ञानविषयत्वात् सत्यरजत-ज्ञानविषयवत्, एवं वक्तुर्यथार्थवाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थप्रतीतिपरत्वज्ञानं ततो वेदतुल्यतया शब्दादर्थप्रत्यय इत्यनुवादकः शब्दः वक्तृज्ञानावच्छेदकतया संसर्गज्ञानानुमानात् तदुपजीविसंसर्गानुमानाद्वा वाक्यार्स्य प्राग्वे सिद्धेः।

यत्तु संसर्गाग्रहो भ्रमः तदभावश्च संसर्गग्रहगह एवेति भ्रमाभावेऽनुमीयमाने संसर्गज्ञानमेवानुमितं इत्याप्तत्वानुमानान्तर्गतमेव वक्तृज्ञानानुमानं न तु वक्तुर्ज्ञानानुमाने तल्लिङ्गं इति - तन्न। भ्रमो हि ज्ञानद्वयं अगृहीतभेदं तदभावश्च गृहीतभेदज्ञानं, न हि ज्ञानाभावे सुषुप्तौ भ्रमव्यवहारः, ततो भ्रमाभावनिश्चयानन्तरं वक्तृज्ञानानुमानम्। किञ्च यद्याप्तोक्तत्वानुमानमेव वक्तृज्ञानानुमानं, तर्हि यादृशं लिङ्गं तादृशमेव गमकमस्त्विति।

यत्तु संसर्गाग्रहो भ्रम इति क्वचित् पाठः, स तु सुगमः[१]। यत्र त्वसंसर्गाग्रहे इति पाठस्तत्र संसर्गाग्रहसहिता[२] संसर्गाग्रहो बोद्धव्यः[३]। तदभावश्च विशिष्टाभावः । स च सत्यसंसर्गाग्रहो विशेषणविरहपर्यवसितया संसर्गग्रह एव पर्यवसितः। न च तन्मते संसर्गो न विशिष्टधीविषय इति वाच्यम्। संसर्गविषयतानियतं न विशिष्टज्ञानत्वम्। समवायातीन्द्रियत्वात् । न तु योग्यो संसर्गो न विशिष्टधीः तं गोचरयतीति परसिद्धान्तात् । तथा च क्वचिदप्येवं संसर्गज्ञानसिद्धिरिति भावः। (२२)

न हि ज्ञानाभाव इति। संसर्गाग्रह इत्यर्थः। तथा च सुषुप्तौ भ्रमव्यवहाराभावात् नायं भ्रम इत्यर्थः।[४] ननु सुषुप्तौ नातिप्रसङ्गः। धर्मधर्मिज्ञानादिसहिताग्रहस्य भ्रमत्वादित्यस्वरसादाह - **किं चेति**। अस्मत्पक्षे तु भ्रमाद्यभावः तल्लिङ्गमिति तस्य गौरवादेव न शब्दसहकारित्वमिति भावः।

अत्रोच्यते। यथार्थवाक्यार्थधीपरत्वं न ज्ञातं प्रमोत्पादकं गौरवात् वाक्यार्थनिरूप्यत्वेन प्रथमं ज्ञातुमशक्यत्वाच्च तस्यापूर्व्वत्वात्। यच्च लोके भ्रमादिनिरासानन्तरं वक्तृज्ञानावच्छेदकतया तदग्रे स्वातन्त्र्येण वा पुमभिप्रेतवाक्यार्थज्ञाने तत्प्रतीतिपरत्वं प्रकरणादिना ज्ञायत इत्युक्तं, तन्न। वाक्यार्थमज्ञात्वा अत्रायमभ्रान्त इति ज्ञातुं पुरुषत्वाद्वक्तुर्भ्रमप्रमादसम्भवेन प्रथमं भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यत्वात् प्रवृत्तिसंवादादेर्ज्ञानोत्तरकालीनत्वात् भ्रमादिजन्यविलक्षणत्वेन च शब्दस्याज्ञानात् ज्ञाने वा यादृशोलिङ्गत्वं तस्यैव प्रत्यायकत्वं अव्यभिचारात् वेदेऽपि वाक्यार्थमविज्ञाय तद्यथार्थप्रतीतिपरत्वं न्यायेनापि ज्ञातुमशक्यं विषयनिरूप्यत्वात् प्रतीतेः लोके तात्पर्य्यनिरूपणार्थमशाब्दवाक्यार्थप्रतीतेः प्रथमं त्वयापि स्वीकारात्। अन्यथा वक्तृज्ञानानुमानं न स्यात्। न च लोकवन्मानान्तरात्तदवगमः। वेदार्थस्य तदविषयत्वात् वेदस्य प्रथमं मूकत्वात्। न च न्यायसिद्धे वेदार्थे मानान्तरात्तात्पर्य्यग्रहः। वेदस्यानुवादकतापत्तेः शब्दस्याप्रमाणत्वापत्तेर्व्वा। अज्ञाते

---

[1] A2 adds एव

[2] T. omits संसर्गाग्रहसहिता

[3] T. बोध्यः।

[4] T. omits three sentences.

वाक्यार्थे तर्क-संशययोरप्यभावात्। अयं पदार्थोऽपरपदार्थसंसृष्टो न वेति संशये तर्के वा एककोटौ संसर्ग उपस्थित इति चेत्, न। अनिश्चिते तात्पर्य्यानिश्चयात् तयोरगृहीतासंसर्ग-विषयत्वेनासदर्थविषयकत्वेन वा वाक्यार्थाविषयत्वाच्च। अन्यथा लोकेऽपि ताभ्यामेवोपस्थितिरिति किं वक्तृज्ञानानुमानेन।

वस्तुतस्तु यदि यथार्थतात्पर्य्यकत्वं ज्ञानं शाब्दप्रमोत्पादकं तदा लोकवेदयोस्तादृशपद-स्मारितत्वेन पदार्थसंसर्गानुमितिसम्भवात् न शब्दः प्रमाणं स्यात्।

ननु पूर्वोक्तयुक्तिरसम्यक्। तथा हि पूर्वोक्तानुमानैः पारिशेष्याद्वाक्यार्थयथार्थज्ञानं सिद्धम्। वेदे तु सामान्यतो वाक्यार्थोपस्थित्या सुग्रहं तात्पर्यम्। न च लोकेऽप्येवमस्तु। किमर्थमशाब्दसंसर्गज्ञानाभ्युपगम इति वाच्यम्। विशेषतः उपस्थितिं विना प्रकरणाद्यनवतारात् ज्ञानपूर्वकतामननुमाय, तद्ग्रहाशक्यतायाश्चोक्तत्वात्। यदपि तयोरगृहीतेत्यादि, तदप्यसत्। वास्तवकोटौ संशयस्य यथार्थादित्यस्वरसादाह - **वस्तुतस्त्विति।**

अपि च पुंवाक्यस्य दोषविशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषाद्दोषाजन्यत्वनिश्चदशायां वेदतुल्यासामग्री पुंवाक्येऽपि वृत्तेति तत एवार्थनिश्चयात् वेदवत्तस्यापि प्रामाण्यं, अनुमितानुमानस्य व्याप्तिस्मृत्यादिविलम्बितत्वात्। एतेनाबाधितार्थपरत्वं लोके वेदे च प्रमापकं लोके वाक्यार्थो बाधितोऽपि दृष्ट इति श्रोतुः प्रमाणावतारं विना न बाधाभावनिश्चयः स च क्वचिच्छ्रोतुरिन्द्रियेण क्वचिद्वक्तुराप्तत्वानुमानेन वेदे तु न्यायात्तन्निश्चयः तदर्थस्य प्रमाणान्तराविषयत्वात् न तत्र शङ्केति सामग्रीभेद इति निरस्तम्।

प्रथमं भ्रमाद्यभावस्याप्तत्वस्य वा निश्चेतुमशक्यत्वात् वेदस्यानुवादकतापत्तेश्च। तस्मात् भ्रमाद्यजन्यत्वं आप्तोक्तत्वं अबाधितार्थकत्वंयथार्थतात्पर्य्यकत्वं निरस्तव्यभिचारशङ्कत्वं अन्यद्वा व्यभिचारिव्यावृत्तं यत्प्रमोत्पादकं तत् स्वरूपसत् न ज्ञातम्। अन्यथा तादृशस्य

वाक्यार्थाव्यभिचारितया तादृशपदस्मारितत्वात् लिङ्गादेव संसर्गसिद्धिः स्यादिति जितं वैशेषिकैः। अत व्यवहारानुमितव्यवहर्त्तुकार्य्यान्वितज्ञाने उपस्थितत्वेन पदानां हेतुत्वग्रहादन्विताभिधायकत्वं गृहीतं न तु लिङ्गज्ञानस्य तदानीं शब्दस्य लिङ्गत्वेनानुपस्थितेरिति चेत्। न। लिङ्गाभावेनैव शब्दादन्वितज्ञानोपपत्तेर्नाकाङ्क्षादिमच्छब्दत्वेन कारणता गौरवात्। शब्दस्य लिङ्गत्वं सम्भवदपि बालेन न ज्ञातमिति चेत्, सोऽयं बालस्य दोषो न वस्तु न इत्यादि वक्ष्यते।

किञ्चैवं लोकवद्वेदेऽपि अनुवादकता स्यात्। एतेन वाक्यार्थतात्पर्य्यग्राहकानुमानात् तात्पर्य्यावच्छेदकतया तदुपजीविनोऽनुमानात् स्वातन्त्र्येण वाक्यार्थसिद्धेर्न शब्दः प्रमाणमिति वैशेषिकमतमपास्तम्। यथार्थतात्पर्य्यग्रहस्य वाक्यार्थबोधाहेतुत्वात्।

नन्विदमप्ययुक्तम् । व्याप्त्यस्मृत्यानुमाननवतारादिति तद्दोषसाम्यमाह - **अपि चेति**।

नन्वाकाक्षादिमच्छब्दत्वेन कारणत्वं प्रथमतो गृहीतमिति तद्रक्षार्थं लिङ्गतया हेतुत्वं न शक्यकल्पनम्। सा हि न शब्दस्य, किं त्वर्थवृत्तेः। शब्दवृत्तेर्वा धर्मस्येत्यरुचेराह - **किं चेति**।

यत्तु ज्ञायमानकरणे इति, तन्न, यथार्थतात्पर्य्यकत्वादेः प्रथमं ज्ञातुमशक्यत्वेनानुमानस्य बाधितत्वात् व्याप्त्यसिद्धेश्च। न हि व्याप्तिः शब्दशक्तिश्च कारणम्, किन्तु तद्बीः। अतीतेऽनुमिति दर्शनात्। अपभ्रंशादौ शक्तभ्रमादन्वयबोधाच्च।

न च सैवोपयुज्यत इति साध्यम्, प्रथमं तदसम्भवात्। तस्मात् यत् अर्थाव्यभिचारित्वेन ज्ञानं करणं तच्च व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते। अन्यथा शब्दस्यार्थव्यभिचारितया ज्ञातस्य ज्ञापकत्वे लिङ्गतापत्तेर्व्वज्वलेपायमानत्वात्। स्यादेतदनाप्तोक्ते बाधकेनार्थाभावदर्शनात् आकाङ्क्षादि-मद्वाक्यत्वेन सदर्थकं बाधितार्थकं वेति संशयान्न तावन्मात्रादर्थनिश्चयः।

न हि संशायकमेव निश्चायकम्, इत्यधिकमपेक्षणीयमिति चेत् - न । अर्थसंशयस्य तद्बाधसंशयस्य वा प्रमाणप्रतिबन्धकत्वात्। वन्हि-तद्बाधयोः संशयेऽपि प्रत्यक्षानुमानादिना

न चेति। तद्धीत्वादिति। हेतुनेति[१] शेषः। यद्वा प्रकृतपक्ष एवोपयोगिज्ञानविषयत्वेन साध्यः[२]। यथोक्त एव हेतुः। ज्ञानोपयोगित्वस्याजनके[३] यथाकथंचिदुपयोगित्वपरत्वेन[४] सार्थकत्वादिति[५] भावः। निरुपाधौ बाधानवकाशादुपाधिमाह - **तस्मादिति।**

अर्थाव्यभिचारित्वज्ञाननिबन्धनप्रवृत्तिकप्रमाणोपयोगित्वमेव साधनावच्छिन्नसाध्यव्यापक उपाधिरित्यर्थः। ननु शब्दस्यापि तथाभूतप्रमाणत्वेनोपाधिः। साधनव्यापक एव स्यादित्यत आह - **अन्यथेति**। तथा च शब्दस्य न तथाभूतप्रमाणत्वमिति न साधनव्यापकतेति भावः। **अर्थसंशयस्येति।** नन्विदमयुक्तम्। अर्थाभावनिश्चयत्वापेक्षयाऽर्थाभावज्ञानत्वस्य लघुत्वेन प्रतिबन्धकता-वच्छेदकतया संशयप्रतिबन्धकत्वौचित्यात्।

न च प्रमाणमात्रोच्छेदः, उत्तेजकाभावविशिष्टस्य प्रतिबन्धकस्य कार्याभावप्रयोजकत्वात्। प्रमाणप्रवृत्तिस्थले च प्रतिबन्धकसंशयोत्तेजकविशेषदर्शनादि[६] सत्त्वात्। अत एव यद्धीसामग्री यत्र प्रतिबन्धिकाविशेषादर्शन (२३) दशायां तद्विपरीतव्याप्तिरपि तद्बलात्[७] व्यभिचारसंशयस्यापि अव्यभिचारग्रहप्रतिबन्धकत्वमिति सर्वसम्मतसिद्धान्तः। प्रकृते तूत्तेजकाभावात् संशयः प्रतिबन्धक एव। न चापरकोटिविषयकतया स एव संशय उत्तेज इति वाच्यम्। एकस्योभयात्मकत्वविरोधात्। प्रतिबन्धकप्रतिबन्धकस्योत्तेजकतयाऽभेदे प्रतिबध्यप्रतिबन्धकत्वाभावात्। ग्राह्याभावे[८] वा भवदुक्तक्रमेणापि

---

[1] T. हेतोरिति
[2] T. ०विषयत्वे साध्ये
[3] T. ०जनकत्वपरस्य
[4] T. ०परत्वादिति
[5] T. omits
[6] T. ०दर्शनादेः
[7] A2. - तद्विपरीतव्याप्तिरपि तद्बलात् :: तद्धीरपि व्याप्तिबलात्
[8] A2 - ०भावे

क्वचिदपि संशयस्याप्रतिबन्धकत्वापातात् विद्यमान [१] कोटिविषयतानियमात् । न चास्माकमपीष्टमेवेति वाच्यम्। अर्थाभावनिश्चयत्वेन प्रतिबन्धकत्वस्य गुरोरङ्गीकारापत्तेः। मैवम्। अर्थाभावज्ञानत्वेन प्रतिबन्धकत्वे सन्देहसाधारण्येन प्रमाणमात्रोच्छेदापत्तेः। न चोक्ता गतिः। तथा सति साधारणरूपेण प्रतिबन्धकत्वे उत्तेजकाभावविशिष्टतदवच्छिन्नाभावो हेतुरित्युत्तेजकसद्भावे व्यतिरेकनिश्चयसद्भावेऽपि [२] प्रमाणप्रवृत्त्यापत्तेः। विशेषदर्शनाद्यभावसहितग्राह्याभावदर्शनाभावस्य विशेषदर्शनकालीनबाधावतारेऽपि सत्त्वात् [३]। न च व्यतिरेकनिश्चयाभावः [४] तत्त्वेनैवोत्तेजकाभावसहितसंशयाभावश्चेत्थमिति द्वयं हेतुः। उक्तानुगतरूपोल्लङ्घने द्वितीयहेतुतायां प्रमाणाभावेन क्वचिदपि ग्राह्याविरहसन्देहस्य प्रतिबन्धकत्वालाभात्। किं चोत्तेजकं न सकलज्ञानेष्वनुगतं क्वचिच्चाप्यदर्शनादौ [५] क्वचिदतिदेशवाक्यार्थस्मृत्यादेः क्वचिदिन्द्रियाद्यसन्निधिकालीनार्थसन्देहे तत्सान्निध्यादेरेव उत्तेजकत्वेन वाच्यत्वात् [६] । तथा च तत्तदभावसाहित्यं ग्राह्याभावज्ञाने विशेषणं तावदभावसाहित्यं वा। नाद्यः, अन्यतरसामग्रीसत्त्वे कार्यानुदयप्रसङ्गात्। नापरः, गौरवात्। उत्तेजकाभिमततत्तत्सामग्र्यैव कार्यसम्भवेन विशिष्टज्ञानाभावकारणतायां मानाभावात्।

अर्थनिश्चयात् अन्यथा प्रमाणमात्रोच्छेदः, तत्पूर्व्वमर्थ-तद्बाधसंशयात्। विनाप्यर्थं वाक्यरचना सम्भवत्यत एतस्यायमर्थो न वा, एतत्सदर्थकं न वा, एतज्जन्यज्ञानं सद्विषयकं न वेति संशयस्यार्थावगमोत्तरकालीनत्वाच्च।

अपि च संशयस्य प्रतिबन्धकता, तदास्य यदि निश्चयसामग्र्यां सत्यामपि कार्यानुदयः। न चैवं व्याप्यदर्शनादिसत्त्वेऽनुमित्याद्यावश्यकत्वात्।

---

[1] T. भाव०
[2] T. ०निश्चये सत्यपि
[3] A2 - संभवात्
[4] T. omits
[5] A2 ०अदर्शनादेः
[6] A2 - ० वक्तव्यत्वात्

यत्तु यद्धीसामग्रीत्यादिव्याप्तिबलात् व्यभिचारसन्देहस्य[1] (२४) प्रतिबन्धकतेति, तदपि न। तत्र तद्धीरपीत्यस्य तद्धीत्वेन प्रतिबन्धकत्वं नार्थः। किन्तु निश्चयसामग्र्यभावादेव तद्धीकालोऽपि न कार्यमित्यादौ तात्पर्यम्। व्यभिचारसन्देहस्य तु न ग्राह्याभावसन्देहत्वेन प्रतिबन्धकत्वम्। अपि तु अन्वयाद्यनुविधानात्तत्त्वेनैव। कथमन्यथा अन्योऽन्याभावगर्भव्याप्तावपि अत्यन्ताभावगर्भव्यभिचारधीः प्रतिबन्धिकेति दिक्।।

ननु संशयो मास्तु प्रतिबन्धकः। न हि संशयप्रतिबन्धकत्वाक्षेपार्थोऽपि तूक्तसामग्रीतः संशयः स्यान्न निश्चयः। न हि संशयसामग्र्येव निश्चयसामग्री। न वा विशेषदर्शनादिरत्र संशयसामान्या[2]पवादकोऽस्तीति परिहारान्तरमाह - **विनापीति।**

अयमाशयः - न तावदनुल्लिखितार्थविशेषं सादर्थ[3] बाधितार्थं[4] न वेति संशयज्ञानमुत्पत्तुमर्हति । क्वचिदर्थे वाक्यानां बाधेन क्वचिच्चाबाधेन सामान्यतो द्वयी कोटिरविरोधिन्येवेति [5]संशयानुपपत्तेः। सर्वत्र वाक्ये सामान्यतः कोटिद्वयप्रमितेः [6] न हि फलोपधानगर्भः सन्देहोऽसम्भवात्। अपि तु बाधितार्थप्रतीतियोग्योऽन्यथा वेति तदाकारः । स चोक्तयुक्त्या न संभवतीति वाक्यार्थविशेषगर्भो वाच्यः। न चापूर्वः स वाक्यार्थावगमाच्छाब्दात् पूर्वमवगत इति।

तस्मादाप्तोक्तत्वं भ्रमाद्यजन्यत्वं अबाधितार्थकत्वं यथार्थवाक्यार्थप्रतीतिपरत्वं वा ज्ञातं अनुगतमपि न हेतुः प्रथमं ग्रहीतुमशक्यत्वात्।

---

[1] A2, T. - ०संशयस्य
[2] A2, T. - ०सामग्री०
[3] A2 - सन्दर्शकम्
[4] T. सदर्थं
[5] T. संशय०
[6] T. ०प्रतीतेः

एतस्येति। एतस्यार्थो धर्मी अयं न वा। उपस्थितधर्मवान्न वेत्यर्थः। यथाश्रुतेन तु वाक्यार्थे वाक्यप्रतिपाद्यत्वकोटिकः संशयो लभ्यते। स त्वनुपयुक्तोऽविवक्षितश्च। तत्समानविषयकसंशयान्तरयोः प्रदर्शनादित्यवधेयम्[१]।

वस्तुतस्तु संदेहसामग्र्यां न निश्चयः सन्देहसमानविषयको न त्वन्योऽपि। तथा संशयसामग्री न निश्चयजननीति[२] अस्या अप्ययमर्थो यावत्संशयसामग्रीतत्समानविषयं[३] निश्चयं न जनयति। तथा च प्रकृते आकाङ्क्षादिमद्वाक्यत्वेन सदर्थमन्यथा वेति संशयसामग्रीत्वमिति तदन्यतरनिश्चयं सामग्रीमजनिष्ट[४]।

एवं चायं पदार्थसंसर्गोऽपरपदार्थवृत्त्यत्यन्ताभावप्रतियोगी न वेति सन्देहो नाकाङ्क्षादिमद्वाक्यत्वेन [५]समानधर्मेण[६] (२५) व्यधिकरणत्वादित्याकाङ्क्षादिमद्वाक्यत्वेन ज्ञातादयं [७]पदार्थोऽपरपदार्थनिष्ठात्यन्ता-भावप्रतियोगी न वेति[८] सन्देहे सत्यप्युभयपदार्थसंसर्गबोधे किं बाधकम्। न चोक्तसंशय एव प्रतिबन्धकोऽस्तु। तत्रेदमुपतिष्ठते[९] मौलमुत्तरमिति सर्वमवदातम्।

---

[1] A2 - बोध्यम्
[2] A2 - निश्चयं न जनयतीति
[3] A2 - या यत्सामग्रीत्वमित्यन्यतरं ; T. omits - ०विषय०
[4] T. ०निश्चयो मा जनिष्ट
[5] T. omits
[6] T. adds जनितो
[7] A2 - पदार्थसंसर्गो
[8] T. ०प्रतियोगिनळिनी०
[9] A2 - अनुतिष्ठते

किन्तु तात्पर्य्यग्राहकत्वेनाभिमतानां न्यायजन्यज्ञानप्रकरणादीनामन्यतरत् तात्पर्य्य-व्याप्यत्वेनानुगतम् । तथाकाङ्क्षासत्तिनिश्चयः, तद्विपर्य्यये संशये च शाब्दज्ञानाभावात्। योग्यतायाश्च ज्ञानमात्रं हेतुः तत्संशये विपर्य्यये प्रमायाच्च वाक्यार्थज्ञानात्। तथा विभक्त्यादिसमभिव्याहारः सम्भूयोच्चारणाच्च शाब्दज्ञानमात्रे कारणानि नानार्थे श्लिष्टे चानेकोपस्थितावपि प्रकरणादिवशादेकमर्थमादायान्वयबोधः।

तात्पर्यव्याप्तत्वेनेति। ननु कथमेतत्। न हि तात्पर्यव्याप्तत्वेन ज्ञानत्वमनुगमकम्। तात्पर्यज्ञानापत्तेः। लाघवेन तद्धेतुतापत्तेश्च। किन्तु स्वरूपसत् तात्पर्यव्याप्तत्वं न च तच्छाब्दबोधसामान्ये हेतुः [१]। अतात्पर्यव्याप्येऽपिप्रकरणभ्रमेण ज्ञानदर्शनात्। न च प्रमासामग्रीयं शाब्दबोधमात्रे [२] कारणानीत्याद्यग्रिमग्रन्थविरोधात्। आकाङ्क्षादि [३] समभिव्याहारानुपपत्तेः। [४] शब्दादिवत्तात्पर्यग्रहे तात्पर्यं व्याप्यत्वा [५] सम्भवश्चेति।

अत्राहुः - तात्पर्यग्राहकतावच्छेदकावच्छिन्नत्वस्य [६] स्वरूपतोऽनुगमकत्वम्। अस्ति च [७] तत्रार्थव्याप्यत्वग्रह [८] योग्यतया आभासे अनाभासे शब्दे चेति।

तद्विपर्यय इति। तदभान [९] निश्चय इत्यर्थः। तथा च यत्संशयव्यतिरेकनिश्चयावित्यादिव्याप्तिबलात् तन्निश्चयहेतुतेति भावः। **विभक्तीति**। यद्यप्यस्याकाङ्क्षयैव गतार्थता, तथापि तद्द्वारापि अनुकूलत्वमस्तीति अवश्यापेक्षणीयतया गणित इति मन्तव्यम्। **संभूयेति।** संभूयैकार्थप्रतिपादकत्वज्ञानमित्यर्थः। ननु यथाश्रुतमासत्त्यानुगतार्थत्वात्। मौनिश्लोकाव्याप्तेश्चेति द्रष्टव्यम्।

---

[1] A2 adds - संभाव्यते ।
[2] A2 omits ०मात्रे
[3] T. adds ०ज्ञानमात्र०
[4] A2. T. - शब्दादेव
[5] T. तात्पर्यज्ञान०
[6] A2 - स्वरूपसतो
[7] A2 - तत्तात्पर्य०
[8] T. ०तत्तात्पर्य०
[9] T. तदभाव०

लक्षणा च न तात्पर्य्यानुपपत्त्या किन्त्वन्वयानुपपत्त्यैव प्रकरणाद्भोजनप्रयोजनकत्वेनावगत-प्रवेशनस्य यष्ट्यन्वयानुपपत्तेः। अजहत्स्वार्थायां प्रकरणादेव छत्रि तदितरस्य यान्तीत्यनेन गमनकर्त्त्वमवगतं तदन्वयानुपपत्तिश्चत्रिमात्रे। पचतीत्यस्य कलायमित्यन्योक्तेन समं नार्थप्रत्यायकत्वं समभिव्याहाराभावात्, तवापि तस्य तात्पर्य्यग्राहकत्वात् सहोच्चरितानां सम्भूयार्थप्रत्यायकत्वस्य व्युत्पत्तिसिद्धत्वात्।

ननु तात्पर्यज्ञाना[1]नपेक्षणे कुतो नानार्थे विनिगमनेत्यत आह - **नन्विति[2]।**

लक्षणेति। तथा च तदनुरोधेनापि न तात्पर्यग्रहे हेतुरिति भावः।

नन्वन्वयानुपपत्तिर्यदि लक्षणाबीजं तर्हि शक्येऽन्वययोग्ये यष्टीः प्रवेशयेत्यादौ अजहत्स्वार्थे[3] च सा सा न स्यादिति तत्रान्यथासिद्धिमाह - **प्रकरणादिति**। न हि भोजनतात्पर्यकत्वपर्यन्तं तत्रापि गह्यते। येनोक्तदोषशङ्का। अपि तु भोजनानुकूलत्वमात्रम् एवमग्रेऽपीति स्मर्तव्यम्[4]।

तदन्वयेति। आकाङ्क्षाविरहान्नत्वयोग्यत्वात् गमनस्याव्यासज्यवृत्तित्वात् प्रत्येकमपि योग्यत्वात् आकाङ्क्षा तु नास्ति। उभयघटितगमनत्वावच्छिन्नस्यैकदेशे निराकाङ्क्षत्वादित्यग्रे वक्ष्यत एवेति स्मर्तव्यम्।

समभीति। संभूयैकार्थप्रतिपादकत्वाज्ञानादित्यर्थः।

सहेति। यद्यपि त्रिपदसमस्यादौ [1]सहोच्चारणेनास्त्येव । तथाप्येकपुरुषोक्तत्वं न सहोच्चारः। किन्तु एकवाक्यतापन्नत्वम्। तत्तु क्वचित् सहोच्चारात्क्वचित् त्रिपदसमस्यादावन्योऽन्यव्यवस्थावचनात् क्वचित् प्रकरणादित एव[2] सुज्ञायमिति सर्वमवदातम्।

---

[1] A2 omits ०ज्ञान०

[2] A2 omits

[3] A2 - अजहत्स्वार्थस्थले

[4] T. ०मात्रग्रहेऽपि मन्तव्यम्।

अन्ये तु नानार्थे लक्षणायाच्च नियतोपस्थित्यर्थं पदार्थे तात्पर्य्यग्रहापेक्षा तेन विना तदभावात् न वाक्यार्थे, तदज्ञानेऽपि प्रकरणादिना सैन्धवपदं तुरगपरं काकपदं उपघातकपरमिति हि प्रतियन्ति। अन्यत्रान्वयप्रतियोग्युपस्थितिः तात्पर्य्यग्रहं विनैवेति न तदपेक्षा।

वस्तुतस्तु इतरपदस्य इतरपदार्थसंसर्गज्ञानपरत्वं तात्पर्य्यं तच्च वेदे न्यायादवधार्य्यते लोके न्यायात् प्रकरणादेर्व्वा। अत एव शाब्दबोधे नानियतहेतुकत्वं तच्चेतरपदराथसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रहः हेतुर्न तु विशिष्य। तच्च स्वपरपदार्थयोः संसर्गानुभवजननं विना अनुपपन्नमिति पदानि सम्भूय जनयन्ति।

ननु [३] सकलमिदमनुपपन्नम्, प्रकरणादीनां [४] सहकारित्वेऽननुगमात्। न च तात्पर्यग्राहकता वच्छेदकावच्छिन्नत्वेन तेषामनुगमः। तावदपेक्षया तात्पर्यस्य लघुत्वात् एकत्वाच्च। न च तद्ग्रहाशक्यतया गौरवं प्रामाणिकम्। सामान्यतः तस्य सुग्रहत्वात्। एकदेशिमतमयुक्ततरम्। नानार्थे उपस्थित्यर्थमिति कोऽर्थः। किमनुभवार्थम् अथ [५] स्मृत्यर्थम्। नान्त्यः, तात्पर्यग्रहात् प्रागेव स्मरणात्। अन्यथा क्व तात्पर्यनिरूपणम् । अतात्पर्यविषयस्य स्मरणाच्च। नाद्यः, अन्वययोग्यत्वे नानार्थानुभवस्य युगपत् वक्ष्यमाणत्वात्। अन्वयायोग्यत्वे तत एव विनिगमनात्। [६] अपि च नानार्थे नानार्थतयोपस्थित इत्यवश्यं वाच्यम्। अन्यथा अन्यतरमात्रार्थव्युत्पत्तौ तात्पर्याग्रहेऽप्यन्वयबोधात्। तथा च नानार्थे तात्पर्यग्रहोऽन्यतरान्वयप्रतिबन्धक उक्तरीत्या निर्वहति । न त्वितरान्वयधीहेतुः। उक्तसामग्र्या एव तत्संभवात्।

---

[1] A2 - सहोच्चारो

[2] T. प्रकरणादिति

[3] A2, T. - सर्वम्

[4] A2, T. add शब्द०

[5] A2 उत

[6] A2 – Here after five sentences are omitted.

अत एव नानार्थे विनिगमना। तदनुपपत्तिरेव लक्षणाबीजं तदभावादेव पचति पदे न स्मृतकलायान्वयबोध इति सिद्धं शब्दस्य प्रमाणान्तरत्वम्। तस्य च निराकाङ्क्षादौ संसर्गज्ञानाजनकत्वात् आकाङ्क्षादिकं सहकारीति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शब्दप्रामाण्यवादः।

किं च शाब्दानुभवापेक्षया नानार्थलाक्षणिकानुभवस्य विशेषत्वात् लाक्षणिकानुभवकत्वेन नियतानुभवपक्षाश्रयणनुपपत्तेश्च इत्याद्यस्वरसादाह - **वस्तुतस्त्विति।** घटपदमानयनान्वित-स्वार्थप्रतीत्युद्देश्यकम्, आनयनपदं घटान्वितस्वार्थप्रतिपादनपरम्। अथ वा घटपदसमभिव्याहृतापर-पदार्थान्वितघटप्रतीतिपरमानयनपदं तथाभूतापरपदार्थान्वितानयनपरम्। एकस्य विशेषत उपस्थितस्याप्यपरस्य सामान्यत उपस्थितस्यान्वये प्रकरणादिना तात्पर्यं गृह्यत इति तात्पर्यम्। अत एव यत्र निरन्तरवाक्यार्थबोधद्वये वक्तुरिच्छा, तदा तद्ग्रहे निरन्तरवाक्यार्थबोधद्वयं सामग्रीसत्त्वात्। निरन्तरानुमितीच्छायां(२७) निरन्तरानुमितिवत् । न चापरापरवाक्यार्थबोधापत्तिः। पदोपस्थित्यभावादिति।।

इति शब्दप्रामाण्यवादालोकः ।।[1]

[1] Adyar Manuscript No. PM 1600 breaks here.

अथाकाङ्क्षावादः

अथ केयमाकाङ्क्षा। न तावदविनाभावः। नीलं सरोजमित्यादावभावात्। विमलं जलं नद्याः कच्छे महिष इत्यत्र जलान्वितनद्या अविनाभावात् कच्छेसाकाङ्क्षतापत्तेः।

नापि समभिव्याहृतपदस्मारितपदार्थजिज्ञासा,अजिज्ञासोरपि वाक्यार्थबोधात् विश्वजिता यजेत द्वारं इत्यत्रापदार्थयोरप्यधिकारिणोऽध्याहृतस्य पिधानस्य चाकाङ्क्षितत्वाच्च। तत्र शब्दकल्पनक्षेऽपि घटः कर्म्मत्वमानयनं कृतिरित्यत्र जिज्ञासितस्यानयनादेराकाङ्क्षितत्वापत्तेः।

अथ जिज्ञासायोग्यता सा। जिज्ञासाच विशेषाज्ञाने भवति, योग्यता च श्रोतरि तदुच्चारणजन्यसंसर्गावगमप्रागभावः। विमलं जलं नद्याः कच्छे महिष इत्यत्र तात्पर्य्यवशात् कदाचित् नद्याः कच्छे संसर्गावगमात् तत्प्रागभावसत्त्वेऽपि श्रोतरि तदुच्चारणेनतात्पर्य्यवशात् जलान्वितनद्याः कच्छे संसर्गावगमोनेति न तत्प्रागभावः। घटः कर्म्मत्वमानयनमित्यत्रापि तथेति चेत् - न। निराकाङ्क्षे तदुच्चारणजन्यसंसर्गावगमप्रागभावस्य सिद्धसिद्धिपराहतत्वात्।

किञ्च यत्रैकोविमलं जलमित्यश्रत्वैव तात्पर्य्यभ्रमेण वा नद्याः कच्छान्वयपरत्वमवैति। अपरः समस्तमेव श्रुत्वा नद्या जलान्वयपरत्वमवधारयति, तत्रोभयोरपि तदुच्चारणजन्यसंसर्गावगमात् नद्या इत्युभयसाकाङ्क्षं स्यात्।

अथ आकाङ्क्षावादालोकः

ननु श्रोतृनिष्ठप्रागभाव-प्रतियोगिशाब्दानुभवे तदुच्चारणजन्यत्वमाकाङ्क्षा। उच्चारणपदं चोपस्थितिपरम्। मौनिश्लोकानुरोधात् तथा चानाकाङ्क्षे [१] तादृशज्ञाने तदजन्यत्वमिति [१] न सिद्ध्यसिद्धिव्याघात इति दोषान्तरमाह - **किं चेति।**

[1] T. साकाङ्क्षे

अपि च प्रागभावाभावस्य कारणान्तराभावव्याप्तत्वात् तत एव कार्य्याभाव इति किमाकाङ्क्षया।

एवञ्च योग्यतासत्तौ अपि न हेतू त्रयोग्ये अनासन्ने च तदुच्चारणजन्यसंसर्गज्ञानाभावेन तत्प्रागभावाभावात्। न चैवं बाधाभावस्यानुमित्यादावपि हेतुत्वम्। प्रागभावाभावेनैवकार्य्याभावात् प्रागभावस्य च कार्य्यमात्रहेतुत्वात्। शब्दे नासाधारण्यम्, उत्थितोत्थाप्याकाङ्क्षयोरुत्कर्षापकर्षौ न स्यातां प्रागभावे तद्भावात्।

नन्विदमप्ययुक्तम्, उभयसंसर्गतात्पर्य इष्टापत्तेः। अन्यथा प्रसङ्गाभावात् तदुच्चारणजन्यतात्पर्यविषय-संसर्गावगमप्रागभावस्योक्तक्रमेण विवक्षितत्वादित्यस्वरसादपरं दोषमाह[२] - **अपि चेति।** प्रकृतप्रागभावा-भावस्य हेत्वन्तराभावव्याप्यतया तत एव कार्याभाव[३] इति [४]क्रमिकाकाङ्क्षाया सहकारिण्येत्यर्थः।

नन्विहान्याभावादभाव एव न[५] कार्यस्य, किन्तु प्रागभावाभावादेवेत्यत आह - **एवं चेति**।

ननु यथा कार्यमात्र [६] कारणत्वेन प्रागभावः क्लृप्त इति हेतुरेवं विशिष्टज्ञानं प्रत्यपि [७] विशेषणज्ञानरूपासत्तिः। असंसर्गग्रहरूपा योग्यता च हेतुरिति कथमनेन तयोरन्यथासिद्धिरित्यत आह - **न चैवमिति।** न ह्यनुमित्यादावपि तद्धेतुत्वम्, येन सामान्यसामग्री सा स्यादिति भावः।

ननु न तत्र प्रागभावाभाव:बाधावतारनिवृत्तौ तत्रैवानुमितिदर्शनादित्यतो दोषान्तरमाह - **प्रागिति**।

ननु ज्ञातहेतुतामात्रेण असाधारण्यं स्यादित्यरुचेर्दोषान्तरमाह - **उत्थितेति।**

---

[1] T. तज्जन्यत्वमिति

[2] T. अपि दूषणमाह

[3] ADYAR manuscript no. PM 1600 breaks here.

[4] T. ०किं

[5] T. एवं

[6] T. कार्यमात्रं प्रति

[7] T. adds विशेषणज्ञानस्य हेतुतेति

अथ ज्ञाप्य-तदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सत्यजनिततात्पर्य्य-विषयान्वयबोधत्वमाकाङ्क्षा, घटमानयतीत्यत्र घटमित्युक्ते किमानयति पश्यति वा। आनयतीत्युक्ते किं घटं अन्यद्वेति जिज्ञासा भवति। घटः कर्म्मत्वमानयनं कृतिरित्यत्राभेदेन नान्वयोऽयोग्यत्वात्, घटस्यानयनमिति तु नान्वयबोधः घट इति पदात् सम्बन्धित्वेन घटस्यानुपस्थितेः।

राज्ञ इति पुत्रेण जनितान्वयबोधत्वात् न पुरुषमाकाङ्क्षतीति चेत्, तर्हि नाम-विभक्ति-धात्वाख्यातार्थानां घट-कर्म्मत्वानयन-कृतीनां स्वरूपेणोपस्थितिर्नान्वयप्रकारकजिज्ञासानुकूलेति तत्र नाकाङ्क्षा स्यात्। घटः कर्म्मत्वमानयनं कृतिरित्यत्र घटमानयतीत्यत्रेवान्वयबोधः स्यात्। न हि तत्र पदार्थस्वरूपाणां एतद्वैलक्षण्येनोपस्थितिः। त्रयाणां तुल्यवत् स्मरणे प्रथमं यतो राज्ञ इति पुरुषेण नान्वेति किन्तु पुत्रेण तत एवाग्रेऽपि व्यर्थमजनितान्वयबोधत्वमिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शब्दाकाङ्क्षावादपूर्व्वपक्षः।।

अथ शब्दाकाङ्क्षावादसिद्धान्तः।

उच्यते। अभिधानापर्य्यवसानमाकाङ्क्षा यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तदपर्य्यवसानं, नाम-विभक्ति-धात्वाख्यात-क्रिया-कारकपदानां परस्परं विना न परस्परस्य स्वार्थान्वयानुभवजनकत्वम्। परमते नीलोघटोऽस्ति नीलं घटमानयेत्यादौ नामार्थानां कारकाणाञ्च न परस्परमन्वयबोधः विशेषणान्वितविभक्त्यर्थानन्वयादिति न विशिष्टवैशिष्ट्येनान्वयः किन्त्वार्थः समाजः। अस्माकन्तु नील-घटयोरभेदानुभवबलादभेद एव संसर्गः विशेषणविभक्तिः साधुत्वार्थम्।

यस्येति। यस्य पदस्य समभिव्याहृतयत्पदव्यतिरेकप्रयुक्तमन्वयाननुभावकत्वं तस्य पदस्य पर्यवसानम्। अन्वयाननुभावकत्वमाकाङ्क्षेत्यर्थः। अत्र च यस्य पदस्य पदान्तरव्यतिरेकप्रयुक्त इत्यत्र पदपदोपस्थितिपरे। अतो न मौनिश्लोकादौ अव्याप्तिः। पदस्य स्वभावत एवाननुभावकत्वेनासंभवश्चेति स्मर्तव्यम्। तेन घटो भवतीत्यपि वाक्यं न [१]रक्तसाकाङ्क्षं भवति। रक्तपदसमभिव्याहाराभावात् । नापि जनितान्वयबोधेऽतिव्याप्तिः। तदानीमन्वयाननुभावकत्वाभावात्। अत एव स्वरूपयोग्यतातो नास्याभेदः। सा हि यावद्वस्तुभाविनी [२] जनितफलेऽपि तिष्ठति। (२८) इयं तु फलजननात् प्रागेव। कश्चित्तु सहकार्यभावगर्भा योग्यता। इयं तु पदरूपसहकारिविशेषाभावगर्भेति ततो भेदः। केचित्तु [३] अस्तु स्वरूपयोग्यता। न चैतावतैव वा हेतुरिति। इयं स्वरूपयोग्यतैव । न चेयं हेतुः। किन्तु एतद्भानमित्यन्ये।

ननु यद्यनुभवजननात् प्रागेवेयं तर्हि प्रागभावपर्यवसानेनैव [४] इति [५] तत्पक्षोक्तदोषापत्तिः। अत्यन्ताभावप्राभावसाधारणाभावगर्भत्वादस्याः स्वरूपयोग्यतायाश्च सर्वत्रानादिसंसर्गाभावगर्भत्वात् ।

---

[1] T. रक्तिमा०
[2] T. ०स्थायि०
[3] T. कश्चित्तु
[4] T. ०पर्यवसन्नैव
[5] T. न

न चौत्कथाद्यनुपपत्तिरेवमपीति वाच्यम्। ससम्बन्धिकपदान्तरसमभिव्याहारतात्पर्यग्रहादेवाकाङ्क्षाया उत्थितत्वादिति[१] न किञ्चिदेतत्। अनेन रूपेण प्रयोजकत्वमिति असाधारण्यम्। न हि स्वप्रागभाव एव हेतुरेतावता लभ्यते। किं तु अन्वयानुभवस्य प्रतिबन्धकतया तदभावस्य संसर्गाभावत्वेन कारणत्वात्। न च ध्वंसोऽप्येवं हेतुः स्यादिति वाच्यम्। ध्वंससाधारणावच्छेदेनापि हेतुत्वे तत्काले सामग्र्यन्तराभावादेव कार्याभावात्। न ह्यन्वयानुभवध्वंसकाले पदोपस्थित्यादिकमस्ति।

वस्तुतस्तु - पदान्तरव्यतिरेकप्रयुक्तत्वविशेषणादेव ध्वंससाधारण्यं नास्ति। न हि हेत्वभावे कार्यध्वंसः। किन्तु अनादिसंसर्गाभावमात्रम्। ननु राज्ञ इति पदस्य तात्पर्यभ्रमेण पुरुषेणान्वयबोधे पुत्रतात्पर्यग्रहेऽप्यन्वयबोधो न स्यात्। अन्वयानुभवाभावरूपप्रतिबन्धिकाभावात्मकाऽऽकाङ्क्षाविरहादिति चेन्न। समभिव्याहृतपदेनैव निराकरणात्। समभिव्याहृतपदस्य तदेकवाक्यतापन्नत्वाभिप्रायपरत्वात्।[२] न च भ्रमेण पुरुषान्वयबोधे वक्तू राजपदे पुरुषपदैकवाक्यताभिप्रायसंभवः।

नन्वेवमाकाङ्क्षाज्ञानस्य हेतुत्वमसंभवि। तथा हि - यदि प्रतिबन्धकाभावरूपा सा तदा तस्य स्वरूपसत एव कार्यमात्रहेतुत्वेन ज्ञानहेतुतायां मानाभावात्। न च तदभावेऽपि तद्भानात्[३] कार्यमिति तदनादरः[४]। सति प्रतिबन्धके कार्यस्यासंभावितत्वात्। किं च तदभावेऽपि तद्भानवात् कार्यम्।[५] न तावत् घटः कर्मत्वमित्यादौ न स्वारोपितसामर्थ्यम् दहतीत्यादेः[६] वक्ष्यमाणत्वात्। नाप्ययमेतीत्यादिवाक्ये तात्पर्यभ्रमेण गतार्थत्वात्। (२९) अपि च आकाङ्क्षायाः संशयसाधारणं ज्ञानमात्रं न हेतुरिति निश्चयो वाच्यः। तस्य संशयभिन्नज्ञानत्वेन तदपेक्षया आकाङ्क्षाज्ञानाभावस्यैव[७] हेतुत्वकल्पनौचित्यादिति। मैवम्। पर्यवसितं हि तत्प्रतिबन्धकं, न तु तदभावत्वेन हेतुत्वम्। अत एवोक्तं - **वस्तुत** इत्यादि।

---

[1] T. उत्कटत्वादिति

[2] T. ०विषयत्वात्

[3] T. तद्ज्ञानात्

[4] T. तद्ज्ञानादरः

[5] T. कार्यसद्भावः

[6] T. न ह्यारोपितदहनेत्यादेः

[7] T. adds लघोः

न हि प्रतिबन्धकाभावस्य विशेषणान्तरावच्छेदेन जनकत्वम्। इह तु पदान्ताभावप्रयुक्तत्वविशेषणावच्छेदेन हेतुत्वात्। अन्वयानुभवे तु [1]जातिनाऽकाङ्क्षाज्ञानमस्तीति तत एव तत्र कार्याभावः। परं तु अनयाऽननुभवनियतत्वादन्वयानुभवः प्रतिबन्धक इत्युच्यते। अत एवाकाङ्क्षाया[2] मानाभावेन तद्ज्ञानं कारणम्। न च यदि नाकाङ्क्षा हेतुः किन्तु तद्ज्ञानं तदान्वयानुभवे जातेऽपि परेण पदान्तरविरहप्रयुक्तान्वयानुभावकत्वव्यतिरेक[3] इति शाब्दाद्बोधितेऽन्वयबोधापत्तिः। यत्पदान्ताभावप्रयुक्तो यदीयानुभवाभावः तच्छाब्दबोधे तदपर्यवसानस्य हेतुत्वं वाच्यम्। न तु सामान्यतोऽतिप्रसङ्गात्। ***तदिदमुक्तमाचार्यचरणैः***[4] - **श्रोतरि तदभाव आकाङ्क्षेति**। न च स्वस्यानुभवे जाते परोक्तशब्दादिना स्वानुभवाभावज्ञानमस्तीति तत्राकाङ्क्षाज्ञानासंभवात् ।

नन्विदमपि तदा यद्येतद्विलम्बेनापि क्वापि कार्यविलम्बो न चैवं तात्पर्येण गतार्थत्वादित्युक्तत्वादिति चेन्न। द्विविधं हि तात्पर्यम्, पदेऽर्थे च। तत्र द्वितीयं यादृशं गृहीतं प्रयोजकं तदुक्तम्। न हि राजपदमपरपदार्थान्वितराजान्वयपरमिति गृहीतेऽपि पुरुषपदेन पुत्रपदेन वा विना राजपदमननुभावकं न वेति संशयोऽपैति। संशये सत्यपि वा शाब्दधीरुत्पद्यते। तस्मादुक्ततात्पर्यात् राजपदस्य पुत्रपदं विनान्वयाननुभावकत्वमेवमात्मिकाया आकाङ्क्षाया ज्ञानस्य नान्यथासिद्धिः।

तदयं समुदायार्थः - यत्पदोपस्थितेरेकवाक्यताभिप्रायविषययत्पदोपस्थितिव्यतिरेकेण (३०) यदीययादृशान्वयविषयकतात्पर्यविषयानुभवजनकत्वाभावस्तदीयतादृशान्वयानुभवे[5] जनयितव्ये तस्य पदस्य पदस्य तत्पदाननुभावकत्वं तत्पदाकाङ्क्षा। एवं सैन्धवपदेनातात्पर्यविषयीभूततुरङ्गप्रतियोगिके यादृशे क्रियाकर्मभावरूपेऽन्वये एकद्वयादिरूपतत्तात्पर्यविषयानुभवो न जन्यते तत्राकाङ्क्षारूपेव[6] परं तु तुरगतात्पर्याभावादेव नान्वयबोध इति इतरपदार्थान्विततुरगान्वयपरं सैन्धवपदमित्येवमाकारकोक्त-

---

[1] T. ज्ञाते

[2] T. adds ०हेतुत्वे

[3] T. ०अननुभव

[4] T. ०लक्षणे

[5] T. ०बोधे

[6] T. अस्त्येव

तात्पर्यग्रहविलम्बेन कार्यविलम्बात् तात्पर्यग्रहः कारण्म्। यत्र[१] पुरुषपुत्रराजादिपदानामुक्तरूपतात्पर्यग्रहेऽपि राजपदैकवाक्यताभिप्रायविषयत्वज्ञानात् पुरुषपदेन नान्वयबोध इति एकवाक्यताभिप्रायविषयत्व ज्ञानाच्चान्वयधीस्तत्रोक्ताकाङ्क्षाज्ञानान्यथाद्युनुविधानात् आकाङ्क्षाज्ञानं कारणमिति उभयोरन्योऽन्य-विरहस्थले कार्यानुदयादन्योन्यसहकारिता यादृशेत्यन्वयविशेषणमेकस्यैवान्वयभेदेन आकाङ्क्षासत्त्वासत्त्व-लाभार्थं तात्पर्यविषयत्वं विशेषणमनुभवे निरन्तरवाक्यार्थबोधस्थले आकाङ्क्षागमनार्थम्। ननु तर्हि तदिदंपदतात्पर्यमाकाङ्क्षेति पर्यवसानात् अस्त्वेकवाक्यताभिप्रायविषयपदोपस्थितिरेवाकाङ्क्षेति चेन्न। घटः कर्मत्वमित्यादीनां संग्रहापत्तेः। जनितान्वयबोधेऽतिव्याप्त्यापत्तेश्चेति दिक्।

यत्त्वनाकाङ्क्षाज्ञानाभावापेक्षया आकाङ्क्षानिश्चयो गुरुरिति तन्न। व्याप्तिज्ञानादेरहेतुत्वापत्तेः। किं चानाकाङ्क्षाज्ञानाभावः तदा हेतुर्यद्यनाकाङ्क्षाज्ञानं प्रतिबन्धकं स्यात्। न चाकाङ्क्षानिश्चयस्याजनकत्वे अनाकाङ्क्षाज्ञानस्य प्रतिबन्धकत्वं संभवति। ग्राह्यविरोध्यविषयकस्य ज्ञानस्य जनकज्ञानविघटनद्वारैव प्रतिबन्धकत्वात् । अन्यथाऽतिप्रसङ्गात् इत्यन्यत्र विस्तरः।

ननु ययोः समभिव्याहारः तयोर्नान्योऽन्याभावो यत्र वान्योऽन्याभावस्तत्र न समभिव्याहार इति कथमाकाङ्क्षाग्राह्योत्पत्तौ [२] ग्रहणप्रकारमनुगतधर्ममाह [३] - **नमिति**। तथा च नामपदं विना विभक्तिपदमित्यादिरूपेण[४] ग्राह्येत्यर्थः। (३१)

ननु नीलपदं विनापि घटपदस्यानयनान्वयबोधकत्वात् न तस्याकाङ्क्षा स्यादित्यत आह - **परेति**। तथा च तन्मते तयोः नाकाङ्क्षा, येनाव्याप्तिराशङ्क्येत। अस्माकं तु यादृशान्वयबोधे साकाङ्क्षत्वं तादृशान्वयानुभवविरहः परस्परस्य परस्परं विनास्त्येवेतिनाव्याप्तिप्रसङ्ग[५] इत्यर्थः।

---

[1] T. यत्तु

[2] T. ग्राह्येत्यतो

[3] T. अर्थमाह

[4] T. ०क्रमेण

[5] T. omits

यद्वा समानविभक्तिकयोरभेदानुभवबलात् विशेषणान्वितविभक्तेरभेदार्थकत्वं अतो विशेषण-विशेष्यभावानुभावकत्वं तत्पदयोः, न परस्परं विना। द्वारमित्यत्राध्याहारं विना प्रतियोग्यलाभात् न स्वार्थान्वयानुभावकत्वं, विश्वजिता यजेतेत्यत्र ममेदं कार्य्यमिति प्रवर्त्तकतात्पर्य्यविषयज्ञानं नाधिकारिणां विनेति तदाकाङ्क्षा।

यद्वा कर्त्तुरिवाधिकारिणेऽपि आक्षेपादेव लाभ इति तदन्वयो न शाब्दः किन्त्वानुमानिकः, गौणलाक्षणिकयोरननुभावकत्वपक्षे तदुपस्थापितस्याध्याहृतस्येवेतरपदं विना नानुभावकत्वम्।

संभवत्यर्थसाधुत्वे [१] शब्दसाधुत्वमित्यरुचेराह - **यद्वेति** [२] । न चैवं कर्मधारयेऽपि विशेषणविभक्त्यर्थेऽभेदे लक्षणा मन्तव्येति ***निषादस्थपत्यधिकरण***विरोधः। कर्मधारयेऽभेदस्य संसर्गमर्यादया भानाभ्युपगमादिति भावः।

द्वारमिति। इदमपि परमत एव। पदपदस्यान्वयप्रतियोग्युपस्थापकपरतया द्रष्टव्यम्। इदं तु तत्त्वम्। अस्मन्मतेऽप्यध्याहृतपदं नानुभावकम्। सामान्यत एवार्थोपस्थापकपदत्वेन अध्याहारात्। न हि शक्तं पदं विशेषतोऽध्याहर्तुं शक्यते। तथा च तदर्थोपस्थापकत्वेन अध्याहृतपदं कथमनुभावकमिति मतद्वयेनोक्तम्[३]।

नन्वेवं प्रतीतानुपपत्त्या कल्पना क्वापि न स्यात्। प्रवर्तकज्ञानस्य अनुमानाधीनत्वादित्यरुचेराह - **यद्वेति**। **कर्तुरिति**। अस्मन्मते दृष्टान्तः। सोऽपि यद्याक्षेपोऽनुमानं तदा। वस्तुतः कर्तुराक्षेपोऽयमेव यत् प्रथमान्तपदोपस्थाप्यत्वमिति वक्ष्यते।

ननु गौणलाक्षणिकयोः अनुभवं प्रत्यसमर्थत्वेन तयोरन्वया[१]नुभावकत्वाभावो न पदान्तराभाव[२]प्रयुक्त पदान्तराभाव[२]प्रयुक्त इति न तत्राकाङ्क्षा स्यादित्यत आह - **गौणेति।**

---

[1] T. adds कथं

[2] T. यज्ञेति

[3] T. omits मतद्वयेनोक्तम्

घटः कर्म्मत्वं आनयनं कृतिरित्यादौ अभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यः तात्पर्य्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव।

आकाङ्क्षा तावदनुभावकस्य सहकारिणी। न च गौणाद्यनुभावकं येन साकाङ्क्षताभ्युपगमेनाव्याप्तिः स्यात्। तथा च यस्य घोषपदादेः येन गङ्गापदेन विना न तीरान्वयानुभावकत्वं तस्य तदपर्यवसानमाकाङ्क्षेति भावः। तदुपस्थापितस्यानुभावकत्वमित्यत्र विषयत्वं षष्ठ्यर्थः। तेन तदुपस्थापितविषयकानुभवजनकत्वमर्थो लभ्यते। अध्याहृतस्य वेति[३] परमते दृष्टान्तः।

वस्तुतस्तु - यत्पदोपस्थापितस्यार्थस्य येन विना नान्वयबोधविषयत्वमित्यर्थो वाच्यः। कथमन्यथा एकपदोपस्थाप्ययोः कृतीष्टसाधनत्वयोः अन्वयबोधकमेकदेशी ब्रुवाणो दूषणान्तरेण प्रत्याख्यातः, न त्वाकाङ्क्षाविरहेण । तथा च गौणादेरननुभावकत्वपक्षेऽपि न व्याप्तिशङ्केति स्मर्तव्यम्।

ननु नामाख्यातादिवत् सामान्यतः पदान्तराभावो ग्राह्यः। तथा च समानविभक्तिकपदान्तराभाव-प्रयुक्तान्वयाननुभावकत्वम् आकाङ्क्षेति [४]वायातमित्यत आह - **घट** इति। (३२)

अन्वयविशेषे तस्य साकाङ्क्षत्वात्। अत एव यादृशान्वय इत्युक्तम्। न तु यदि तत् साकाङ्क्षं तर्हि कुतो नान्वयधीरित्यत आह - **अयोग्यत्वादिति**। अत एव धर्म्यभिन्नधर्मवादिनो योग्यताभ्रमात् भवत्येवेति भावः।

ननु पदान्तराभावप्रयुक्तानुभावकत्वाभावो गुरुः। तत्प्रयुक्तज्ञापकत्वाभावस्यालघुत्वात्। अस्ति च तदिहापीत्यत आह - **तत्तदिति**।

न वयमनुभावकत्वाभावगर्भो साकाङ्क्षां [१] ब्रूमः, अपि तु सामान्यतो ज्ञापकत्वाभावो विशेषपर्यवसन्नः। स्मरणस्य पदान्तराभावेऽप्युपपत्तेः। तथा च कथमतिव्याप्तिरिति भावः।

---

[1] T. omits ०अन्वय०

[2] T. ०व्यतिरेक०

[3] T. एवेति

[4] T. गतम्

घटमानयतीत्यत्रेव भ्रमेण तथान्वयतात्पर्य्येऽपि क्रिया-कारकभावेन नान्वयः, नामविभक्ति-धात्वाख्यात-क्रिया-कारकपदानां अन्वयबोधे तान्येव पदानि समर्थानि न तु तदर्थकानि पदान्तराणि। अग्निः करणत्वं ओदनः कर्म्मता पाकः कृतिः इष्टसाधनता इत्यादिपदेभ्यः अग्निर्नैदनं पचेतेत्यत्रेव अन्वयाबोधात्, अग्निकरणकौदनकर्म्मक-पाकविषयककृतिरिष्टसाधनं इति तु वाक्यं न पदम् ।

अत एव द्वारमित्यत्र पिधेहि पदाध्याहारः। क्रियापदार्थस्यान्यत उपस्थितौ अपि कारकानन्वयात् असामर्थ्यञ्च स्वभावात्। अनासन्नमपि आसन्नतादशायां आसन्नत्वभ्रमेण वा अन्वयबोधसमर्थमेव। वह्निना सिञ्चतीत्यत्र क्रिया-कारकपदयोरन्वयबोधे सामर्थ्येऽपि अयोग्यताज्ञानं प्रतिबन्धकं दाहे समर्थस्याप्यग्नेर्म्मणिरिव। अत एव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽप्यन्वयबोधः।

ननु यदि तदभावेऽप्याकाङ्क्षाज्ञानादन्वयधीः, तदिहापि तथा ब्रमो[२] भविष्यतीत्यत आह - **भ्रमेणेति**।

वाक्यं समासवाक्यं, न तु पदम्। प्रत्येकं पदं समासे चान्यैव व्युत्पत्तिरिति भावः। कश्चित्तु वाक्यत्वोपवर्णनेन तत्र वाक्यार्थीभूतकृताविष्टसाधनत्वमर्थः, न क्रियाकर्मभावः। तादृशान्वयबोधे तेषामसामर्थ्यादित्याह[३]। नन्वेवमसमर्थादन्वयानुभवाभावे योग्यता आसत्ती अपि हीयेत। तत्राप्यसामर्थ्यादेव अन्वयाननुभावस्य सुवचत्वादित्यत आह - **आसन्नमपीति।** तत्र वास्तवसामर्थ्यात् अन्यथा कदापि फलोपधानं न स्यादिति भावः।

---

[1] T. ०गर्भमाकाङ्क्षां

[2] T. ०भ्रमात्

[3] T. वदन्ति

न हि स्वभावतोऽसमर्थं आरोपितसामर्थ्यं वा दहति पचति वेति, प्रकृते तु पदार्थस्वरूपज्ञानं न त्वन्वयभ्रमोऽपि। पुरुषपदं विनापि राज्ञ इत्यस्य पुत्रेण समं स्वार्थान्वयानुभावकत्वं इति न तदाकाङ्क्षा।

यद्वा त्रयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वये तात्पर्य्याभावात् नान्वयबोध इत्यग्रेऽपि तथा। न च पुत्रस्योत्थिताकाङ्क्षत्वात् तेनैवान्वयबोध इति वाच्यम्। तात्पर्य्यवशात् पुरुषेणैव प्रथममन्वयबोधात्। अत एवान्वयबोधसमर्थत्वे सति अजनिततात्पर्य्यविषयान्वयबोधत्व-माकाङ्क्षेति केचित्। प्रकृति-प्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यतावत् क्रिया - कारकपदयोरजनितान्वयबोधत्वमाकाङ्क्षा।

नन्वाकाङ्क्षासत्त्वे प्रथमत एव कुतो न राजपुरुषान्वयबोधः, सामग्रीसत्त्वादित्यरुचेराह - **यद्वेति**। पदविशेषणीभूताभिप्रायाभावेन विशिष्टाभावरूपाकाङ्क्षा-विरहादित्यर्थः [१] । उत्थिताकाङ्क्षात्वात् ससम्बन्धिकत्वात्।

अत एवेति। यदि तात्पर्यवशादपि पुरुषेण नान्वयबोधः तदा जनितान्वयबोधत्वमात्रं विशेषणमुपादीयेत । न तु तात्पर्यगर्भमिति भावः।

वाक्येति। यथा कुलकादौ वाक्ये[२] कर्मण्यवान्तर[३]वाक्यार्थबोधपूर्वक एव महद्वाक्यार्थबोध इत्यर्थः।

नव्यास्त्वित्यस्वरसोद्भावनम्। तद्बीजं तु पदविशेषणमननुगमेन तज्जन्योपस्थितित्वेन न हेतुताग्रहः। न च द्वितीयः कल्पो विकल्पसहः, तादृशयत्किञ्चिदजन्यत्वस्यातिप्रसङ्गात्। तादृशयावदजन्यत्वस्य ग्रहीतुमशक्यत्वात्। एवमयोग्यानासन्नैरपि[४] पदे प्रतियोगिकुक्षौ निक्षिप्य [१]तदजन्योपस्थितित्वेन हेतुत्वे कारणान्तरविलोपादित्यपि[२]। (३३)

---

[1] T. भावः

[2] T. वाक्यार्थे०

[3] T. ०अवतार०

[4] T. ०अनासन्नेऽपि

नव्यास्तु पदविशेषजन्यपदार्थोपस्थितिः घटः कर्म्मत्वं आनयनं कृतिरित्येवम्बिधपदाजन्य-पदार्थोपस्थितिर्व्वा आसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेवम्बिधशब्दान्नान्वयबोधः त्वयाप्येवंविध-पदार्थोपस्थितेराकाङ्क्षाहेतुत्वेनावश्यमभ्युपेयत्वात्, जनितान्वयबोधात् नान्वयान्तरबोधः तात्पर्य्या-भावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति, किन्तु स्वजनकोपस्थितेः परिचायकत्वभावमिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शब्दाकाङ्क्षावादसिद्धान्तः।

समाप्तोऽयमाकाङ्क्षावादः।

यत्तु - कैश्चिदुक्तम्, घटः कर्मत्वम् आनयनं कृतिरित्यादीनामपि नासामर्थ्यात् अन्वयाबोधकत्वं कथमन्यथा तादृग्भिरेव वाक्यैरावापोद्वापक्रमेण व्युत्पन्नस्य ततोऽन्वयबोधः[३]। न चैतादृशवाक्येन परस्याप्रवर्तनात् व्युत्पत्त्यभावः[४]। । प्रयोज्यप्रयोजकयोः व्युत्पन्नत्वेन विभक्त्यादिस्मरणद्वारापि परम्परया वाक्यार्थज्ञानजननद्वारा प्रवृत्त्युत्पादनात्। न च व्युत्पित्सुना सविशेषो ज्ञातो येन साक्षाज्जनकत्वज्ञानलक्षणव्युत्पत्तिस्तस्य न स्यादिति। मैवम्। पुरुषविशेषीयवाक्यार्थबुद्धौ असामर्थ्यात्। व्युत्पत्तिवैचित्र्येण पुरुषवैचित्र्यात्। कथमन्यथा तथाव्युत्पन्नस्य घटमानयेत्यादितो वाक्यार्थानुभवः। न ह्युक्तासामर्थ्यलक्षणाकाङ्क्षादिविरहमन्तरेण तदननुभाव[५]प्रयोजकमन्यदिह गवेष्यमाणं पश्याम इति।

इति शब्दखण्डे आकाङ्क्षावादालोकः समाप्तः ।।

---

[1] T. ०तदन्यजन्य०

[2] T. ०लोपप्रसङ्गादित्यादि

[3] T. ०अर्थप्रत्ययः

[4] T. ०अनुपपत्तिः

[5] T. ०तदनुभवाभाव०

अथ योग्यतावादः

ननु का योग्यता, न तावत् सजातीयेऽन्वयदर्शनं, यथाकथञ्चित् साजात्यस्या-व्यावर्त्तकत्वात्। पदार्थतावच्छेदकेन साजात्यस्याद्यजातः पयः पिवतीत्यादावभावात् वाक्यार्थस्या-पूर्व्वत्वाच्च। नापि समभिव्याहृतपदार्थसंसर्गव्याप्यधर्म्मवत्त्वं, वाक्यार्थस्यानुमेयत्वापत्तेः।

अथ योग्यतावादालोकः

अद्येति।[१] न चाद्यजातत्वं न पदार्थतावच्छेदकमिति वाच्यम्। अन्वयितावच्छेदकपरत्वादिति बहवः। वस्तुतस्तु - पयस्त्वं पदार्थतावच्छेदकमेव। तदवच्छेदेनाद्यज्ञानसंसर्गानवगमादिति[२] यथाश्रुतमेव सम्यक्।

नन्वद्य ज्ञातसंसर्गो न पयसि। अनन्वितान्वयस्य ग्रन्थकारसम्मतत्वात्। तथा चाद्यजननपयसां संसर्गो युगपदेव[३] भासते। न च विशिष्टवैशिष्ट्यालाभः। विशेष्ये विशेषणम्। तत्र च विशेषणान्तर-मित्यादिसामग्रीतः संभवात्।

एवं च पदार्थतावच्छेदकावच्छिन्ने तद्दर्शनमस्त्येवेति अरुचेराह - **वाक्यार्थेति**। तथा च सर्वत्र नायं प्रकारो यागेष्वसमवधानादिवाक्यार्थाप्रत्यय[४]प्रसङ्गात्। तदवच्छिन्ने तत्संसर्गादर्शनादिति भावः।

वाक्यार्थेति। न च योग्यताया संशयो हेतुरिति संसर्गव्याप्यसंशयो वाच्यः। तथा च कथमेवमिति वाच्यम्। व्याप्यसन्देहस्य व्यापकसन्देहसामग्रीत्वमिति[५]। तथा सति सर्वत्र[१] वाक्यार्थसंशयापत्तेः। न चान्यादृशयोग्यताभ्युपगमेऽपि तथात्वापत्तिः। उक्तसमाधिसत्त्वादिति[२] दिक्।

---

[1] T. पदार्थेति।
[2] T. ०अदर्शनादिति
[3] T. युगपदेकस्य
[4] T. ०प्रत्यय०
[5] T. ०सामग्रीसत्त्वेन

नच वस्तुगत्या संसर्गव्याप्यो यो धर्म्मस्तद्वत्त्वं तच्च न ज्ञातमुपयुज्यते इति नानुमेयः संसर्ग इति वाच्यम्। योग्यताभ्रमाच्छाब्दभ्रमानुपपत्तेः।

अत एवानन्वयनिश्चयविरह एव योग्यता स्वरूपसती हेतुः तत्र तद्धर्म्माभावनिश्चये तत्प्रकारकशाब्दज्ञानानुदयात् इति परास्तम्।

नापि समभिव्याहृतपदारथसंसर्गाभावव्याप्यधर्म्मशून्यत्वम्, प्रमेयमभिधेयमित्यादौ संसर्गाभावस्याप्रसिद्ध्या तद् निरूपणात् गेहनिष्ठघटाभावे प्रमिते घटोऽस्तीतिवाक्यात्तन्निश्चयेऽप्य-न्वयज्ञानानुदयाच्च।

नापि बाधकप्रमाणाभावः, अन्यत्र यद्बाधकं तदभावस्यायोग्येऽपि सत्त्वात्।

नापि प्रकृतसंसर्गबाधकस्याभावः, प्रतियोगिसिद्ध्यसिद्धिव्याघातात्।

योग्यतेति। योग्यताभ्रम एव शाब्दभ्रहेतुर्वाच्योऽन्यस्यानुगतस्याभावात् । तथा च तदभावे तदधीनो भ्रमो न स्यादिति भावः। ननु संसर्गाभाव[3]व्याप्यधर्मशून्य[4]मित्यस्यायमर्थो यत्संसर्गविरोध्यनधिकरणत्वम्। विरोधित्वं च तदधिकरणानधिकरणत्म्। तच्च केवलान्वयिन्यवृत्ताकाशादौ (३४) प्रसिद्धमित्यरुचे-र्दोषान्तरमाह - **गेहेति।** यत्र गेहे कदाचिदपि घटसंसर्गस्तत्र संसर्गाधिकरणतया प्रतीतोऽपि गेहे यो घटो नेत्यभावः। सोऽपि संसर्गाधिकरणनधिकरणेनेति तदधिकरणानधिकरणशून्यत्वग्रहः संभवति। तथा सत्यतिप्रसङ्गः। यथाश्रुते तु कदाचिदपि तत्संसर्गे ततस्तत्कालीनतद्गृहत्वमपि संसर्गाभावव्याप्यमस्तीति न घटाभावग्रहकाले तथाभूतव्याप्याभावनिश्चय इति ध्येयम्।

---

[1] T. सार्वत्रिकत्वेन
[2] T. ०समाधित्वादिति
[3] T. संसर्गाभावादेव
[4] T. ०शून्यत्वम्

न च प्रकृतसंसर्गे अन्यत्र सिद्धस्य बाधकप्रमाणस्याभावः, प्रकृतसंसर्गस्य प्रथममप्रतीतेः अयोग्येऽपि तत् सत्त्वाच्च। तत्र बाधकमप्यस्तीति चेत्, तर्हि प्रकृतसंसर्गबाधकस्याभावः। तच्चाप्रसिद्धम्।

अत एव तत्र बाधकस्याप्यनिरूपणम्। नापीतरपदार्थसंसर्गाभावप्रमाविषयत्वाभावोऽपरपदार्थे, केवलान्वयिन्यप्रसिद्धेः।

एतेन यत्रासम्बन्धग्राहकं प्रमाणं नास्ति तद्योग्यमिति निरस्तम्।

नापि बोधनीयसंसर्गाभावप्रमाविरहः, प्रतियोग्यप्रसिद्धेः, बोधीयसंसर्गस्य प्रागप्रतीतेः योग्यता च न स्वरूपसत्युपयुज्यते इत्युक्तम्, अयोग्ये तत् सत्त्वस्यानिरूपणाच्च।

अपि च स्वीयबाधकप्रमाविरहस्यायोग्येऽपि सत्त्वात् बाधकप्रमामात्रविरहस्य योग्येऽपि ज्ञातुमशक्यत्वात् परप्रमाया अयोग्यत्वात्।

न च स्वरूपसन्नेवायं हेतुः, स्वीयबाधकप्रमाविरहदशायां योग्यताभ्रमेण शाब्दभ्रमानुपपत्तेः, अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमामात्रविरहोऽनुमेय इति चेत् - न। सेकानन्विततोये द्रवद्रव्यत्वे सत्यपि बाधकसत्त्वेन व्यभिचारात् उपजीव्यत्वेन तस्यैव योग्यतात्वापत्तेश्च।

तर्हीति। अन्याभावसत्त्वेऽपि यदभावात् कार्याभावः स एव हेतुरिति प्रकृतसंसर्गाबाधकप्रमाविरहो वाच्यः। तथा सत्येतद् दूषणम्। यथाश्रुते तु प्रकृतसंसर्गे बाधकसामान्याभावो हेतुरिति क्वाप्रसिद्धिर्भवति।

ननु यदि न बाधकमानाभावः तदा बाधकमानज्ञानापत्तिः । परस्परविरोधे हि न प्रकारान्तरस्थितिरित्यत आह - **अत एवेति।** नाभावधीर्नाप्यभावधीरुभयाज्ञाने विरोधाभावादिति भावः। अन्वयाप्रयोजकत्वमन्वयव्याप्यधर्मवत्त्वं[1] यदि तदा उक्तदोषापत्तिरित्ययन्वयस्वरूपयोग्यतावच्छेदकधर्मवत्त्वं वाच्यम्। तथा सत्याह - **सेकेति**।

[1] T. ०व्याप्यत्वं

न चैवमेवेति वाच्यम्। आकाङ्क्षासत्त्यन्वयप्रयोजकरूपवत्त्वे सत्यप्यनाप्तवाक्ये बाधकप्रमायामन्वयाबोधात्, बाधकप्रमाविरहो हेतुरिति चेत्तर्ह्यावश्यकत्वात् सैव योग्यता।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे योग्यतावादपूर्व्वपक्षः।।

ननु पूर्वमेवोक्तं न निश्चयोऽपेक्षणीयः । किन्तु सन्देहमात्रम्। तच्च स्वरूपयोग्यतावच्छेदक[1]ज्ञानादेव तस्य समानधर्मत्वादित्यत आह - **उपजीव्येति**।

इति योग्यतावादपूर्वपक्षः

[1] T. adds ०धर्मवत्त्वं वाच्यम्। तथा

अथ योग्यतावादसिद्धान्तः।

उच्यते - बाधकप्रमाविरहो योग्यता। सा चेतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः।

सा चेति। बाधितस्थले ह्येकपदार्थसंसर्गवद्भिन्नसंसर्गेऽपरपदार्थनिष्ठः सेचनकरणत्वनिष्ठो योऽत्यन्ताभावः, तत्प्रतियोगित्वप्रमाविशेष्यत्वमेवेति तदभावो योग्यतेत्यर्थः। न च विषयत्वाभावमात्रं सम्यक्[१]। घटसंसर्गत्वं गेहनिष्ठात्यन्ताभावप्रतियोगीति प्रमाविषयो घटसंसर्गोऽपीत्यसम्भवापत्तेः। न च घटसंसर्गो गेहनिश्चयात्यन्ता[२] भावप्रतियोगिधर्मवानिति प्रमाविशेष्यतया तथाप्यसंभव इति वाच्यम्। तत्प्रतियोगित्वमात्रप्रकारकप्रमाविशेष्यत्वाभावस्य विवक्षितत्वात्। मात्रपदस्यान्यविशेषणत्वपरत्वात्। न चेह तथा प्रमेति भावः।

अत्र वदन्ति। एकेति[३] पदार्थविशेषणत्वमेयत्व[४] मित्यादावव्याप्तिरपरत्वस्य भेदगर्भतया तद्गर्भयोग्यताविरहात्। पदविशेषणत्वे चैकपदोपस्थाप्यकृतीष्टसाधनत्वयोः अन्वयाबोधो योग्यताविलम्बादेव प्राप्त इति तन्निरासाय युक्त्यन्तरानुसरणप्रयासानुपपत्तेः। लडाद्येकपदार्थयोः[५] वर्तमानत्वकृत्योरन्वयधियः[६] स्वयमप्यङ्गीकाराच्च। (३५)

किं च गन्धवानाद्यक्षणवर्ति घट इत्यपि योग्यं स्यात्। प्रागभावसत्त्वेऽपि अत्यन्ताभावप्रतियोगित्वाभावात्। एवं ध्वंसस्थलेऽपि। अपि च द्रव्यं संयोगीत्यपि वाक्यमयोग्यं स्यात्। तन्निष्ठात्यन्ताभावप्रतियोगित्वात् संयोगस्य।

---

[1] T. omits
[2] T. गेहनिष्ठ०
[3] T. एकेत्यादौ
[4] T. ०प्रमेयत्वे प्रमेयत्व०
[5] T. तदा एकपदवाच्ययोः
[6] T. ०अन्वयीय०

न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं तर्हि व्याप्तिवदिहापि लाघवेनान्योऽन्याभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभावहेतुतापातात्। न चेष्टापत्तिः। अत एवोक्ताव्याप्तिरप्यलग्न भवतीति वाच्यम्। तथा सत्ययं पदार्थसंसर्गोऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगीति प्रमायामपि शाब्दधीप्रसङ्गात्।

न च व्याप्तिस्थलेऽपि साध्यात्यन्ताभाववद्गामित्वज्ञानेऽपि अनुमित्यापत्तिः। सत्यां व्याप्तिबुद्धा[1]विष्टत्वात् । अन्यथा तदभावे[2] कार्याभावात्। न चेहापि तत् सुवचम्। तत्र तस्याविरोधित्वात्। इह ग्रह्याभावपर्यवसानेन साक्षाद्विरोधात्। न ह्यत्रेव तत्रापि साध्यसंसर्गग्रहे तत्साक्षाद्विरोधि। किन्तु करणविघटकम्। किं च प्रतियोग्यसमानाधिकरणत्वं तत्सामानाधिकरण्येनाज्ञातत्वमित्युक्तं ***व्याप्तौ*** । तथा च तदंशस्य स्वरूपसत्ताया अन्योन्याभावात्यन्ताभावमात्रज्ञातव्य [3] भागे तुल्यतया लाघवानवतारेण उभयोर्ज्ञानजनकत्वं विनिगमनाविरहात्। तत्कथमेकैव योग्यता।

न च विनिगमना। उभयहेतुत्वेऽपि [4] हेतुत्वादन्यतरोपसंग्रह उपलक्षणार्थ इति वाच्यम्। अन्योऽन्याभावोऽत्यन्ताभावो वा नास्तीति विपर्यस्यतोऽन्यतरगर्भयोग्यतामात्रज्ञानादेव शाब्दधीदर्शनेन अन्योऽन्यव्यभिचारेण प्रत्येकहेतुत्वपक्षस्य वाच्यत्वात्। तस्य चाननुगमेनासंभवात्। किं चोक्तद्वयवदेकपदार्थेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगिसंसर्गाभाववत्त्वप्रमाविशेष्यत्वाभावादिकं कुतो न योग्यता, तुल्यन्यायत्वात्। तस्मादुक्तरूपा अभावा अननुगता एव प्रत्येकं योग्यता। ग्रन्थस्तूपलक्षणपरः। तासां च ज्ञानं न कारणं येन मिलिततावद्धीहेतुत्वे असम्भवः। प्रत्येकहेतुत्वेऽथाननुगमः। किन्तु तावद्योग्यताविरहज्ञानमननुगतमपि मिलितम्। हेतुर्विषयबाधाबाधाभ्यां च प्रामाप्रमा चेति।

---

[1] T. ०सिद्धौ

[2] T. तदभावादेव

[3] T. ०अभावगर्भतया ज्ञातस्य

[4] T. विनिगमनात् उभयोर्हेतुत्वे मिलित०

अत्र वयं ब्रूमः - [१] तात्पर्यविषयीभूतसंसर्गे तदाश्रयाभिमतापदार्थनिष्ठधर्मविरोधित्वप्रमा (३६) त्वाभावो योग्यता। तथा च तात्पर्यविषयविशिष्टवैशिष्ट्यसंसर्गे तादृशप्रागभावस्यापि विरोधीति नातिव्याप्तिः। एवं संसर्गवदन्योऽन्याभावस्यापि संसर्गो विरोध्येवेति न तदन्योऽन्याभावग्रहे एतादृशयोग्यताज्ञानं संभवति, येनातिव्याप्तिः। एवं च संयोगि द्रव्यमित्यत्रापि सामानाधिकरण्यमात्रे न विरोध इति योग्यत्वम्। विशिष्टवैशिष्ट्ये तु विरोध एवेत्ययोग्यतायाः यस्मिन् ज्ञाते यद्भानं नेत्यस्यैव विरोधित्वात्। वस्तुतस्त्वेकपदार्थसंसर्गे तात्पर्यविषये तदाश्रयीभूतापरपदार्थनिष्ठधर्मविरोधित्वप्रमाविशेष्यत्वाभावः। तादृशसंसर्गे तादृशपदार्थनिष्ठान्योऽन्याभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभावः तादृशसंसर्गे तादृशपदार्थनिष्ठप्रतियोग्यसमानाधिकरणाभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः । एकपदार्थेऽपरपदार्थ-निष्ठात्यन्ताभावप्रतियोगिसंसर्गवत्त्वप्रमाविशेष्यत्वाभाव इत्येवमादिः प्रत्येकमेव योग्यता। प्रत्येकज्ञानादेव शाब्दान्वयबोधात्। न च मिलितज्ञानानां हेतुत्वमसंभवि। प्रत्येकस्य च हेतुत्वेऽननुगम इति वाच्यम्। ग्राह्यसंसर्गविरोधिविरहज्ञानत्वेनानुगमात्। ग्राह्यसंसर्गविरोधित्वं च तद्ज्ञानप्रतिबन्धकज्ञानविषयत्वम्। तदुक्तम्। अनन्वयनिश्चयस्य प्रतिबन्धकस्य सर्वत्राभावादित्यन्यथा तत्वेनाहेतुत्वे उक्तरूपयोग्यताज्ञानहेतुत्वाय तदुपवर्णनस्याकिञ्चित्करत्वापत्तेः। न चैवं व्याप्तिज्ञानानामपि साध्यविरोधिसामानाधिकरण्य-धीविरोधिसामानाधिकरण्यज्ञानत्वेन अनुगतानां हेतुतापत्तिः। इष्टत्वात्।

न चान्योऽन्याभावगर्भेव व्याप्तिरित्यादिग्रन्थविरोधः। अनौपाधिकत्वमात्रव्यवच्छेदपरत्वादिना उपपादितत्वात्।

न च गौरवेण तावद्ज्ञानापेक्षायां तावद्विरहाज्ञानस्यैव हेतुत्वमुचितम्। लाघवादावश्यकत्वाच्चेति वाच्यम्। प्रमाप्रमयोर्विचित्रकारणान्तराभावात्। अन्यथा व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यैव तद्धेतोरिति न्यायेन अनुमितिहेतुतापत्तेः।

न च विषयसत्त्वादेव प्रमा, तदभावादेवाप्रमेति वाच्यम्। विषयस्य प्रत्यक्षमात्रहेतुत्वात्। अतीतादिना व्यभिचारात्। अन्यथाऽनुमितावुक्तप्रकारापत्तेः। नापि विषयाभावस्य भ्रमहेतुत्वम्। स

[1] T. योग्यता०

घटस्तदानीं गन्धवानित्यत्रातीतप्रागभावावच्छेदेन (३७) गन्धप्रतीतेर्भ्रमरूपाया अनुत्पत्तेर्विषयबाधरूप-प्रागभावस्यातीतस्याजनकत्वात्[1]। अत एव प्रत्यक्षभ्रमेऽपि दोषान्तरं कारणमनुमतमिति सर्वं सुस्थम्।

तावद्योग्यताज्ञानानां तावद्व्याप्तिज्ञानानां च प्रत्येकमेव शाब्दे विशेषेऽनुमितिविशेषे च जनकत्वम्, कार्याननुगमस्यादोषत्वात्। शाब्दबोधसामान्ये अनुमितिसामान्ये[2] च पदज्ञानमात्रम् पक्षधर्मताज्ञानमात्रं च कारणम्। न चातिप्रसङ्गः, विशेषणसामग्रीं विना सामान्यसामग्र्या अकिञ्चित्करत्वादित्यपि वदन्ति।

नन्वेवं घटो नेह गेह इति प्रत्यक्षेऽप्युक्तान्यतमयोग्यताज्ञानादन्वयबोधापत्तिः। प्रमा तावत् ज्ञानकूटस्य प्रतिबन्धकतया तावद्ज्ञानाभावकूटजनकमित्युक्तत्वात् न चैवमावश्यकत्वात् तत्कूटमात्रं कारणम्, [3] प्रमावैचित्र्यनियामकान्तराभावस्योक्तत्वात्। न केवलं शाब्दे रीतिरियं सल्लिङ्गपरामर्शजानुमितिभ्रमत्वनिर्वाहाय उक्तरूपयोग्यता, अन्यतमज्ञानस्याबाधितत्वज्ञानरूपत्वेन [4] हेतुत्वस्योक्तत्वात्।

कश्चित्तु घटाभावग्रह एव घटसंसर्गाभावग्रहं विना न भवति । यत्संसर्गावच्छिन्नो योऽभावः तत्संसर्गाभावग्रहनियतग्रहविषयः स इति गेहे न घट इति ज्ञाने सफलरूप[5]योग्यताज्ञानासंभवादित्याह ।

---

[1] T. adds ०अनुत्पत्तेः

[2] T. omits

[3] T. ०प्रमाऽप्रमा०

[4] T. adds ०अनुमितौ

[5] T. ०नियतग्रहविषयः स इति गेहे न घट इति ज्ञाने सफलरूप० :: ०नियत इति गेहे घट इति ज्ञाने सत्युक्तरूप०

प्रमेयं वाच्यमित्यत्र प्रमेयनिष्ठात्यन्ताभावप्रतियोगित्व-प्रमाविशेष्यत्वं गोत्वे प्रसिद्धं वाच्यत्वसंसर्गे तदभावः।

वस्तुतस्त्वितरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्म्मशून्यत्वं योग्यता लाघवात् शक्यज्ञानत्वाच्च। न च नरशिरःशौचानुमानबाधात् तदशौचबोधकशब्दात् अन्वयाबोध इति वाच्यम्। उपजीव्यजातीयत्वेन शब्दस्य बलवत्त्वात् तेनैव तदनुमानबाधात्।

पूर्वोक्तमव्याप्तिमुद्धरति - **प्रमेयेति**। नन्विदमसङ्गतम्, तथाहि - यद्यप्यपरपदार्थतावच्छेदकावच्छिन्न-निष्ठाभावप्रतियोगित्वप्रमाविशेष्यत्वमाकाशादाववृत्तौ सुलभप्रसिद्धः। तथाप्युक्तरूपा योग्यता ज्ञाता प्रयोजिका वाच्या न वा वृत्तावनुपस्थिते तादृशयोग्यताज्ञानं संभवतीति [१] तादृशायां प्रमेयं वाच्यमिति धीर्न स्यादित्यपरम्, यत्किंचित्पदार्थतावच्छेदकाश्रयगर्भयोग्यतामाश्रित्य गोत्वे प्रसिद्धिरुक्ता। न चैतादृशी योग्यता संभवति। पयसा सिञ्चतीत्यादावपि एकपदार्थसंसर्गस्य यत्किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वनियमेन तादृशप्रमाविशेष्यत्वाभावज्ञानासंभवादिति। [२]

यत्पदार्थविशेषनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः तत्पदार्थविशेष [३] योग्यतात्वेन तद्ग्रहस्यापि [४] किञ्चिन्निष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः संसर्गत्वावच्छिन्ने इति ग्रहस्यापि संभवादिति भावः।

नन्विदमप्रमागर्भत्वेन गुरु ज्ञानं चेत्यत आह - **वस्तुत** इति।

तात्पर्यमस्योक्तरीत्या (३८)कथितप्रायम्। न चोक्ताभावप्रतियोगित्वमेव तस्य योग्यतास्तु। किमवच्छेदकपदेनेति वाच्यम्, असंभवात्। न हि वाक्यार्थरूपः संसर्गः[१] प्रागवगतो न वापरपदार्थविशेषः।

---

[1] T. निर्वहतीति

[2] T. ०अभावादिति, मैवम्।

[33] T. ०विशेष्य०

[4] T. adds ०भावात्, यत्

नन्वाकाङ्क्षासत्तिमत्वेन शब्दस्य प्रमाणता न तु योग्यतापि तन्निवेशिनौ बाधाभावस्य प्रमामात्रहेतुत्वादिति चेत् - न। बाधे हि प्रमाणदोषोऽवश्यं वक्तव्यः, अन्यथा प्रमाणविषये बाधासम्भवात् यथानुमाने बाधादुपाधिकल्पनद्वारा व्याप्तिविघातः, निरुपाधौ बाधानवकाशात्। सेयं न स्वरूपसती प्रयोजिका शाब्दाभासोच्छेदप्रसङ्गात्। तन्निश्चयश्च न भवत्युपायाभावात् इति चेत् - न। संशय-विपर्य्यय-प्रमासाधारणस्य योग्यताज्ञानमात्रस्य कारणत्वात्। अयोग्यताज्ञानस्य प्रतिबन्धकस्य सर्व्वत्राभावात् क्वचित्तन्निश्चयोऽपि योग्यानुपलब्ध्वा यथेह घटो नास्तीति।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे योग्यतावादः।

अपि तु संसर्गत्वावच्छिन्नत्वेन संसर्गः पदार्थत्वावच्छेदेन पदार्थः। तथा च सर्वस्याः संसर्गव्यक्तेः प्रत्येकं प्रत्येकपदार्थनिष्ठाभाव [२] प्रतियोगित्वेन संसर्गत्वावच्छिन्नोऽपरपदार्थत्वावच्छिन्ननिष्ठात्यन्ताभाव-प्रतियोगीति प्रतीत्यसंभवः। न चैवमुक्तयोग्यतायामपि तत्तत्संसर्गस्य तथात्वेन तत्तत्संसर्गत्वस्य प्रतियोगितावच्छेदकतया संसर्गत्वावच्छिन्ने तथाभूतावच्छेदकाभावप्रत्ययानुपपत्तेरिति वाच्यम्। संसर्गत्वे तादृशप्रतियोगिता-वच्छेदकत्वाभावस्य विवक्षितत्वात्। एवमुक्तरूपयोग्यतायामपि निर्वाच्यमिति सङ्क्षेपः।

नन्वस्तु योग्यता हेतुः, अपि तु सामान्यसामग्रीत्वेन विशेषसामग्री च प्रमाजनकतावच्छेदकावच्छिन्ना[३]। तद्बहिर्भावेन इत्याशङ्कते - **नन्विति**। प्रमाणता प्रमाफलोपधानमित्यर्थः।

इति शब्दखण्डे योग्यतावादालोकः समाप्तः।।

---

[1] T. ०संसर्गविशेषः

[2] T. ०अत्यन्ताभाव०

[3] T. omits

अथासत्तिवादः।

आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः,

अथ आसत्तिवादालोकः

आसत्तिश्चेति। नन्वेवमनासन्नमासत्तिभ्रमेणान्वयबोधविषयो न स्यात्। तत्रोपस्थिति[१] स्वीकारे भ्रमस्यैवासत्तितापत्तेः। अव्यवहितपदार्थोपस्थितिं विना विशेषणज्ञानाभावेन विशिष्टबुद्ध्यनुदयादासत्ति-भ्रमेणाप्यन्वयबोधे तदावश्यकत्वाच्च। ननु तदुपस्थापकपदाव्यवहितोपस्थितिरिति[२] विवक्षितम्। व्यवहितोक्तपदाव्यवहितत्वभ्रमस्यैव आसत्तितया आसत्तिभ्रमस्थलस्याभावात्। न चोपस्थापकपदस्याव्यवधानम्। सा अत एव वस्तुतो व्यवहितमपि अव्यवहितत्वेन ज्ञात्वा विपर्यस्यतीति वाच्यम्। मौनिश्लोकादौ पदाभावेनासत्त्यभावापत्तेः। अत एवोच्चारणव्यवधानं आसत्तिरिति निरस्तम्। न च तदुपस्थापकपदस्य तदर्थस्याव्यवहितोपस्थापनम् उपस्थित्यनुकूलो व्यापार इति यावत्। स च क्वचित् उच्चारणं क्वचिल्लिप्यादि।[३]तत्तद्व्यापारं विना पदतदर्थयोः अनुपस्थितेः।

युक्तं चैतत्। अनेन वक्त्रा इदमव्यवहितोच्चारितमनेनाव्यवहितं लिखितमित्यादिभ्रमे सत्येव व्यवहितपदोपस्थाप्यपदार्थान्वयबोधादिति वाच्यम्। एवं योजनादिनापि श्लोकादावन्वयबोधो न स्यात्। वक्त्रा अव्यवहितोच्चरितमिति ज्ञानेऽव्यवहितोपस्थापनरूपासत्त्यभावात्स[४] विशेषदर्शनात्। (३९) किं च एकपदानन्तरमित्यव्यवधानप्रतियोग्यवशंय वाच्यम्। तथा चैकपदोपस्थाप्ययोरन्वयो नावगम्येत। आसत्त्यभावात्। न चेष्टापत्तिः। कृतीष्टसाधनतान्वय[५]बोधस्य अनेन[६] दूषितत्वादर्थतः स्वीकारादिति। मैवम्। तदर्थोपस्थित्यनुकूलव्यापारस्य विवक्षितत्वात्। न वातिप्रसङ्गः। एकपदानन्तरमपरपदतात्पर्यस्यैव तद्व्यापारत्वात्। तस्य च लिप्यनुमित्यादिनाभावात्। अत एव श्लोकादौ योजना तत्तात्पर्यकत्वं ज्ञात्वा

---

[1] T. adds ०भ्रम०

[2] T. तथेति

[3] T. वस्तुतः

[4] T. ०रूपानुकूलव्यापाररूपासत्तिज्ञानाभावात्

[5] T. omits

[6] T. omits

सा च स्मृतिर्नानुभवोऽतोनान्योन्याश्रयः।

शिष्यबोधाय [१] योजनया तत्तात्पर्यकत्वज्ञापनात् [२] । न च शुकवाक्यादौ आसत्त्यभावः। उपस्थापकव्यापारस्यैव तथाविधस्य[३] तत्त्वात्। तच्चोभयथा तात्पर्यतो वा उच्चारणतो वा क्वचित् किञ्चिदिति अननुगमोऽपि नाशङ्कनीयः। सामान्यतः अर्थोपस्थित्यनुकूलव्यापारत्वेन जनकत्वात्। न च तात्पर्यमन्यव्यवधाने उच्चारणमन्याव्यवधाने च यत्र तत्र का गतिरिति वाच्यम्। यत्र हि तात्पर्यमन्यत्र तत्र सतोऽप्युच्चारणस्याकिञ्चित्करत्वेन अन्वयबोधानुकूलाव्यवहितोपस्थित्यनुकूलत्वात्। अन्वयबोधानुकूलोपस्थित्यनुकूलत्वस्य विवक्षितत्वात्। तत्र च विपरीततात्पर्ये उच्चारणाधीनोपस्थितेः अन्वयबोधाननुकूलत्वात् । एतदर्थमेवोक्तमन्वयप्रतियोगीत्यन्यपदार्थेत्येव ब्रूयादिति दिक्।

अव्यवधानम् अन्वयविरोधिव्यवधानाभावः। न चान्वययोग्ये पदार्थान्तरेऽव्यवहितोक्ते तथा। तेनैव सहान्वयसंभवेनान्वय [४] विरोधित्वात्। यत्र च नानाविशेषणोच्चारणानन्तरोच्चारितविशेष्यान्वयबोधः तत्रैकविशेषणव्यवहितेऽपि विशेषणान्तरे तयोरन्योऽन्यान्वयासंभवेन व्यवधानेऽपि तदन्वयविरोधित्वाभावेन नाव्याप्तिरित्यवधेयम्। वस्तुतोऽव्यवहितत्वेन पदतात्पर्यमासत्तिः पर्यवसितेति शुकवाक्ये नाव्याप्तिशङ्कापि।

सा चेति। न चैवमात्माश्रयो नान्योन्याश्रय इति वाच्यम्। उक्तरूपासत्तौ तद्ज्ञानं तद्ज्ञाने चानुभवगर्भोक्तासत्तिरिति[५] भावः। एतच्च यथाश्रुते विवक्षिते तु न। यद्यपि अन्योऽन्याश्रयत्वमनुभवानुकूल-अन्योऽन्याश्रयत्वमनुभवानुकूल-व्यापारान्तरेऽनुभवात्। किं च व्यवहितविशेषणात्तूपपत्तिः। युगपदेव सर्वपदार्थवैशिष्ट्याभावात् [६] । तत्त्यागे चैतानि संभूयान्वयबोधतात्पर्यकाणीत्येवमाकारके व्युत्पत्त्येव गतार्थत्वादिति द्रष्टव्यम्।

---

[1] T. ०बोधनाय क्रियते

[2] T. ०ज्ञानात्

[3] T. तथापि तस्य

[4] T. ०प्रकृतान्वय०

[5] T. ०गर्भोक्तरूपासत्तिरिति

[6] T. ०अनुभवात्

अथ नानाविशेषणक-कर्म-कर्त्तृ-करणाधिकरण-क्रियाधिकमिकपदज्ञानजन्यक्रमिकपदार्थ-स्मृतीनां न यौगपद्यं सम्भवति आशुतरविनाशिनां क्रमिकाणांमेलकानुपपत्तेरिति कथं तावत्पदार्थान्वयबोधः विशेषणज्ञानसाध्यत्वाहि शिष्टज्ञानस्येति चेत् - श्रौत्रप्रत्येकपदानुभवजन्य-संस्कारमेलकादेकदेव तावत्पदस्मृतिः तत एकदेव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः।

प्रत्येकेति। (४०) यथा तव पदस्मरणे [१]तथा प्रत्येकानुभवपूर्वकतावत्पदस्मरण इति मतभेदेन दृष्टान्त इति भावः।

तथापीति। तत्तदवान्तरवाक्यार्थबोधस्य नष्टत्वात्। तावत्पदार्थराशिघटितमहावाक्यार्थबोधस्य अन्यथानुपपत्तेरित्यर्थ इति सम्प्रदायः।

वयं तु - अतस्तावदेवम्। अस्तु तावत् साकाङ्क्षयोग्यासन्नतावत्पदार्थघटितावान्तरवाक्यार्थबोधः तथापि नानाविशेषणकैकपदार्थघटितवाक्यार्थबोधे उक्तैव गतिः। समूहालम्बनस्मृतिरेव गतिः, अनन्यतगिकत्वात्। विशेषणानामन्योऽन्यमनाकाङ्क्षत्वेऽयोग्यत्वे [२] च तत्तत्परस्परान्वयभावेन तत्तत्सकलविशेषणसाकाङ्क्षायोग्यविशेष्यमात्रान्वयितया तावद्विशेषणविशेष्योभयगोचरसमूहालम्बन-स्मृत्यावश्यकत्वादित्यर्थ इति ब्रूमः। अत एवाक्षेपेऽपि नानाविशेषणकेत्युक्तम्। अन्यथा तदनन्तर्भावेनैव आक्षेपलग्नकतायां तदुपन्यासवैयर्थ्यात्। अन्यथान्यत्राप्यवान्तरवाक्यार्थ बोधस्थले तन्मूलकावान्तर-वाक्यार्थस्मृत्यैव उपपत्तेस्तावद्गोचरस्मृत्यनन्यगतिकत्वोपन्यासविरोधात्। तस्मादिदं पर्यवसितम्। नानाविशेषणकविशेष्यबोधे युगपत्तावदन्वयबोधानुरोधात् समूहालम्बनस्मृतिनियमः। न चैकविशेषणविशिष्टे विशेष्ये तत्र विशेषणान्तरधीरिति वाच्यम्। एकतत्र द्वयमित्येवंप्रकारकान्वयधीतात्पर्यकवाक्ये तथाप्यप्रतीकारात्। वाक्यार्थकर्मके कुलकादौ तावद्गर्भाकाङ्क्षामूलके न्यायादावसंभवन्महावाक्यार्थज्ञाने

---

[1] - तथा प्रत्येकानुभवपूर्वकतावत्पदस्मरण इति मतभेदेन दृष्टान्त इति भावः। **तथापीति।** तत्तदवान्तरवाक्यार्थबोधस्य नष्टत्वात्। तावत्पदार्थराशिघटितमहावाक्यार्थबोधस्य अन्यथानुपपत्तेरित्यर्थ इति :: T. -- तात्पर्यस्मरण०

[2] T. ०घटयोग्यत्वे

न चान्यविषयकसंस्कारेण नान्यत्र स्मरणमिति वाच्यम्। वाक्यार्थानुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण तत्रैकस्मरणकल्पनात्। प्रत्येकवर्णसंस्काराणामिवानन्यगतिकतया पदस्मरणे।

ग्रन्थादौ चावान्तरवाक्यार्थबोधनियमात् समूहालम्बनस्मृत्यभावनियमः। न हि [१] कुलकादावित्युवाचेत्यादि-पदोपस्थाप्यवाक्यार्थानुपस्थितान्वय-बोधः। न च तदुपस्थितिरवान्तरवाक्यार्थबोधं विना इत्यादिसर्वनाम्नः पूर्वोपस्थितपरामर्शकत्वात्, तस्य च प्रकारान्तरेणोपस्थितौ पूर्ववाक्यस्य वैयर्थ्यम्। एवं पर्वतोऽग्निमानित्यन्वयबोधे कुत इत्याकाङ्क्षाभावे कुतो हेत्वन्यधीरिति[२] वाक्यार्थगर्भैवाकाङ्क्षा । न हि वह्निबोधमात्रे तदन्वयः। एवं पञ्चाध्यायात्मकमहावाक्यार्थबोधेऽपि अवान्तरवाक्यार्थबोधानभ्युपगमे अध्ययनाद्यनुपपत्तिः। न ह्यध्ययनेन तावदेकदैव (४१) ज्ञानम्,[३] किन्तु दिने दिने किञ्चित् किंञ्चित्। अत एव समवधानासमर्थः स्वल्पं स्वल्पमुच्चार्य योजनया बोध्यते। अन्यत्र घटमानयेत्यादौ तु न नियमः। सामग्रीद्वयस्य पृथक् पृथगावश्यकतायामेकत्र सामग्र्यनियमे तदुभयानियमत्। एवं पञ्चावयववाक्यादावपि सर्वत्रानन्वितसर्वान्यपक्षो **ग्रन्थकृता**ऽभिप्रेत[४] इति भ्रमस्त्यक्तव्य इति सर्वं सुस्थम्।

अन्ये तु - यावद्भिर्वक्तुर्वचनाविच्छेदः तावद्भिरेकदैवानन्वितसर्वान्वयधीः विच्छिन्ने त्वन्यस्यान्वय-बोधेऽवान्तरवाक्यार्थबोधपूर्वकोऽन्वयबोधः। अत एव श्लोकार्थे विच्छिन्नेऽपरार्धवर्तिपदार्थान्वयबोधे क्लेश इति वदन्ति। अत्र - पदगर्भायामासत्तौ ।

संस्कारेति। नानास्मरणोऽप्यन्यतमसहकारि[५] कल्पनादेको द्वावित्यादाविव तत्र त्वेकशब्देन एकमेकत्वं विभक्त्या वान्यदेकत्वमुपस्थापितम्। अन्वयबोधे एकस्यैवेकत्वान्वयस्तथा [१] द्वावित्यत्रापि द्रष्टव्यम्।

---

[1] T. तर्हि

[2] T. हेत्वन्यत्वधीरिति

[3] T. ज्ञातम्

[4] T. ग्रन्थकृतो हि मतः

[5] T. ०अन्यतरसहभाव०

अथ यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते। तेन तोनान्वितः स्वार्थः पदैरेवावगम्यते। न चैवमन्वयानन्तराभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यम्। एवमपि प्रथममनन्वये हेत्वनुपन्यासात् उत्तरस्य हीदं सामग्रीवैकल्यं न पूर्वस्येति चेत् - अस्तु तावदेवं तथापि चरमं तावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्यगतिकत्वात्।

अत्र वदन्ति - सन्निधिर्न पदजन्यैवान्वयबोधहेतुः द्वारमित्यादौ अध्याहृतेनापि पिधानादिना अन्वयबोधदर्शनात्, न च पिधेहीति शब्द एवाध्याह्रियते, अनुपयोगात्। अर्थस्यैवान्वय-प्रतियोगित्वेनोपयोगित्वात् आवश्यकत्वाच्च। अर्थापत्तेरुपपादकविषयत्वात्।

न च शब्दात्रमुपपदाकम्। अपि तु तदर्थः। अवश्यकल्प्यार्थसाहचर्य्येण दैववशसम्पन्नशब्द-स्मृतेरन्यथासिद्धेः, अन्यथापदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तेः। स्वार्थान्वयपरत्वाच्छब्दानां द्वारमिति न पिधानान्वयबोधकमिति तदन्वयबोधार्थमवश्यं शब्दकल्पन-मिति चेत् - न। लक्षणायां व्यभिचारात् तवाप्याक्षिप्तेन कर्त्रान्वयबोधाच्च।

अथ द्वारपदसहभावमात्रं पिधेहि शब्दस्य कल्प्यते लाघवात्।

न च पिधानाभिधायकानेकशब्दोपस्थितौ विनिगमकविरहः। संस्कारतारतम्यात् पदविशेष-स्मृतेरिति चेत्- न। आकाङ्क्षादिमत्प्रतियोग्यन्वितस्वार्थपरत्वस्य क्लृप्तत्वात् लाघवेनार्थाध्या-हारात्। न च श्रुतपदानि लब्धप्रयोजनानीति कथमप्यध्याहृते तेषां तात्पर्य्यमिति वाच्यम्। श्रुतार्थान्वयानुपपत्त्या अध्याहृते तात्पर्य्यात्।

कथं तर्ह्योदनं पचतीत्यत्र समभिव्याहृतमात्रान्वयः कलायादेरपि स्मृतत्वात् इति चेत् - न। तात्पर्य्यनियमादित्यवेहि यत्परः शब्दः स हि शब्दार्थः। अन्यथा तवापि दैववशस्मृतकलायपदोप-स्थापितेनान्वयबोधः स्यात् अयं देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्त्तुरनभिधानात् तृतीया स्यात् इति चेत् - न। अध्याहृतपचतिपदेनापि कर्त्तुरनभिधानात्,

[1] T. omits : द्वावित्यादाविव तत्र त्वेकशब्देन एकमेकत्वं विभक्त्या वान्यदेकत्वमुपस्थापितम्। अन्वयबोधे एकस्यैवेकत्वान्वय-स्तथा

कर्त्तृसंख्याभिहितेति चेत् - न। देवदत्तस्य पाक इत्यत्रापि तृतीयापत्तेः। तात्पर्य्यतस्तत्र व्यवस्थेति चेत् - तुल्यम्।

ननु द्वारं पिधेहीत्यादौ पिधानशब्दानुभवे पिधानोपस्थापकपदत्वेन जनकत्वमिति चेत्। न। अन्वयप्रतियोग्युपस्थापकपदत्वेन जनकत्वात् न तु तदुपस्थापकयावत्पदत्वेन गौरवात्।

वस्तुतः स्मरणमकिञ्चित्करमनावश्यकं च पिधेहिपदं द्वारान्वयबोधानुकूलद्वारपदाथ-[1]समभिव्याहारादिति वा द्वारोपस्थापकपदसमभिव्याहारवदिति वा सामान्यतोऽनुमितिर्विशेषानुमापक-लिङ्गाभावात् इति निर्गलितम्।[१]

देवदत्तस्येति। नन्वत्र कृद्योगे षष्ठी वापवादिका। अन्यथा तृतीयाप्रसक्तौ[२] तत्सूत्र[३] प्रणयनानुपपत्तिरिति। मैवम्। कृद्योगेऽपि षष्ठी न कर्तृत्वप्रकारेण बोधयति। किन्तु सम्बन्धत्वेन सम्बन्धस्तु कर्तृत्वमेवेत्यन्यदेतत्। तथा च कर्तृसङ्ख्यानभिधाने कर्तृत्वप्रकारान्वयबोधार्थं तृतीयानियमे प्रकृतेऽपि तथा स्यादित्यर्थः।

अत एवांशङ्कते - **तात्पर्यत** इति। एतादृशे तात्पर्यमेव तत्संसर्गकतया प्रयोगे वाऽसाधकत्व[४] मित्याक्षेपार्थः। तुल्यं प्रकृतेऽपि विशेष्यत्वेनान्वये तात्पर्यं तादृशान्वये वा तृतीया न साधुरित्यर्थः।

नन्विति। यावत्तिदुपस्थापकेति बोद्धव्यम्। तेन यावदन्वयप्रतियोग्युपस्थापकपदत्वेन न हेतुत्वम्, गोरवादित्यर्थः।[५](४२)

---

[1] T. ०तत्त्वम्

[2] T. तृतीयायाः प्राप्तौ

[3] T. ०प्रकाशन०

[4] T. असाधुत्वम्

[5] T. adds अन्यथा प्रकृतानन्वयात्

एवं पिधानान्वयबोधेऽपि। अन्यथा गौण-लाक्षणिकयोरन्वयबोधो न स्यात् तयोरननुभावकत्वादिति।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे आसत्तिवादपूर्व्वपक्षः।।

अथासत्तिवादसिद्धान्तः।

उच्यते, क्रियापदोपस्थापिता क्रिया, कारकपदोपस्थापितच्च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रं अन्यथा द्वारं कर्म्मता पिधेहि, द्वारं पिधानं कृतिरित्यत्रापि क्रिया-कर्म्माध्याहार इवान्वयबोधप्रसङ्गः। क्रियायाः कर्म्मणश्चोपस्थितेस्तुल्यत्वात्। एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत् - तर्ह्याकाङ्क्षायां पदविशेषोपस्थापितत्वं तन्त्रं न तूपस्थितिमात्रं। अर्थविशेषऽसाधुत्वान्नात्रान्वयबोध इति चेत् - न। पिधेहीति पदं विना द्वारमित्यस्याप्यसाधुत्वात् तदर्थयोगे साधुत्वस्य तुल्यत्वात् साधुत्वज्ञानस्यान्वयबोधेऽप्रयोजकत्वाच्च गौरवादपभ्रंशादप्यन्वय-बोधाच्च।

न चात्रासंसर्गाग्रहः, बाधकाभावात्। तस्मात् क्रियापदस्य कारकपदेन कारकपदस्य क्रियापदेन सहान्वयबोधकत्वं न त्वेकं विनाऽपरस्य। अपि च सकर्म्मकक्रियापदयोगं विना द्वितीयानुपपत्तिः। न हि क्रियापदार्थयोगे द्वितीया। घट आनयनं कृतिर्तयत्रापि द्वितीयापत्तेः। तथा च पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्याहारं विना चतुर्थ्यनुपपत्तिः। यदि स्पृहयतिपदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात् स्पृहयतीच्छतिपदयोरेकार्थत्वात्।

तस्मात् क्रियाकारकेति। नन्वप्रयुक्तमेव । तत्पदविशेषजन्यत्वस्याप्रयोजकत्वात्। पदविशेषो ह्यन्वयाविरोधी वाच्यः। तदपेक्षया अन्वयविरोध्यजन्यत्वस्य लघुत्वात्। पदान्तर्भावे गौरवात्।

यच्चापरमुक्तम् साधुत्वाय पदाध्याहारस्तदपि न । एवमपि पदाध्याहारनियमात्। साधुत्वज्ञानस्या-हेतुत्वमिति स्वयमेवाभिधानात्। अपभ्रंशात्मकपदघटितवाक्ये पदार्थान्वय[1] बोधाभावापाताच्च। किञ्च पदं श्रुतं नास्त्येव इत्याभिप्रायिकमुन्नेयम्। न च वक्तुरभिप्रायविषयो नियमतः पदमस्ति। न च श्रोतुस्तथा निश्चयाभावेन तदभिप्रायविषयपदानुमितिराभासरूपैव। पदज्ञानमात्रस्यैव प्रयोजकत्वादिति वाच्यम्।

[1] T. ०बोधान्वयाभाव०

अथ साधुत्वार्थद्वारं पुष्पेभ्यं इत्यत्र पिधेहि-स्पृहयतिपदाध्याहारोऽनुमेयन्ते न त्वन्वयबोधार्थं तस्यान्वयप्रतियोगिविज्ञानादेवोपपत्तेरिति चेत् - तर्हि क्रियापदयोगं विना न कारकविभक्तिः। कारकपदयोगं विना न तदन्वययोग्यं क्रियापदमिति केवलकारकपदे क्रियापदाध्याहारः। केवलक्रियायाञ्च कारकपदाध्याहारः साधुत्वार्थमावश्यक इति तज्जन्योपस्थितिरन्वयबोधौपयिकौ तस्मात् क्रिया-कारकपदोपस्थापितयोरेव क्रिया-कारकयोः परस्परमन्वय इति शब्दाध्याहार एव। कर्त्राक्षेपे तु वक्ष्यामः।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे आसत्तिवादः।

मीमांसकेन पिधेहीति निगदितश्रोतुः नैयायिकादेः आभिप्रायिकपदाभावनिश्चयेन पदाध्याहाराभावेनान्वय-बोधानुपपत्तेः।

न च शुकोदीरितपिधेहीति वाक्ये अर्थाध्याहारपक्षेऽपि न सङ्गतिरिति वाच्यम्। आप्तोक्तत्वनिश्चयं विना अध्याहारलक्षणयोरकल्प्यत्वेनेष्टापत्तेः।

अपि च यत्र पदान्तरं विनापि साधुत्वं यथा घट इति विशेष्यपदं तत्र विशेषणपदाध्याहारो न स्यात्। तथा च तत्र विशेष्यपदोपस्थितिमात्रेणान्वबोधोपपत्तेः[1]। न च समानविभक्तिकविशेषणपदं विना विशेष्यपदमपि [2] अभेदान्वयबोधेऽसाध्विति वाच्यम्। इष्टस्वर्गयोरभेदान्वयबोधस्य विधौ वक्ष्यमाणत्वेन व्यभिचारादिति। **अत्र ब्रूमः** - पदे विशेषो नान्वयाविरोधित्वमेककारणपरिशेषापत्तेः। अन्वयविरोधितावच्छेदका-प्रतीतावन्वयविरोधित्वप्रतीतेश्च [3] । न चान्वयबोधजनकतावच्छेदकशून्यत्वात् अन्यत्तद्विरोधित्वं नाम। तस्माद्विभक्त्यादिसमभिव्याहृतपदत्वमेव विशेषः।

---

[1] T. ०बोधापत्तेः

[2] T. omits अभेदान्वयबोधे

[3] T. ०विरोध्यप्रतीतेः

ननु यदनुभावकं तद्विभक्त्यादिसमभिव्याहृतपदमेवेति चेत्, न। विभक्त्यादिसमभिव्याहृतपदत्वेन वृत्त्युपस्थापिता[1] स्वार्थानुभवजनकत्वात्। अन्यथा तात्पर्यमात्रादेव निर्वाहे वृत्तिकल्पना क्वापि न स्यात्। तात्पर्यस्यावश्यकत्वात्। (४३) किं च वृत्त्यनुपस्थितस्यापि शाब्दबोधविषयत्वं यदि तदा आकाशादिपदानां शक्त्यादिकल्पना न स्यात्। समवायसम्बन्धेन स्वार्थोपस्थापनेन इतरपदैरेवान्वयबोधसंभवात्।

यदप्युक्तं *मीमांसकेनेत्यादि*, तदप्ययुक्तम्। उक्तयुक्त्या पदस्येवान्वयबोधोपयोग्युपस्थिति-हेतुत्वेऽन्वयबोधानुकूलोपस्थापकत्वेन सामान्यतोऽपि वक्तुरभिप्रायस्य पदविषयत्वात्। विशिष्याभिप्रायाविषयत्वेऽपि सामान्यतः तथाभावात्। न च पदत्वेन तथाभावाभावनिश्चये कथमेवमिति वाच्यम्। समानप्रकारकविरोधिज्ञानस्यैव प्रतिबन्धकतया पदजन्योपस्थितिरेव न नियामिकेति निश्चयेऽपि वस्तुगत्या तस्या एव तथाभावेनान्वयबोधानुकूलोपस्थितित्वेन तस्या एवाभिप्रायविषयत्वात्।

नन्वेवं *नैयायिकेनोक्ते* पिधेहीति पदे अन्याप्युपस्थितिरन्वयबोधाङ्गमिति निश्चयवतो[2] मीमांसकस्य पदाध्याहाराभावेऽन्वयबोधो न स्यादिति चेत्, न। इदं पिधेहिपदमितरान्वयबोधानुकूल-समभिव्याहारवदित्याकारिकाया अनुमितेरेव, पदगौरवत्वात्[3]। पदादन्यस्योक्तयुक्त्याऽतथाभावात्। पदत्वेन ज्ञानस्याकिञ्चित्करत्वात्। तदर्थोपस्थापकत्व[4] ज्ञानस्यैव वर्णलोपाद्यनुरोधेनार्थोपस्थापकत्वात्। तदर्थमेव चान्यत्र पद[5] ज्ञानानुसरणात्। न चोक्तप्रकारेण पदज्ञानेऽपि न शक्तिधीरिति वाच्यम्। शक्तेरप्यन्वयप्रयोजकसम्बन्धत्वेन ज्ञानं तन्त्रम्। न त्वीश्वरज्ञानत्वेन इति वक्ष्यते। तथा च प्रकृतेऽपि न काचित् अनुपपत्तिरिति दिक्।।

इति शब्दखण्डे आसत्तिवादालोकः समाप्तः ।।

---

[1] T. ०वृत्त्युपस्थाप्यार्थान्वितशक्त्युपस्थापित०

[2] T. निश्चिन्वतो

[3] T. ०गोचरत्वात्

[4] T. ०ज्ञापकत्व०

[5] T. पदार्थ०

अथ तात्पर्य्यवादः।

तात्पर्य्याधीनं शब्दप्रामाण्यं तत्र तत्परत्वं न तत्साध्यकत्वम्, पदार्थ-तत्संसर्गयोः शब्दासाध्यत्वात्। अथ तद्गोचरप्रवृत्तिनिवृत्तिसाध्यकत्वं तत्परत्वम्। तच्च भाव्यार्थस्य साक्षात् भूतार्थस्य तु प्रशंसा-निन्दावाक्यस्य प्रशस्तनिन्दितार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषय-प्रवृत्तिनिवृत्तिजनकत्वं तत्परत्वमिति चेत्, न।

अथ तात्पर्यवादालोकः

वस्तुतः शक्तिर्यत्र ज्ञाता तत्पदज्ञानमेव पदार्थस्मरणात् व्यापारकमनुभावकम्। न तु शक्तिधीरपि तदातनी [१] पदार्थोपस्थापिका [२] वेत्यग्रे वक्ष्यते इत्येव रमणीयम्। पूर्वं कारणं परं कार्यमिति परपदार्थालोचनया आशङ्क्य निषेधति - **नेति**।

पदार्थेति। तथा च घटादिपदं घटादिपरमित्यव्यवहारापत्तिरिति भावः।

भूतार्थस्येति। परिणतिसुरसमित्यादिवाक्यस्येत्यर्थः।

तत्तद्बुद्धीति। तदनुभवेत्यर्थः। अग्रे च तत्प्रतिपाद्यकत्वं तत्प्रत्तिपत्तिसामान्यपरमित्यपौनरुक्त्यम्। ननु तत्प्रायकत्वं[३] तत्प्रतिपादनानुकूलवक्तृ[४]व्यापारविषयत्वं न तु प्रतिपत्ति[५]जनकत्वमात्रम्। अत एव न प्रतिपादकत्वमुक्तम्। न चैवमन्योऽन्याश्रयावकाशः इत्यस्वरसाद्दोषान्तरमाह - **प्रशंसेति**। तथा च प्रवृत्तिपरं वाक्यमिति व्यवहारविरोध इति भावः।

---

[1] T. तदा नाना०

[2] T. adds अनुभाविका

[3] T. तत्तत्प्रतिपाद्यकत्वं

[4] T. omits

[5] T. ०प्रतीति०

तत्परत्वे तज्ज्ञानं जनयित्वा तत्र प्रवर्त्तकत्वं तत्प्रवर्त्तकत्वञ्च तत्परत्वमिति परस्पराश्रयात्। लाक्षणिकस्याननुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः स्वरूपाख्यानमात्रपरत्वेनापि पर्य्यवसानाच्च।

ननु तद्बुद्धिजनकत्वं तत्परत्वं प्रशंसा-निन्दावाक्यमपि प्रशस्त-निन्दितस्वार्थधीहेतुत्वेन तत्परमेव, तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्त्तते निन्दिताच्च निवर्त्तते इति स्वविषये प्रवृत्तिनिवृत्तौ जनयतीति तत्परमुच्यत इति चेत् - न। गौण-लाक्षणिकयोरननुभावकत्वात् तद्बुद्धिजनने तत्परत्वमित्यन्योन्याश्रयाच्च। तज्जननयोग्यत्विमिति चेत् - तर्ह्येकमित्यन्योन्याश्रयाच्च। तज्जनन-योग्यत्वमितिचेत् - तर्ह्येकत्रोच्चारणे नानार्थे नानार्थपरत्वं लक्षणायाञ्च मुख्यार्थपरत्वं स्यात् योग्यतायाः सत्त्वात्। नापि तत्प्रतिपाद्यकत्वं, तात्पर्य्यं विना न तथेत्यन्योन्याश्रयात्। प्रशंसा-निन्दावाक्यस्य प्रवृत्त्याद्यप्रतिपादकत्वात् लाक्षणिकस्याप्रतिपादकत्वाच्च।

अथ गङ्गापदं स्वार्थाविनाभावि तीरं प्रतिपादयत्तत्परमिति चेत् - न। मञ्चाः कोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्य्यात् गङ्गादिपदं मत्स्यादिपरं मुख्ये तीरपरञ्च स्यात् अविनाभावस्य तादवस्थ्यात्। मुख्ये बाधके सतीति चेत्, तर्हि मुख्यार्थपरतैव न स्यात्।

लाक्षणिकस्येति। गङ्गापदेन पूरस्मरणं, तेन तीरस्मरणम्, न तु तीरप्रतिपत्त्यनुकूलो गङ्गापदे सम्बन्ध इति भावः। ननु नोक्तक्रमेण तीरस्मृतिस्तस्यापदार्थत्वे विभक्त्यर्थान्वयाननुपपत्तेः वक्ष्यमाणत्वात्। तथा च लाक्षणिकस्य स्वार्थाविनाभाव एव लक्ष्यप्रतिपत्त्यनुकूलः सम्बन्धः इत्याशङ्कते - **अथेति** ।

ननु तत्समयावच्छिन्नः पुरुषः तद्ग्राप्य एवेति अरुचेर्दोषान्तरमाह - **गङ्गेति**। मुख्ये बाधक इत्युपलक्षणम्। स्वार्थाविनाभूतयोग्यत्वे इत्यपि द्रष्टव्यम्। तेन मत्स्यादिप्रसङ्गो वारितो भवति। अन्यथा परिहारान्यूनतापत्तिरिति।

न स्याच्च गच्छ गच्छसीत्यत्र गमनाभावपरत्वम्।

उच्यते। तत् प्रयोजनकत्वं तत्परत्वं तदर्थश्च प्रतीतिः प्रवृत्ति-निवृत्तौ च, प्रयोजनत्वञ्च न साध्यत्वं अन्योन्याश्रयात्। नापि प्रतिपाद्यच्छाविषयत्वम्, यस्य यदिच्छाविषयः तं प्रति तत्परत्वापत्तेः। तदर्थसाध्यत्वेन इच्छानियम इति चेत् - न। इद धूम इत्यत्र जन्य-ज्ञाप्यभेदेन साध्यस्य बहुविधतया वाक्यभेदप्रसङ्गात् पुमिच्छाया नियन्तुमशक्यत्वात्, किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वम्। यः शब्दः वक्त्वा यदिच्छया प्रयुक्तः स तत्परः, सा चेच्छा प्रतिपाद्यधीप्रवृत्तिनिवृत्तिविषयेति तत्परत्वम्। नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापदात् मख्यलाक्षणिकपराच्चावृत्त्या क्रमेणानेकपदार्थज्ञानं न त्वेकदैव। सकृदुच्चरितस्य सकृदर्थपरत्वनियमेनैकत्रोच्चारणे अनेकार्थपरत्वाभावादिति सकल-तान्त्रिकैकवाक्यतया वदन्ति।

ननु प्रतिपत्त्यनुकूलसम्बन्धवत्त्वं सामान्यतः तात्पर्यसत्[१] सम्बन्धो द्वेधा शक्तिर्मुख्ये बाधकभावे[२] स्वार्थाविनाभावश्चेति तत्कथं तर्हीत्याद्यतो दोषान्तरमाह - **न स्यादिति।**

प्रयुक्तं परप्रतिपत्ति[३] विषयीकृतः, न तु जनितो मौनिश्लोकानुरोधात्। ननु वक्तुरिच्छा यत्रोभयत्र युगपद्बोधे तत्रोभयोरेकदानुभवे सकृदुच्चरितादिति सिद्धान्तो भज्येतेति अत आह - **नानाति।** सकृदुच्चरितस्य सकृत्प्रत्यायकत्वव्युत्पत्तिनियम[४] निश्चये विशेषदर्शनादेकदाऽनेकार्थप्रत्यये न वक्तुरिच्छा। उभयानुभवेनेच्छामात्रस्य क्रमिकानुभवाभ्यामपि निर्वाह इत्यावृत्तिरेव कल्प्यते। तथैव व्युत्पत्तेः एकदोच्चारणैकमात्रानुभवजनकत्वकल्पनात्। अत एव यत्राकत्रोच्चारण एव नानर्थानुभवजननदर्शनं, तत्रैकोच्चारणे नानार्थानुभवो नावृत्तिः[५] करणत्वैकत्वादिशक्त[१] तृतीयादिविभक्त्यादौ सूर्याचन्द्रमसोभयवाचि पुष्पवन्तादिपदे च। एतच्चापूर्वे स्फुटम्। व्युत्पत्तिवैचित्र्येण सकृदसकृदर्थोभयप्रतिपादनात्। तच्च उभयानु-

---

[1] T. तात्पर्यम्

[2] T. मुख्यबाधके

[3] T. प्रयुक्तः प्रति

[4] T. omits

[5] T. दर्शनं, तत्रैकोच्चारणे नानार्थानुभवो नावृत्तिः :: ०व्युत्पत्तिनियमादेकदैव नानार्थानुभवाप्रवृत्तिः

वयन्तु ब्रूमः - अनेकपदार्थप्रतीतीच्छया एकमुच्चारणं भवत्येव पुमिच्छायानियन्तु-मशक्यत्वात्। यदि च तदुच्चारणं नानेकार्थपरं तदावृत्तिरपि न स्यात् तात्पर्य्यनिर्वाहार्थ-मावृत्तिकल्पनात्। अन्यथैकपरेऽपि तदापत्तेः।

भावनेच्छया एकत्र वाक्ये यदि तदैकदैव इत्यवश्यमभिप्रायः। आवृत्तौ वाक्यभेदावश्यकत्वादिति (४५) वाच्यम्। पूर्वोक्तविशेषदर्शनेन युगपदनुभवेच्छाया इदमेक[२]वाक्यान्तर्भावेन तादृगिच्छाविरहादिति भावः।

किं[३] चोच्चारणे। एकस्मिन् वाक्ये। नन्विदं[४] युगपदुभावर्थावनुभावयत्विति वक्तुरिच्छाया-मावृत्तिकल्पनमेव नास्ति। युगपदुभयानुभवश्च संभृतसामग्रीकतया ब्रह्मणापि दुरपवादः। इदं वाक्यमुभौ बोधयत्वित्यभिप्रायेऽपि तथा। आवृत्तौ वाक्यभेदात्। न चोक्तविशेषदर्शनात् एतादृशेच्छा वक्तुरसम्भावितेति वाच्यम्। पुत्रविनाशे शोकार्तस्य पुत्रदिदृक्षादर्शनेन[५] बाधितेऽपीच्छासम्भवात्। विशेषदर्शनस्या-सार्वत्रिकत्वाच्च।

वस्तुतस्तु विशेषदर्शनमेव न । एकत्रोच्चारणे एकानुभव[६]दर्शनात्। एकानुभावकत्वं क्लृप्तम्, न त्वेकमात्रानुभावकत्वम्। कल्पकाभावात्, गोरवाच्च। कस्यचित् तथा व्युत्पत्तावपि न सकृदुच्चारितादित्याद्यपि नियमः। भ्रान्तस्य तथाभावात्। एवं चेदुक्तयुक्त्या व्युत्पत्तिरेव नैतादृशी। तदा वक्तुरिच्छायां यौगपद्याप्रवेशेऽपि इमावर्थाविदं वाक्योच्चारणं बोधयत्विति क्रमाक्रमान्यतरगर्भवक्त्रभिप्रायमपि नावृत्तिकल्पनम्। उक्ताभिप्रायस्थल इव युगपदनुभवसामग्रीसमावेशादिति मनसिकृत्याह - **अत्र ब्रूम** इति। एकवाक्यान्तर्भावेन यौगपद्यान्तर्भावेन वा यदि विशेषदर्शनान्न वक्त्रभिप्रायस्तदा तुष्यतु दुर्जन इति न्यायात्

---

[1] T. ०पदार्थकरणैकत्वादिशक्तेः

[2] T. ०एकैक०

[3] T. एकत्र

[4] T. वाक्यं युगपद्धीमान्

[5] T. ०सम्भवेन

[6] T. adds ०जनन०

अत एव तदुच्चारणस्य उभयपरतायां नावृत्तिकल्पणं तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्य्यादिज्ञाने युगपदनेकान्वयबोधो भवति सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियन्तुमशक्यत्वाच्च।

अथ विवादाध्यासितमक्षपदोच्चारणं एकपदैकशक्तिविषयमेकमेवानुभावयति एकपदोच्चारणत्वात् घटपदोच्चारणवत्।

एकोच्चारणान्तर्भावेन तु स्यादेव पुमिच्छाया नियन्तुमशक्यत्वात् [१] तदन्तर्भावेनापि वक्त्रभिप्रायस्वीकारे तवावृत्तिरपि न क्लृप्ता स्यादिति भावः।

नन्वावृत्तिकल्पकं तात्पर्यमिति सत्यम्। परं तु युगपदनुभवसामग्र्येव न शब्दस्यैकदा एकमात्रानुभवजनकत्वस्वभावत्वादित्यत आह - **अत एवेति**। यत एव न शब्दस्वभावोऽपि तु तात्पर्यग्रहमात्रापेक्षेत्यत एव पुष्पवन्तादिपदे उभयपरे[२] नावृत्तिरिति भावः।

ननु सामग्रीतौल्यमेव न एकमात्रानुभवजनकत्वस्वभावत्वात् तस्य । न च पुष्पवन्तादिपदे व्यभिचारः। व्युत्पत्तिवैचित्र्येण विशेषादित्यत आह - **प्रथममिति।** तस्माद्विनिगमकाभावात् उभयोर्ज्ञानमज्ञानं वा स्यात्, न त्वावृत्तिरिति न तादृशस्वभावसिद्धिरिति भावः।

अथेति। अंशतः सिद्धसाधनवारणाय (४६) विवादपदमिति । एकमात्रानुभावकत्वे बोधो जात्यादीनाम् अथानुभवादित्येकशक्तिविषयमिति विशेषणान्तेनैकशक्तिविषयस्य एकस्यैव अनुभावकत्वं लभ्यते। एकशक्तिविषयत्वावच्छिन्नस्य एकत्वेन[३] विवक्षितत्वात्। एकपदोच्चारणत्वात्। एकपदोच्चारणान्तर्भावेन नानार्थशक्त्यैकपदोच्चारणत्वात्।[४] तेन न [१]विभक्त्यादिपदे व्यभिचार इति भावः।

---

[1] T. नियन्तुमशक्यत्वात् :: अनियमात्

[2] T. ०पदे

[3] T. एव

[4] T. omits this sentence.

यद्वा एकत्रोच्चारणे नानाशक्त्या नानार्थाननुभावकं नानार्थत्वात् एकपरनानार्थपदविदिति चेत् - न। अनेकार्थानुभवसामग्रीसत्त्वेन बाधितत्वात् सामग्रीविरहस्योपाधित्वाच्च।

अत एवाक्षमानयेत्युक्ते भिन्नप्रकरणादिना भिन्ने तात्पर्य्यप्रमायां भ्रमे वा प्रतिपाद्ययो-रेकदैवावृत्तिं विनानेकार्थप्रतीतिर्न तु तत्रैको विलम्बते, एवं घटं पटं वा आनयेत्यत्रानयनस्योभय-परत्वे एकदैवान्वयबोधो न त्वावृत्तिः वाक्यभेदस्त्वर्थभेदात् न ज्ञानभेदात्। गङ्गायां जलं घोषश्च प्रतिवसतीत्यत्र गङ्गापदस्य युगपत्प्रवाह-तीरयोस्तात्पर्य्यग्रहे तयोर्द्वयोरप्येकदोपस्थितौ जल-घोषयोरेकदैवान्वयबोधः।

नन्वेकमात्रानुभावकत्वम् अननुभावक उभयपरम्। शतोबाधितमित्यरुचेराह - **यद्वेति**। स्वकीयशक्त्यन्तरविषयाननुभावकत्वं साध्यम्. यथाश्रुते ऽपरपदार्थान्वितस्वार्थानुभवकत्वात् बाधापत्तेः। अत एव पदत्वादित्यत्र घटादिपदे व्यभिचारात् नानर्थत्वादिति हेतुर्निरुक्तः। तदर्तोप्युक्तनानार्थान्यनानार्थत्वादिति उपाधौ बाधानवकाशादाह - **सामग्रीति**। ननु यदि तादृशस्थले एकपदैवान्वयधीस्तदा एकवाक्यतापत्तिः, ज्ञानभेदेन वाक्यभेदात् इत्यत आह - **वाक्येति।** अर्थैक्यादेरेकवचनत्वलक्षणादिति भावः।

गङ्गेति। ननु शक्ययोरेकदानुभवेऽपि शक्यलक्ष्ययोः कथमेवमन्वयानुपपत्तिधीविलम्बेन लभ्योपस्थितेः विलम्बितत्वादिति, मैवम्। शक्योपस्थितौ तदन्वयानुपपत्तौ लक्ष्यतात्पर्यग्रहकाले शक्येऽपि तात्पर्यग्रहसंभवात्। घोषमत्स्यादिसमुदितस्य जलान्वयानुपपत्त्योरुभयोरुभयान्वयधीसंभवाच्च।

नन्वेवं सकृदुच्चारितादित्यादिनियमो भज्येत। न चान्वयानुभवकत्वाभावगर्भाकाङ्क्षेति जनितानुभवे आकाङ्क्षाविरहात् नानुभवान्तरमिति वाच्यम्। तात्पर्यविषयत्वान्वयानुभावकत्वाभावगर्भाया आकाङ्क्षायास्तत्रापि सत्त्वादिति। मैवम्। सामग्रीसत्त्वे इष्टापत्तेः अन्यथा तदभावादेव तदभाव इति दिक्।

---

[1] T. omits here onwards ...

न च यगपद्वृत्तिद्वयापत्तिः, इष्टत्वात्, तात्पर्य्याद्धि वृत्तिः। न तु वृत्त्यनुरोधात् तात्पर्य्यम्, गौण-लाक्षणिकयोरुच्छेदापत्तेः तात्पर्य्यनिर्वाहार्थं वृत्तित्वेन तयोः कल्पनात्। मुख्यलाक्षणिक-योरेकैकमात्रपरत्वे तु युगपद्वृत्तिद्वयविरोधः। अनेकान्वयबोधपरत्वे वृत्तिद्वयविरोधस्य दोषत्वे परिभाषापत्तेः, यत्र मुख्यार्थे शीघ्रत्वेन प्रथममन्वयबोधः अनन्तरं लाक्षणिकान्वयबोधः तत्रावृत्तिरेव। तस्मात् युगपत्तात्पर्य्यग्रहे सति नावृत्ति किन्त्यनेकार्थपरत्वे सत्येव यत्र तात्पर्य्यग्रहक्रमात् अन्वय-बोधक्रमः तच्चावृत्तिः प्रथमोच्चारणस्य पर्य्यवसितत्वादिति।

एवञ्च लोके क्लृप्तत्वात् वेदेऽपीदं तात्पर्य्यमिति तस्य पौरुषेयत्वम्।

अत्र मीमांसकाः - यथोच्चारणपूर्व्वकत्वात् उच्चारणं वेदे परतन्त्रं तथा तात्पर्य्यमपि तात्पर्य्यपूर्वकमेवेति परतन्त्रम्। न तु कस्यापि प्रथमं तात्पर्य्यं अनादित्वात् पूर्वपूर्ववाक्यार्थ-ज्ञानेच्छयोच्चारणमुपजीव्याग्रिमाग्रिमस्य तदिच्छयोच्चारणात् तदिच्छया तदुच्चारणमेव हि तत् परत्वं लोक-वेदसाधारणम् । सा चेच्छा स्वतन्त्रा परतन्त्रा वेति न कश्चिद्विशेषः। तदवधारणञ्चानादि-मीमांसापरिशोधितन्यायाद्वेद इत्युभयवादिसिद्धम्। अतस्तात्पर्य्यानुरोधेन वेदस्य न पौरुषेयत्वम्। नन्वर्थज्ञानं विनोच्चारितवेदात् कथमर्थधीः वाक्यार्थज्ञानं विनातदिच्छयोच्चारणाभावात्। प्रतिपुरुषमुच्चारणभेदादिति चेत् - तर्हि पठ्यमानभारतादपि तथाभूतादर्थधीर्न स्यात् व्यासेन यत्प्रतीतीच्छया उच्चारणं कृतं तज्जातीयत्वात्।

एवं प्रथमोच्चारणस्य पर्यवसितत्वमेतदेव। यदनुभवान्तरजननकाले स्वतः परतो वा विसामग्रीकत्वं, न तु जनितान्वयबोधतया निराकाङ्क्षत्वमुभयोः तात्पर्यविषयत्वे एकानुभवसिद्धावपि आकाङ्क्षासत्त्वात्। एकदेशसिद्धौ समुदायासिद्देः एकज्ञानसिद्धावुभयज्ञानासिद्धेरिति दिक्।

यथेति। स्वमते दृष्टान्तः। ननु स्वतन्त्रतदिच्छयोच्चरितत्वं तत्परत्वं कथमध्यापकनिर्वाह्यम् (४७) अत आह - **तदिति**। लाघवादिति भावः। मीमांसापूर्वं कथं तदवधारणमित्यत आह - **अनादीति।**

अर्थज्ञानं विनापि पद्यमानभारतादर्थधीरिति चेत् - तर्हि वेदेऽपि तुल्यम्, तत्तात्पर्य्यक-जातीयत्वस्य नियामकत्वात्। अन्यथा पठ्यमानवेदात्तवाप्येर्थधीर्न स्यात् ईश्वराप्रणीतत्वात्।

अथ वेदः पौरुषेयः वाक्यत्वात् भारतादिवत् इति चेत् - को वेदः, अनुगतधर्म्माभावेन तस्य शाखासु नानार्थत्वात्, तथाहि न मुख्यवेदपदप्रयोगविषयोवेदः मुख्यार्थाकथनात्।

नापि शाखासमुदायः, तस्य वेदनिरूप्यत्वात्। समुदायस्याप्रतिपादकत्वेन वाक्यत्वासिद्धेश्च। नापि स्वर्गकामादिवाक्यम्, स्मृति-भारतादेरपि तथात्वात्। नापि सन्दिग्धकर्तृकवाक्यम्, वादिनोर्निश्चयात्। वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशय इति चेत् - तर्ह्यनुमानाभ्यां तस्य संशयोमध्यस्थसंशयप्रश्नानन्तरच्चानुमानमित्यन्योन्याश्रयः। नापि विवादाध्यासितं वाक्यम्, अनुगतधर्म्मं विना विवादस्याप्यभावात् भारतादावपि तत्सम्भवाच्च।

ननूच्चारणानादित्वत्वं त्वयोच्यते। तदेव नास्तीति शङ्कते - **अथेति**। तथा चोच्चारणसाधित्वे अर्थसिद्धमेव तात्पर्यसादित्वमिति भावः।

अनुगतेति। पक्षतावच्छेदकापरिचर्ये किं समानाधिकरणं साध्यं सिद्ध्येदिति भावः। पुराणं पढच्चमो वेद इति अन्यत्रापि वेदपदप्रयोगादंशतः सिद्धसाधनं मा भूदिति अत आह - **मुख्येति।**

मुख्यार्थेति। अनुगतप्रवृत्तिनिमित्ताज्ञाने मुख्यामुख्यविभागानुपपत्तेरित्यर्थः।

ननु मध्यंदिन्यासमुदायोऽस्तु पक्ष इत्यत आह - **समुदायस्येति।** [1]

स्वर्गेति। शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वमित्यर्थः। अन्यथा आदि-शब्दार्थानिर्वचनादिति भावः। **तर्हीति।** पक्षतावच्छेदकभानान्तरमनुमानावतारादिति भावः। विवादे विप्रतिपत्तिः। ननूक्तधर्मावच्छेदेनैव विवादपदत्वमास्तामित्यत आह - **भारतेति।** तथा च तत्राप्येवं विवादापत्तेः अनतिप्रसक्तस्यैवावच्छेदकत्वादिति भावः। न तु भारतादावपि विवादसंभवादित्यर्थः।।

---

[1] T. omits upto here.

नापि महाजनानांवेदाकारानुगतव्यवहारात् वेदत्वं जातिः, देवदत्तीयत्वाद्यनुमापक-शब्दवृत्तिजातिभिः सङ्करप्रसङ्गात्। किञ्च पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा, अध्यापक-तदुभयधीजन्यत्वेन सिद्धसाधनात्। नाप्युच्चारणस्य सादित्वं, प्रत्युच्चारणस्य सादित्वात्।

नापि स्वतन्त्रपुरुषप्रणीतत्वम्, पठ्यमानवेदभारतयोस्तदभावात्। तज्जातयः स्वतन्त्रपुरुषप्रणीत इति चेत्, तर्हि पठ्यमानभारतं व्यासस्य न ममेति कथं स्यात्, स्वातन्त्र्यञ्च यद्युच्चारणव्यक्तौ तदा ममाप्युच्चारणसामान्ये न व्यासस्यापि।

तथा च सति पक्षताक्षतेरभावादंशतः सिद्धसाधनस्य विवादादेवाभावात्। विवादानवतारे तत्साधारणपक्षत्वालाभादिति।

साध्यं विकल्प्य दूषयितुं पृच्छति - **किं चेति।**

नापीति। साद्युच्चारणविषयत्वं नेत्यर्थः। ननु सादित्वं न प्रागभावप्रतियोगित्वम्, अपि तु सजातीयध्वंसाव्याप्यप्रागभावप्रतियोगित्व-मित्याशङ्क्य निषेधति - **नापीति।**

पठ्यमानेति। तथा च वाक्यत्वं तत्रैवानैकान्तिकमिति भावः।

तज्जातीय इति। तज्जातीयत्वं[1] साध्यमित्यर्थः।

तर्हीति। स्वतन्त्रपुरुषप्रणीतं तत्तद्वृत्तिधर्मवत्त्वं ब्रुवता इदं न स्वतन्त्रपुरुषप्रणीतमित्युक्तं भवति। स्वातन्त्र्येण च व्यपदेशः प्राधान्येनेति न्यायात् व्यासस्य न ममेति व्यपदेशो न स्यादिति भावः।

ननूक्तं न स्वातन्त्र्यमपि तु सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं साध्यम्। यदीयं च तादृशमुच्चारणं तेनैव व्यपदेश इत्येव नियामकमित्यत आह - **स्वातन्त्र्यमिति**। तद्व्यक्तित्वावच्छिन्नोच्चारणानपेक्षत्वे ममाप्युच्चारणत्वावच्छिन्नानपेक्षत्वेन व्यासस्यापि।

---

[1] T. omits

किञ्च स्वतन्त्रपुरुषप्रणीतजातीयत्वं यदि साध्यते तदाद्यभारते स्मृतौ च वाक्यत्वमनैकान्तिकम्, न हि तज्जातीयं स्वतन्त्रपुरुषप्रणीतमस्ति। अथ स्वतन्त्रकृतसजातीयं स्वतन्त्रपुरुषप्रणीतमिति साध्यमनिर्धारितविशेषं जीवो क्वचिदस्तीति वदिति चेत् - न। पठ्यमानभारते व्यभिचारात्। अथार्थप्रतीत्यतदर्थपरतया प्रतिसन्धीयमानपदत्वं पौरुषेयत्वं तस्य प्रथममावश्यकत्वात्, अत एवानुच्चारितोऽपि मौनिश्लोकः पौरुषेय इति चेत् - न। अर्थज्ञानवताध्यापकेन सिद्धसाधनात्, अन्यथा पठ्यमानवेद-भारताभ्यां व्यभिचारात्।

अत एव वेदत्वं स्वतन्त्रपुरुषप्रणीतवृत्ति वाक्यवृत्तिधर्म्मत्वात् भारतत्ववदिति निरस्तम्। स्वतन्त्रप्रणीतत्वं हि वाक्यार्थगोचरयथार्थज्ञानचिख्यापयिषयोच्चारणम्, तथा च तथाविधाध्यापकेन सिद्धसाधनम्। एतेन वक्तृत्वानुवक्तृत्वयोर्भेदस्य लोकसिद्धत्वात् सवक्तृकत्वं साध्यमिति निरस्तम्।

नापि सजातीयोच्चारणानपेक्षोच्चारणं पौरुषेयत्वं पठ्यमानवेदे बाधात् भारते व्यभिचाराच्च। उच्यते - शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम्, ईश्वरीयप्रमायाः अजन्यत्वात्, वेदार्थस्यानुमानादिविषयत्वेऽपि अनुमानादेर्वेदोपजीवकत्वात्।

ननूक्तं द्वयं न सजातीयत्वमपि तु आनुपूर्वी (४८) विशेष इत्यरुचेर्दोषान्तरमाह - **किंचेति।**

तदेति। आद्यभारतादिपूर्ववृत्तिनस्तादृशस्याभावात्[1]। निष्टार्थस्य च भूतत्वादिति भावः।

अथेति। वेदजातीयं पक्षः स्वतन्त्रकृतत्वं साध्यम्। तद्धि स्वतन्त्रपुरुषप्रणीतत्वमित्यर्थः।

शब्देति। शब्दस्तदुपजीवि च शब्दजन्यवाक्यार्थज्ञानोपजीवीति यावत्। ताभ्यां प्रमाणाभ्यामतिरिक्तं यत्प्रमाणं तज्जन्यप्रमित्यविषयार्थकत्वे सतीत्यर्थः। तेन प्रत्यक्षशब्दानुपजीव्यानुमानादिविषयार्थक-लौकिकशब्दव्यावृत्तिः। न च प्रथमप्रमाणपदवैयर्थ्यम्। प्रामाण्यार्थं यच्छब्दजन्यवाक्यार्थज्ञान-

[1] T. तादृशादित्वस्य

मुपजीवतीत्यर्थ [१] लाभार्थं तदुपादानात् । अन्यथा शब्दजन्यप्रवृत्त्यादिमूलकदृष्टघटितचक्षुरादिविषयक-लोकिकवाक्यातिव्याप्तेः अशक्यपरिहारत्वात्[२]। साक्षात् परम्परासाधारणापेक्षामात्र[३]घटितत्वादुपजीवितायाः । न च [४]वक्तृव्याप्रियमाणं प्रामाण्यार्थं कञ्चिच्छब्दमपेक्षते[५] । किन्तु स्वनिर्वाहार्थमपेक्षते तु वेदोपजीविप्रमाणं प्रामाण्यार्थवेद्यम्। अत्र चोपजीवितायां वाक्यार्थपर्यन्तधावनं [६]श्रावणप्रत्यक्षेण चैत्रशब्दं श्रुत्वा चैत्रः शब्दायत शब्दायत इत्यादिप्रयुक्तवाक्यातिव्याप्तिवारणाय तस्य शब्दप्रत्यक्षमूलकप्रमाणमात्रगम्यार्थकत्वात्।

ननु तज्जन्यवाक्यार्थज्ञानोपजीविप्रमाणविषयार्थकत्वम्। अत एव शब्दपदमप्यर्थवत्। अन्यथा शब्दस्यापि प्रमाणस्य शब्दगोचरज्ञानोपजीवित्वेन शब्दोपजीवितया पृथगुपादानानुपपत्तेः। न चैवमप्यतिव्याप्तिः। चैत्रवाक्यादयमर्थो ज्ञात इत्यादिवाक्यानां चैत्रशब्दजन्यवाक्यार्थज्ञानं विनाऽसंभवादिति वाच्यम्। चैत्रशब्दजन्यवाक्यार्थज्ञानाभावेऽपि वाक्यार्थज्ञानमात्रेण तादृशवाक्यप्रयोगसिद्ध्या तदनुपजीवित्वात्।

यद्वा शब्दोपजीवितसमानविषयकशब्दजन्यवाक्यार्थज्ञानोपजीविना [७] । अत एव न सापेक्षता [८] चक्षुरादावुक्तप्रसङ्गः। एवमपि प्रमाणपदोपादानं तदर्थमेव। न हि स्वर्गो यागादिजन्यो अन्याजन्यत्वे सति जन्यत्वादित्यादिलिङ्गस्वसत्तायामेव शब्दमुपजीवति। अपि तु प्रमाजनने। नचैवं योगजप्रत्यक्षविषयत्वात् वेदार्थस्यासंभवः। तस्य योगविध्युपदेशकशब्दोपजीवित्वेऽपि विशिष्टशब्दानुपजीवित्वादिति वाच्यम्। अग्रिमप्रमाणपदेनैव तद्वारणात्। न हि योगिनिप्रत्यक्षे (४९) शब्दतत्समानविषयकशब्दोपजीविभ्यामतिरिक्तं प्रमाणं जनकमस्ति। योगजधर्मस्य प्रामणव्यापारत्वात्। न तु प्रमाणत्वात्। मनसस्तु साधारणत्वात् । शब्दतदुपजीविप्रमाणातिरिक्तमनोजन्यतच्छब्दजबुद्ध्यादिभिरसंभववारणाय साधारणशरीरात्मादिवारणाय अग्रिमप्रमाणपदस्यासाधारणकारणपरत्वात्। न च योगिप्रत्यक्षस्थले योगजधर्मादन्यपदसाधारणमस्ति। अत

---

[1] T. उपजीव्यमित्यर्थ०

[2] T. ०प्रतीकारत्वात्

[3] T. ०शरीरत्वात्

[4] T. ०चक्षुः

[5] T. अपेक्ष्यते

[6] T. omits

[7] T. ०वाक्यार्थज्ञानोपजीविना :: ज्ञानसापेक्षता

[8] T. omits

स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदार्थ-प्रतीत्यतत्प्रणयनात्।

एवाग्रिमप्रमितिपदमपि अर्थवत्। शब्दतदुपजीविप्रमाणातिरिक्तासाधारणस्मृतिकरणजन्यस्मृति-विषयार्थत्वेना-संभववारकत्वात्। विशिष्टज्ञानादेः स्मृतिकरणस्य प्रमाणाभावेन विशिष्टातिरिक्तत्वात्। स्मृतिश्च न प्रमितिः, अननुभवत्वात्। अनुभवपरत्वात् प्रमितिपदस्य । अत एव ज्ञानलक्षणायामपि प्रयोगो[1] वारितः। तत्र ज्ञानस्य प्रत्यासत्तित्वात्। मनसः साधारणत्वात्। [2]वैयर्थ्यगोचराया वेदोपजीवित्वाच्च। सामान्यलक्षणा तु यदि बहिरिन्द्रियप्रत्यासत्तिरपि तदा स्वजन्यज्ञानसमानप्रकारकत्वेन प्रमितिः विशेष्या। न हि प्रमेयत्वादिना तज्जन्या धीः वेदजन्यप्रमितिसमानप्रकारिका।

न च स्वर्गसाधनत्वप्रकारिका सा वेदानुपजीविप्रमाणजन्याऽसाधारणकारणजन्या वा। मनोमात्रकरणजत्वात् । न च वेदव्याख्याने भगवत्कृतेऽतिव्याप्तिः। वेदाः केनचित् व्याख्याताः महाजनपरिगृहीतत्वात् इत्यादीनां तदतिरिक्त[3] प्रमाणत्वात्। अर्थपदस्य तात्पर्य[4] परतया व्याख्यानस्य वेदतदर्थबोध्यबोधकभावतात्पर्यकत्वात्। न च वेदार्थस्य तद्गोचरत्वादसम्भवः। स्वसमानप्रकारकत्वेनैव वारणत्वात्। न हि वेदतद्व्याख्यानयोः तुल्यप्रकारकधीजनकत्वसंभवोऽभेदापत्तेः। अत एव सङ्केतग्राहकभगवद्वाक्येऽप्यनतिप्रसङ्गः। तदर्थस्य तदुभयभिन्नप्रमाणगोचरत्वात्। [5] न चायुर्वेदादौ दृष्टार्थेऽतिव्याप्तिः। तस्य परमतेऽवेदत्वेन तदुभयसिद्धा दृष्टार्थक[6] मात्रस्य पक्षत्वात्। एतावत् वेदसमानविषयक[7]स्मृत्यादौ गतमत आह - **शब्देति[8]।**

---

[1] T. प्रसङ्गः
[2] T. वेदार्थ०
[3] T. तदुभयातिरिक्त०
[4] T. adds ०विषय०
[5] T. ०गम्यत्वात्
[6] T. adds ०वेद०
[7] T. ०समानार्थक०
[8] T. शब्दजन्येति

शब्दजन्यज्ञानाजन्यत्वे कृते आधुनिकवेदाव्याप्तिरिति वाक्यार्थोपादानम्। न च सा तथापीति वाच्यम्। वाक्यार्थज्ञानस्य हेतुत्वात्। तद्विनापि सजातीय[1]श्राविणस्तादृशवेदजननात्। न चैवं शब्दपदत्यागे (५०) जन्यवाक्यार्थ[2]ज्ञानजन्येत्येव युक्तम्। अस्मन्मते सत्यन्तविशेषणवैयर्थ्यात्। तन्मते व्यावर्त्याप्रसिद्धेः। व्यावर्त्याप्रसिद्धेः। अजन्यज्ञानासिद्धदशायां प्रमाणशब्दे जन्यज्ञानाजन्यत्वस्य दुर्ग्रहत्वात्। तत्पक्षकपौरुषेयत्वानुमानाच्च जन्यज्ञानसिद्धेः न च वेदसमानार्थकव्युत्क्रमोक्तशुकवाक्यातिव्याप्तिः। स्वविजातीयशब्दजन्यवाक्यार्थ-ज्ञानमूलकत्वविवक्षायां वाक्यार्थपदवैयर्थ्यादिति वाच्यम्। प्रमाणशब्दत्वेन वारणात्। तस्य महाजनपरिगृहीतार्थकत्वात्। अप्रमाणशब्दव्यावृत्तेः सत्यन्तेनैव भावात्। प्रमाणशब्दस्यानर्थकत्वात् । महाजनपरिगृहीतत्वं चादृष्टार्थकाध्ययनयोग्यत्वमिति न काप्यनुपपत्तिः। न चैवं सत्यन्तवैयर्थ्यम्। दृष्टार्थकपुराणादिव्यावर्तकत्वात्। तदध्ययनेनाप्यदृष्टजननात्[3]। न च स्वाध्यायोऽध्येतव्य इति विरोधोऽध्ययनगर्भत्वादेदस्य इति वाच्यम्। एतस्योभयमतपक्षतावच्छेदकत्वात् स्वरूपं त्वदृष्टार्थकेश्वरवाक्यत्वम्। अस्माकं नित्यानुपूर्वीकत्वादि परेषां तदवच्छेदेनैव अध्ययनविधिः[4]।

वस्तुतस्तु सत्यन्तस्य स्मृत्यादिसाधारण्यं प्रागुक्तम्। तद्वारणीयम्। तद्वारणं च शब्दजन्यवाक्यार्थज्ञानजन्यत्वप्रयुक्तप्रामाण्यवत्तया तेन वेदस्य प्रामाण्यम् ईश्वरप्रत्यक्षमूलकत्वेन। शब्दान्तरस्य विजातीयानुपूर्वीकस्य प्रामाण्यं शब्दजन्यवाक्यार्थज्ञानजन्यत्वेन। तथा च शब्दजन्यवाक्यार्थज्ञानजन्यत्वप्रयुक्तप्रामाण्यवत्त्वावच्छेदकं तद्विजातीयतदर्थकशब्दत्वं तच्छून्यत्वं विवक्षितम्। शब्दपदं च तादृशवाक्यान्तर्भूतपरम्। तेन एकदेशस्यापि अन्तर्भूततया[5] तत्रापि शूद्रादेरपि अध्ययनबोधो[6] लभ्यते। अत एव चत्वारो वेदा इति सङ्गच्छते। अन्यथा समुदायवृत्तित्वेन वेदत्वस्य तद्विरोध इति सर्वं सुस्थम्।

---

1 T. adds ०वेद०

2 T. omits ०जन्यवाक्यार्थ०

3 T. omits one sentence.

4 T. ०विरोधि

5 T. वेदतया

6 T. ०बाधः

सजातीयोच्चारणानपेक्षोच्चरित-जातीयत्वं पौरुषेयत्वम्, आद्यभारतेऽपि तज्जातीयत्वान्न व्यभिचारः।

अथवा वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति प्रमाणतावच्छेदकवाक्यवृत्तिधर्म्मत्वात् स्मृतित्ववत्। यद्वा वेदाः शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमाणशब्दत्वात् भारतवत्।

न च पठ्यमाने वेदे बाधः भारते मन्वादिस्मृतौ च व्यभिचारः तेषां द्विकर्तृकत्वात्, तादृशज्ञानजन्यजातीयत्वं वा साध्यं, तवाप्येतदभावादेव वेदेऽपौरुषेयत्वव्यवहारः।

सजातीयेति। समानजातीयानुपूर्वीकशब्दोच्चारणानपेक्षोच्चारणविषयजातीयत्वमित्यर्थः।

आद्येति। निष्टार्थस्याविवक्षितत्वादिति भावः।

ननु सजातीयत्वं तद्वृत्तिधर्मवत्त्वमिति धर्मान्तरेण सिद्धसाधनमिति शङ्कया धर्मपक्षकमेवानुमानमाह - **अथ वेति**[1]।

प्रमाणेति। महाजनपरिग्राह्यतावच्छेदकेत्यर्थः। महाजनपरिग्रहश्च ग्रहणधारणानुष्ठानादिरित्यर्थः (५१) अनुच्चारितयागादिवृत्तियागत्वादौ व्यभिचारो मा भूदिति वाक्यधर्मत्वं विशेषणम्। विशेषणं तावन्मात्रं वा इदानीन्तनवेदत्वादावनैकान्तिकमित्युभयमुपात्तमिति भावः। तेन प्रमाणत्वावच्छेदकं यदि प्रमाणमात्रवृत्तित्वं तदा इदानीन्तनवेदत्वे यदि तदवच्छित्तिप्रत्ययजनकत्वं तदायोग्यवाक्यत्वे व्यभिचारः। प्रमाणशब्दत्वमेव वेदत्वमिति तस्यैव तदवच्छेदकत्वात् असिद्धिश्चेति दूषणमलग्रकं भवतीति बोद्धव्यम्[2]। तेषामपक्षत्वे तत्र सन्दिग्धानैकान्तिकं परमते स्यात्। तस्य हेतुमति साध्याभावसन्देहोऽपि दूषकमिति प्रकारान्तरमाह - **तादृशेति**। नेदं पारिभाषिकमित्याह - **तवापीति**। गुर्विति स्वरूपमात्रकथन-परमध्ययनपूर्वकत्वमात्रादेवेष्टसिद्धेरित्येव ध्येयम्[3]।

---

[1] T. यद्वेति।

[2] T. बोध्यम्

[3] T. इत्यवधेयम्।

नन्वप्रयोजकमिदं वाक्यार्थगोचरयथार्थज्ञानपूर्व्वकत्वमेव शब्दप्रामाण्ये तन्त्रं न तु तादृशज्ञानस्य शब्दाजन्यत्वमपि गौरवात्, अन्यथा वेदेऽपि तव हि कर्तृकत्वेन प्रामाण्यं स्यात् लोके तथा दर्शनात्।

एवञ्च अनादिमीमांसासिद्धन्यायेनावगततात्पर्य्यात् वेदादर्थं प्रतीत्य पूर्व्वपूर्व्वाध्यापकेन उच्चरिताद्वेदादुत्तरोत्तरस्याप्यध्ययनतदर्थप्रतीतिरित्यनादितैवातः किं स्वतन्त्रपुरुषेण तत्प्रयोजनस्य परन्त्रादेव सिद्धेः।

किञ्च पूर्व्वकालो न वेदशून्यः कालत्वात् वर्त्तमानकालवत्।

न चांशे बाधः अंशे चाश्रयासिद्धिः, अंशत्वेनानुपादानात्, पूर्व्वकालो न वेदशून्य इत्युद्देश्यप्रतीतेरसिद्धेः नांशतः सिद्धसाधनं। तथा पूर्व्वकालीनं वेदाध्ययनं गुर्व्वध्ययनपूर्व्वकं अध्ययनत्वात् इदानीन्तनाध्ययनवत्।

न च लिप्यनुमितवेदाध्ययनेन व्यभिचारः, लिपेरध्ययनपूर्व्वकत्वात्। न चैवं भारताध्ययनमपि तथा स्यात्, तस्य भारतादावेव व्यासादिकर्तृकत्वेन कथनादिति।

उच्यते - वेदप्रामाण्याधीनं तत्प्रामाण्यमत्यात्माश्रयः। न च पूर्व्ववेदप्रामाण्याधीन-मुत्तरवेदप्रामाण्यमिति व्यक्तिभेदमादाय नात्माश्रय इति वाच्यम्। एवं तत्पूर्व्वस्यापि तत्पूर्व्वप्रामाण्यात् प्रामाण्यमित्यनवस्थानात्। अनादित्वादयमदोष इति चेत् - न। मूलभूतप्रमाणान्तराभावात् अन्यपरम्परापातात्। स्वतः प्रमाणं वेद एव सर्व्वत्र वेदे मूलमिति चेत् - न। सर्व्वेषामेव परवेदापेक्षत्वेन स्वतः प्रमाणत्वाभावात्।

अत एव आचारात् स्मृतिः स्मृतेराचार इत्यत्र विश्वासवीजपरानपेक्षमूलभूतप्रमाणाभावा-दन्धपरम्पराभयेन तत्र वेदमूलकत्वकल्पना। अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रामाण्याव-धारणेऽपि तन्निर्वाहकेतरानपेक्षमूलभूतप्रमाणाभावेनानाश्वास एव।

अन्यथा स्मृत्याचारयोरप्येवं प्रामाण्यावधारणे प्रमाणमूलकत्वकल्पना न स्यात्। तस्मादाश्वासवीजपरानपेक्षेश्वरप्रत्यक्षमूलकत्वादेव वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्य्यते।

एतेनानुमानमपि निरस्तम्। मूलभूतप्रत्यक्षं विना वेदप्रामाण्यानुपपत्त्या साध्याभावसिद्धौ बाधात्।

ननु वेदो न पौरुषेयः अस्मर्य्यमाणकर्तृकत्वादिति बाधकमस्त्विति चेत् - न। कपिल-कणाद-गौतमैस्तच्छिष्यैश्चाद्यपर्य्यन्तं, वेदे सकर्तृकत्वस्मरणस्य प्रतीयमानत्वात्।

न च मूलभूतानुभवाभावात् स्मरणादुपपत्तिः, पौरुषेयत्वानुमानादेवानुभवात्। अस्मरणमेव तत्र बाधकमिति चेत् - न। एवं सत्यस्मरणाननुभवयोरन्योन्याश्रयात्। अग्रे तदर्थस्मरणाभावेऽपि प्रमाणस्यानुभावकत्वात्।

न हि भाविस्मरणमपेक्ष्य प्रमाणमनुभावकम्। 'तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त ऋचः सामानि जज्ञिरे' इति कर्तुश्रवणात् 'प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते' इत्यादिकर्तृस्मरणाच्च। पौरुषेयत्वे बाधकं विना अर्थवादमात्रत्वस्य वक्तुमशक्यत्वात्।

'स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा।

शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाः ।।

इति महाभागवतपुराणीयवाक्यस्य श्रुतिविरोधेनान्यत्र तात्पर्य्यात्।

ननु स्वयंभूरेष भगवानित्यादिवाक्यं वेदस्य नित्यतां प्रतिपादयद्बाधकं स्यादित्यत आह - **स्वयंभूरिति।** यथौदुम्बरीं स्पृष्ट्वा उद्गायतीति प्रयुक्त [1] श्रुतिविरोधेन सर्वा औदुम्बरीं वेष्टयितव्येति स्मृतेर्यथाश्रुतार्थे बाधकं कल्प्यते। स्मृतिमूलभूतश्रुतिसापेक्षप्रामाण्याय प्रत्यक्षवेदविरोधेन मूलवेदाननुमानादप्रामाण्यनिर्णयात् तथा इहापीति भावः।

इति शब्दखण्डे तात्पर्यवादालोकः समाप्तः ।।

---

[1] T. प्रत्यक्ष०

न च कार्य्यपरमेव प्रमाणं, कर्तृस्मरणस्य सर्व्वत्राविध्यर्थत्वात् सकर्तृकत्वार्थवादस्य स्वर्ग-नरकार्थवादस्येव 'ईश्वरमुपासीत' इति विधिशेषत्वाच्च। साधयिष्यते च सिद्धार्थस्य प्रामाण्यम्।

न चैवमानन्दोऽपीश्वरे स्यादिति वाच्यम्। तत्र मानान्तरविरोधात्। पुरुषस्य भ्रम-प्रमादादिभूयिष्ठत्वेन वेदेनाश्वास इति चेत् - न। धर्म्मिग्राहकमानेन नित्यसर्व्वज्ञत्वेन सिद्धे तत्र दोषाभावादिति।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे तात्पर्य्यवादः।

अथ शब्दानित्यतावादः।

ननु तथाप्यप्रयोजकं पौरुषेयत्वानुमानं नित्यनिर्दोषत्वेनैव तत्प्रामाण्योपपत्तेरिति चेत्। न। वर्णानां अनित्यत्वेन तत्समूहस्य सुतरामनित्यत्वात्। न च तदसिद्धं, तथाहि वर्णात्मकः शब्दोऽनित्यः समवेतत्वे मत्युत्पत्तिमत्त्वात् घटवत्। न च हेत्वसिद्धिः, उत्पन्नो गकारः हट्टायामुत्पद्यमानोऽस्ति कोलाहल इति प्रत्ययात्। न च व्यञ्जकाभावात् प्रागनुपलब्धस्योपलब्धिमात्रं तस्य, उत्पन्नो गकार इति प्रत्ययात्। न चायमौपाधिकः, अन्योत्पत्तावगृह्यमाणायामपि तदनुभावात्। न च स्मर्य्यमाणारोपः, बाधकाभावात्। अन्यथा घटोत्पत्तिरपि न सिद्ध्येत्।

अथ शब्दानित्यतावादालोकः

नित्येति। नित्यतया निर्दोषत्वेनैव प्रामाण्योपपत्तेरिति निर्दोषता[1]हेतुतया नित्यत्वं बोद्धव्यम्[2]। ननु[3] ननु[3] प्रामाण्यहेतुत्वेन लौकिकवाक्यातिव्याप्तिः। **तथाहीति।** वर्णात्मक [4]इत्यंशतः सिद्धसाधनतावारणाय समवेतत्वे सतीत्यस्य समवाये सतीत्यर्थः। तेन समवायसम्बन्धसमानाधिकरणोत्पत्तिमत्त्वं लभ्यते। अन्यथा समवायप्रतियोरित्वसमानाधि-करणेत्यर्थे प्रतियोगित्वविशेषणवैयर्थ्यापत्तेः। न चास्मन्मते शब्दत्वादिसमवायवत्तया शब्दस्य हेतुमत्त्वेऽपि कथं परमते हेत्वसिद्धिरिति वाच्या[5]। सादृश्यादीनां तन्मते तत्र समवायात्। उत्पत्तिरप्यत्र स्वसमानकालीने [6] पदार्थध्वंसानाधारसमय [7] मात्रनिर्वाच्यम्। अन्यथा तादृशसमवाय[8]सम्बन्धसम्बन्धे हेतुत्वलाभे व्यर्थविशेष्यत्वात्[1]।

---

[1] T. निर्दोष०
[2] T. बोध्यम्
[3] T. न तु
[4] T. इति विशेषणम्
[5] T. हेतुः सिद्धिरिति वाच्यम्।
[6] T. ०काल०
[7] T. ०समयाधारत्व०
[8] T. ०समय०

यत्तु श्रोत्रानुविधानात् पदं शृणोमीत्यबाधितानुव्यवसायात् श्रोत्रादन्येन ग्रहीतुमशक्यत्वाच्च श्रोत्रग्राह्यैवानुपूर्वी। सा च घसमानकालीनप्रागभावप्रतियोगित्वं टस्येति प्रागभावप्रतियोगित्व-मुत्पत्तिमत्त्वं वर्णस्य प्रत्यक्षमिति - तन्न। घज्ञानानन्तरज्ञानविषयत्वं टस्यानन्तर्य्यं तयोरानुपूर्वी ।सा च मनसैव गृह्यते घटपटज्ञानयोरिव। तदुपनीता च श्रोत्रविषयः।

वस्तुतः तादृशसमवाय [२] सम्बन्धपरमेवोत्पत्तिपदं समवाये सत्युत्पत्तिरित्येव हेतुः। कथायां धूमादित्येव प्रयोज्यम्[३]। मतुपो व्यर्थत्वात् इत्युक्तत्वादिति।

ननूत्पत्तिमत्त्वं (५२) न स्वसमानकालपदार्थप्रतियोगिक [४] ध्वंसानाधारसमयसम्बन्धित्वं वर्णमात्रपक्षीकरणे चरमशब्दे भागासिद्धिसन्देहादिति प्रागभावप्रतियोगित्वं वाच्यम्। तत्रैकदेशिनः समाधानमाशङ्कां निराकरोति[५] - **यत्त्विति।**

सा चेति। तद्वर्णमात्रस्यानुपूर्वीत्वे नदी दीनेत्यादेः अविशेषप्रसङ्गादिति भावः।

घटज्ञानेति। मौनिश्लोकानुरोधादिति भावः।

तदुपनीतेति। न च तदुपनयपर्यन्तं लाक्षणिकम् उत्तरवर्ण[६] एव न स्थित[७] इति विशेष्याभावे[८] कुतः तद्विशिष्टश्रौत्रधीरिति[९] वाच्यम्। वीचीतरङ्गन्यायेन नानावर्णोत्पत्त्या वर्णान्तरे पूर्ववर्णघटितसम्बन्धेन विशेषणज्ञानोत्पत्त्या स्मर्यमाणानुपूर्वीविशेषणकविशिष्टधीसामग्र्या वा तथासम्भवादिति भावः।

---

1 T. ०विशेषणत्वात्
2 T. ० समय०
3 T. प्रयोक्तव्यम्
4 T. omits
5 T. आशङ्क्य निषेधति
6 T. तद्वर्णः
7 T. स्थितिः
8 T. ०अभावात्
9 T. ०श्रौत्रविशिष्टधीरिति

ननु स एवायं गकार इति प्रत्यभिज्ञाबाधिकमिदमित्येकैका एव गकारादिव्यक्तयः। यद्यपि प्रत्यभिज्ञाया नित्यत्वं न विषयस्तथापि नाशकत्वाभिमतशब्दान्तरादीनां अन्तरासम्भवेऽपि तावत्कालीनतां गकारस्य गृह्णातीति 'तावत्कालं स्थिरञ्चैनं कः पश्चान्नाशयिष्यतीति पराभिमताशु विनाशित्वव्यतिरेकान्नित्यतायामेव पर्य्यवस्यति।

न च धर्म्मिणो गकारस्य भेदेऽपि एकजातीयत्वेन प्रत्यभिज्ञा, तथा सति तज्जातीयोपमितिः स्यान्न तु स एवायमिति। अथ तारत्व-मन्दत्वविरुद्धधर्म्माध्यस्तविषयत्वेन सा न प्रमाणम्। न च तारत्वादीनां स्वाभाविकत्वं विरुद्धत्वञ्चासिद्धं, मन्दस्तारो गकारस्तारान्मन्दोऽन्य इत्यनन्यथासिद्ध-प्रत्यक्षात् तत्सिद्धेः। न ह्यपां शैत्य-द्रवत्वे स्वाभाविके इत्यत्र प्रत्यक्षादन्यत् प्रमाणम्। तत् किं यो यद्गतत्वेन भासते स तद्धर्म्म एव तथा सति रक्तः पटः लोहितः स्फटिक इत्यादावपि तथा स्यादविशेषात्, न, रक्तत्वादीनामन्यधर्म्मत्वस्थितौ स्फटिकादीनाञ्च तद्विरुद्धधर्म्मत्वे स्थिते जवाकुसुमादेरन्वय-व्यतिरेकानुविधानाद्बाधेन तत्र भ्रान्तत्वात्।

तारत्वमन्दत्वेति। न चान्यूनानतिरिक्तवृत्तिजातिद्वयस्यासंभवात् नेयं शङ्का । तारत्वमन्दत्वयोरभेत् तद्वृत्तिधर्मयोश्चभेदादित्यग्रे वक्ष्यमाणत्वात्। एकप्रतियोगिकं तारत्वं तत्प्रतियोगिकं मन्दत्वं विरुद्धं यदेव एकप्रतियोगिकतारत्वं तदेवापरप्रतियोगिकं मन्दत्वमित्यग्रे वाच्यमित्यर्थः[१]।

अनन्यथेति[२]**।** न चानन्यथासिद्धत्वं प्रमात्वम्। तथा च प्रमारूपप्रत्यक्षेणेत्यर्थः। तथा च विनिगमनाभावात् प्रमाप्रत्यभिज्ञानवैपरीत्यमेव कुतो नेति वाच्यम्। उभयज्ञानाप्रामाण्यकल्पनापेक्षया प्रत्यभिज्ञामात्रस्य प्रामाण्यकल्पनायां लाघवस्यैव विनिगमकत्वादिति भावः।

---

[1] T. भावः

[2] T. अनन्येति।

न चेह तारत्वादेरन्यधर्म्मत्वेनोपस्थितिः। नापि गकारादीनां तद्विरुद्धधर्म्मवत्त्वं, नाप्यन्यस्य तारत्वादिधर्म्मिणोऽनुविधानम्। न चावश्यं स्वीकृतवायोरेव धर्म्मास्तारत्वादयोगकारादिगतत्वेन भासन्ते इति वाच्यम्। स्पर्शाग्रहे त्वचो व्यापाराभावेन त्वचा तदग्रहात्।

न च श्रवता तद्ग्रहः, अवायवीयत्वेन वायुमात्रधर्म्माग्राहकत्वाच्चक्षुर्वत्। तारत्वादयो वा न वायुधर्म्माः श्रावणत्वात् कादिवत्, वायुर्वा न श्रवणमात्रग्राह्यधर्म्मो मुर्त्तत्वात् पटवत्। अत एव न तारत्वादयो वायुधर्म्मध्वनिधर्म्माः वायुधर्म्मस्य ध्वनेरग्रहात्।

न च ध्वनिरूपः शब्दो नभोवृत्तिरेव तथा सति तद्धर्म्मतारत्वादिग्रहः श्रवसेति वाच्यम्। तारोऽयं गकार इत्यत्र ध्वनीनामस्फुरणात् तत्कारणाभावाच्च।

न च व्यक्त्या विना जातिस्फुरणं, तस्या व्यक्तिसमानसंवित्संवेद्यत्वात्।

न च स्मर्य्यमाणतारत्वाद्यारोपः, बाधकाभावात् प्रथमतस्तारत्वाद्यग्रहप्रसङ्गाच्चेति। मैवम्। तारत्वादयो न गकारादिजातयः गत्वादिना सङ्करप्रसङ्गात्।

स्पर्शाग्रहेति। स्वव्यवस्थापकगुणमात्रपुरस्कारेण इन्द्रियप्रवृत्तेरिति भावः।

अवयवीयत्वेनेति। अवयवीयबहिरिन्द्रियत्वेनेत्यर्थः। तेन न मनसि व्यभिचारः[1]।

वायुमात्रेति। सत्तादिग्राहकतया व्यभिचारः स्यादिति मात्रपदोपादानमिति भावः । वायुधर्मो वायुमात्रधर्म इत्यर्थः। अन्यथा सत्तादावनैकान्तिकमिति भावः।

न श्रवणेति। न श्रवणमात्रग्राह्यधर्मेत्यर्थः। तेन न बोधः, वायोर्द्रव्यत्वात् इति भावः।

ननु तारत्वं जातिविशेषः। तस्य शब्दवृत्तित्वेऽपि वायुवैजात्यमावश्यकमिति लाघवात् तदेवास्तु। न तु शब्देऽपि वैजात्यान्तरम्। अत एव बाधकात् अस्त्वारोप इत्यरुचेर्दोषान्तरमाह - **प्रथमत** इति।

[1] T. adds इति भावः।

न च नानैव तारत्वं, ताराकारानुगतप्रत्ययाभावप्रसङ्गात्।

न च सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकशब्दवृत्तिजातित्वेन नानातारत्वेष्वनुगमः, तदप्रतिसन्धानेऽपि तारत्वानुगतप्रत्ययात्। तारत्व-मन्दत्वे च न शब्दवृत्तिजातौ सप्रतियोगिकत्वात्।

नापि तारत्व-मन्दत्वयोर्विरोधः, य एव गकारस्तार आसीत् स एवेदानीं मन्द इति समयभेदेन वक्तृभेदेन च तयोरेकत्वप्रतीतेः। तारोऽयं न तारतरस्तारान्मन्दोऽस्य इति भेदप्रतीतिरस्तीति चेत् - न। धर्म्मिणोऽभेदे भासमाने विशिष्टधर्म्मिभेदप्रतीतेर्धर्म्मभेदविषयत्वात्। एकत्र घटे लोहितोऽयं न श्याम इदानीमिति प्रतीतिवत्।

स्मर्यमाणारोपे हि सादृश्यविशिष्टधर्मिधीजनितारोप्य[१] (५३) स्मृतिहेतुरिति प्रथमं चाकचक्यादि-विशिष्टशुद्धशुक्तिधीमात्रम्। न तु रजतत्वविशिष्टधीर्यथा। तथेहापि स्यादिति भावः।

सजातीयेति। स्वाश्रयसजातीयेत्यर्थः। अत्र च सुखादिसाक्षात्कारप्रतिबन्धकतानवच्छेदकतया[२] सजातीयपदं गुणत्वव्याप्यजात्या साजात्यस्य विवक्षितत्वात्। प्रतिबन्धकमात्रे न[३] कृते फलोपधानप्राप्तौ बुभुत्सावशात् मन्देऽपि शब्दे श्रूयमाणे[४] तारशब्दस्याप्रतिबन्धकतया तत्साधारणानुगतमतिर्न लभ्यते[५] इति तदवच्छेदकत्वमुक्तम्।तस्य मन्दबुभुत्सयोत्तेजिकया अप्रतिबन्धकीकृतस्यापि प्रतिबन्धकतावच्छेदक-वत्त्वात्[६]। अनुपहितफलस्यापि योग्यत्वात्। शब्दवृत्तिपदं रसादिसाधारणमनुगतमतिप्रसङ्गवारणाय। बुभुत्सामीदृशीमादाय मन्देऽपि मा भूदनुगतमतिरिति जातिग्रहणमिति भावः।

---

[1] T. ०धर्मधीस्मारितारोप्य०

[2] T. ०अप्रतिबन्धकतया

[3] T. च

[4] T. गृह्यमाणे

[5] T. लभ्येत

[6] T. ०अवच्छेदके सत्त्वात्।

न च तीव्रेण गकारेण मन्दगकाराभिभवात् तयोर्भेदः। न हि तदेव तदभिभावकं, तस्यैव तेनैव तदैव ग्रहणाग्रहणयोर्विरोधात् इति वाच्यम्। तारत्वव्यञ्जकवायोर्बलवत्त्वेन मन्दत्वव्यञ्जक-वाय्वभिभावात् मन्दत्वस्याग्रहणात्।

सन्तु वा तार-मन्दरूपादयोऽभिन्ना एव गकारास्तत्प्रत्यभिज्ञाने बाधकाभावात्। तस्मात् वायुधर्म्मा एव तारत्वादयः शब्दगतत्वेन भासन्ते। दर्पणधर्म्मा इव मुखादौ तद्ग्रहणाच्च स्पर्शपुरस्कारेण कर्णशष्कुलीत्वगिन्द्रियेण तार-मन्दजनकवायूनां त्वयाप्युत्कर्षापकर्षस्योद्भूतस्पर्शस्य च स्वीकारात् श्रौत्रेणैव वा। चक्षुरादेर्यत्र वायुधर्म्मग्रहस्तत्रायोग्यत्वमुपाधिः। अन्यथा श्रोत्रेण स्वगुणो न गृह्येत इन्द्रिये तथा दर्शनात्। चक्षुर्वा न पार्थिवरूपग्राहकं अपार्थिवेन्द्रियत्वात् रसनवत् इत्याद्यपि स्यात्।

अथ योग्योयोग्येन गृह्यते स्वगुणः परगुणो वा। योग्यता च फलबलेन कल्प्यते। तर्हि श्रोत्रस्यापि वायुधर्म्मग्रहे तुल्यम्। न च तारो गकार इत्यत्र वायोरप्रतीतिः, वायुत्वेननाप्रतीतावपि तारत्वादिनैव तत्प्रतीतेः। यथा अग्नित्वेनाप्रतीतावपि अयोगोलके लोहित इति प्रतीतिः।

ननु वायुशब्दयोस्त्वचा श्रोत्रेण वा ग्रहे केन तारोऽयं गकार इत्यारोप इति चेत् - न। उभयेन्द्रियग्राह्ययोरसंसर्गाग्रहात् संसर्गव्यवहारः। अस्तु वा त्वगिन्द्रियोपनीतस्य श्रोत्रेणारोपः श्रोत्रेणैव वा तारत्वग्रहोऽपौत्युक्तम्, उत्पत्तिमत्त्वं चासिद्धं तत्प्रतीतेः श्रुतपूर्व्वोऽयं गकार इति प्रत्यभिज्ञानबाधितत्वात्। ननु प्रत्यभिज्ञेव तया बाधिता गत्वजात्यौपाधिकोऽभेदप्रत्ययो गकारे सम्भवतीत्युक्तमिति चेत्- न। गत्वजातेरसिद्धेः भेदे भासमानेह्यभेदप्रतीतिर्जातिमालम्बते।

वाय्वभिभवात्। वायुसम्बन्धात् प्रतिबन्धकसम्बन्धस्यैव अभिभवात्। सन्तु वेति प्रौढवादमात्रम्। नानात्वेऽपि अनुगततारत्वाप्रत्ययप्रसङ्गानुद्धारादिति मनसिकृत्य प्रथमकल्पमेवोपसंहरति - **तस्मादिति**।

उत्कर्षेति। उत्कर्षत्वाश्रयापकर्षत्वाश्रयजातिमत्त्वादित्यर्थः।

न च गकारभेदप्रतीतिरस्ति। तारत्वमन्दत्वे अपि न भेदहेतू य एव तारः स एवेदानीं मन्द इति प्रत्यभिज्ञानात्। गकारानित्यत्वेऽपि तथा सम्भवतीति चेत् - तर्हि नित्यत्वेऽपि कर्णशष्कुली-त्वगिन्द्रियोपनीतवायुधर्म्मोत्पत्तेरुपाधित्वं सम्भवति।

न च वायोरप्रतीतिः, उत्पन्नत्वेनैव तत्प्रतीतेः लोहितत्वेनैव जपाकुसुमस्य स्फटिके। अस्तु वा प्रागनुपलभ्यमानत्वे सति उपलभ्यमानत्वेन उत्पन्नस्य सादृश्येन स्मृतोत्पत्तिमत्त्वारोपः।

न चैवं घटादावपि नोत्पत्तिः सिद्धेदिति वाच्यम्। कुलालव्यापारानन्तरमनुभूयमानघटस्य तद्व्यापारात् प्रागनुभूयमानेन घटेन नाभेदो भासते। किन्तु भेद एवेति तत्र प्रागसत्त्वे सत्त्वं सिध्यति। गकारे तूत्पत्तिप्रतीत्यनन्तरं कण्ठताल्वादिव्यापारात् पूर्व्वमनुभूयमानगकारेणाभेदप्रत्ययात् दीपवत् स व्यञ्जक एव।

अथ शब्द उत्पद्यते उत्कर्षवत्त्वे सति अपकर्षवत्त्वात् माधुर्य्यवत् अत एवानित्यत्वमिति चेत् - न। तारत्वमन्दत्वयोरुत्कर्षापकर्षयोर्गकारे पूर्व्वन्यायेनासिद्धेः सिद्धौ वा आतिसङ्करभयेनोत्कर्षा-पकर्षयोर्जात्योः रसत्व-शब्दत्वव्याप्ययोर्नानात्वेन रसशब्दसाधारण्याभावात्।

अत एव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकसामान्यमुत्कर्षः तत्प्रतिबध्यसाक्षात्कार-विषयतावच्छेदकसामान्यमपकर्ष इति साधारणो हेतुरपास्तः। तारत्वादेर्गकारजातित्वासिद्धेः।

सजातीयेति। तादृशसाक्षात्कारप्रतिबन्धकतावच्छेदकतादृशसाक्षात्कार[1] प्रतिबध्यतावच्छेदकताश्रय-जातिमत्त्वादित्यर्थः[2]। अत्र च सामान्यपदमनुगमक[3]धर्मप्रविष्टमिति उपात्तम्। वस्तुतस्तादृशबुभुत्सादिमति[4] मन्दशब्देऽपि साध्यसत्त्वेन व्यभिचारवारकतया हेतावप्रवेशनीयमेवेति अवधेयम्।

---

[1] T. omits

[2] T. ०जातीयत्वादित्यर्थः।

[3] T. ०अनुगत०

[4] T. ०बुभुत्सावशादिति

साधनावच्छिन्नसाध्यव्यापकमूर्त्तगुणत्वस्याश्रौत्रत्वस्य चोपाधित्वात् अप्रयोजकत्वाच्च। न हि कारणाधीन एव उत्कर्षोऽपकर्षश्च, परममहति परमाणौ च परिमाणे प्रत्येकं सत्त्वात्। न चोभयस्यैकत्र सत्त्वं कारणप्रयोज्यं, एकैकवद्द्वयोरपि प्रत्येकमेकत्वात्। स्यादेतत् श्रोत्रव्यापारानन्तरमिदानीं श्रुतपूर्व्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमेव शब्दानित्यत्वं विनाशिभावत्वेनोत्पत्तिमत्त्वानुमानाद्वा, प्रत्यक्षप्रतियोगिकाभावत्वेन हि प्रत्यक्षत्वं ध्वंसस्य घटध्वंसवत् न तु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्षत्वं तन्त्रं धर्म्माभावस्य प्रत्यक्षत्वापत्तेः। तदिन्द्रियाग्राह्येऽपि प्रतियोगिसमवायिनि गन्धरसाभावयोर्ग्रहणाच्च। नोभयं गौरवात् स्मृतघटसंयोग-ध्वंसाप्रत्यक्षत्वापाताच्च। न च प्रतियोगियोग्यत्वस्य तन्त्रत्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यात् इति वाच्यम्। आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावात्।

साधनेति। यथाश्रुतस्य ज्ञानादौ साध्यव्यापकत्वात् साधनेत्यादिविशेषणम्। न च ज्ञानादौ तथा साध्यम्। ज्ञानादेरन्यसाक्षात्काराप्रतिबन्धकत्वात् । सुखादेस्तथाभावेऽपि विजातीयमात्रं प्रति तथाभावात्। न तु सजातीयेऽपि । मूर्तगुणत्वं च मूर्तवृत्तिमात्रम्। न तु गुणत्वान्तर्भावोऽपि। व्यर्थविशेष्यत्वादिति।

शुद्धसाध्यव्यापकमुपाधिमाह - **अश्रोत्रगुणत्वेति।** उत्पत्तिगुणत्वमन्मात्रे[1] श्रोत्रगुणत्वाभावसत्त्वात्। न च शब्दोऽपि सर्वो न श्रोत्रगुण इति वाच्यम्। व्यापकव्यभिचारस्यादोषत्वात्। ध्वनेश्च वायुधर्मत्व[2]मतेऽयमुपाधिः, अतो न व्यभिचारः। द्रव्यादेरपि व्यावर्तकत्वात्[3] न पक्षेतरत्वम्।

केचित्तु - (५४) अश्रोत्रत्वमुपाधिरिति पाठं कल्पयन्ति। स ध्वनौ साध्यव्यापकतया प्रामादिक इति ध्येयम्। ग्राहकेत्युपलक्षणम्। काले गृह्यत एवेति इष्टापत्तिरपि द्रष्टव्या। न च समयेऽपि किञ्चिद्देशावच्छेदेन ग्राह्यः। अत एवासमवायिनोऽपि तद्देशत्वसम्भवादिति।

---

[1] T. उत्पत्तिमात्रे

[2] T. ०वायवीयत्व०

[3] T. ० व्यावर्तनात्

किञ्च यस्य सत्त्वं यत्रानुपलब्धिविरोधि तस्याभावस्तत्र गृह्यते इति योग्यानुपलब्ध्यर्थः। अत एव पृथिवीत्वाभावो जलीयपरमाणौ न प्रत्यक्षः प्रत्यक्षश्च वायौ रूपाभावः। अस्ति च तथा शब्दे तस्य सत्त्वे समवधाने च प्रतीतिप्रसङ्गात्। निरधिकरणाभावप्रतीतिर्नास्तीति चेत् - न। इहेदानीं शब्दो नास्तीति प्रतीतेः। तस्मात् यत्राधिकरणे देशे समये वा प्रतियोग्यत्र वर्त्तते तत्र तदभावो निरूप्यते।

अत एव सद्भ्यामभावो निरूप्यते इत्युक्तम्। शब्दाभावस्य च स्वत एवेन्द्रियसन्निकृष्टत्वात् नाश्रये सन्निकर्षापेक्षा। इन्द्रियविशेषणतया नाभावग्रहणमिति चेत् - न। अयोग्यत्वस्योपाधित्वात्। अन्यथा गुणस्य संयुक्तसमवायेन ग्रहणदर्शनात् न समवाये शब्दग्रहः स्यादिति - मैवम्। सत एव हि शब्दस्य व्यञ्जकविरहादनुपलब्धिमात्रं न तु ध्वंसः। तत्तद्व्याप्येतरसकलतदुपलम्भकसमवधाने तदनुपलब्धिरूपयोग्यानुपलब्धेरभावात्। प्रतियोग्युपलम्भकव्यञ्जकवायोरभावात्।

किञ्चेति। प्रतियोगिसत्त्वप्रतिसञ्चितप्रतियोगिकमनुपलम्भस्य तद्विरोधित्वमित्यर्थः। एतच्च ***प्रत्यक्षपरिच्छेदे*** विवेचितम्। तत्रानुसन्धेयमिति न प्रतिपाद्यते।

अत एवेति। सद्भ्यां प्रामाणिकाभ्याम्,[१] न तु ज्ञायमानाभ्यामिति तत्रास्तीति तदुपष्टम्भः।

तत्तदिति। उक्तरूपो विरोधोऽपि यावत्तदुपलम्भकसमवधाननियतः, न हि यत्किञ्चित्कारणसत्त्वेऽपि कार्योत्पादो येन केनापि ग्राहकेणोपालम्भापादनं संभवति। न चाश्रयानाशानन्तरसंयोगध्वंसप्रत्यक्षस्थले व्यभिचारान्नेयं सामग्रीति वाच्यम्। व्याप्यपदेनैव तद्वारणात्[२]। तथा हि व्याप्यत्वं न दैशिकम्। वारणीयस्य इन्द्रियसन्निकर्षादिरवारणे[३] घटेन्द्रियसन्निकर्षाग्राह्यघटाभावग्रहे व्यभिचारादिति कालिकं वाच्यम्। भवति हि यदा घटेन्द्रियसन्निकर्षः, तदा घट इति व्याप्तेः घटव्याप्यसन्निकर्ष इति तदितरसामग्र्यामेव घटाभावप्रत्यक्षोत्पत्तिः । न चैवमपि समञ्जसम्। घटोपलम्भप्रागभावस्य घटाव्याप्यस्य घटोपलम्भमात्रहेतोः।

---

[1] T. omits

[2] T. ०धारणात्

[3] T. ०सन्निकर्षादेरवधारणे

विनष्टप्रतीतिरपि त्वगिन्द्रियोपनीतव्यञ्जकवायुस्पर्शध्वंसोपाधिकैव। वायुर्नोत्पादकः।

किन्तु व्यञ्जकः इत्यत्र किं विनिगमकमिति चेत् - न। इदानीं श्रुतपूर्व्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीत्यनन्तरं पुनः श्रवणे श्रुतपूर्व्वोऽयं गकारः पुनः स एवायं कोलाहल इति प्रत्यभिज्ञानमेव। घटध्वंसप्रतीत्यनन्तरञ्च स एवायं घट इति न प्रत्यभिज्ञानमिति तत्र विनष्टप्रतीत्याध्वंस एव सिध्यति।

अत एव तारत्व-तारतरत्व-मन्दत्व-मन्दतरत्वप्रतीतीनां भ्रमत्वकल्पनमित्यपास्तम्। एतासु सतीष्वप्यभेदप्रत्यभिज्ञानात्। स्यादेतत् शब्दः प्रयत्नसाध्यः तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलभ्यमानत्वात् पटवत्, अभिव्यञ्जकत्वं हि इन्द्रियसम्बन्धप्रतिबन्धकापनायकत्वादिन्द्रियसन्निधापकत्वाद्वा कुद्योत्सारणेनेव पटादीनाम्। तदुभयमपि शब्दे न सम्भवति नित्यसमवेतत्वेनावरणापनयनसन्निधापनयोरभावात्।

नापि श्रोत्रसंस्कारात्, इन्द्रियसंस्कारस्य उन्मीलनालोकादेः सकृदिन्द्रियसम्बन्धयोग्यसर्वार्थोपलब्ध्यनुकूलसंस्कारजनकत्वं दृष्टं तद्वद्वायुरपि सकृदेव सर्वशब्दोपलब्ध्यनुकूलं श्रोत्रे संस्कारमादध्यात्, तथात्र सर्वशब्दोपलब्धिः स्यात्।

समवधानं विनैव घटाभावप्रत्यक्षोत्पत्तेरिति असाधारणोपलम्भकपरं व्याप्यपदम्[१]। तथा च प्रतियोगितदसाधारणेतर[२] यावत्तदुपलम्भकसमवधाने सति अनुपलब्धिः योग्यानुपलब्धिः पर्यवसन्ना। न चेदमुदाहृतसंयोगनाशप्रत्यक्षं व्यभितरति। संयोगिनः संयोगप्रत्यक्षासाधारणकारणत्वादिति[३] भावः।

वायुस्पर्शेति। यद्यपि वायुध्वंस इत्येव वक्तुमुचितं तथापि वायुप्रत्यक्षताविप्रतिपत्तेस्तु इन्द्रियोपनीतस्पर्शध्वंसेऽभ्युपगमतानुरोधादुक्तम्।

---

[1] T. ०परम्।

[2] T. ०तदसाधारणग्राहकेतर०

[3] T. ०असाधारणत्वादिति ०

तदुक्तम् -

'सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्।

घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते'।।

अत्रान्वय-व्यतिरेकाभ्यां कार्य्ये प्रतिनियतजनकजन्यत्ववच्छब्दोऽपि प्रतिनियतव्यञ्जक-व्यङ्ग्यत्वमिति चेत् - न। वर्णा हि न प्रतिनियतव्यञ्जकव्यङ्ग्याः एकावच्छेदेन समानदेशत्वे सति समानेन्द्रिय-ग्राह्यत्वात् घटैकत्वपरिमाणवत्।

न चावयवसंयोगबहुत्वव्यञ्जकाव्यङ्ग्येनावयविनोत्पलत्व-व्यञ्जकदीपाव्यङ्ग्येन तन्नीलिम्ना घटवृत्तिपृथक्त्वाव्यञ्जकाव्यङ्ग्येनैकत्वेन वा व्यभिचारः। अवयवसंयोगाऽवयविनोर्नीलत्वोत्पलत्व-योश्चाव्याप्यव्याप्यवृत्तिनोरुत्पलत्वस्य चाधिकवृत्तित्वेनैकावच्छेदेन वृत्त्यभावात्। बहुत्वपृथक्त्व-व्यञ्जकव्यङ्ग्यत्वञ्च अवयव्येकत्वयोरिति न परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वम्।

न प्रतिनियतेति। न परस्परव्यभिचारिप्रमापकप्रमाण्या इत्यर्थः। तेन द्वित्वभ्रमजनकेन परिमाणग्राहिण्या[1] परिमाणभ्रमजनकेनैकत्वग्राहिणा च न व्यभिचार इत्यर्थः।

एकावच्छेदेनेति देशकालसाधारणम्। अतो नैकाधिकरणक (५५) क्रमिकगन्धादिभिः व्यभिचारः। तेषां भिन्नसमयावच्छेदेन वृत्तेः। न चैवमस्यावश्यकत्वे सति समानदेशत्वं व्यर्थम्। येन चरणावच्छिन्न-शाखावृक्षप्रतियोगिकाभ्यां येन संयोगाभ्यामन्योऽन्याविषयकप्रमाविषयाभ्यामनैकान्तिकवारकत्वात्।

रूपरसादिभिर्व्यभिचारवारणाय **समानेन्द्रियेति**। प्रतिनियतेन्द्रियाग्राह्यत्वात् इत्यर्थः। न च विशिष्टाभावस्यातीन्द्रियेऽपि सत्त्वात् व्यभिचारः। तादृशसाक्षात्कारविषयत्वस्यैव साध्यतया अतीन्द्रियेऽपि साध्याभावाभावादिति[2] भावः।

---

[1] T. ०ग्राहिणा

[2] T. साध्यसत्त्वादिति

अत एव नीला बलाकेत्यत्र रूप-परिमाणयोरर्द्धनिखातवंशसङ्ख्या-परिमाणयोर्वा न व्यभिचार इति - मैवम्। वर्णाः प्रतिनियतव्यञ्जकव्यङ्ग्याः आश्रयेण सह समानेन्द्रियाग्राह्यत्वात् गन्धवत् इत्यापाततः सत् प्रतिपक्षत्वात्।

वस्तुतस्तु अनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ प्रतिनियतव्यञ्जकव्यङ्ग्यत्वसाधकस्यैव बलवत्त्वम्। शब्दस्य शब्दजनकत्वञ्च शब्दनाशकत्वं वीचीतरङ्गन्यायेनोत्पत्तिकल्पनञ्च कल्पनमेव शब्दस्य शब्देऽजनकत्वादनाशकत्वाच्च अन्त्याद्यशब्दवत्।

एतेन सामान्यवत्त्वे सत्यस्मदादिवहिरिन्द्रियजप्रत्यक्षत्वात् इत्यपास्तम्। प्रत्यभिज्ञानबाधात् शब्दत्व-गत्वादेरसिद्धेश्च, तस्माच्छब्दो नित्यः व्योमैकगुणत्वात् तत्परिमाणवत्, श्रोत्रग्राह्यत्वात् शब्दत्ववत्,

---

यत एव तादृशं साध्यं विवक्षितम् , अत एव नीलेत्यादौ न व्यभिचार इत्याह - **अत एवेति।**

ननु मिथ इति विशेषणप्रत्यक्षोपष्टम्भकपरतया ग्रन्थोऽवतरणीयः[१]। पददानेऽपि उक्तविवक्षाविरहे तत्राव्यभिचारावारणादिति। **आश्रयेणेति।** आश्रयाग्राहकेन्द्रियग्राह्यत्वादित्यर्थः।

व्योमैकेति। ननु व्योममात्रवृत्ति[२] गुणत्वं पर्यवसितो हेतुः। तत्र च गुणांशो व्यर्थः। न च ध्वंसानवच्छिन्नसत्तावत्त्वं नित्यत्वं साध्यं विवक्षितम्[३]। तत्र च साध्ये नभोनिष्ठविशेषपदार्थो व्यभिचार इति गुणग्रहणम्[४]।

मीमांसकानां सत्ताविशेषयोरनभ्युपगमेन तत्साध्ये तत्र व्यभिचारवारणाय[१] विशेषणोपादानानौचित्यादिति। मैवम्। व्योममात्रवृत्तित्वं यदि व्योमेतरावृत्तित्वे सति व्योमवृत्तित्वं तदा

---

[1] T. ०अवतारणीयः। मिथः

[2] T. omits

[3] T. omits

[4] T. इति वाच्यम्।

व्यर्थविशेष्यत्वमिति। व्योमेतरावृत्तित्वमात्रमर्थः। तावन्मात्रं च शब्दसमवाये व्यभिचारि। तेन[२] गुणत्वं विशेषणमिति भावः।

अत्र यद्यपि ***मीमांसकानाम्*** अन्वयव्यतिरेकिण एवानुमानतया व्यतिरेकोपपादनावश्यकतया व्योमत्वजातेरभावेन शब्दाश्रयत्वस्यैव तत्त्वे व्यतिरेकव्याप्तेर्व्यर्थविशेषणतया दुर्ग्रहत्वम्,[३] यत्र नित्यत्वाभावस्तत्र शब्दत्वाभाव इति व्याप्तिग्रहासंभवात्[४]।

न च तथा सत्यसाधारणत्वमिति वाच्यम्। एवमपि तद्वारकविशेषणोपादानानौचित्यात् व्याप्तिग्रहानौपायिकत्वात्।[५] असाधारणस्य सत्प्रतिपक्षतया दूषणत्वम् अगृहीतायां व्याप्तौ न निर्वहतीति असाधारणवारकविशेषणस्य व्यर्थत्वात्। (५६) तथापि पञ्चरूपसम्पन्नता[६] सिद्धये व्यतिरेकोपासना सार्वत्रिकी। न तु व्यतिरेकव्याप्तिग्रहोऽपि[७] सार्वत्रिक इति व्यर्थविशेषणतया व्यतिरेकव्याप्त्यग्रहेऽपि शब्दाश्रयेतरावृत्तिगुणत्वे हेतौ विपक्षावृत्तित्वमङ्गमक्षतमिति[८]। अत एव शरीराजन्यत्वहेतोरकर्तृकत्व-साधकत्वं तत्सिद्धान्त ***इत्युक्तमीश्वरे***। वस्तुतोऽसाधारणेऽपि हेत्वाभासे न सत्प्रतिपक्षोत्थापकत्वम् अपि तु व्याप्यनिश्चय[९] इत्युक्तं ***हेत्वाभासे***। तथा चासाधारणत्ववारकविशेषणं सार्थकमेव। व्याप्यग्रहौपाधिकत्वादिति ध्येयम्।

हेतुतावच्छेदकावच्छिन्नहेतूपस्थितिर्व्यर्थविशेषणताबीजम्। न च शब्दाश्रयवृत्तिगुणत्वोपस्थितौ शब्दत्वावच्छिन्न[१०]शब्दत्वेपस्थितिः। अन्यथा अन्वय एव वैयर्थ्यमिति[११] नाशङ्कितम्। तदवच्छिन्न-

---

1 T. तत्साध्ये तत्र व्यभिचारवारणाय :: तद्घटितसाध्यतन्निष्ठव्यभिचारवारक०
2 T. इति
3 T. दुर्ग्रहः। ०
4 T. ०संभवात्।
5 T. ०अनौचित्यात् व्याप्तिग्रहानौपायिकत्वात्। :: अनौपाधिकत्वात्
6 T. ०उपपन्नता०
7 T. ०व्याप्यग्रहेऽपि
8 T. अपेक्षितमिति।
9 T. ०निश्चायक
10 T. ०शब्दत्वत्वावच्छिन्न०
11 T. ०वैयर्थ्यं किमिति

विशेषगुणान्तरासमानाधिकरणैकवृत्तिगुणत्वात् समयपरिमाणवत्, पृथिवीतरनित्यभूतविशेष-

तदनुपस्थितिः तद्गुणत्वाभावोपस्थितौ कतदवच्छिन्नशब्दत्वाभावेऽपि समानेति परमार्थः। शब्दत्ववदित्यस्मन्मते षडिन्द्रियवद्यः कालः शब्दसङ्ख्या वा दृष्टान्तः। तव तु अतन्त्रम्[1]। न तु दृष्टान्तस्योभयसिद्धिरिति[2] भावः।

यद्यपि श्रोत्रग्राह्यत्वं श्रोत्रजन्यज्ञानगोचरत्वं त्रिपुटीप्रत्यक्षवादिमते श्रोत्रजन्यज्ञान एवानैकान्तिकम्, तथापि श्रोत्रजन्यज्ञानजनकश्रोत्रसन्निकर्षाश्रयत्वादित्यत्र तात्पर्यम्। न चाग्रेतनश्रोत्रपदवैयर्थ्यम्। उपनीतवीणादेरपि[3] श्रोत्रप्रत्यक्षविषयतया विशेषत्वेन ज्ञानलक्षणाप्रात्यासत्त्याश्रयस्यानित्यतया व्यभिचार-वारकत्वात्। विशेषणसन्निधेरपि विशिष्टधीहेतुत्वात्। न च तद्ज्ञानं श्रोत्रस्य प्रत्यासत्तिः। किन्तु मनसः संयुक्तसमवेतविशेषणतान्तर्भावादित्यन्त्र विस्तरः।

विशेषेति। शब्देतरविशेषगुणासमानाधिकरणेत्यर्थः। यद्यपि शब्देतरेति व्यर्थम्, तथापि परेषामसिद्धिवारकस्यापि सार्थकतया इदं द्रष्टव्यम्। एकवृत्तिपदं मनोदिक्संयोगादावनैकान्तिकत्ववारणाय। गुणपदं मनःकर्मणि तद्वारणाय। न च तद्वेगे। तथा सत्यपि व्यभिचार इति वाच्यम्। निरन्तरगतिसन्तानस्यैव तन्मते वेगत्वादिति भावः।

पृथिवीति। पाकजरूपादावनैकान्तिकतत्व (५७) वारणाय पृथिवीतरेति भूत[4]विशेषणम्। नित्यपदं नित्यपदं जलावयविरूपादौ तद्वारणाय । भूतपदं ज्ञानादावनैकान्तिकवारणाय। संयोगादौ तद्वारणाय विशेषपदमिति भावः। अत्र बहिरिन्द्रिग्राह्यगुणवत्त्वं भूतत्वमिति यथाश्रुते व्यर्थविशेषणतया नित्यसमवेतबहिरिन्द्रिय-ग्राह्यविशेषगुणत्वादिति तात्पर्यम्।

[1] T. तव तु अतन्त्रम् :: उभयसिद्धदृष्टान्तत्वं तत्र
[2] T. ०सिद्धत्वमिति
[3] T. ०उपनीतस्य विशेषणादेरपि
[4] T. omits

गुणत्वात् अपाकजत्वे सति नित्यैकसमवेतत्वात् जलपरमाणुरूपवत्, अव्यासज्यवृत्तित्वे सति अनात्मविभुगुणत्वात् कालपरिमाणवत्, विपक्षे बाधकञ्च प्रत्यभिज्ञानमेवेति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शब्दानित्यतावादपूर्व्वपक्षः।

अपाकजेति।[१] स्पर्शवन्मात्रवृत्तिसंयोगासमवायिकारणकत्वाभावे सति नित्यभूतसमवेतैकमात्र-वृत्तिगुणत्वादित्यर्थः। तेनाग्निसंयोगजन्यशब्दविशेषे भागासिद्धिः।[२]ज्ञानादौ परमाणु[३]कर्मणि परमाणुसंयोगादौ च न यथाश्रुतमादाय व्यभिचार इति भावः।

अव्यासज्येति। संयोगादौ व्यभिचारवारणाय सत्यन्तम्। ज्ञानादौ तदर्थमनात्मेति। घटादिरूपादौ तदर्थं त्विति। गुणपदं च [४]संपातायातमकिञ्चित्करमेव। यथोक्तविभुसमवेतत्वस्यैव समर्थत्वादित्यवधेयम्।[५]

---

[1] T. पाकजेति।

[2] T. adds भूतपदे विना

[3] T. omits

[4] T. संपातायनम्

[5] T. adds इति भावः।

अथ शब्दानित्यतावादसिद्धान्तः।

अत्रोच्यते। गकारादिव्यक्तयोनैकैकाः, अस्ति च शुक-सारिका-मनुष्यप्रभवेषु स्त्रीपुंस-तद्विशेषप्रभवेषु च गकारादिषु स्फुटतरवैलक्षण्यात् स्वरूपतो भेदप्रथा इक्षुक्षीरादिमाधुर्य्यवत्।

न चेयमौपाधिकी भेदप्रीतीतिः, न हि विदितकुङ्कुमस्य कुङ्कुमारुणा तरुणीतिवत् स्त्री-पुंसप्रभवत्वमानुभविकमुपाधिः इन्द्रियासन्निकर्षेण स्त्री-पुंसादिभेदमविदुषोऽपि शब्दभेदप्रत्ययात्, यतोऽनुमापयन्ति शुकशब्दोऽयं स्त्रीशब्दोऽयमित्यादि अन्यथान्योन्याश्रयात्, तत्प्रभवत्वे ज्ञाते भेदप्रत्ययस्तस्माच्च तदनुमानमिति।

न च कृपाणान्वय-व्यतिरेकानुविधानात् कृपाणे मुखदीर्घत्ववत् औपपत्तिकमौपाधिकत्वं, अन्यानुविधानाभावात्।

अथ व्यञ्जकवायोरेव वैलक्षण्यं शुकादिगकारगतत्वेन भासते वायोरुपलब्धिस्तेनैव रूपेणेति चेत् - न। गकारगतत्वे बाधकाभावात्।

न चाभेदप्रत्यभिज्ञानं बाधकं, न हि य एव शुकशब्दः स एव स्त्रीशब्द इति प्रत्यभिज्ञानं, अन्यथा तेषु भेदज्ञानाभावेन वक्तृविशेषानुमानं न स्यात्।

न चाभिव्यञ्जकवायोरेव वैलक्षण्यं शुकाद्यनुमापकं, तस्य गकारावृत्तित्वात् ततत्रर चारोपे अनुमितेर्भ्रान्तत्वापातात्।

तस्मात् यथा कृष्णा गौः शुष्का गौरिति भेदे भासमाने गकारानुगतप्रतीतिर्गोत्वमालम्बते तथा शुकादिगकारेषु भेदे भासमानेऽयं गकारोऽयमपि गकार इति बुद्धिर्गत्वमालम्बते इति प्रत्यभिज्ञा च भेदप्रथा चोपपद्यते।

किञ्च गत्वादिकं यदि न जातिस्तदा कोलाहलप्रत्ययो न स्यात् तथा हि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्यक्त-गकारादिवर्णविभागं कोलाहलमात्रं श्रूयते।

न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः सम्भवति, तदभिव्यञ्जकभेरीताडनादेरभावात्। न च वर्णाभिव्यञ्जका एव ध्वनिव्यञ्जकाः, सन्निधानेऽपि श्रूयमाणे वर्णे तच्छ्रवणप्रसङ्गात्। न च वर्णाभिव्यञ्जकवायुभिरेव दूरे ध्वनिमात्रमभिव्यज्यते, कव्यञ्जकस्य गव्यञ्जन इव वर्णव्यञ्जकस्य ध्वनिव्यञ्जनेऽसामर्थ्यात् तत्समर्थशङ्कादेरभावाच्च। न च तत्र शब्दत्वमेव प्रतीयते न शब्दः, व्यक्त्यग्रहे जात्यग्रहात्।

न चाभिव्यञ्जको वायुरेव कोलाहलत्वेन प्रतीयते, शब्दत्वेन प्रत्ययात् सन्निधावपि तथा प्रत्ययप्रसङ्गाच्च। गकारादिग्रहेऽपि तेषां परस्परभेदाग्रहात् कोलाहलधीरिति चेत् - न। तेषु वैधर्म्म्याभावात् तदभावेऽन्योन्याभावस्याभावात् स्वरूपग्रहणात् समीपे बहुगकारेषु भेदाभावेन तदग्रहे कोलाहलधीप्रसङ्गाच्च। अनेकवर्णोच्चारणस्य तद्धेतुत्वे दूरेऽपि तदप्रत्ययापत्तेः। तस्मादवश्यं गत्वादिजातिरुपेया यदग्रहे गकारादिग्रहेऽपि कोलाहलबुद्धिव्यपदेशौ।

अथास्तु स्त्री-पुंसादिगकारभेदस्तथापि यावद्वक्तृभेदमनन्ता एव नित्या वर्णाः प्रत्यभिज्ञानादिति चेत्, अत्त्युत्पाद-विनाशप्रतीतौ सत्यामपि स एवायं गकार इति प्रत्यक्षिज्ञा, अस्ति हि तदनन्तरमप्युत्पादविनाशप्रथा।

ननु शकप्रभवत्वं वर्णानामनुमीयते। प्रत्यभिज्ञातो नित्यतया निर्णीतवर्णे [१] शुकसारिकादिप्रभवत्वरूपवैलक्षण्यप्रतीतेः भ्रमत्वात् [२]। तथा च शुकप्रभवध्वनिसाहित्यमेव वर्णास्य वैलक्षण्यम्। तच्च निगतवैजात्यनिबन्धनशुकप्रभवत्वानुमित्यैव निर्व्यूढमिति गकारभेदभानासिद्धेः नभत्वजातौ मानमस्ति। तत्कुतस्तथा प्रत्यभिज्ञाऽन्यथासिद्धिरित्यरुचेः गत्वादिजातिसाधकमानान्तरमाह - **किञ्चेति।**

[1] T. निर्णीतेऽपि

[2] T. omits

न चोत्पादप्रतीत्यभेदप्रत्यभिज्ञयोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति, न वानयोः परस्परं बाध्य-बाधकभावे विनिगमकं येनैकभ्रान्तत्वेनाविरोधः स्यात्। कथं वा भेदाभेदज्ञानयोरन्यत्रावधारितं परस्परप्रतिबन्धकत्वं परिभूय प्रथमं तयोरेकसत्त्वेऽप्यपरोत्पत्तिप्रसङ्ग इति सङ्कटप्रविष्टस्तेन प्रत्यभिज्ञानं शब्दनित्यत्वे प्रमाणयितुं न शक्यते। नन्वेवमुत्पत्तिमत्त्वादिनाप्यनित्यत्वसिद्धिः कथं, इत्थं, उत्पादादिबुद्धि-प्रत्यभिज्ञयोरप्यवश्यं विषयभेदः, एकविषयत्वे विरोधेनैकानन्तरमपरानुत्पत्तिप्रसङ्गात्।

एवञ्च भेदे भासमाने प्रत्यभिज्ञायाः सजातीयत्वं विषयो न वक्त्यभेदः।

अस्ति च शब्दस्य कोऽपि च जातिविशेषः श्रोत्रग्राह्यः यस्मात् प्राच्यादिदिग्देशविशिष्ट-शङ्खप्रभवत्वमनुमीयते, अव्यपदेस्यत्वेऽपि इक्षुक्षीरादिमाधुर्य्यावान्तरवत् तत्सत्त्वात्। अन्यथा दिग्देशविशिष्टशङ्खादीनां ग्रहे श्रोत्रस्यासामर्थ्यात् तत्प्रतीतिर्न स्यादेव। तथापि गत्वादिना परापरभावानुपपत्त्या शुकादिगकारादिषु न जातिविशेषा इति चेत् - शुककारादिषु कत्वादिव्याप्या नानाजातिर्भिन्ना तया प्रत्येकं शुककारादिषु शुकादिप्रभवत्वमनुमाय तद्व्यवहारः। न तु शुककारादिषु एका जातिरस्ति शुकप्रभवत्वाद्यनुमापिका तद्व्यवहारकारिका वा, गत्वादिना सङ्करप्रसङ्गात्, गत्वन्तु न नाना अननुगतत्वेन ततोऽनुगतव्यवहारानुपपत्तेः।

प्राच्यादीति। यत्र देशशब्द उत्पद्यते तद्देशप्रभवत्वमित्यर्थः। स च [१] कस्यचित् प्राक् कस्यचिदन्यथैवेति नैकत्र विरुद्धजातिद्वयसमावेशशङ्कापीति भावः।

अननुगतेति। सकलसाधारणशुकप्रभवत्वरूपैकोपाधिवत् नानागत्वसाधारणैकधर्माभावेन तस्याननुगतत्वमिति भावः।

---

[1] T. adds ०देशः

अत एव तारत्वमपि गत्वादिव्याप्यं नाना न तु गत्वम्। तन्निश्चयेऽपि गत्वसन्देहश्च व्याप्यतावच्छेदकरूपानिश्चयात्। न चानुगतव्यवहारानुपपत्तिः, सजातीयसाक्षात्कारप्रतिबन्धकता-वच्छेदकत्वेनानुगतेन नानातारत्वेष्वनुगतव्यवहारसम्भवात्, तदज्ञाने व्यवहारासिद्धेः। तारत्व-मन्दत्वे न जाती सप्रतियोगिकत्वात् इति चेत् - न। तारत्व-तारतारत्वादय उत्कर्षादिरूपा जातिविशेषा एव ते चाश्रये गृह्यमाण एव गृह्यन्ते न तूत्कर्षावध्यपेक्षाः यथा मधुरतरत्वादय उत्कर्षव्यवहारम् इतर-सापेक्षाः कुर्व्वन्ति तथा मन्दाद्यपेक्षया तारत्वादिव्यवहारम्,उत्कर्षस्तु जातिरूपादन्योऽसम्भावित एव।

ते चाश्रय इति। नन्वयमपसिद्धान्तः। सत्यां व्ययजिहीषायां व्यवहारार्थं व्यवहर्तव्यज्ञाने अन्यानपेक्षणात्। अपि च तारत्वादिर्न जातिः, अन्यूनानतिरिक्तवृत्तित्वात्। यदेव ह्यन्यापेक्षया [१] तारं तदेवान्यापेक्षया मन्दम् इति मन्दत्वस्य तदन्यूनानतिरिक्तवृत्तित्वादिति।

अत्राहुः - व्यवहारः शब्दप्रयोगात्मा। स प्रवृत्तिनिमितज्ञानमपेक्षते। (५८) न च तादृशशब्दप्रयोगे सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकजातिमानयमित्यात्मको विशिष्टवैशिष्ट्यावगाहिनिर्विशेषणीभूत-प्रवृत्तिनिमित्तनिश्चयः सजातीयोपस्थितिं विना इत्याश्रये गृह्यमाणे गृहीतेऽपि [२] जातिविशेषे तद्विशेषण [३] सापेक्षतया प्रवृत्तिनिमित्तग्रहमन्तरेण [४] शब्दप्रयोगविलम्बो न तु यावद्व्यवहरणीयज्ञानेऽपि व्यवहारार्थमन्यापेक्षापीति यथार्थः [५] । अन्यूनानतिरिक्तवृत्तितया [६] न जातित्वाबाधनियमः। किन्तु घटत्वकलशत्ववत् भेदविरहः। तथा च प्रकारान्तराभावात् बाधकान्तराभावाच्च तज्जातित्वमावश्यकमिति भेदस्तयोर्नास्तीति बुध्यते। यदेव ह्येकापेक्षया तारं तदेवान्यापेक्षया मन्दमिति एकस्यैव प्रतिबध्यप्रतिबन्धकतावच्छेदकत्वलक्षणनानाधर्मसमावेशात् नानापदप्रयोगः। न चैवमुभयोरविरोधे

---

[1] T. एकापेक्षया

[2] T. इत्याश्रये गृह्यमाणे गृहीतेऽपि :: इत्याश्रयेण सह गृह्यमाणेऽपि

[3] T. तद्विशेषग्रहः

[4] T. ०विलम्बेन

[5] T. ०ग्रन्थाशयः

[6] T. ०व्यक्तितया

गकारे तु नैवम्, अनन्यथासिद्धभेदप्रत्ययबलेन वक्तृविशेषानुमानबलेन च तत्सिद्धेर्गत्वकत्व-व्याप्यतन्नानात्वस्वीकारात्। तवापि वायुवृत्तित्वे शुकादिककार-गकारादिव्यञ्जकवायूनां विजातीयत्वं वाच्यम्। तथा च ककारव्यञ्जकवायुत्वव्याप्यं यदि शुकवर्णाभिव्यञ्जकवायुत्वं तदा शुकगकार-व्यञ्जकवायौ न स्यात्।

अथ व्यापकं तदा सर्व्व एव कव्यञ्जकवायवः शुकवर्णाभिव्यञ्जकवायवः स्युस्तस्माद्वायुवृत्तित्वेऽपि तासां नानात्वमावश्यकम्। न चैवं तज्जातीयोऽयमिति स्यात्। न तु सोऽयमिति वाच्यम्। तज्जातीयत्वप्रतीतेरपि सोऽयमित्याकारदर्शनात् यथा सैवेयं गाथा तदेवेदमौषधं बहुभिः कृतं मयापि प्रत्यहं क्रियमाणमस्तीत्यादौ।

तन्निबन्धनविरुद्धधर्माध्यासोपन्यासो विरुद्ध्यत इति वाच्यम्। एकप्रतियोगिकतारत्वमन्दत्वयोः विरोधेन तन्निबन्धनविरुद्धधर्माध्यासोपन्यासादिति दिक्।

ननु तारत्वाद्येवानुगतकत्वम्, गत्वं तु नानास्त्वित्यत आह - **गकारे त्विति**। गत्वे तु नैवमित्यर्थः।

अनन्यथेति। अत्रानुगमकत्वप्रकारान्तरत्वानुगमकप्रकारान्तराभावेन[१] तदेकत्वतद्व्याप्यतारत्वादीनां नानात्व[२] स्वीकारादिति भावः[३]। एतच्च पूर्वं वक्तृविशेषानुमापकजात्यभिप्रायेणोक्तम्। इदानीं तु तारत्वाद्यभिप्रायेण इत्यपौनरुक्त्यमिति ध्येयम्।

तज्जातीयत्वेति। नन्विदमयुक्तम्, प्रतीत्यवैचित्र्येण शब्दवैचित्र्यादर्शनात्[४]। किं च तत्पदस्य सर्वनामशब्दतया प्रकृतवाचकत्वेन धर्मपरत्वं धर्मिपरत्वं वा । आद्ये तत्पदसमभिव्याहृतैवकारस्याभेद-

---

[1] T. अत्रानुगमकत्वप्रकारान्तरत्वानुगमकप्रकारान्तराभावेन :: अत्रानुगमकप्रकारान्तरवत् गत्वानुगमकप्रकाराभावेन

[2] T. ०नानार्थ०

[3] T. अर्थः।

[4] T. प्रतीत्यवैचित्र्येण शब्दवैचित्र्यादर्शनात् :: प्रतीतिवैचित्र्ये शब्दवैचित्र्यदर्शनात्

न हि तावद्वर्णमात्रमानुपूर्व्वी, जरा-राज-नदी-दीनादिषु तन्नानात्यात्, किन्तु तदुच्चारणानन्तरमुच्चारणं तज्ज्ञानानन्तरं ज्ञानं वा तच्च नानेति तद्वती गाथापि नानैव। न चाभेदे भासमाने उत्पादादिबुद्धिरेवान्यस्योत्पादादिकमवगाहते, गकारगतत्वप्रतीतेर्भ्रान्तत्वप्रसङ्गात्। न चेष्टापत्तिः। अभेदे भासमाने तद्विरुद्धधर्म्मवत्त्वभ्रमानुदयात् विनिगमकाभावेनोभयस्यापि यथार्थत्वाच्च, कुतस्तर्हि तस्या अभेदो विषयः। यत्र प्रथमं न भेदप्रथा अत एव भेदसत्त्वे तद्ज्ञानात् क्वचित् सा भ्रान्तः। तस्माद्यत्र भेदप्रतीतिस्तदितरबाधकाबाध्या तत्र प्रत्यभिज्ञैव न भवति भवन्ती वा तज्जातीयत्वमालम्बते। न तु भ्रान्ता, विशेषदर्शने भ्रमानुदयात्।

अपि च यथा शङ्खादिध्वनीनां उत्पत्ति-विनाशप्रत्ययात् तारत्वादिविरुद्धधर्म्मसंसर्गाच्चा-नित्यत्वे सैवेयङ्गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया तथा वर्णाप्रत्यभिज्ञापि। अन्यथा ध्वनयोऽपि नित्याः स्युः। उत्पत्ति-विनाश- तारत्वादिप्रतीतीनां प्रत्यभिज्ञानवलेनौपाधिकत्वात्।

न च वर्णेषु तारत्वेनैव भासमाना ध्वनय उपाधयः सम्भवन्ति। न तु ध्वनिषु वर्णास्तज्जनकण्ढताल्वाद्यभिघाताभावादिति वाच्यम्। वर्णोच्चारणदशायामपि गुर्जरीकादि-जनकानामभावात्। तस्मात् उत्पत्तिविनाशतारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वे द्वयोरपि नित्यत्वमनित्यत्वं वा। न चोभयोरपि नित्यत्वमेव, उक्तन्यायेन प्रतिभिज्ञायास्तज्जातीयत्व-विषयत्वात्।

व्युत्पन्नतया बाधः। द्वितीये वाऽसम्भवः स्फुट एव। किं च श्यामो नष्टो रक्तघट उत्पन्न इति आमपाकदशायां बुद्धिव्यपदेशवति [१] इहापि गत्वादिव्यञ्जकवायूत्पत्तिविनाशबुद्धिव्यपदेशः स्यादिति [२] विषयभेदव्यवस्थावैपरीत्यमपि कुतो न स्यादिति।

---

[1] T. ०दशाबुद्धिवत्

[2] T. ०विनाशबुद्धिव्यपदेशः स्यादिति :: ०विनाशविषयक एवोत्पादविनाश०

किञ्च यदि व्यङ्ग्यः शब्दः स्यात् तदा वाह्यालोकाभावे घटस्येव व्यञ्जकाभावे शब्दस्यानुपलम्भात् तत्संशयः स्यात्। न त्विहेदानीं शब्दो नास्तीति निश्चयः तस्माद्वर्णो न नित्योऽनित्यो वा सत्त्वे सत्युत्पत्तिमत्वात्। अस्मदादिवहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वात्, अस्मदादिप्रत्यक्षगुणत्वाद्वा, आत्मैकत्वप्रत्यक्षत्वपक्षे प्रत्यक्षविशेषगुणत्वात्,

---

अत्राहुः - तत्पदसमभिव्याहृत एवकारोऽभेदव्युत्पन्नः। तत्पदं च भेदभानाभावे तज्ज्ञात्याश्रयत्वेन तत्तद्व्यक्तिपरमिति तदभेदपरस्तथा व्यपदेशः, तथैव प्रतीतेः। भेदभाने तज्ज्ञात्या लिङ्गितत्परत्वेन यावत्तद्व्यक्तिपरमिति सामान्यतो भेदाभावः[१]। तत एव सामान्य(५९)शब्दस्य व्यक्तिविशेषव्यक्ति[२] सामान्यवचनत्वभेदेन[३] तत्तद्व्यक्त्यन्योऽन्याभावतदवच्छिन्नान्योऽन्याभावाभावोभयपरत्वात् वैपरीत्यव्यवस्था तु गोरवेण निरसनीया। नानाज्ञानानां विशेषान्तरकल्पनापेक्षया प्रत्यभिज्ञानमात्रविषयभेदकल्पनायां लाघवादिति दिक्।

ननु तथापि क्वचित् सोऽयं[४] क्वचित्तु तज्ज्ञातीयोऽयमिति बुद्धिव्यपदेशयोः किं नियामकमिति चेत् सत्यम्। यत्र स्वतो विलक्षणतया उक्तरूपजात्यवच्छिन्नभेदज्ञानं तत्र सोऽयमिति यत्र तज्ज्ञातित्वेन उपस्थित[५]जात्यवच्छिन्नाभेदज्ञानं तत्र तज्ज्ञातीयोऽयमिति बुद्धिव्यपदेशाविति।

अस्मदादीति। इन्द्रियग्राह्यो जातिमानात्मापीति बहिःपदं बहिरिन्द्रियग्राह्यजातिरपीति जातिमत्त्वं बहिरिन्द्रियजन्यसामान्यप्रत्यासत्तिजन्योपनीतभानाभ्यां नित्यस्यापि जातिमतो विषयीकरणमित्यस्मदादीति। लौकिकज्ञानवत इत्यर्थः। तेन लौकिकबहिरिन्द्रियजन्यज्ञानविषय[६]जातिमत्त्वादिति हेत्वर्थः।

---

[1] T. ०भेदाभावपरः

[2] T. ० व्यक्तिविशेषव्यक्ति० :: ०वृत्ति०

[3] T. adds ०तत्त्वप्रतीतिभेदेन च

[4] T. तत्तज्ज्ञातीयोऽयमिति

[5] T. ०उक्तरूप०

[6] T. ०विषयत्वे सति

व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्, अनात्मप्रत्यक्षगुणत्वात्, अव्याप्यवृत्तित्वात्।

ननु योगिबहिरिन्द्रियाग्राह्यपरमाण्वादिव्यभिचारवारणाय अस्मदादीति। तथा सति उक्तव्यभिचारवारणात्। किं च योगजोधर्मो न रसं चाक्षुषयतीति वस्तुस्वभावाप्रच्यवनेन प्रवर्तमानो यस्येन्द्रियस्य यद्योग्यं तद्व्यवहितमपि ग्राहयतीति असन्निकृष्टसन्निकर्ष एव कल्पते। शब्दानेष शृणोति योजनशतात् इत्यादिवत्[१] परमाण्वादिग्राहकत्वप्रतिपादकागमाश्रवणात्। तथा च बहिरिन्द्रियग्राह्यं जातिमन्नित्यं नारूपे वेति क्व व्यभिचारशङ्का। यतोऽस्मदादिपदमिति यथोक्त एवार्थो ग्राह्य इति।

व्यापकेति। एतच्च मतभेदेन विच्छिद्य हेतुद्वयं व्यापकसमवेतविशेषगुणत्वादिति परमते।[२] प्रत्यक्षविशेषगुणत्वादिति अस्मन्मते। प्रथमस्यास्मन्मते भगवद्ज्ञानादौ, द्वितीयस्य तन्मते रूपादौ व्यभिचारादिति दिक्।

अनात्मेति। आत्मैकत्वे व्यभिचारवारणायानात्मेति। आत्मा समवेतेत्यर्थः। प्रत्यक्षपदं जलपरमाणुरूपादौ अनाकान्तिकत्ववारणाय रूपत्वादौ तद्वारणाय गुणपदमिति भावः।

अव्याप्येति। स्वात्यन्ताभावसमानाधिकरणत्वात् अत्यन्ताभावत्वं नित्यसंसर्गाभावत्वमिति[३] संयोगरूपस्वात्यन्ताभावसमानाधिकरणे (६०) संयोगात्यन्ताभावे न व्यभिचारः। यद्वा अव्याप्यवृत्तित्वमवच्छिन्नवृत्तित्वम्। संयोगात्यन्ताभावे व्यभिचारवारणाय गुणपदं प्रयोज्यमिति। समवायरूपावृत्तितेति[४] भावः[५]।

---

[1] T. इत्यादिश्रवणात्

[2] T. ० गुरुमते।

[3] T. ०अतो न

[4] T. omits समवायरूपावृत्तितेति

[5] T. adds यद्वा समवायितया वृत्तिरत्र विवक्षितम्।

ईश्वरज्ञानञ्च न तथा। तत्प्रयोजककारणाभावात्, बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, भूत-प्रत्यक्षगुणत्वात्, उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्त्वाद्वेत्यादि, रसत्वादिव्याप्यजातेर्नानात्वेऽपि तादृशप्रवृत्तिनिमित्तत्वस्य साधारण्यात्।

न चात्र साधनावच्छिन्नस्य पक्षधर्म्मावच्छिन्नस्य वा साध्यस्य व्यापकः स्पर्शवत् समवेतत्वं उपाधिः। सर्व्वत्र वर्णात्मकशब्दपक्षीकरणे व्योमगुणेष्वनित्येषु ध्वनिषु साध्याव्यापकत्वात् स्पर्शवत् पदस्य पक्षमात्रव्यावर्त्तकत्वेन पक्षेतरत्वाच्चेति।

ईश्वरज्ञानं त्विति। ईश्वरज्ञानादिकं त्वित्यर्थः।

बहिरिति। इन्द्रियान्तराग्राह्यत्वे सतीन्द्रियग्राह्यत्वमिन्द्रियव्यवस्थाहेतुत्वमिति तावन्मात्रमात्मैकत्वे गतम् अत उक्तं **बहिरिति**। तच्च बहिरिन्द्रियान्तराग्राह्यत्वे सति बहिरिन्द्रियहग्राह्यत्वम् तावन्मात्रं च रूपत्वादौ व्यभिचारीति गुणत्वादित्युक्तम्। अत्र च बहिरिन्द्रियग्राह्यत्वे आत्मैकत्व [1] वारणाय ध्रुवे यदीन्द्रियाग्राह्यत्वं इन्द्रियान्तराग्राह्यत्वं बहिरिन्द्रियाग्राह्यत्वं वा क्रियेत। तदा सर्वथा विरोध इति बहिरिन्द्रियान्तराग्रह्येति विशेषणमुक्तम्।

उत्कर्षेति। अत्र जातिपदम् अणोर्महानुत्कृष्ट इत्यादिपदयोगात् परिमाणस्यापि तत्प्रवृत्तिनिमित्तत्वेन तद्वत्याकाशादौ व्यभिचारवारणायेति । यद्यपीदं परमाणुपरिमाणात् परममहत्परिमाणमुत्कृष्टमिति घटयोगात् [2] व्योमादिपरिमाणे गतं तथाप्युभयशब्दप्रवृत्तिनिमित्तजातिर्विवक्षिता।

साधनेति। यदवच्छिन्नं साध्यं प्रति उपाधिः न व्यभिचारस्तस्य बहिरिन्द्रियव्यवस्थाहेतुगुणत्वादेः साधनस्यावच्छेदकत्वं साध्ये द्रष्टव्यम्। न तु सर्वस्योत्कर्षगर्भादेः साधनस्यावच्छेदकत्वे सुखादौ साध्याव्यापकत्वात्। यदा तु ध्वनयो वायवीयास्तदा न क्वापि साध्यव्यापकतेति दोषान्तरमाह -

---

[1] T. adds ०व्यभिचार०

[2] T. ०प्रयोगात्

यदा च वर्णा एव न नित्यस्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्व्यादिविशिष्ट-वर्णसमूहरूपाणां पदानां, कुतस्तराञ्च तत्समूहरूपस्य वाक्यस्य कुतस्तमाञ्च तत्समूहस्य वेदस्येति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शब्दानित्यतावादसिद्धान्तः।

स्पर्शवदिति। वस्तुतः स्पर्शवत्समवेतत्वे व्यर्थविशेषणत्वमुक्तक्रमेण समवेतत्वमात्रे व्यापकत्व (६१) ग्रहसंभवात्। न तु तस्य साधनव्यापकत्वमिति चेत्, सत्यम्। त्यज तर्हि तमुपाधिं विशेषणप्रवेशाप्रवेशाभ्यां साध्यव्यापकत्व-साधनाव्यापकत्वसंभवादिति भावः।।

इति शब्दखण्डे शब्दानित्यतावादालोकः समाप्तः।।

अथोच्छन्नप्रच्छन्नवादः।

तथापि परतन्त्रपुरुषपरम्पराधीनतया प्रवाहाविच्छेदमेव नित्यत्वं ब्रूमः इति चेत् - न। स्मृत्याचारानुमितानां शाखानामुच्छेददर्शनात्।

स्यादेतत्। विवादपदमपूर्व्वबोधिका स्मृतिः स्मृत्यर्थानुभवजनकवेदमूला अविगीतमहाजन-परिगृहीतस्मृतित्वात् प्रत्यक्षवेदमूलकस्मृतिवत्।

अथ उच्छन्नप्रच्छन्नवादालोकः

तथापीति। कालोपाधित्वं तच्छाखाध्ययन[1]व्याप्यमित्यर्थः।

स्यादेतदिति। न च तथापीत्यनेनानित्यताभ्युपगमदर्शनाद्विरोधः। नित्यानुमेयतायां प्रवाहस्यासंभवादिति वाच्यम्। तथापीत्यादेराक्षेपस्य स्मृत्याचारेत्यादिनैव[2] उत्तरेण निराकरणे तत्प्रसङ्गेन स्यादेतदित्यादिना वादान्तरावारणात्। प्रवाहाविच्छेदो वेदस्य सर्वदैव तुल्यरूपता। यथैकत्र काले स तथान्यदपीति विवक्षितम्। तच्चोच्छेदेन संभवतीति सर्वदानुमेयतां व्यवस्थापयति स्यादेतदितीति कश्चित्।

विवादेऽपि। स्मृतिमात्रपक्षीकरणे अंशतो बाधसिद्धसाधने मा भूतामित्यपूर्वबोधकत्वं विवादपदत्वं च विशेषणमन्यतरोपादानेऽपि[3] तदुभयान्यतर[4]प्रसङ्गात् तत्तदुभयमेवास्तु[5]। कृतं स्मृतिग्रहणेन । तादृशस्य वेदसाधारण्येन अंशतो बाधापत्तेः। न च लोभन्यायमूलकस्मृत्योरपि कदाचित् तादृशविवादपदत्व[6]संभवेनांशतो बाधः। अपूर्वबोधकत्वेन अपूर्वप्रमापकत्वस्य उक्तत्वादिति भावः।

स्मृत्यर्थेति। स्मृत्यर्थानुभवजनकवेदमूलकत्वमज्ञातेन वेदेनास्थायिना न संभवतीति पक्षधर्मताबलादनुमेयस्थायिवेदपर्यवसानमिति भावः।

---

[1] T. omits
[2] T. ०सभृत्याचारेणैव
[3] T. ०अन्यतरविशेषणमात्रोपादानेति
[4] T. omits
[5] T. न च तदुभयं मास्तु।
[6] T. तादृशप्रमाद०

वेदमूलकत्वञ्च वेदजन्यानुभवजन्यत्वं ज्ञानद्वारा ज्ञायमानस्यैव वेदस्य स्मृतिहेतुतयानुमानं, कुविन्दस्येव ज्ञानादिव्यवहितस्य पटे, नतु कारणकारणता। वेदे सत्येव तत्प्रतिसन्धाने स्मृतिप्रणयनात्, वेदार्थस्मृतिता च प्रसिद्धिसिद्धा। स्मृत्यर्थश्च स्मृतित एव उपस्थितः। न च स्मृत्यर्थबोधकवेदानुमाने स्मृत्यर्थरूपवेदार्थस्य विषयत्वात् वेदोऽनुवादकः ज्ञानान्तरोपनीतस्य विशेषणत्वेन विशिष्टबुद्धिसम्भवात्, पाककृतौ मानसप्रत्यक्षायां पाकस्य संज्ञासंज्ञिज्ञाने संज्ञायाज्ञानायथार्थत्वे तदनुव्यवसाये भ्रमविषयस्येव।

अविगीतेति। लोभमूलकस्मृतेः विगीतत्वात् न्यायमूलकस्मृतेः महाजनापरिगृहीतत्वात् वेदस्यास्मृतित्वात् त्रितयमुपात्तम्। महाजनश्चादृष्टार्थी पुरुष इत्यवधेयम्[1]।

ननु वेदमूलकत्वं वेदपरम्पराकारणतयापि निर्वहतीति उच्छिन्नवेदमूलकतयापि संभावितम्। न वेदस्थैर्ये प्रमाणमित्यत आह - **वेदेति**। ननु वेदार्थप्रमापकत्वं स्मृतित्वं च स्मृतेर्वेदानुमानात् प्रागनुपस्थितं स्मृतिपदप्रवृत्तिनिमित्तापरिचयाच्च दुर्ज्ञेयमित्यत आह - **वेदार्थेति**। वेदार्थता स्मृतिता चेत्यर्थः। तथा च या वेदार्थरूपा दृष्टप्रमापकत्वेन स्मृतित्वेन च प्रसिद्धा तादृश्यैव वेदमूलकत्वे विवादविषयः पक्षः । न च विवादविषयतावच्छेदक-रूपापरिचयः उभयसिद्धान्यतर (६२) कोटिकान्यत्वस्यैव तत्त्वादिति भावः।

साध्याप्रसिद्धिं परिहरति - **स्मृत्यर्थ** इति। **ज्ञानान्तरेति।** न च तादृशज्ञानगोचरतयैव वेदार्थस्य[2] वेदोऽनुवादक इति वाच्यम्। न हि यथाकथंचिदुपस्थितार्थबोधकतामात्रेण अनुवादकता मा भूत्। एकदा वेदार्थाधिगमे[3] पुनस्तेन तदर्थबोधजननात् वेदानुवादकता। तद्विनापि कदाचित् तेनार्थबोधनात्।

अपि त्ववश्यापेक्षयणीय निरपेक्षप्रमाणबोधितार्थप्रमापकतायां संशयतर्कोत्प्रेक्षादिबोधितार्थ-प्रमापकत्वात् प्रत्यक्षे वादान्तम्[4]।

---

[1] T. भावः।
[2] T. omits
[3] T. ०अवगमे
[4] T. ०प्रत्यक्षवेदानाम्

अन्यथा भ्रान्त-भ्रान्तिज्ञसङ्करापत्तिः। न तु शब्दार्थोऽनुमानस्य विषयः तस्यासिद्धत्वेना-जनकतया स्मृत्यव्यापकत्वात्। स च वेदो नित्यमनुमेय एवानुमितादेवार्थमवधार्य्य स्मृतिप्रणयन-सम्भवात्।

नन्वासंसारमपठिस्य न वेदत्वं उत्पत्तितोऽभिव्यक्तितो मौनिश्लोकवदभिप्रायतो वानुपूर्व्वी हीनवर्णमात्रस्य निरर्थकत्वात्। ज्ञानजनकसमभिव्याहारस्यानेकत्वे विशेषाननुमानाच्चेति चेत् - न। स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य वेदस्य स्मृत्यर्थानुभावकत्वात्। न हि शब्दोबोधे नियतपदानुपूर्व्वी हेतुः। व्यभिचारात्। पदस्य वर्णविशेषानुपूर्व्वी नियमेऽपि तत्तद्वर्णानुपूर्व्वीक पदविशेषत्वेन न हेतुत्वं हस्त करादिपदानां प्रत्येकं व्यभिचारात्। किन्त्वव्यभिचारितदर्थज्ञापकत्वेन ज्ञातस्य लाघवादावश्यक-त्वाच्च, तदर्थज्ञापकत्वज्ञानार्थमेव क्वचिद्वर्णक्रमस्वरविशेषाणामुपयोगः। अत एव वर्णलोपादौ कुशमानयेति सकारसन्देहे लिपावुच्चारणे वा हस्तकरसन्देहेऽपि वाक्यार्थबोधः। ननु क्रमिकपदवत्त्वं वाक्यत्वम्।

न च स्मृतिनिरपेक्षप्रमाणम् अवश्यापेक्षणीयं वा । स्मृत्यर्थगोचराचारादापि अनुमानसंभवेन तथानुमिततद्वेदस्यापि तदर्थबोधकत्वादिति भावः।

तस्येति। कार्येण कारणानुमानेऽकारणस्यातद्विषयत्वमिति परसिद्धान्त इति प्रागेव कथनादिति भावः। उत्पत्तित इति न्यायनये। अभिव्यक्तित इति गुरुनये। अभिप्रायत इति उभयमते।

व्यभिचारादिति। घटमानयानय घटमित्युभयाभ्याम् अन्वयबोधदर्शनादिति[1] भावः।

अव्यभिचारीति। अनुगतेत्यर्थः।

ननु यद्यानुपूर्वी न प्रयोजिका, तदा नदी दीनेत्यादावविशेषप्रसङ्ग[2] इति अत आह - **तदर्थेति**।

[1] T. adds ०वाक्याभ्यामर्थदर्शनात्

न चात्र पदक्रमः, अनुच्चार्य्यमाणतयोच्चारणाधीनस्य युगपदनुमीयमानतया बुद्ध्यधीनस्य वा तस्याभावादिति चेत्, न हि क्रमिकपदवत्त्वं वाक्यत्वं, गौरश्व इत्यादावभावात्। किन्तु विशिष्टार्थपरशब्दत्वं तच्चात्राप्यस्त्येव।

अथानुच्चार्य्यमाणस्य न वाक्यत्वं न वा अर्थानुभावकत्वमिति चेत् - न। लिप्यनुमितानामपि वाक्यत्वात् अर्थबोधकत्वाच्च, लिपितुल्या च स्मृतिः।

किञ्च वाक्यमुच्चार्य्यते न तूच्चारणाद्वाक्यत्वं, अन्यथा वाक्यमुच्चारयेत्यत्रानन्वयापत्तिः। अनुच्चारितमौनिश्लोकश्च वाक्यं न स्यादुच्चारणदशायाञ्च वाक्यत्वे वाक्यस्यासत्त्वमेव स्यात् एकदा तावत्पदानां उच्चारणाभावात्। न च कृतक्रियमाण करिष्यमाणोच्चारणस्य वाक्यत्वं। समुदाये प्रत्येकस्याभावात्। तस्मादर्थविशेषज्ञापकत्वेनैव ज्ञातादर्थविशेषधीः।

अत एवास्ति वन्हिलिङ्गमिति शब्दात् प्रतीते धूमे वन्हेरनुमानं। न तु तदर्थज्ञापकत्वेन ज्ञातात् पदादर्थज्ञानमात्रं स्यात्, न तु संसर्गधीः। घटः कर्म्मत्वमानयनं भावना तद्बोधकमिति ज्ञानेऽपि घटमानयेति वाक्यादिवान्वयबोधाभावात्।

उच्चारणगर्भं वाक्यत्वं[2] मा भूत्, उच्चारणव्याप्यं वाक्यत्वं स्यादित्याशङ्कते - **अथेति।**

ननु लिप्यनुमितमपि कदाचिदुच्चार्यत एवेत्यरुचेराह - **किं चेति।**

उच्चार्यमाणत्वं वर्तमानोच्चारणविषयत्वमिति लडर्थान्तर्भावेन दूषणमिदम्। न केवलं इयंशब्दे रीतिः, अपि तु ज्ञायमानकरणमात्रस्यैव ज्ञाप्यज्ञापकत्वज्ञानं सामग्रीत्यत आह - **अत एवेति**।

---

[1] T. ०अविशेषापत्तिः।

[2] T. ०वाक्यार्थत्वं

एवञ्चान्वयप्रकारकर्म्मत्वाद्युपस्थापकविभक्त्यादिमत्पदविशेषस्य तदुत्थापिताकाङ्क्षादेश्च ज्ञानं वाक्यार्थधीहेतुरतो न तैर्विना ज्ञापकत्वमात्रेण ज्ञातादर्थधीः। हस्तकरादिसन्देहे कुशमानयेत्यादौ विभक्त्यादिज्ञानादेव वाक्यार्थानुभव इति - मैवम्। न हि तत्तद्विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्वं, अननुगमात्। किन्तु घटः कर्म्मत्वमित्याद्यन्वयविरोधिपदाजन्यपदार्थोपस्थितिस्तथा सा चेहाप्यस्ति।

वस्तुतस्तु नानापदात् पदार्थोपस्थित्यनन्तरं वाक्यार्थबोधे तथैव सामग्री अनुमितवेदाद्वाक्यार्थानुभवे विलक्षणैव सा स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् धर्म्मिग्राहकप्रमाणेन तस्य तथैव सिद्धत्वात्। तवेश्वर्सयेवाशरीरस्य कर्तृत्वे।

अत एव वर्णपदविभक्त्यादिविशेषघटितत्वेनाज्ञातस्याखण्डस्य सखण्डस्य वा वाक्यार्थानु-भावकत्वात् पदार्थस्थानीयस्तस्य वाक्यार्थस्तत्र वर्मसमूहः पदं पदसमूहो वाक्यमित्यत्रापि ततो ग्रहः प्रमाणशब्दत्वमात्रेण तस्य सिद्धेः। अन्यथा क्लृप्तहेतुं विना सोऽनुभावक इत्यादौ तदसिद्धावाश्रयासिद्धिः सिद्धौ वा बाधः तेन विनैव सर्व्वानुपपत्तिं परिभूय तदनुभावकत्वस्य धर्म्मिग्राहकमानसिद्धत्वात्।

अत एव क्वचित् स्तुतिनिन्दाभ्यां कल्पितविधिनिषेधकवेदार्थमधिगत्य प्रवृत्तिनिवृत्तौ। अन्यथा विधिनिषेधकानां नानाप्रकारकत्वेन विभक्त्यादिविशेषवत्पदस्यानुमातुमशक्यत्वात् न ततोऽर्थधीः स्यात्।

नन्वन्वयविरोधिपदाजन्योपस्थितित्वेन न जनकत्वम्, अन्वयविरोधित्वस्यैव ग्रहीतुमशक्यत्वात्। विभक्त्याद्यसमभिव्याहृतत्वमन्वयविरोधित्वमिति चेत्, न। एवं सति विभक्तिसमभिव्याहृतपदत्वेनैव जनकत्वस्य लाघवेन संभवात्। न तु विभक्त्याद्यसमभिव्याहृतपदाजन्योपस्थितित्वेन गौरवात्। एवं च पदार्थोपस्थितिमात्रस्यात्र वाक्यार्थानुभावोऽनुमितवेदादित्यस्वरसात् मतान्तरमाह - **वस्तुतस्त्विति।** (६३)

तथापि वक्तृज्ञानानुमानानन्तरमिवानुमितानुमानादेव वाक्यार्थसिद्धैर्लौकिकवाक्यवद् वेदस्यानुवादवत्वं स्यादिति चेत् - न। धर्म्मिग्राहकमानेन स्मृत्यर्थज्ञापकतया ज्ञातात् सम्भूतसामग्री-कत्वेनानुपदमेव वाक्यार्थबोधोदयात् अपेक्षणीयान्तराभावात्। अनुमानस्य व्याप्त्यादिज्ञानापेक्षितत्वेन विलम्बितत्वात्। न च वेदस्यापि योग्यतादिज्ञानापेक्षिततया विलम्बः। तन्निरपेक्षबोधकस्यैव धर्म्मिग्राहकमानसिद्धत्वात् योग्यतादिविशिष्टस्यैवानुमानाद्वा।

एवं मङ्गलाचारस्याविगीतशिष्टाचारत्वेन कर्त्तव्यतामनुमाय सा कर्त्तव्यता वेदवोधितः, अलौकिकाविगीतशिष्टाचारकर्त्तव्यतात्वादिति तद्बोधकत्वेनानुमितवेदात् कर्त्तव्यताधीस्ततः प्रवृत्तिः।

ननु स आचारावेदबोधितकर्त्तव्यताकः तादृशाचारत्वादित्यनुमितवेदात् तत्कर्त्तव्यताधीः,

---

तन्निरपेक्षेति। तदित्युपलक्षणम्। यथार्थतात्पर्यकत्वधीलक्षणशाब्दबोधसामान्य[1] सामग्रीनैरपेक्ष्यमपि द्रष्टव्यम्।

ननु तदुभयनैरपेक्ष्यमयुक्तम्। असंसर्गग्रहादेः विशिष्टधीसामग्रीत्वात् इत्यरुचेराह - **योग्यतेति।**

स्मृतिस्थलीयं प्रकारमाचारेऽपि[2] अतिदिशति - **एवमिति**। यद्बोधकत्वेनानुमितो वेदस्तद्बोधयतीत्यन्यैव शाब्दबोधसामग्री। तथा च मङ्गलकर्तव्यतामनुमाय तां पक्षयित्वा वेदबोधितत्वानुमाने विशिष्टबोधकतया वेदोऽनुमित इति विशिष्टं बोधयति। वेदबोधितकर्तव्यतानुमाने तु मङ्गलबोधकतया वेदाननुमानात् न वेदानां मङ्गलाधिगमः[3] स्यादिति पदार्थमात्रकर्तव्यता बुध्यते। न तु विशिष्टकर्तव्यतावाक्यार्थ इत्यभिसन्धायाह - **नन्विति।**

नुनु यदि सामग्रीद्वयं तदा विभक्त्यादिसमभिव्याहारेण मङ्गळमन्यथाकर्तव्यतां बोधयेत्। न त्वनुमितो वेदो मङ्गळकर्तव्यतां बोधयिष्यतीत्यत आह - **विभक्तीति**। अनुमिते विभक्त्यादिसमभि-व्याहारात्मकसामग्र्यभावादित्यर्थः।

---

[1] T. omits

[2] T. ०आचारस्थलेऽपि

[3] T. ०वेदामङ्गळावयवः

विभक्त्यादिकं विनानुमितवेदात् तत्कर्त्तव्यताज्ञानाभावात् मङ्गलमाचरेदित्येवं रूपस्य च वेदस्यनानुमानं तथा व्याप्त्यभावात्। तस्मात् तस्य कर्त्तव्यतामनुमाय तद्बोधकवेदानुमानम् । प्रथमं कर्त्तव्यताज्ञानेऽपि वेदानुमानम् अविनाभावात्। न च तत एव प्रत्यक्षवेदानुमानम्। प्रत्यक्षत्वे उच्छेदानुपपत्तेः शाखान्तरवत्।

यत्तु अष्टकाः कर्त्तव्याः कार्य्या अष्टका इत्येवं रूपमेव वाक्यमनुमेयं उपस्थितत्वात्। एवञ्च तत्रैवार्थे प्रतिपुरुषमन्यान्यवेदानुमानं न दोषाय एकार्थानेकपदोपस्थितौ वानेकवाक्यानुमानमेवेति। तन्न, आचारतो वेदानुमाने मङ्गलमाचरेदित्याद्यन्यतरोपस्थितौ नियमाभावात्। अनेकवेदकल्पने च स्वानुभवविरोधः, मनुस्मृतिमूलञ्चानेकं वाक्यं नावश्यकमिति कथमाधुनिकोऽनेकमनुमिनुयात्।

न च स्मृत्यर्थबोधको वेदः स्मृतिसदृश एवानुमेयः नियमतः स्मृतेरुपस्थितत्वात् इति वाच्यम्। तदर्थस्मृतेरपि नानाप्रकारकत्वात् तस्य च प्रदोषादौ अनुच्चरितवेदस्येव वेदत्वं श्रोत्रग्रहाणार्हतया च शब्दत्वं वाक्यत्वमर्थबोधकत्वादित्येतदेव युक्तं स्मृत्याचारेण चानुमितो वेदोऽर्थं बोधयतीति पूर्व्वपूर्व्वेणानुमितवेदात् उत्तरोत्तरस्मृत्याचाराविति नान्धपरम्परा शब्दार्थशक्तिग्रहवत् स्वतः प्रमाणमूलकत्वात्। तस्मान्नित्यानुमेयत्वं वेदस्य न तूच्छेद इति।

अत्रोच्यते। उच्छिन्नवेदादर्थं प्रतीत्य स्मृत्याचारयोरुपपत्तेः न सामग्र्यन्तरकल्पनम्। अत एव नाश्रयासिद्धिर्बाधो वा स्मृत्याचारानुमितवेदस्यास्माभिरभ्युपगमात्। इदानीञ्च स्मृतिरर्थं प्रतीत्याचाराच्च कर्त्तव्यतामनुमाय प्रवृत्तिः।

ननु तत्समभिव्याहृत एवानुमीयतामित्यत आह - **मङ्गलमिति**। अविनाभावादित्युपलक्षणम्। अन्धपरम्परास्कन्दनेन आश्वासार्थं चेत्यपि द्रष्टव्यम्। अन्यथा स्मृतित एव स्मृत्यर्थोपस्थितौ तत्रापि वेदानुमानं न स्यादित्यवधेयम्।

श्रोत्रेति। कत्वादेरेव तदवच्छेदकत्वादिति भावः।

न चैवं किं वेदेनेति वाच्यम्। तुल्यत्वात् अविनाभावाच्च तत्कल्पनं तुल्यम्। तथा च स्मृत्याचारयोर्वेदजन्यानुभवमूलत्वानुमानादेव पक्षधर्म्मताबलात् प्रत्यक्षवेदमूलकत्वसिद्धिः। अन्यथा तस्यानुभावकत्वाभावेन मूलत्वानुपपत्तेः।

तस्मात् स्मृत्याचारानुमितो वेदः प्रत्यक्षोऽध्ययनविषयश्च वेदत्वात् सम्मतवत्, अन्यथा सामग्र्यन्तरकल्पने गौरवप्रसङ्गः।

ननु स्तुतिनिन्दार्थवादेन कल्पितात् विधिनिषेधकवाक्यात् कथमर्थमवगम्य प्रवृत्तिनिवृत्तौ। न हि तत्र वर्णपदविभक्तिविधिप्रत्ययक्रमविशेषाणामनुमानं सम्भवति। व्यभिचारादिति चेत् - न। स्तुतिनिन्दावाक्याभ्यां प्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्प्यते, लाघवात्। न तु विधायकनिषेधकवाक्यं गौरवात् उक्तदोषाच्च। यत्र चार्थवादादेव तदर्थावगमः 'तरति मृत्युमित्यादौ तत्र न तत्कल्पनापि।

अथ तस्याध्ययनविषयत्वे शाखान्तरवत् बहुभिर्मेधाविभिराध्यात्मिकशक्तिसम्पन्नैर्ध्रियमाण-शाखाया उच्छेदासम्भव इति चेत् - न। एकस्य न सकलशाखाध्ययने शक्तिरित्येकेनेवापरैरपि तदनध्ययने शाखोच्छेदसम्भवादेकानधीतायाः अपराध्ययनविषयत्वनियमे मानाभावात् शाखात्वस्येव प्रत्यक्षशाखात्वस्याप्रयोजकत्वात्। यद्यपि वेदसहस्रशाखाविदो व्यासादयः सन्त्येव, तथाप्यध्ययनाभाव एव शाखोच्छेदः।

ननु शाखोच्छेदे वर्णपदवाक्यहानिशङ्कया प्रत्यक्षवेदादपि वाक्यार्थप्रयोगयोरनिश्चये वैदिकव्यवहारमात्रं लुप्येतेति चेत् - न। श्रूयमाणमात्रस्यैव महाजनपरिगृहीतत्वात् तन्मात्रबोधिता-ङ्गेति कर्त्तव्यतयैव शिष्टैरनुष्ठीयमानत्वाच्च तदर्थनिश्चयात्।

न च उच्छिन्नशाखाबोधितेति कर्त्तव्यताशङ्कया एकस्मिन्नपि कर्म्मण्यनाश्वासप्रसङ्गः, नानाशाखेतिकर्त्तव्यतापूरणीयत्वात् तस्येति साम्प्रतम्। सन्ति हि तत्तत्कर्म्मणि नानाशाखाबोधितसकलेतिकर्त्तव्यताबोधनायैनमेव कालक्रमभाविनमनाश्वासमशङ्कमानैर्महर्षिभिः

प्रणीता महाजनपरिगृहीताः स्मृतय इति नानाश्वासः। अन्यथा एकस्य सकलशाखानवगमात् शाखान्तरबोधितेतिकर्त्तव्यतासंशयेनैकशाखातो नार्थनिश्चयः स्यात्।

यत्तु विभक्त्यादिमत्तत्तत्पदानां तत्समुदायानाञ्च प्रत्यक्षत्वन्तेष्वपि कश्चिद्वेदः तत्रायं समुदायो वेद इत्यनिश्चय एव नित्यानुमेयार्थः, वेदत्वं वा तत्रानुमेयमिति - तन्न। प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वेदत्वाभावनिश्चयात्।

अत एव वेदत्वं तत्र नानुमेयं बाधात् विशिष्य पक्षाज्ञानाञ्च धर्म्मवेदनाजनकत्वञ्च वेदत्वं नानुमेयं तज्जनकत्वस्य प्रत्यक्षतद्वात्, नाध्ययनविषयत्वं तद्भावात्, न जातिरनभ्युपगमादिति।

स्यादेतत् । स्मृत्याचारयोर्वेदमूलत्वे तत्तोरच्छेदादिविवादस्तदेव त्वसिद्धं, तथा हि वेदसमानार्था महाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमाने लिङ्गं तथा च प्राथम्यात् साध्यप्रसिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवापूर्व्वादिवाक्यार्थज्ञानमस्तु किं वेदेन तदर्थस्य स्मृतित एव सिद्धेः अपूर्व्वस्यापि शब्दैकगम्यत्वेन स्मृतितो ज्ञातस्य ज्ञापकत्वेनानुवादकतापत्तेश्च। सा च स्मृत्यन्तरादित्यनादिरेत्र स्मृतिधारावश्यकी। अन्यथा मनुस्मृतेः पूर्व्वन्तवापि वेगानुमानं न स्यात्। सर्व्वा च स्मृतिः स्मृतिजन्यवाक्यार्थप्रमाजन्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नान्धपरम्परा। प्रत्यक्षा स्मृतिः स्मृतिमूलं नानुमिता अनुमितवेदवत्तस्याननुभावकत्वात्। वेदार्थस्मृतिताप्रसिद्धिस्तु प्रत्यक्षवेदमूलस्मृतिसाहचर्य्येण भ्रमात् प्रत्यक्षवेदार्थबोधितलोभन्यायमूलस्मृताविव तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलत्वभ्रमाद्वा भवन्ती न सम्भवन्मूलान्तराणां वेदमूलकत्वं कल्पयति।

अथ स्मृतिरिव तद्वेदमूलकत्वप्रसिद्धिरपि महाजनपरिगृहीता एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिगृहीतवेदमूलत्वप्रसिद्धित्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्। एवं वेदार्थताप्रसिद्धिरपि। अन्यथा महाजनपरिगृहीतानादरे वेद - स्मृत्योरपि प्रामाण्यं न स्यादिति चेत् - न। यूपहस्त्यादिस्मृतेस्तत्प्रसिद्धो व्यभिचारात्, क्लृप्तलोभादित एव तत्सम्भवात् विचारकाणां

विप्रतिपत्तेश्च तत्र तत्प्रसिद्धौ विगानं महाजनानामिति चेत् - न। अत्रापि मूलान्तरसम्भवादविप्रतिपत्तेश्च विगानमेव तेषाम्।

अत एव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वम्। न च वेदमूलेऽयमिति कृत्वा स्मृतेर्महाजनपरिग्रहात् तन्मूलत्वं, वेदमूलेयमिति प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमानेन।

न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, असिद्धेः, मन्वादिस्मृतित्वेन पूर्व्वमहाजनपरिग्रहेणोत्तरोत्तरेषां परिग्रहादनुष्ठानाद्युपपत्तेः, एवं होलाकाद्याचारेऽपि वेदलिङ्गेनैव कर्त्तव्यताज्ञानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः। अविगौतालौकिकविपयकशिष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात्। वेदं विनापि तत्कर्त्तव्यताधीसम्भवात् न तदर्थं वेद इति इहापि तुल्यम्। आचार-कर्त्तव्यतानुमानयोरनादित्वेनाचाराणां कर्त्तव्यत्वानुमानमूलकत्वात् नान्धपरम्परा।

न च पूर्व्वानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् सा, व्याप्ति - पक्षधर्म्मतासत्त्वेन सर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामान्याधीनं सर्व्वस्य प्रामाण्यमिति न निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः।

एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तम्। अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैव हेतोरुपपत्तेः निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च।

न च सापेक्षत्वेन न प्रमाणता, व्याप्त्यादिसत्त्वात्। अन्यथा प्रमाणे नैरपेक्षस्य वैयर्थ्यात्। न चाचारे वेदमूलत्वप्रसिद्धेस्तदनुमानं। असिद्धेः व्यभिचारादन्ययोपपत्तेश्च। न च वेदमूलत्वेनैव महाजनपरिग्रहात्तथा, न हि वेदमूलोऽयमिति कृत्वा महाजनानां तत्परिग्रहः। वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वाच्छक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेनैव महाजनपरिगृहीतोऽयमाचार इति

ज्ञात्वा तत्र महाजनपरिग्रहः, गौरवादसिद्धेश्च। पूर्व्वमहाजनपरिग्रहादेवोत्तरोत्तरेषां परिग्रहादनुष्ठानोपपत्तेः। तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदसिद्धिरिति चेत् - न। असम्भवन्मूलान्तरत्वस्योपाधित्वात्। अन्यथा लोभन्यायमूलस्मृतेरपि वेदमूलत्वप्रसङ्गः।

अस्तु वा स्मृत्याचारयोरनादित्वम्। न चाचारात् स्मृतिः स्मृतेराचार इत्यन्धपरम्परा मूलभूतप्रमाणाभावात् इति वाच्यम्। स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमपीति - उच्यते। प्रलये पूर्व्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्व्वज्ञेश्वरप्रणीत-वेदमूलत्वं स्मृत्याचारयोः। अन्यथा मूलाभावेनान्धपरम्पराप्रसङ्गः।

न च मन्वादीनामतीन्द्रियारथदर्शित्वं, तदुपायश्रवणादेस्तदानीमभावात्। पूर्व्वसर्गसिद्ध-सर्व्वज्ञमन्वादय एवे ते इति चेत्, न, प्रमाणाभावात्। स्मृत्याचारयोः प्रमाणमूलत्वमेव तत्कल्पकमिति चेत्, न, प्रतिसर्गं तेषामन्यान्यत्वकल्पने गौरवमित्येकस्यैव नित्यसर्व्वज्ञस्य कल्पनात्। न च स्मृतय एव तत्प्रणीताः, तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधनात् स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च।

एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वासाधकमपि भगवति प्रमाणम्। अत एव 'प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते' इत्यागमोऽपि। एवञ्च पूर्व्वं प्रत्यक्षमूलावेव स्मृत्याचारौ, अग्रे च कालक्रमेणायुरारोग्य बल-श्रद्धा-ग्रहण-धारणादिशक्तेरहरहरपचीयमानत्वात् तदध्ययन-विच्छेदेन शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्त्तव्यतामधिगत्य प्रवृत्तिः।

नन्वेवं स्मृतिरस्तु वेदमूला मङ्गलाद्याचाररुवीश्वरादेव भविष्यति घटलिप्यादिसम्प्रदाय-वदिति चेत् - न। बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात्।

वृद्धव्यापारघटितस्येति। एतत् वस्तुगतिमनुसृत्योक्तम्। वस्तुत ईश्वराचारात् ईदृशाचारान्तरा-संभवेन तन्मूलकत्वं सम्भावितमेव । न हि स्वेष्टसाधनतामाचारस्यानुमाय प्रवर्तितुमर्हति।

न च मङ्गलादिपदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यम्। स्वर्गादिपदवद्वाक्यार्थे तदुपपत्तेः। अत एव यत्र वचनमात्रात् परप्रतिपत्तिस्तत्र नाचारः परीक्षकाणाम्, तस्य च वेदत्वं नेश्वरप्रणीतत्वेन शक्तिग्रहणार्थतद्वचने व्यभिचारात्। किन्तु तादृशाचारस्य वेदमूलत्वनियमादिति। स्यादेतत्। प्रलये सत्येवमेव तत् स एव तु नास्ति प्रमाणाभावात् इति चेत् - न। काल - कपालान्यावृत्तिघटप्रागभावः कार्य्यद्रव्यानाधाराधारः कार्य्यद्रव्यानधिकरणकार्य्याधिकरणवृत्तिर्वा अभावत्वात् आकाशवृत्त्यन्योन्याभाववदिति वृत्तप्रलयसाधनात्।

न च भगवदाचारे स्वेष्टसाधनतारूपं साध्यं प्रसिद्धम्, येन तत् दृष्टान्तमूलकव्याप्त्या आचारान्तरान्तरं संभवेत्। न च विश्वविषयेच्छया स्वेष्टप्रसिद्धिः[1]। समाप्तिरूपं फलपारिशेष्याभावेन तत्फलसाधनतानवगमे तदर्थतया मङ्गलेऽप्रवृत्तिप्रसङ्गात् इत्यूह्यम्।

किन्तु तादृशेति। न चेदमन्योऽन्याश्रयग्रस्तम्। आचारस्य वेदमूलकत्ववादिनं प्रति तादृशशब्दस्य वेदत्वे साधिते तथा व्याप्तिनिश्चयात्। तथाव्याप्तौ तादृशशब्दस्य वेदत्वसिद्धिरिति वाच्यम्। भावानवगमात्। तादृशाचारस्यालौकिकाविगीताचारस्य वेदमूलकत्वनियमात्। शब्दतदुपनीतिप्रमाणातिरिक्तप्रमाणजन्य-प्रमित्यविषयार्थ (६४)शब्दमूलकत्वनियमादित्यत्र तात्पर्यात्। तथा च तादृशशब्दस्य भगवदीयत्वेन शब्दजन्यवाक्यार्थज्ञानाजन्यत्वमुभयसिद्धमेवेति अर्थवशसम्पन्नमेव वेदत्वमिति वेदमूलकत्वसिद्धिरिति।

कालेति। घटप्रागभावस्य पक्षीकृतस्य आकाशादिवृत्तितयाऽर्थान्तरं मा भूदिति बाधस्फोरणाय **कालकपालान्यवृत्तीति**। तत्र तत्प्रागभावाधारत्वाभावावेदकं विशेषणमिति। तेन कपालस्य कार्यद्रव्या-नधिकरणत्वमेव न संभवति। कार्यद्रव्यानधिकरणत्वेन कार्यद्रव्याधिकरणभिन्नत्वस्य विवक्षितत्वादिति। पक्षधर्मताबलात् तादृशकालसिद्धिः। न च दिशार्थान्तरं दिशोऽपि तादृप्यं न तादृशकालानन्तर्भावेन[2]। न हीदानीं कापि दिक् सकलकार्यद्रव्यशून्या प्रतीयते। तथा च तथासिद्धावपि अभिमतकालसिद्धिरप्रत्यूहा।

---

[1] T. ०स्वेष्टसाधनताप्रसिद्धिः ईश्वरे

[2] T. adds संभवति

न च दिशोऽपि प्रागभावाधिकरणत्वे कालकपालान्यवृत्तित्वविशेषणबाधः। कालपदेन साधारणाधिकरणस्य विवक्षितत्वात्। साधारणमधिकरणं विश्वस्य दिक्कालावेव।

यत्तु कार्यद्रव्यानाधारत्वं यदि तदाधारभिन्नत्वमिति तदा बाधापत्तेः[१] । न हि तादृशे घटप्रागभाव-भासत्वशङ्का। न च काल एव तथा। तस्य कार्यद्रव्याधिकरणरूपस्यैकत्वेन तद्भिन्नत्वाभावात्। न च खण्डप्रळयात्मककालोपाधिः तथा उपाधेरनधिकरणत्वात् उपाधिमतश्च कालस्य भिन्नत्वाभावात् भेदाभेदानभ्युपगमात्। न हि श्यामघटात् पाकरक्तो घटो भिन्न इति संभवति। परं तु श्यामत्वाभावमात्रमिति, तन्न। उपाधिविशिष्टस्याधिकरणत्वे उपाधेरप्यधिकरणत्वादिति दिक्।

कार्यद्रव्यानाधारत्वं महाप्रलयेन अर्थान्तरत्वापादकं मा भूदिति। भावकार्याधिकरणत्वं तद्विशेषणमिति साध्यान्तरमुक्तमिति केचित्। तन्न। प्रागभावस्य महाप्रलयवृत्तित्वबाधादेव तदसंभवात्। तस्मादुक्तरूपस्यावान्तरप्रलयपदार्थतया तत्साधनाय विशिष्टं प्रतिजानीते - कार्ये तत्त्वंभावादिति। एतच्च यथाश्रुतं यद्यपि कार्यद्रव्यानधिकरणान्योऽन्याभावे व्यभिचारितयापि घटत्वनिरूपिताभावत्वादित्यत्र तात्पर्यम्। तेन कार्यद्रव्यानधिकरणत्वात्यन्ताभावेऽपि न व्यभिचारः। तस्याभाव (६५) प्रतियोगिकतया भावरूपत्वात्। अभावत्वेन शुद्धाभावस्यात्र विवक्षितत्वात्।

वस्तुतस्तु कार्यद्रव्यानधिकरणान्योऽन्याभावेऽपि कार्यद्रव्यानधिकरणे सिषाधयिषिते काले[२] वर्तत एव। अतो न पक्षसमत्वात् व्यभिचारः। अन्यथा नित्यत्वव्याघातात्। न चान्योन्याभावस्य प्रतियोगितावच्छेदकविरोधित्वनियमभङ्गापत्तिः। वृत्तिभेदेन तत्संभवात्। न हीदानीं कार्यद्रव्यानधिकरणान्योन्याभाव अयं कालः। कार्यद्रव्यानधिकरणभिन्न इत्यनयोः प्रतीत्योः वृत्त्यवैचित्र्यवैचित्र्यं घटते। न चानुभवविरोधः। एककालस्य कालत्वेनानाधिकरणत्वात् अन्यत्र देशत्वेनेति। कथमन्यथा कालान्योऽन्याभावस्य नित्यतया कालवृत्तित्वेऽपि देशतया न कालोऽधिकरणम्, कालः कालभिन्न इति प्रतीत्यापत्तेरिति दिक्।

---

[1] T. ०आधारापत्तिः

[2] T. ०कार्ये

एवमेव घटध्वंसं पक्षीकृत्यागामिप्रलयसाधनम्।

यद्वा घटः कार्य्यद्रव्यानधिकरणकार्य्याधिकरणवृत्तिध्वंसप्रतियोगौ कार्य्यत्वाच्छब्दवत्।

यद्वा कार्य्यद्रव्यत्वं कार्य्यद्रव्यानधिकरणकार्य्याधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति कार्य्यमात्र-वृत्तित्वात् शब्दत्ववत्।

द्वितीयसाध्ये चाभावत्वमाद्यभावत्वमत एवान्योन्याभावपर्यन्तं दृष्टान्तितम्। अतो न महाप्रलयाव्यवहितपदार्थध्वंसे व्यभिचारः। कार्यत्वात् - इदानींतनकार्यत्वात्। महाप्रलयाव्यवहितकार्ये न व्यभिचार इति भावः।

कार्यमात्रेति। मात्रपदस्य कार्त्स्न्यपरत्वेन कार्यपदस्य विभाजकोपाध्यवच्छिन्नपरतया विभाजकोपाध्यवच्छिन्नतयावत्कार्यवृत्तित्वादित्यर्थः। तेन न चरमक्रियात्वादौ व्यभिचार इति भावः। अन्यथा यथाश्रुते मात्रपदवैयर्थ्यम्, द्रव्यत्वादावपि[१] साध्यत्वात्कार्यतावच्छेदकत्वविवक्षायां मुक्तौ व्यभिचारः[२], महाप्रलयाव्यवहितशब्दवृत्तिचैत्रजन्यतावच्छेदकावान्तरजातिशङ्कया व्यभिचारसंशय[३] इति। अनादितावच्छेदकधर्मत्वविवक्षायां सजातीयध्वंसव्याप्यप्रागभावप्रतियोगित्वमनादित्वं निर्वाच्यमिति व्याप्तौ सामानाधिकरण्यप्रवेशस्यावश्यकतया ध्वंसव्याप्यत्वे प्रागभावस्य कालिके प्रागभावसमनाकालताध्वंसस्य प्रविष्टैवेति प्रागभावसमानकालीनध्वंसप्रतियोगिवृत्तित्वस्यैव सामर्थ्ये ध्वंससमानकालप्रागभाव-प्रतियोगितावच्छेदकत्वे व्यर्थविशेषणत्वमिति यथओक्त एव हेत्वर्थः। न च द्रव्यगुणादीनां प्रलये क्रमिकनाशोत्पत्त्या प्रलयप्राक्कालेनार्थान्तरम्। स्थूलकालोपाधिमादाय समानकालताया विवक्षितत्वात्। तथाभूतकालस्य सूक्ष्मत्वादिति ध्येयम्।

---

[1] T. omits द्रव्यत्वादावपि

[2] T. omits मुक्तौ व्यभिचारः

[3] T. omits ०संशय०

यद्वा एककालीनाः सर्व्वे परमाणवः समग्रोपादेयप्रबन्धशून्या आरम्भकत्वात् नष्टपवनारम्भकपरमाणुवत्। सर्व्वत्र पक्षतावच्छेदकावच्छिन्नं साध्यं प्रतीयते इति एककाले शून्यता लभ्यते। न च पवनपरमाणुनामपि पक्षत्वेनांशतः सिद्धसाधनं, पक्षधर्म्मतावललभ्यसाध्याप्रतीतेः, अभेदानुमानवच्च पक्षस्य दृष्टान्तत्वाविरोधः।

यद्वा परमाणवः कार्य्यद्रव्यानधिकरणवृत्तिकार्य्यवन्तः नित्यद्रव्यत्वात् आकाशवत्, भगोलकसन्तानोऽयं भूगोलकसन्तानानधिकरणवृत्तिध्वंसप्रतियोगौ कार्य्यत्वात् घटवत्।

एककालीना इति । स्पर्शवन्त इत्यपि पूरणीयम्। अन्यथा मनःस्पर्शतो बाधापत्तेः। उपादेयप्रबन्धेत्यादौ (६६) उपादेयपदस्य स्वोपादेयपरत्वात्, द्रव्यपरत्वाच्च। अन्यथा बाधात्। सर्वत्र सर्वोपादेयप्रबन्धशून्यत्वाभावात्। गुणादिसत्त्वाच्च। शून्यपदस्य ध्वंसपरत्वात् । अन्यथा बाधस्य स्फुटत्वादेव। अत एव हेतुरपि जनकत्वादित्युक्तः। अन्यथा मेयत्वादित्येव क्रियेतेति भावः।

जनकत्वात्। द्रव्यसमवायिकारणत्वात् । अन्यथा उक्त एव व्यभिचारापत्तेः। परमाणव इति प्रत्येकं स्वस्वधर्मावच्छिन्नाः पक्षः। कार्यद्रव्यानधिकरणवृत्तिकार्यवत्त्वं च तादृशकार्याधिकरणतावच्छिन्नत्वं साध्यम्। तेन परमाणावाकाशसंयोगादिना न सिद्धसाधनम्। प्रत्येकं संयोगाधिकरणतानवच्छिन्नत्वात् मिलितस्यैव व्यासज्यवृत्तिधर्माधिकरणत्वावच्छिन्नत्वादिति भावः। कार्यपदं प्रागभावावच्छिन्नसत्ताकपरम्। अतो महाप्रलयेन नार्थान्तरमित्यवधेयम्।

नित्येति। नित्यत्वं गुणादौ घटत्वं द्रव्यादौ व्यभिचारीति द्वयमुपात्तमिति भावः।

भूगोलकेति। अवयवानामावापोद्धारेण [१] भूगोलकस्य विनाशोत्पादात् मा भूत्। अधुना अर्थान्तरमिति सन्तानग्रहणम् ।

---

[1] T. ०उद्वापेन

यद्वा एतत्कर्म्मातिरिक्तानि कर्म्माणि एतत्प्रतिबन्धकप्रतिबध्यानि कर्म्मत्वात् एतत्कर्म्मवत्। न चात्र व्यभिचारशङ्का, सर्वेषामेवंरूपत्वादनेवम्भावे च स्वभावप्रच्यवात्। अन्यथा नियमेऽपि नियमान्तरापेक्षायामनवस्थितेः। आगमोऽप्यमुमेवार्थं संवतदीति कृतं प्रसक्तानुप्रसक्त्या।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे उच्छन्नप्रच्छन्नवादः।।

यद्यपि यथाश्रुतं महाप्रलयेनार्थान्तरदुस्थम्, तथापि प्रागिव कार्याधिकरण-निष्ठत्वेन ध्वंसो विशेष्यः। साध्येषु सर्वत्र कार्यद्रव्यभूगोलकाद्ये तद्ब्रह्माण्डावच्छेदेन विशेषणीयम्। अन्यथाऽप्रयोजकत्वात्। न हि ब्रह्माण्डान्तरवर्तिकार्यद्रव्याणामपि युगपद्विनाशमागमो बोधयति, येन विपक्षबाधको भवेत्।

अत एव वक्ष्यति - **आगमोऽपि।** अत एव वात्रान्यत्र ब्रह्माण्डे प्रलयकाले ब्रह्माण्डान्तरप्रलय-संशयेन प्रागभावलक्षणे परत्वगर्भे प्रलयकालीनपरमाणुक्रियाप्रागभावाव्याप्तिसन्देह [१] इति तत्र लक्षणान्तरमाश्रीयते।

एतदिति। पक्षधर्मताबलात् स एकः कालः पर्यवस्यतीति भावः।

न चात्रेति। एषु उक्तानुमानेष्वित्यर्थः।

सर्वेषामिति। सर्वेषामनुमानानाम् उक्तरूपसाध्यव्याप्यत्वादित्यर्थः। अनेवंभावे अव्याप्यत्वे स्वभावप्रच्यवात्। उपाध्यनुपलम्भेन अनौपाधिकत्वस्वभावस्य निश्चितस्य प्रच्यवापत्तेः।

ननु कश्चिदुपाधिः स्यादिति शङ्कायामनौपाधिकत्वनिश्चय एव कथमित्यमित्यत आह - **अन्यथेति**। एतादृशशङ्कास्कन्दने वक्तव्ये नियामकसहस्राणामपि तथा स्कन्दनेऽपर्याप्या अनवस्था स्यादिति भावः। (६७)

---

[1] T. ० क्रियाप्रागभावाव्याप्तिसन्देह :: क्रियायामव्याप्तिसन्देह

ननु यावच्चाव्यभिचारित्वमिति यायात् शङ्कास्कन्दनाय किञ्चिदवश्यं वाच्यमेव। अन्यथा जितं चार्वाकैरित्यतो नियामकान्तरमाह - **आगम** इति। यद्वा सर्वत्र नियामके नियामकशङ्कायां क्रियमाणायां तन्नियामकाभिधानेनैव पुरुषायुषपर्याप्तेः वादान्तरावतारो न स्यादेवेत्यनवस्थार्थः। तदिदमुक्तं **कृतं प्रसक्तानुप्रसक्त्येति।**

इति शब्दखण्डे उच्छन्नप्रच्छन्नवादालोकः समाप्तः।।

विधिवादः।

आचारमूलत्वं वेदस्य प्रवर्त्तकज्ञानजनकत्वेन भवतीति प्रवर्त्तकज्ञानं निरूप्यते। तत्राभिधा - सङ्कल्पापूर्व्वभावनाज्ञानं न प्रवर्त्तकं, तस्मिन् सत्यपि अप्रवृत्तेः असत्यपि प्रवृत्तेश्च।

विधिवादालोकः

आचारेति। प्रवृत्तिजनकत्वं वेदस्य साक्षादसाधनस्य [१] द्वाराधीनं द्वारं तु ज्ञानमिच्छा च। ज्ञानमनुत्पाद्य नेच्छा सत्तादिच्छाजनने [२] शब्दासामर्थ्यात्। अन्यथाऽतिप्रसङ्गात्। न चान्यत् द्वारत्वेन शङ्कास्पदमिति पारिशेष्यात् ज्ञानमेव द्वारमिति[३] तद्विचार्यत इति भावः।

तत्राभिधेति। तत्र अभिधा लिङर्थः। सैव च प्रवर्तिकेति भट्टाः। तेषामयमाशयः - द्विधा भावना। अर्थभावना शब्दभावना च। सा च कर्मकरणेतिकर्तव्यतापेक्षित्वात् अंशत्रयवती। अन्यथा स्वर्गादिफलं न भावयेत्। तस्यैतत् त्रितयाधीनत्वात्। तत्राद्यार्थविषयत्वेन अर्थभावनापदवाच्या। [४] फलोत्पत्त्यनुकूल-कर्तृशक्तिमात्रं सर्वाख्यातसाधारणम्। कर्ता च चेतनोऽचेतनश्च रथादिः। तदन्या च शब्दनिष्ठतया शब्दशक्तिः। शब्दव्यापारतया च शब्दभावनापदवाच्या प्रवर्तना लिङाद्यर्थः। तदुक्तम् -

अभिधां भावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः।।

अर्थत्मकत्वं चार्थगोचरत्वम्। शब्दभावना च किं केन कथमित्यंशत्रयवती। तदुक्तम्[५] -

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ।।

---

[1] T. साक्षात् जनकस्य
[2] T. साक्षात् इच्छाजनने
[3] T. तद्विचारमिति
[4] T. ० व्यापार ०
[5] T. तदाह -

इति। लिङस्तावदभिधानामको व्यापारो लिङ्निष्ठोऽवश्याभ्युपेयः। करणस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा दृष्टम्। यथा दण्डकाष्ठादेः चक्रभ्रमिविक्लित्त्यादि[1]जनकत्वं स्वनिष्ठस्पन्दज्वलनादि[2]द्वारा। न च व्यापारे एव व्यभिचारोऽनवस्था वेति वाच्यम्। व्यापारस्य करणत्वात्[3]। व्यापारिण एव तत्त्वात्[4]। व्यापारभिन्नत्वगर्भत्वाद्वा व्याप्तेः। परनिष्ठपदमप्येतदर्थमेव । अन्यथा व्यभिचारानवस्थयोः अन्यतरप्रसङ्गात्। शक्तिज्ञानादिव्यापारकत्वस्य उभयसम्मतत्वात् सिद्धसाधनं मा भूदिति स्वनिष्ठगर्भासाध्यं तत्र किमित्याकाङ्क्षायां प्रवर्त्यपुरुषप्रवृत्तीरेव भाव्या। केनेत्याकाङ्क्षायां सम्बन्धेति। अव्युत्पन्नस्य लिङ्पदादप्यप्रवृत्त्या सम्बन्धबोधस्तच्छक्तिग्रहः सहकारीत्यर्थः। प्ररोचना चाङ्गतया अवसीदद्विधिशक्त्युत्तम्भके तयोपयोगिनीप्रशस्तत्वज्ञाने पुरुषप्रवृत्तेः स्तुतिरुत्तेजिका भवतीति ।

इदं चात्र तत्त्वम् - अभिधापि न तत्त्वेन ज्ञातस्वरूपसती वा हेतुः, अतिप्रसङ्गादिति प्रवर्तनत्वेन ज्ञाता। न च निष्फले दुःखैकफले वा कर्मणि सा तथा ज्ञातुं शक्यते। अतो भावनात्वेन ज्ञाता। न च भाव्यनुपस्थितौ तत्सम्भवः।

न च क्रिया भाव्या कष्टत्वादिति समभिव्याहृतं फलं प्रति भावनात्वेन ज्ञाता। अत एवाश्रुते फले विश्वजिदादौ फलं कल्प्यते। सेयं यद्यपि इष्टसाधनत्वपर्यवसायिता तथापि क्रियागतमिष्टसाधनत्वं विध्यर्थः। अपि तु अभिधागतमिति विशेषः। तदेव क्रियागतं नेत्याक्षिप्ततदिष्टसाधनताबोधोऽपि ।

तदयं पर्यवसितार्थः। उक्तयुक्त्यवष्टम्भेन अभिधायायं सिद्धायां प्रवर्तनात्वावभावत्व-भानानुकूलाप्यपराशक्तिलिङ्पद एव एका प्रवृत्त्यनुकूला अपरा च ज्ञानानुकूला इति शक्तिचतुष्टयमिति तन्त्रसङ्केतभिन्नायामभिधायां मानाभावात्। शब्दस्य व्यवहाराधीनव्युत्पत्तिबलेन ज्ञानमात्रजनकत्वाव-धारणात् न तु प्रवृत्तिजनकत्वावधारणात् इत्यन्विताभिधाने वक्ष्यमाणत्वात्। भावे वा आवश्यकेष्टसाधनताज्ञानमात्रव्यापारत्वेनोपपत्तौ अभिधालक्षणाव्यापारानपेक्षत्वात्।

---

[1] T. omits ०विक्लित्त्यादि०

[2] T. ०स्पन्दनादि०

[3] T. ०अकारणत्वात्

[4] T. तथाभावात्

कार्य्यत्वज्ञानं प्रवर्त्तकमिति गुरवः। तथा हि ज्ञानस्य कृतौ जन्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति तत्सत्त्वे कृतिविलम्बोहेत्वन्तराभावात्।

न च करणस्येत्यादिनियमात् । तथानियमे स्वनिष्ठस्य गौरवेण प्रयोजकतया व्यर्थविशेषणत्वात् व्याप्तिस्मृत्यादावुक्तनियमव्यभिचाराच्च । तस्य अनुमित्यादिकरणत्वात्। तस्मात् अवश्यवाच्यक्रियेष्टसाधनत्वमेव वृत्त्यर्थो नाभिधेति । तदिदमुक्तम् - *असत्यपि प्रवृत्तिरिति। तस्मिन् सत्यपीत्यादिहेतुश्च साकलपूर्वादौ उक्तसाध्येषु यथायोगं हेतुद्वयमिति।*

अपरे तु विधिशब्दश्राविणः प्रवृत्तिदर्शनेन (६९) व्युत्पित्सुर्बालः स्वप्रवृत्तिजनकत्वेनावधारिते शक्तिं कल्पयति। तादृशी च तेनेच्छा ज्ञाता। अतश्च सैव लिङर्थ इति वदन्ति। तदपि न। एवमपि हि लिङेच्छाज्ञानं जन्येत। न च तत्प्रवर्तकम्। स्वर्गकामादिपदादेव तल्लाभेनान्यलभ्यतया तच्छक्त्यकल्पनाच्च। न चेच्छैव लिङा जन्यते। बाधादिति।

अन्ये त्वपूर्वमेव विध्यर्थः। वैदिकेतरतद्ज्ञानस्यैव प्रवर्तकत्वादिति वदन्ति। तदप्यसत्। अपूर्वत्वव्याघातात्। अपूर्वपदादपि प्रवृत्त्यापत्तेश्च।

केचित्तु भावना प्रयत्नः। तद्ज्ञानं प्रवर्तकमिति सा विध्यर्थ इति वदन्ति। एतदपि सर्वाख्यातसाधारण्यात् नोचितमिति मनसिकृत्य संक्षिप्यैकग्रन्थेन दूषितवान् **तस्मिन्नित्यादिना**।

हेतुद्वयं च यथायोग्यमित्युक्तम्। अभिधायां मानाभावेन तस्मिन् सतीत्यादिहेतोरनन्वयादिति ।

ज्ञानस्येति। साक्षादसाधनस्योपायविषयस्य वेत्यर्थः। तेन प्रवृत्तिविषयप्रत्यक्षे फलज्ञाने च न व्यभिचार इति भावः।

चिकीर्षा च कृतिसाध्यत्वप्रकारिकाकृतिसाध्यक्रियाविषयेच्छा पाकं कृत्या साधयामीति तदनुभवात्। सा च स्वकृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात्। अत एव स्वकृतिसाध्ये पाके प्रवर्त्तते। न त्विष्टसाधनताज्ञानसाध्यास्वकृत्यसाध्ये चिकीर्षापत्तेः, स्वकृत्यसाध्यत्वज्ञानं प्रतिबन्धकमिति चेत् - न। तदभावकारणत्वे गौरवात्।

अथाभाव उभयसिद्धः कृतिसाध्यताधीरसिद्धेत्यतो न लाघवावसर इति चेत् - न। यत्र शब्दादनुमानाद्वा दैवात् सा तत्र लाघवावतारादिच्छायाः स्वप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वाच्च जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वाच्च। व्याप्तिज्ञानविघटनद्वारा अनुमितिप्रतिबन्धकानैकान्तिकज्ञानवत्। अन्यथा स्वकृत्यसाध्यत्वानिष्ट-साधनत्वोपेक्षणीयत्वनिष्फलत्वज्ञानं प्रतिबन्धकं क्रियाज्ञानमेव क्रियाज्ञानमेव प्रवर्त्तकं कल्प्येत।

तत्र व्यापारीभूतां चिकीर्षां लक्षयति - **चिकीर्षा चेति**। अत एव कृतिसाध्यतप्रकारिका फलेच्छापि इति न सा प्रवृत्तिहेतुरिति क्रियाविषयत्वं विशेषणम्। तदर्थोऽपि फलान्यविषयत्वम्। अन्यथा फलस्यापि धात्वर्थतया क्रियात्वेन तच्चिकीर्षाव्यवच्छेदो न स्यात्। अत एव कृत्यसाध्यक्रियायां भ्रमे एतादृशेच्छासंभवेऽपि न सा कृतौ व्यापार इति क्रिया इति साध्यत्वेन वास्तवेन विशेषिता। तादृशविषये तादृशेच्छायां कृत्यनुत्पादस्य हेत्वन्तराभावाधीनत्वनियमादिति भावः।

पाकमिति। पाकं कृत्या साधयामीत्येवमाकारिकायास्तस्या इच्छाया अनुभवात्। कृतिसाध्यत्वेन पाकमिच्छामीत्यनुभवेनेति शेषः। अन्यथा यथाश्रुतेनेति शब्देनेच्छानुभवाकारकथनापरत्वलाभे विरोधादिति भावः। इच्छायाः जन्येच्छायाः।

स्वप्रकारकेति। स्वप्रकारकप्रकारकधीसाध्येत्यर्थः।

ननूक्तक्रमेण लाघवावतारे कारणताग्रहप्रयोजके भेदाग्रहादिरपि न प्रवृत्तिहेतुः, अभेदग्रहापेक्षया गुरुत्वादित्यरुचेराह - **इच्छाया** इति।

ननु सनो धात्वर्थगोचरेच्छावाचित्वात् लाघवाच्च कृताविच्छा चिकीर्षा सा च दृष्टाविवेष्टसाधनताज्ञानादिति चेत् - न। वन्हिना साधायमीतिवत् कृत्यासाधयामीतीच्छायाः कृतेः पूर्व्वमनुभूयमानायाः सनन्तावाच्यत्वेन गौरवेण च प्रत्याख्यातुमशक्यत्वात्।

किञ्च पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृतेः, धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारवाचित्वं। ओदनं बुभुक्षत इत्यत्र भोजनविशेष्यतयौदनस्येच्छाविषयत्वानुभवात्। इष्टसाधनत्वेन दृष्टाविव कृताविच्छासम्भवेऽपि कृतीच्छा न प्रवर्त्तिका किन्तु स्वकृतिसाध्येच्छैव। घटं जानाति चिकीर्षति करोतीति ज्ञान-चिकीर्षा-कृतीनामेकविषयत्वानुभवात्।

अथ यदि कृत्या साधयितुमिच्छा सा तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेत्। न ह्युपायविशेषसाधयत्वेनेच्छोपायान्तराधईनफलाभेन निवार्य्यते। प्रीत्या धनलाभेऽपि प्रतिग्रहेण तल्लिप्साया अनिवृत्तेरिति चेत् - न। स्वविषयसिद्धत्वस्य फलेच्छाविच्छेदस्य चोपायेच्छाविरोधित्वात्।

नन्विदमप्ययुक्तम्। यत्प्रकारकं ज्ञानं तत्प्रकारिकैवेच्छा (७०) इत्यस्य इच्षसाधनताज्ञानजन्यायां तदप्रकारिकेच्छायां व्यभिचारात्। यत्प्रकारिकेच्छा तत्प्रकारताज्ञानसाध्यैवेत्यस्य रजतस्मरणाजन्य-भ्रमस्थलीयरजतेच्छायां स्वमतेन व्यभिचारादित्यरुचेरन्यं हेतुमाह - **जनकेति**। साक्षादविरोधिन इति शेषः। तेन बाधप्रतिरोधादौ न व्यभिचार इति भावः।

लाघवाच्चेति। प्रवृत्तिनिमित्तलाघवाच्चेत्यर्थः। सन्नन्तावाच्यत्वं व्युत्पत्तिविरोधेन। गौरवेण प्रवृत्तिनिमित्तगौरवेण। तथा च तत्पदवाच्याऽपि सा प्रवृत्तिहेतुरिति भावः।

अस्तु वेति। पाकस्य सिद्धतया स्वविषयसिद्धत्वम् ओदनस्य सिद्धत्वाच्चफलेच्छाविच्छेद इति भावः।

अस्ति च तत्र पाकौदनयोः सिद्धत्वं। अन्यौदनेच्छायां पाकचिकीर्षा भवत्येव, प्रत्युतासिद्धत्वात् कृतावेवेच्छा न विच्छिद्येत यदि कृतिविषयसिद्धत्वफलेच्छाविच्छेदो न विरोधिनौ। प्रीत्या धनलाभे च तदधिकधनेच्छा न विच्छिद्यते तस्यासिद्धत्वात् तत्फलेच्छायाश्च सत्त्वात् धनमात्रार्थिनश्च प्रीत्या। धनलाभेऽपि प्रतिग्रहेण तल्लिप्सा नास्त्येव धनमात्रस्य सिद्धत्वात्। किञ्चिद्विशेषसिद्ध्यैव हि सामान्येच्छाविच्छेदः। अन्यथा सकलस्वविषयसिद्धेरसम्भवेन तद्विच्छेदो न स्यादेव।

वस्तुतस्तु क्रियानुकूला कृतिरिष्टोपाय इति ज्ञाने क्रियायाः कृतिसाध्यत्वमिष्टोपायत्वञ्च बातं क्रियाद्वारैव कृतेरिष्टसाधनत्वादिति तद्बोधात् कृताविव कृतिसाध्यत्वेन क्रियायामपि सैवेच्छेति चिकीर्षायां कृतिसाध्यत्वप्रकारनैयत्यमतः कृतिसमानविषयचिकीर्षात्वेन चिकीर्षायाः कृतिकारणत्वं, न तु कृतीच्छात्वेन भिन्नविषयतया गौरवात्। तथापि येन रूपेण यस्येष्टसाधनत्वं तेन प्रकारेण तत्रेच्छा यथा स्वकेदारवृष्टित्वेन इष्टसाधनत्वात् तथैवेच्छा तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वमतः कृतिसाध्यत्वेन तत्रेच्छा भवतीति, कृतौ कृतिविषये वा चिकीर्षायां न दृष्टीच्छा, विलक्षणसामग्र्यन्तरकल्पनमिति चेत् - भवेदेवं।

ननु यत एव गौरवान्न सा चिकीर्षापदवाच्या, तत एव न हेतुरपीति। तथा च लाघवात् कृतीच्छैव कारणम्। यदपि पाकस्य प्राधान्येन इच्छाविषयत्वमनुभूयते इति, तदपि चिकीर्षापदवाच्या। कृतिसाध्यत्वेनेत्यत्र मानम्, न तु तद्धेतुत्वे। तदपेक्षया कृतीच्छा लाघवस्य तद्धेतुतानिर्वाहकस्य अनुद्धारादित्यस्वरसात्। कृतीच्छापेक्षया कृतिसाध्यत्वेनेच्छायां लाघवमेव व्यवस्थापयति - **वस्तुतस्त्विति**।

तेनेति । ननु प्राणपञ्चकसञ्चारे फलत्वेन प्रवृत्तिविषयत्वमापाद्यते, व्यापार्यत्वेन वा। आद्ये तदनुकूलः प्रयत्नः प्राणादावापाद्यः। स तु प्राणा --- विषयाकृतिसाध्यताधीः प्रवृत्तिहेतुर्न तु फलविषयेत्युक्तम्। अतः कृतिसाध्यताज्ञानान्तोक्तप्रसङ्गः। अत एव न द्वितीयोऽपि। प्राणसञ्चारस्य

अतीन्द्रियत्वात्। अपि च विषभक्षणादिव्यावृत्त्यर्थं स्वविशेषणवत्ता प्रतिसन्धानजन्यत्वं कार्यताज्ञाने विशेषणमावश्यकम्। तथा च क्वातिप्रसङ्गःशङ्केति।

अत्राहुः - सञ्चारवत्त्वेन प्राण एवोक्तरूपकृतिसाध्यः। कृतेः सिद्धवृत्त्यसिद्धविषयत्वनियमात्। तथा च तद्गोचरप्रवृत्तिराद्या। प्राणस्य च तन्मते प्रत्यक्षत्वात् प्राणेत्युक्तम्। अस्मन्मते तु प्राणवहनीडी द्रष्टव्या। न च मनोवहनाडीवत् तत्रेष्टापत्तिः। फलबलेन तस्या एव तथाभावात्। अस्यास्तु फलाभावेन प्रवृत्तिविषयत्वायोग्यत्वात्, फलवत्। न चायोग्यत्वे प्राणायामानुपपत्तिः। तावता असञ्चारानुकूलपक्षयोग्यत्वस्य लाभात्। न तु सञ्चारानुकूलतयोग्यत्वस्य। न च यत्कृतिसाध्यताज्ञानं ततः सा कृतिरिति जीवनयोनिकृतिसाध्यताज्ञानात् (७१) प्रवृत्तिरूपकृत्यापादनं कथमिति वाच्यम्। कृतिमात्रसाध्यताज्ञाने सत्यतिप्रसङ्गापादनादुक्तक्रमेण हेतुतायां तादृशज्ञानं विनापि जीवयोनियत्नोत्पत्त्या व्यभिचारात्। विवादाभावाच्च। न च सामान्यतः कृतिसाध्यताज्ञानेऽपि चिकीर्षाविलम्बेन प्रवृत्तिविलम्बः। तस्या अप्यापाद्यत्वात्।

यत्तु अपि त्वित्यादि, तत्तुच्छम्। अहं कृतिसाध्यप्राणपञ्चकसञ्चारो जीवित्वादित्याद्यनुमानानां संभवात्। अत एव श्रमे व्यतिप्रसङ्गवारणार्थं विशेषणान्तरोपादानम्। अन्यथा तस्याप्युक्तक्रमेण वारणे तदपि न क्रियेतेति भावः।

वयं तु कृतिसाध्यताधीरेव हेतुः, न तु कृतावुक्तविशेषणापेक्षा। तथा हि चिकीर्षाधीसाध्यताज्ञानस्य हेतुत्वेऽपि प्रकृतेचिकीर्षाधीना कृतिरयोग्यैव विषयस्वभावादित्येव बीजम्। तथा च कृतिसाध्यताधीरेव चिकीर्षाधीनकृतौ कारणम्। तथा च तथाज्ञानेऽप्युक्तस्थले न चिकीर्षाधीनाकृतिरयोग्यत्वादुत्पद्यते। अन्यादृश्यां तु तद्ज्ञानमहेतुरेवेति क्वातिप्रसङ्गः ।[१]

[1] Adyar Manuscript Acc No. D. 1599 is incomplete and ends here. Here after TANJORE Ms. TD 6099 is continued.

यदि कृतिसाध्यत्वेन पाकस्य ओदनसाधनता स्यात्, न चैवं, गौरवात्। किन्तु पाकत्वेन। स तु कृतिं विना नेत्यन्यदेतत्। वन्हिना साधयामीतिवत् कृत्या साधयामीतीच्छा इष्टसाधनताज्ञानादेवेति चेत् - तर्हि तत्र वन्हिसाध्यताज्ञानवदत्रापि कृतिसाध्यत्वज्ञानं कारणमावश्यकं कृतौ चानुभवसिद्धचिकीर्षाधीनत्वं विशेषः तेन प्राणपञ्चकसञ्चारे जीवनयोनिकृतिसाध्ये न प्रवृत्तिः। अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि तत्र प्रवर्त्तेत।

न चान्वयव्यभिचारः। तादृशविषयविशेषविलम्बात्। अन्यथा भ्रमेण चिकीर्षाधीनकृति-साध्यताज्ञानेऽपि चिकीर्षायामपि प्राणपञ्चकसञ्चारे प्रवृत्यापत्तेः वज्रलेपायमानत्वादिति।

ननु चिकीर्षाधीनत्वं न ज्ञातं तत्रम्, येन चिकीर्षाधीनकृत्यसाध्यतायामपि तादृश एव कृतिसाध्यत्वेन बोध्येतेति कथं भ्रमनिबन्धनोऽतिप्रसंङ्ग इति चेन्न। चिकीर्षाधीनत्वेनोपलक्षित-कृतिविशेषासाध्यस्य प्राणपञ्चक (४०३ क) सञ्चारादेतत्साध्यत्वभ्रमसंभवात्। तथा हि तादृशे भ्रमे चिकीर्षाधीने तदधीनत्वज्ञानात् चिकीर्षाधीनत्वं यत्र वास्तवं तदधीने तदधीनत्वभ्रमाञ्चात्र चिकीर्षाधीनत्वस्योपलक्षणतायां यद्यापाद्यः कल्पोपाधितो द्वितीयस्य तु प्रसङ्गे किमपि न बाधकं पश्यामः।

ननु कृतिसाध्यताज्ञानेऽपि हेतौ तदयोग्यतया प्राणपञ्चकसञ्चारे न चिकीर्षाधीनकृतिरेव परमार्थः। तथा सति कृतिसाध्यत्वेन सामान्येन ज्ञातापि विशेषकृतिरेव प्रवर्तकज्ञानविषय इति चेत्, सत्यम्। एवं चेदुक्त विशेषणप्रवेशस्तर्ह्युपायविषयत्वमपि विशेषणं प्रवेश्यताम्।

वस्तुगत्या तादृशकृतिसाध्यताज्ञान एव पर्यवसानात्। एवं च स्वेच्छाधीनत्वम्, अपि विशेषणमनावश्यकं भ्रमस्य दुःखतया इच्छां प्रत्ययोग्यात्वादेवातिप्रसङ्गाभावादेवान्यथी सुखेऽतिप्रसङ्ग-भङ्गायोपायविषयत्वविशेषणप्रवेशापत्तेरुक्तत्वात्।

न चान्वयव्यभिचारः सिद्धः, इच्छाभाव इव विषययोग्यताविलंबादेव विलंबात्। न च तत्रापि सिद्धत्वज्ञानविलंबाद्विलंबः। तद्वदिहापि तादृशकृतिविषययोग्यताज्ञानहेतुत्वौचित्यान्नास्ति कथितज्ञानस्यापि विषयकृतं किञ्चिद्वैलक्षिण्यमस्तीत्यलमधिकेनेति।

ननु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्ष्यमात्रगतानतिप्रसक्तधर्म्माभावात् कृतिमात्रस्य चातिप्रसङ्गात् तत्तत्कृतिविशेषा उपलक्ष्याः। तथा च तदननुगमात् प्रवृत्त्यननुगमः। विशेषणत्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं प्रमाणाभावस्य।

किञ्च चिकीर्षासाध्यावस्थायाः कृतेः सिद्धावस्थसाधनत्वविरोधेन कृतिसाध्यता पाकादौ न ज्ञायेतेति चेत् - न। अस्ति हि कृतिविशेषोपमानसप्रत्यक्षसिद्धो जीवनयोनिप्रयत्नव्यावृत्त-श्चिकीर्षोपलक्ष्यः यत्र चिकीर्षाकारणत्वग्रहः स च तव जातिरूपो मम त्वनुगतकारणोपाधिरूपः। एवञ्च चिकीर्षाधीनत्वेनानुगतेन कृतिविशेषाणामुपलक्ष्याणां अनुगतत्वमपि। यथा गोत्वेण तटस्थेनोपलक्षिता महिष्यादिव्यावृत्तधानकर्म्मव्यक्तिविशेषाः धेनुपदेनोच्यन्ते न तु गोत्वमपि। तथा चिकीर्षापि। एवं जीवनयोनियत्नव्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानं कारणमिति नाननुगमः।

ननु कृतिसाध्ये न कृतिर्व्विशेषणमसत्त्वात् सत्त्वे वा कृतौ सत्यां ज्ञानं ज्ञाने च कृतिरित्यन्योन्याश्रयः, नोपलक्षणमतिप्रसङ्गादिति चेत् - न। कृतिर्हि ज्ञाने विषयतया विशेषणमेव साध्ये च परिचायकतयोपलक्षणं अन्यथा इष्टसाधनेऽपीष्टं न विशेषणमसत्त्वात् नोपलक्षणमतिप्रसङ्गात्, लिङ्गज्ञानादौ वा का गतिः।

अनुगतेति। अनुगते (४०३ ख) कारणे चिकीर्षालक्षणो उपाधिरूपः प्रयोजकरूपस्तद्वाक्ये रूप इति यावत्। न तु कारणजन्यत्वरूप उपाधिस्तज्जन्यत्वे ग्राह्ये तज्जन्यत्वस्यानवच्छेदकत्वात् । तद्व्यक्तितद्व्यक्तिविशेषस्यावच्छेदकत्वे तु न दोषः। कार्यतावच्छेदकस्याननुगमेऽप्यदोषत्वादिति भावः।

किञ्चेत्यादि दोषं परिहरति - **एवमिति** ।

परिचायकता चेति। परिचेतावच्छेदकस्तु स एव, धर्मादेरवच्छेदेन कृतिजन्यत्वग्रह इति भावः।

नन्वेवं भ्रमेऽपि चिकीर्षा स्यात्तस्यापि चिकीर्षाधीनकृतिसाध्यत्वात् अत्र वदन्ति।

भ्रमस्तु भोजनादिक्रियासाध्यो न तत्कृतिसाध्यः अचिकीर्षितत्वात् कृतेः स्वध्वंससाक्षात्कारातिरिक्ते चिकीर्षाविषयमात्रे जनकत्वात्, न हि भोजनचिकीर्षाधीनकृत्या गमनं साध्यते इति केचित्। तन्न। गुरुतरभारोत्तोलने कृत्यसाध्ये भ्रमात् प्रवृत्तस्य निगडनिश्चलदेहस्य वा कृतौ सत्यामुत्तोलनचलनक्रियानुत्पादेऽपि भ्रमानुभवात् कृतेरेव कारणत्वात्। न तु तज्जन्यक्रियायाः सुखे व्यबिचाराच्च। न हि सुखं कृतिकारणचिकीर्षाविषयः। उपायचिकीर्षाजन्या हि कृतिः न तु सुखचिकीर्षाजन्या। चिकीर्षाजन्यकृतिसाध्यत्वं न श्रमे द्वेषयोनिप्रयत्नादपि तदुत्पत्तेरित्यपरे। तन्न। शत्रुबधस्येष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वात् द्वेषस्य यत्नाजनकत्वात्, द्वेषसिद्धिस्तु शत्रुं द्वेष्मीत्यनुभवबलात्।

भ्रमेऽपीति। यज्ज्ञिकीर्षाधीनकृतिसाध्यत्वेन जायते, तज्ज्ञिकीर्षाधीनकृतिविषयो न तु तदधीनकृतिविषय इत्युक्तरूपज्ञानात् चिकीर्षाधीनकृतिविषयः भ्रमोऽपि स्यादित्यर्थः।

न च भ्रमः फलं कृतिः। स तु क्रियागोचरेति नातिप्रसङ्गःशङ्केति वाच्यम्। एवमपि सुख इव चिकीर्षापत्तेर्वज्रलेपत्वात्। न ह्युक्तरूपज्ञानातिरिक्तमस्माकमिव तस्यापि चिकीर्षाहेतुरस्तीति भावः।

कृतेरिति। यद्यपि नायं नियमः स्वपूर्ववर्त्तिगुणान्तरध्वंसे कृते जनकत्वात्। तथापि कृतित्वेन जनकत्वे नियमो द्रष्टव्यः। तत्र विरोधिगुणत्वेन तथाभावात्। तत्वं च स्वोत्तरवर्तिसमानाधिकरण-योग्यविशेषगुणत्वमिति न काप्यनुपपत्तिः।

न हीति। न च सामान्यनियमे को दोष इति वाच्यम्। यत एव न सुखचिकीर्षाहेतुरतस्तां विनापि (४०४ क)प्रकृतिरित्यर्थसिद्धमिति सुखविशेषे एवमपि व्यभिचारादिति भावः।

शत्रुवधस्येति। न च विनिगमकाभावो यत्र द्वेषस्तदभाव इच्छा यत्र वेच्छा तदभावे द्वेष इति समनियमादिति वाच्यम्। प्रतियोगिविषयद्वेषस्य भिन्नविषयतया गौरवेणाप्रवर्तकत्वात्। किंतु लाघवेन समानविषयकेच्छाया एव।

यत्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन। यद्यचिकीर्षितेऽपि श्रमे चिकीर्षाधीन कृतित्वेन कारणता स्यात् तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं गमनादीति न स्यात्। श्रमवङ्गमनेऽपि तज्जन्यत्वप्रसङ्गात्, भोजनादिश्च चिकीर्षाधीनकृतिविशेषात्, स हि कृतिमात्रं व्यभिचरति जीवनयोनिकृतेस्तदनुत्पादात्।

न चैवं तन्निवृत्तौ द्वेष एव हेतुरुक्तयुक्तेरिति वाच्यम्। इष्टत्वात्तदुक्तमन्या यत्र सामाञ्जलौ रागद्वेषाविनाभावात्।

प्रवृत्तिनिवृत्योरिति । न च तदभावप्रवृत्तिरेव तन्निवृत्तिविषयवैलक्ष्यण्यात् प्रयत्नयौगपद्यस्य चेष्टास्थल इव क्षतेरभावात्। न च द्वेषसिद्धिस्त्वित्यादिग्रन्थ विरोधः। यदि द्वेषो नाम नात्मगुणः कश्चिदध्यक्षः स्यात्तदा निवृत्तिकारणं कल्पयेत्। अन्यस्यैवादृष्टत्वात्। कस्यापि निवृत्त्या कार्येण कल्पनादितिप्रत्यक्षसिद्धे तस्मिन् तस्यैव निवृत्तिकारणात्वेन कल्पनमित्यनुभवालंबनमित्यत्र तात्पर्यात्।

न चैवं ततोऽपि भ्रमपूर्वपक्षाप्रतिक्षेप इति वाच्यम्। निवृत्तिप्रयत्नस्य क्रियां प्रत्यजनकत्वेन तच्छ्रमजनकत्वस्य शोकानास्पदतया प्रवृत्तिहेतुत्वस्यैव तद्वेषे शङ्कितत्वादिति, न काप्यनुपपत्तिः।

जीवनयोनीति। यद्यपि चिकीर्षधीनकृतिमात्रादपि भ्रम इति कृतिविशेषस्तादृशो वाच्यस्तथा च जीवनयोनिकृतिविशेष एव तथास्त्विति नायं परिहारः। तथापि (४०४ ख) चिकीर्षाधीनकृतौ क्रियाविशेषरूपविषयवैलक्षण्यात् भ्रमः। न च जीवनयोनियतस्तथेति वैषम्यम्, जीवनयोनियत्ने जीवनस्यार्थमनोयोगस्य वैजात्यप्रयोजकाभावेनैकरूपतया वैजात्यस्य मानाभावाच्चेति भावः।

स्वेच्छेति । यद्यपीच्छासामान्यसामग्र्यभावादेव चिकीर्षालक्षणविशेषकार्याभावः, भ्रमे च दुःखमये सामान्यसामग्री नास्त्येवेत्युचितम्. तथाप्युपाये पाकादावेव चिकीर्षा न स्यात्। सामान्यसामग्र्या अभावान्न ह्यसम्मत इव तेषामपीष्टसाधनताधीरिच्छासामग्रीत्ययं कल्प आद्यत इति भावः।

यद्वा श्रमो न भोजनकृतिसाध्यः किन्तु तन्निरन्तरोत्पन्नाज्जीवनयोनिप्रयत्नादेवेति। तन्न। न हि कृतित्वेन तच्छ्रमजनकत्वं। नापि कृत्यन्तरादेव श्रमोत्पत्तिः, जीवनयोनिप्रयत्ने सत्यपि भारोद्वहनादिकमकुर्व्वतस्तादृशश्रमाननुभवेन तस्य श्रमाजनकत्वात् तस्मात् भोजनादिवत् श्रमविशेषणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्। सुप्तस्य स्वेदाद्यनुमितः श्रमः तज्जन्य इति चेत् - न। स्वेदादेः श्रमान्यहेतुकत्वात् अन्यथा जागरेऽपि तदनुवृत्तौ श्रमानुवृत्तिप्रसङ्गात् इति मैवं। स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्, श्रमश्च नियमतोऽन्येच्छाधीनकृतिसाध्यः श्रमे दुःखत्वेनेच्छाविरहादत एवान्येच्छाजन्यकृतिसाध्यत्वेन श्रमो नान्तरीयक इत्युच्यते। स्वचिकीर्षाधीनत्वन्तु न कृतौ विशेषणं गौरवात्।

अन्ये तु कृतिगतं धर्म्मान्तरमेव उद्देश्यत्वं तद्विशिष्टकृतिसाध्यश्च न श्रमः अचिकीर्षितत्वात् किन्तु कृतिमात्रसाध्यः। अत एव कष्टं कर्म्मेत्यनुभवो लोकानाम्। एवं चिकीर्षायां ममैकं कृतिसाध्यत्वं प्रयोजकं तव तु कृतिसाध्यत्वे सतीष्टसाधनत्वं सुखत्वं दुःखाभावत्वञ्चेति चतुष्टयं। इच्छाप्रयोजकन्तु मम सुखत्वं दुःखाभावत्वञ्चेति द्वयं, वृष्टिसाध्ये सुखे हीच्छावृष्टिमपि विषयीकरोति, न त्विष्टसाधनत्वेन तत्रेच्छा साधनत्वस्येच्छाविरोधित्वात्।

गौरवादिति। यद्यपि प्रवर्तिका धीर्न स्वेच्छाधीनत्वं चिकीषाधीनत्वं वावगाहते उपलक्ष्यकृतिविशेषे कृतित्वेनैव जायमाने वस्तुत एव तदुभयमस्तीति किं लाघवेन । तथापि कारणताग्राहकेणावच्छेदकतया तत्र धर्मांतरमवश्यं गृहीतव्यमिति तत्र लाघवावतारो द्रष्टव्यः।

अन्ये त्वित्यस्वरस्योद्भावनम्, तद्बीजं तु यद्युद्देश्यत्वविशिष्टकृतिसाध्यत्वमिति यथाश्रुतोऽर्थस्तदा कुत श्रमवारणमेकस्या एव कृतेरुभयजनकत्वव्यवस्थापनादथोद्देश्यकृतित्वेन जनकत्वमत एवोक्तं - किं तु कृतिमात्रेत्यादि। तदा जीवनयोनिकृतितेऽपि भ्रमापत्तिरित्युक्तमेवावर्त्ततेत्यादि चिन्त्यते इति (४०५ क) न। य एव कृतिमात्रात् भ्रमोऽत एव कर्म कार्यजातं कष्टं श्रमसंवलितमिति सार्वलौकिकानुभव इति भावः।

वृष्टीति। सुखेच्छायामवच्छेदकतया सुखत्वमिव वृष्ट्यादिकमपि तथैव विषय इति भावः । चिकीषार्जन्यकृतिसाध्यताज्ञानं प्रवर्त्तकम् । तत्र चिकीर्षाधीनत्वविशेषणोपादानप्रयोजनं यत् केचिदावक्षते।

तव तु त्रयं। विषभक्षणे तु कृतिसाध्यत्वेऽपि बलवदनिष्टसाधनत्वेन चिकीर्षा नास्तीति कृतौ चिकीर्षाजन्यत्वं विशेषणमिति कश्चित्, तत्तुच्छं। एवं हि विषभक्षणं कृतिसाध्यमेव न स्यात् जीवनयोनिकृतेस्तस्यानुत्पत्तेरिति व्यर्थं विशेषणम्।

स्यादेतत्। इष्टसाधनताभ्रमाट् विषभक्षणे चैत्यवन्दने च चिकीर्षाजन्यकृतिसाध्यत्वमस्ति ज्ञानप्रयुक्तत्वात् कार्य्यत्वस्य, तथा च सञ्जातबाधोऽपि तत्र कार्य्यत्वज्ञानात् प्रवर्त्तेत तथा तृप्तोऽपि भोजने।

ननु स्वकृतिसाध्यतानुभवस्तथा, अन्यथेष्टसाधनतास्मरणे विषभक्षणेऽपि प्रवर्त्तेत। न चेष्टसाधनताज्ञानं वेदोवाऽनुभावकमस्तीति चेत् - न। वस्तुतस्तत्र कृतिसाध्यत्वे लिङ्गान्तरेणाप्तवाक्येन वा तदनुभवसम्भवात् लिङ्गाभासाच्छब्दाभासाद्वा अप्रवृत्तिप्रसङ्गाच्च। भेदाग्रहवादिनस्तत्र तव तदनुभवाभावात्।

उपन्यस्य दूषयति - **विशेषेति ।**

संज्ञातेति। यद्यपीदानीं स्वेच्छाधीनमत्कृतिसाध्यताज्ञानं प्रवर्तकं संजातबोधस्य नास्त्येव तदा तत्रेच्छायाभावात् तथापीदानीमिति नेच्छाविशेषणं वारणीयभावी यौवराज्यस्येदानीमिच्छाधीन-कृतिसाध्यत्वादपि तु कृतिविशेषणम्। तथा संजातबाधोपादाने तन्त्रेच्छाधीनाया मत्कृतिस्तत्साध्यमिदमिति जानात्येवेति भावः।

न चेदमपि ज्ञानं चिकीर्षां जनयित्वा प्रवृत्तिं जनयेत्। सा वेच्छासामान्यासामग्र्यभावादेव नेति वाच्यम्। तन्मते तावन्मात्रस्य चिकीषार्सामग्रीत्वमित्युक्तत्वादित्यलमनेनेति ।

वस्तुत इति। नन्विदानीं कृतिसाध्यत्वं चेदनुभाव्यं भावियौवराज्यप्रवृत्यतिप्रसंगभङ्गाय तर्हि न लिङ्गान्तरेण शब्देन वातिप्रसङ्गस्तदा मत्कृत्यभावेनारुचेराह - **लिङ्गेति**। तथा चेदानीं मत्कृतिसाध्यताज्ञानं हेतुर्वाच्यः। स चोक्तानुमानाद्यभावेऽपि (४०५ ख) प्रागुपजाततादृशानुभवस्मृतिरस्त्येवेति कथं न प्रवृत्यापत्तिः।

मैवम्। स्वविशेषणवत्ताप्रतिसन्धानजन्यं हि कार्य्यताज्ञानं प्रवर्त्तकं तथा हि काम्ये पुरुषविशेषणं कामना ततः काम्यसाधनताज्ञानेन याग-पाकादौ कार्य्यताज्ञानं। नित्ये च काल-शौचादि स्वविशेषणं, तथाचैतत्सन्ध्यायामहं कृतिसाध्यसन्ध्यावब्दनः सन्ध्यासमये शौचादिमत्त्वात् पूर्वसन्ध्यायामहमिवेति कार्य्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यं। तदुक्तं - स च कार्य्यविशेषः पुरुषविशेषणावगतः प्रवृत्तिहेतुरिति। संजातबाधस्य च विषभक्षणे चैत्यवन्दने च भ्रमदशायामिव नेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्य्यताज्ञानात् प्रवर्त्तेत तृप्तस्य च कामनाविरहेण इष्टसाधनताज्ञानाभावात् न तथा बोधः।

न च तदा तदातनमत्कृतिसाध्यत्वमिदानीमित्याकारेणानुभवे भातमतोऽनुभवसमानविषयतानियमात् तत्स्मृतेरपि सकालो विषय इत्यधुना प्रवृत्यापदनमयुक्तमिति वाच्यम्। स्मृत्यापि स्वकालस्यानुभवागोचरेस्यैव ज्ञानसामान्यसामग्रीमहिम्ना विषयीकरणादतीतो गोचरज्ञानस्य वर्तमानविषयतानियमादन्यथा स घट इत्यादि स्मृतितो प्रवृत्यापत्तेरिति भावः।

स्वेति । स्वस्वप्रवर्तमानपुरुषस्य यद्विशेषणं तद्वत्त्वं तद्वर्तमानता, तत्प्रतिसन्धानजन्यमित्यर्थः।

न चातिप्रसङ्गो मदीयेदानींन्तनेच्छाविषयसाधनत्वशुचित्वसमानाधिकरणविहितकालजीविता प्रतिसन्धानात्मकविशेषसामग्रीद्वयसहिताया एव तस्य जनकत्वात्। न चैतदुभयं विषभक्षणादौ तत्फले तदानींतन तदिछाभावादिति भावः।

एतत्सन्ध्यायामिति। इदं तु प्राथमिकमनुमानम्, न त्वेतद्देव यथाश्रुतं प्रवर्तकानुमानं द्रष्टव्यम्। प्रवृत्तिविषयविशेष्यकज्ञानस्यैव प्रवर्तकत्वात् । किंतूक्तमाने सति सन्ध्योपासनमिदानीतनमत्कृतिसाध्यं मत्कृतिनिष्टाहेतुताप्रतियोगिककार्याधिकरणत्वादित्यनुमानम्। न चासिद्धिसमान (४०६ क) वित्तिवेद्यतया प्रथमानुमाने तत्तद्ग्रहादत एव प्राक् तदपेक्षा ।

अन्ये त्वात्मनो जीवित्वप्रतिसन्धानजन्यं श्रमे कृतिसाध्यताज्ञानं सम्भवतीति जीवनव्यतिरिक्तत्वं स्वविशेषणे विशेषणमिति। तन्न। श्रमे स्वेच्छाधीनकृतिसाध्यत्वाभावात्। इष्टसाधनतालिङ्गकं कार्य्यताज्ञानं प्रवर्त्तकं इत्यपरे। तन्न। नित्ये तदभावात्।

ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु स्वविशेषवत्ताज्ञानजन्यत्वापेक्षया लघुत्वात्। किञ्चोपायविषया चिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् वृष्टीच्छावत्। भोगचिकीर्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत् - न। तवापि स्वविशेषणाधीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात्। कृतिहेतुचिकीर्षायां तत् प्रयोजकम्। न च भोगचिकीर्षा तथा, उपायचिकीर्षात एव कृतिसम्भवात् इति चेत् - तुल्यमिति। मैवम्। साध्यत्व-साधनत्वयोर्व्विरोधेनैकत्र ज्ञातुमशक्यत्वात्। असिद्धावस्थस्य हि साध्यत्वं सिद्धतादशायां तदभावात्। सिद्धतादशायाञ्च साधनत्वं असिद्धावलस्थावतः कार्य्यानुत्पत्तेः। तथा च पाकादेरसिद्धत्व-सिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः। न चैकमेकेनैकदा सिद्धमसिद्धञ्च इति ज्ञायते।

यद्वोक्तानुमानानन्तरं मानस एव तद्विशेष्यकानानुभवो वायौ शीत इत्यनुभवानन्तरं शीतो वायुरितिवदिति भावः।

ननु स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वापेक्षविषयतयेष्टसाधनं त्वलघुतरमित्युक्तं तत्प्रतिसंधान-जन्यत्वस्य तदव्यवहितोत्तरवृत्तित्वपरत्वात् तत्समानकालमात्रपरत्वात्। अन्यथाकृतसाध्यतास्मृतेः प्रवर्त्तकतापतेः। स्वविशेषणप्रतिसन्धानजन्यत्वयोग्यत्व स्यविवक्षितत्वाद्वा। तदवच्छेदकम च रूपमसंजातबाधात् तृप्तिपुरुषीयकार्याताज्ञानत्वमेव। एतस्य तु रूपस्य तत्रापि विद्यमानत्वात्। तथा चेष्टसाधनत्वमेवानन्यथासिद्धत्वनियमयोः प्रवेशात् गुरुतरमित्यरुचेरावश्यकतया तस्य प्रामाणिकतया गौरवात्। न दोषावेत्यभिसन्धाय तदावश्यकतामाह - **किं चेति**।

असिद्धेति। साध्यत्वसमत्वगर्भसाधनत्वं च पूर्वसत्त्वरूपतया सत्यगर्भमित्येकदैव एकेनैकत्र सत्वासत्वे इति भावः।

न च स्वरूपगततासाध्यत्व-साधनत्वयोरतो न विरोध इति वाच्यम्। यदि हि स्वरूपनिबन्धनं तदुभयं तदा तत्स्वरूपं सदैव सिद्धमसिद्धञ्च स्यात्। भिन्ननिरूपितत्वेऽपि तयोः सिद्धत्वासिद्धत्वे अनवगम्याज्ञानात्, तस्मात् समयभेदोपाधिक एव तदुभयसम्बन्धः पाके। इदानीं साध्यत्वं अग्रे साधनत्वं ज्ञायत इति चेत् - न। इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहात् शब्देन तथा प्रतिपादयितुमशक्यत्वात् गौरवाच्च।

न च कृतितः सिद्धमिष्टसाधनमिति ज्ञानात् चिकीर्षा। न हि सिद्धं कश्चित् चिकीर्षति, कृतेः पूर्व्व कृतितः सिद्धमिति ज्ञानाभावाच्च। न च कृतिसाध्यत्वेन पाकादेरिष्टसाधनत्वात् साधनत्वमपि साध्यम्। न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनता, इत्युक्तम्। तस्मात् कृत-क्रियमाणविलक्षणं कृत्यनन्तरभविष्यत्तारूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकं तादृशञ्च साधनत्वविरोध्येव।

स्वरूपगतत्वं यदि स्वरूपावच्छिन्नत्वं तदाह । यदि अथ स्वरूपेऽन्यावच्छेदेन सत्वं तदा तदवच्छेदकमुक्तरूपमेवेत्युक्ते दोषानिवृत्तिरित्याह - **भिन्नेति।**

समयेति । नन्विदमयुक्तम्, सध्यत्वतदवच्छेदकसम्बन्धयोस्तादासंभवात् तद्धर्मिण एवासत्वात् । (४०६ ख) न हि वृक्षावर्तमानाया अपि शाखाया तत्संयोगावच्छेदकत्वमिति, मैवम् । अवच्छेद्यतुल्यस्यावच्छेदकत्वात् । यत्रावच्छेद्यधर्मिण सत्येव तत्रावच्छेदकमपि तथा यत्र त्वमवच्छेद्यसत्यपि तं धर्मिणि तदसंबन्धज्ञानादिव तत्रात्वाच्छेदकमपि तथैवेति तथैव तदसंबंधस्यापि कालस्यावच्छेदकत्वमिति भावः।

ननु यद्यदा यत्कृतिसाध्यं तत्तदुत्तरं तन्न कृतिसाधनत्वमिति भवत्येवानुमानं शब्दो वान्यथा यत्तत्पद संकेतोऽप्यननुगमादशक्यग्रह इत्यरुचेराह - **गौरवाच्चेति**। यद्यपि परपक्षेऽपीदानीमन्तर्भावस्तथा व्यग्रेऽपि तदान्तरभावाभावाल्लाघवमिति भावः। ननु कारणतावच्छेदकावच्छिन्ने कारणत्वमिति कृतिसाध्यत्वविशिष्टे साधनत्वमित्यसद्धर्म एव तदिति कुतो विरोध इत्याशंक्य निषेधति - **न चेति** ।

किञ्च साधनत्वस्य सिद्धमात्रधर्म्मत्वात् साधनत्वज्ञानमिच्छाविरेधि। न हि कश्चित् सिद्धमिच्छतीत्युक्तम्। एतेन वृष्ट्यादिविष्टसाधनताज्ञानमुपायेच्छाकारणत्वेन क्लृप्तमिति निरस्तम्। कथं तर्हि स्वतोऽसुन्दरे वृष्ट्यादाविच्छा। तत्साध्येष्टज्ञानादिति गृहाण।

अन्ये तु सुख - दुःखाभाव-तत्साधनेष्टिच्छाप्रयोजकमनुगतमुद्देश्यत्वं पुरुषार्थपदवेदनीयं धर्म्मान्तरमस्ति अनुगतकार्य्यस्यानुगतकारणनियम्यत्वात्। तदेव दुःखतत्साधनव्यावृत्तं सुख-तत्साधनादौ चिकीर्षाप्रयोजकमिति।

न च दुःखविरोधित्वमेव तथास्तीति वाच्यम्। सहानवस्थाननियमविरोधस्यासम्भवात्, बध्य-घातकभावस्यैकसमये समानाधिकरण्याभावस्य च यत्नादिसाधारण्यादिति। तन्न। तदज्ञानेऽपि सुखत्वज्ञानादिच्छोत्पत्तेः। न हि सुखत्वे ज्ञाते धर्म्मान्तरज्ञानं विना नेच्छेति, तथात्वे स्वतः प्रयोजनहान्यापत्तेः। तदेव हि स्वतः प्रयोजनं यदवगतं सत् स्ववृत्तितयेष्यते।

उक्तं गौवरम्। वस्तुतस्तु तथाभावेऽपि कृतिसाध्यत्वं यादृशामत्र प्रकारस्तस्यावच्छेदकत्व-मसंभावितमेव कार्यत्वस्यासत्त्वगर्भतयोक्तविरोधस्यानुद्धारादिति कृतिकारणत्वं वाच्यम्। तच्च प्रर्वतकतायामनुपयुक्तं कृत्यनन्तरं भविष्यत्वप्रकारकेछाया अनिर्वाहकत्वादिति भावः।

ननु वृक्षसंयोगितदभावांश्चेति न्याये नैकधर्म्युपसंहारः संभवत्येवेत्यरुचेराह - **किं चेति।**(४०७ क)

तत्साध्येति। तत्साध्यत्वप्रकारिकेच्छा भवत्यवच्छेदकत्वेन सुखत्वमिव वृष्टिमपि विषयीकरोत्येवेति भावः। तत्साधनेषु बलवदनिष्टाननुसंधितत्साधनत्वेन ज्ञातेषु तेन विसंवादस्थले संग्रह उक्तायाः सामान्यसामग्रीत्वादिति भावः।

तदेव चेति। कृतिसाध्यत्वसहितमिति शेषः। तथा च विषभक्षणस्य तदानीं दुःखसाधनत्वज्ञानानोद्देश्यत्वमस्तीति नातिप्रसंग इति भावः।

किञ्चानुगतधर्म्मकल्पनापि कारणे।

न च सुखादि इच्छाकारणं अनागतत्वात्, किन्तु तदवगमः। तर्हि सुखादिज्ञाने तत् स्वरूपसदेवेच्छाप्रयोजकमस्त्विति चेत् - न। यथा ह्युद्देश्यत्वं सुखज्ञानादिषूत्पद्यते अन्यतरत्वात् तृणारणिमणिन्यायाद्वा तथैवेच्छैव जायतां, कृतिसाध्यत्वञ्च कृतौ सत्यां अग्रिमक्षणे स्वरूपं न कृतिं विना, क्षेमसाधारणच्चैतत्। कृतिसाध्यत्वञ्च न कृतेः पूर्वम्।

ननु कृतौ नष्टायां सन्नपि धर्म्मो न कार्य्यः तथा च कथं कार्य्योऽपूर्व्वे कामिनोऽन्वयः क्षणिकत्वेन क्रियातुल्यत्वादिति चेत् - न। यद्वृत्तिकाम्यसाधनत्वं तत्र कार्य्यताबुद्धेः प्रयोजकत्वात् न तु कार्य्यताविशिष्टस्य काम्यसाधनतेति व्याप्तिः।

ननु पाकादौ कृतिसाध्यताज्ञानं न प्रत्यक्षेण कृत्यनन्तरं पाके सति कृतिसाध्यताज्ञानं तस्मिन् सति कृतिरित्यन्योन्याश्रयात् कृतिसाध्यतोत्तीर्णे चिकीर्षा-कृत्योरसम्भवाच्चेति चेत् - न।

ननु सुखदुःखयोर्वध्यघातकभावः शंकाऽऽस्पदमपि न तयोः स्वसाक्षात्कारमात्र-निवर्तत्वादित्यन्यमविरोधपदार्थमाह - **एकेति** ।

यद्यपि यथाश्रुतस्य दुःखसामग्र्यामतिव्याप्तिस्तस्या अप्येककाले दुःखसमानदेशत्वादिति। दुःखपदं द्वेषविषयपरम्। तथा च तद्विरोधो द्वेषविषयताभावाच्छेदकत्वधर्मत्वं शक्यनिर्वचनमेव। तथापि द्वेषोऽपि कथमननुगतेषु तेष्विति तत्राप्यनुद्देश्यत्वं नामोक्तगत्या धर्मान्तरं वाच्यमिति विनिगमकादिदमुद्देश्यमेवानुगमकमङ्गीकृतमिति भावः।

न तद्देश्यत्वं निरुपाधिकतयैव स्वत इति स्यादित्यरुचेराह - **किं चेति**।

नन्वेवं कृत्यजन्यतया प्रायश्चित्तादौ कथं दुःखनुत्पादचिकीर्षया प्रवृत्तिरित्यत आह - **कृतीति।** यथाचैतत्तथोक्तमन्यत्रेत्यर्थः।

पाको मत्कृतिसाध्यः मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात् दैवाद्यनधीनत्वे सति

पाको मत्कृतीति। पाक इदानीं (४०७ ख) स्वेच्छाधीनमत्कृतिसाध्य इदानीमिच्छाधीन-मत्कृतिव्यतिरेकासत्वे सतीदानीन्तनमदिच्छाविषयसाधनत्वात्। यद्यदिच्छाधीनमत्कृतिव्यतिरेकसत्त्वे सति यदातनयदिच्छाविषयसाधनं तत्तदा तदिच्छाधीनकृतिसाध्यं यदा मदीयं कृतिसाध्यं भोजनाद्यनुकृतिसाध्यं वा, भोजनं यदा तदेति च स्थूलकालोपाध्युपसंहारा, न तु क्षणस्येति न विरोधः। न चैवं सत्यन्तमात्रगमकत्वे शेषवैय्यर्थ्यम्, तप्तस्य भोजने संजातितबाधस्य विषभक्षणे व्यभिचारवारकत्वात् तद्धीर्न तदा स्वेच्छाधीनतत्कृतिसाध्यमपि भवतीत्याद्यधीनं तत्कृतिव्यतिरेकस्तत्कारणाभावे कार्याभावनियमात् कृतिसाध्यस्य जीवनयोनिकृत्यजन्यस्येच्छाधीनकृतिजन्यत्वनियमात् ।

न चोदाहतद्वयं तदातनतदिच्छाविषयसाधनं तत्फले तदा तच्छोभावात् विशेष्यमात्रं च वृष्ट्यादौ च प्राणा पञ्चसत्तारे चास्तीति तदुभयव्यतिरेकवारणाय विशिष्टमुपात्तम्। तत्रापि वृष्ट्यादौ तद्वारणायकृतिमात्रमन्यवारणार्थमिच्छाधीनेति पकीयतद्वारणाया मदिति इयत्परमात्रावधेयम्। यथा साध्ये स्वान्तर्भावस्तथा हेतावपि न तदन्तर्भावः । तथा सति स्वच्छाधीनकृतिजन्यव्यतिरेकित्वम्। तस्य तदा स्वेच्छाधीनकृतिसाध्यत्वमित्यत्र (४०८ क) व्यभिचाराभावेन शेषवैय्यर्थ्यापातात् इदानीमिति हेतावपि प्रवेशनीयम्। अन्यथा व्यभिचारात्। भावियौवराज्यादीनामिच्छाधीनकृतिव्यतिरेकासत्वेन मदिष्ठसाधनाना-मिदानीं स्वेच्छाधीनमत्कृतिसाध्यत्वाभावात् यत्तद्धां सामान्योपसंहारे विशेषसिद्धिः। फलनं तु विशेषप्रसिद्धिरप्यङ्गमिति प्राचीनमते नेदमनुमानामिति विशेषाप्रसिध्यादीमाशङ्कनीयम्।

न चेदानीन्तनमदिछाविषयत्वपर्यतं यदि हेत्वर्थस्तदा मधुविषसंपृक्तान्नभोजनव्यभिचारवारणाय बलवदित्यादिकमग्रेतनं विशेषणं विरुध्येतेति वाच्यम्। इष्टपदस्येच्छाविषयतावच्छेदकावच्छिन्न-परत्वज्ञासिद्धत्वे सति मधुभोजनजन्यसुखत्वादि अस्तु, मिलितभोजनेऽपि मधुभोजनत्वं तदवच्छेदकमिति साधु बलवदित्यादिविशेषणम्।

न च विषभक्षणदुःखासंभिन्नजन्यसुखत्वेन तत्रेच्छेति वाच्यम्। स्वतःपुरुषार्थत्वहान्यापत्तेः। इच्छोत्पत्तौ दुःखसंभेदनापेक्षणात्। अत एव बलवदनिष्टाननुबंधित्वं चेदानीन्तनबलद्वेषविषयदुखाजनकत्वम्, द्वेषे च बलवत्वं जातिविशेषः। अत एव रागान्धस्य न तादृशे द्वेषो दुःख इति भवति। तद्धेतावपि प्रवृत्तिरिदमेव चेदानीन्तनत्वेन द्वेषविशेषणप्रयोजनकमन्यथारागारागाभ्यां तदुखेऽपि (४०८ ख) द्वेषातिशयदर्शनासिद्धो हेतुः स्यात् । कदापि तादृशदुःखजननात्। न च द्वेषे बलवत्त्वमधिकम्, दुःखमात्रस्यैव द्वेषविषयत्वेनाप्रसिद्धिवारकत्वात् । प्राणिनामपि सुखदुःखयोः रागद्वेषसम्भवात् । अन्यथा प्रवृत्तिनिवृत्त्योरसंभवापत्तेः।

न चासक्त इत्यादिविरोधः, अस्मदादिसाधारणोत्कटरागद्वेषविरहपरत्वात्। अन्यथा दुःखमात्रस्य द्वेषाविषयत्वे दुःखस्य सोपाधिद्वेषविषयत्वे तदाभावस्य निरुपाधिपुरुषार्थत्वहान्यापत्तेः। एवं च यथाश्रुतेनैव समञ्जसे हेतौ व्यर्थविशेषणताभयेन साध्येऽपि बलवदनिष्ठाननुबन्धित्वविशेषणं प्रवेशनीयमित्यपि व्याख्यानम्।

न च बलवदनिष्टसाधनमिदमिति ज्ञाने अप्रवृत्या तदननुबन्धिकृतिसाध्यताया: प्रवर्तकत्वेनावश्यं साध्ये विशेषणप्रवेश इति वाच्यम्। एतावतापि तद्भानाभावमात्रहेतुत्वलाभात्तदननुबन्धित्वज्ञानस्य तैः प्रवर्त्तकत्वानङ्गीकाराच्च।

यत्तु तदननुबन्धित्वमिष्टोत्पत्तिनान्तरीयकदुःखादिदुःखजनकत्वरूपम्, तथा च तादृशकृतिसाध्यता-धीर्यदि प्रवृत्तिसामान्यसामग्री तदानित्ये प्रवृत्तिर्न स्यात्। इष्टपदस्य तज्जन्येष्टपरताया अप्रसिद्धेरिति तदननुबन्धित्वधीः न हेतुरिति, तन्न। इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकभिन्नत्वज्ञानस्य (४०९ क)नित्येऽपि सम्भवात् । तथाच तद्धेतोरिति न्यायादेव तदनुबन्धित्वज्ञानाभावो हेतुः, न तु तदननुबन्धित्व ज्ञानमिति न साध्ये तत्प्रवेशः। वस्तुतस्तु बलवदनिष्टसाधनत्वज्ञाने उक्तलिङ्गकार्यताज्ञानाभावादेवा-प्रवृत्तिरिति तत्प्रतिबन्धकत्वाभावात् तदाभावकारणत्वमपि दुर्लभम्। न च नित्यनुरोधात्तथा तत्राप्यस्य लिङ्गविशेषणत्वादुक्तसाध्यस्य तादृशज्ञानकाले बाधेन व्यभिचारवारकत्वात्। न च प्रकृतित्वेनैव कृतिविशेषधीः प्रवृत्तिकेति सिद्धान्तितम्।

मदिष्टसाधनत्वाद्वा मद्भोजनवदित्यनुमानात् स्वकृतिसाध्यताज्ञानं यस्य यदिष्टसाधनं यत्कृतिं विना यदा न सम्भवति तत् तदा तत्कृतिसाध्यं इति व्याप्तेः।

असिद्धस्येष्टसाधनत्वाभावात्, बलवदनिष्टाननुबन्धित्वञ्च लिङ्गविशेषणं तेन न मधुविषसंपृक्तान्नभोजने व्यभिचारः। अतीतपाके च कृतिसाध्यतोत्तीर्णे न व्यभिचारः सामान्यतस्तस्यापि कृतिसाध्यत्वात्, अतीतता दशायाञ्चातीतौदनेच्छाविरहेणेष्टसाधनत्वाभावात्।

अत एव निदाघदूनदेहो वर्षति वारिदे तोयदात्तोयलाभसम्भावनायां वा सरोऽवगाहने न प्रवर्त्तते इष्टसन्तापशान्तिसाधनतोयसम्बन्धस्य स्वकृतिं विनापि सिद्धिप्रतिसन्धानेन लिङ्गाभावेन स्वकृतिसाध्यत्वज्ञानाभावात्। यदा च मत्कृतिं विना न सम्भवतीति प्रतिसन्धत्ते तदा प्रवर्त्तते।

तथा च कृतिसाध्यमित्येव साध्यमिति विशेषकृतेः विषयत्वेऽपि कृतित्वमेव व्यापकतवच्छेदकमिति न सत्यम्, तद्व्यभिचारो येन विशेषणान्तरोपादानमिति वाच्यम्। कामनालिङ्गकज्ञानप्रवर्त्तकत्वानुरोधेन उक्तसाध्यादारात्। न हि कृतित्वेन हानप्रयोजकं तद्विशेषेणान्तरप्रवेशे नप्रवर्त्तकमिति संभवति। प्रयोजकरूपावैकल्प्यात्। परं तु विशेषणान्तर्भावेन न प्रयोजकताव्यभिचारादिति निगर्व इति संक्षेपः।

यस्येति । उपलक्षणमेतत्। तदेवं हेत्वन्तरेऽपि प्रयोज्यमिति भावः।

ननु मत्कृतिव्यतिरेकासदत्यन्तावदेव स्यादिति ततः कुतः कृतिसाध्यतेत्यत आह - **सिद्धेति** । तथा च हेतुत्वविशेषदर्शनादेव सिद्धत्वे सिद्धे विशेषनिषेधात् परिशिष्टकृतिसाध्यत्वं पर्यवस्यतीत्यर्थः। कृतीति वर्त्तमान इत्यर्थः। (४०९ ख)

ननु सामान्यव्याप्तौ वा व्यभिचारो विशेषाव्याप्तौ वा। नाद्य इत्याह - **समानेति** । नान्य इत्याह - **अतीतेति।** तथा चेदानीं कृतिसाध्यत्वसाध्याभावेऽपि हेत्वाभावादेवाव्यभिचार इति भावः। यत एव मत्कृतिव्यतिरेकत्व इति विशेषणान्त एव न स्थलान्तरेऽपि व्यभिचार इत्याह - **अत एवेति** ।

यस्य सन्तापशान्तिमात्रमिष्टं स सरोऽवगाहनस्येष्टसाधनत्वमेव न प्रतिसन्धत्ते उपस्थितवृष्टितोऽपि तत्सम्भवादिति कश्चित्, तन्न, तोयसम्बन्धत्वेन सन्तापशान्तिसाधनत्वं तस्य च सरोऽवगाहनेऽपि सत्त्वात् ।अन्यथा वृष्टिरपि तत्साधनं न स्यात् सरोऽवगाहनादपि तत्सिद्धेः।

कार्य्यसाधनत्वञ्च कृतिसाध्यत्वे न लिङ्गं पाकादिवदोदनादेरपि प्रवृत्तेः पूर्व्वं कृतिसाध्यत्वज्ञानं हेत्वभावात्।

नन्वेवं लिङ्गज्ञानमेव प्रवर्त्तकं अस्तु प्राथमिकत्वात् आवश्यकत्वाच्च। न च लाघवात् कृतिसाध्यत्वज्ञानं तथा। कृतिसाध्यतानुमितौ तदा मानाभावेन युगपदुपस्थित्यभावात् प्रवृत्तिसामग्र्यानुमिति प्रतिबन्धाच्चेति चेत् - न। लिङ्गज्ञाने कृतिसाध्यत्वाप्रकाशे तत्प्रकारक-चिकीर्षायां तस्याहेतुत्वात्। अत एव लिङ्गान्तरज्ञानमपि न प्रवर्त्तकम्।

ननु पाकादिः कृतः क्रियमाणो वा न पक्षः तस्य कृतिसाध्यत्वे बाधात्। नाप्यनागतः। भावि पाके मानाभावेनाश्रयासिद्धेः। पाकत्वं भविष्यद्वृत्ति सामान्यत्वात् गोत्ववत् इति मानमिति चेत् - न। मानाभावेन गोत्वेऽपि तस्याप्रसिद्धेः। पाकमात्रं पक्ष इति चेत् - न। मात्रार्थो यदि पाकत्वं तदा बाधोलिङ्गासिद्धिश्च। सर्व्वपाकपरत्वे च तस्य सिद्धभागे बाधोऽनागतभागे चाश्रयासिद्धिः। वर्त्तमानाद्युदासीनः पाकः पक्षः पाकसामान्ये च कृतिसाध्यत्वं न बाधितमित्योपि न। सिद्धस्य पक्षत्व नासिद्धस्येत्यनुमितेः सिद्धविषयत्वे बाधात् भिन्नविषयत्वे वा सिद्धविषयेच्छा-प्रवृत्त्याद्यनुत्पादकत्वाच्च।

विशेष्याभावादेव न तत्र व्यभिचार इत्येकदेशिमतमुन्यस्य दूषयति - **यस्येति** ।

ननु सामग्र्येव मानमित्यत आह - **प्रवृत्तीति** । तथा च सामग्र्येव नेति भावः।

लिङ्गेति। न च रजतत्वप्रकारिकाया विसंवादिस्थल इच्छया अतथाभूताज्ञानसाध्यतया व्यभिचारः, यत्प्रकारिका या सा तत्प्रकारिकज्ञानव्यतिरेकप्रयुक्तव्यतिरेकेति नियमात्। अस्ति च हेतुतावच्छेदकभूतरजत ज्ञानाभावात् तादृशेच्छाभाव इति भावः।

कृत-क्रियमाणसाधारणकृतिसाध्यत्वज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते। अनन्यगतिकत्वेन तथाकारणस्वभावकल्पनादिति चेत् - तर्हि यादृशं कृतिसाध्यत्वं चिकीर्षायां प्रकारः तादृशं ज्ञाने नास्तीत्यन्यप्रकारकज्ञानादेव चिकीर्षा स्यात्। तथा च लिङ्गज्ञानमेव प्रवृत्तिहेतुरस्तु प्राथमिकत्वात्।

यत्तु स्मृतपाके कृतिसाध्यत्वासंसर्गाग्रहात्प्रवृत्तिः स चासंसर्गाग्रहः इष्टसाधनताग्रहादिति। तन्न। स्मृतपाकस्य सिद्धत्वेन तत्र कार्य्यत्वासंसर्गग्रहेऽनुमानबाधात्। स्मृतपाकस्य सिद्धत्वं तदा न गृह्यते इति चेत्, तर्हि स्मृतपाकस्य सिद्धत्वग्रहे ओदनार्थी पाके न प्रवर्त्तेत सिद्धौदनोऽपि पाके तृप्तोऽपि भोजने प्रवर्त्तेत। तत्र पाकादौ सिद्धत्वग्रहात्तदसंसर्गग्रह इति चेत्तुल्यम्।

अपि च स्मृतपाके कार्य्यत्वासंसर्गाद्विद्यमाना संसर्गाग्रहाद्वि संवादिनौ प्रवृत्तिः स्यात्।

किञ्चैवं सिद्धपाकज्ञानादज्ञातेऽसिद्धे पाके इच्छाप्रवृत्तौ स्यातामिति।

ननु येन प्रकारेणासंसर्गग्रहस्तेनासंसर्गाग्रहो मा भदिति सामान्येन न स्यादित्यरुचेराह - **अपि चेति**।

ननु सत्यस्थलेऽप्यसंसर्गाग्रहो हेतुसंसर्गसत्त्वासत्त्वाभ्यां प्रवृत्तिसंवादिविसंवादादित्यस्वरसादाह - **किं चेति**। न चैवमेव समानप्रकारकतया नातिप्रसङ्ग इति वाच्यम्। घटज्ञाने तत्प्रकारघटेच्छापत्तेः। न चासिद्धविषयत्व तज्जनकज्ञानप्राकराश्रयविषयत्वमिच्छास्वभाव इति वाच्यम्। रजतज्ञाने तच्छुक्तीच्छानुत्पत्तेः।

न च रजतधीर्न हेतुरपि तु भेदाग्रहहेतुतावच्छेदिकेति युक्तम्। तावतापीच्छासंभवेऽप्यसिद्धे प्रवृत्त्यनुपपादनात्। तत्र विषय प्रत्यक्षस्यापि हेतुत्वात् । तदुक्तम् - **प्रवृत्तीति**।

न च समानविषयके हेतौ संभवति भिन्नविषयकसंकल्प्यत इति भावः।

अत्र ब्रूमः। पाके कृतिसाध्यत्वं सिद्धत् सिद्धे बाधात् अनागतपाकमादाय सिध्यति। पक्षतावच्छेदकधर्म्मसामानाधिकरण्यं साध्यमानस्य लिङ्गेन सिद्ध्यतीत्यनुमाने क्लृप्तत्वात् यथा प्रसिद्धवन्हिबाधेऽपि वन्हिमात्रं न बाधितं इत्यप्रसिद्धोऽपि वन्हिः सिध्यति तथा प्रसिद्धपाके कृतिसाध्यत्वबाधेऽपि पाकमात्रे न बाधितमित्यप्रसिद्धं पाकमादाय तत्सिध्यति। अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात्, तस्मात् असिद्धस्य क्वचित् सिद्धे सिद्धे सिद्धस्य च क्वचित्। अप्रसिद्धस्य चासिद्धे सिद्धिस्तेनानुमा त्रिधा। अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि पाकादौ कृतिसाध्यत्वं कथमवगम्येत।

पक्षतेति। न चासिद्धे बाधादनागतस्याज्ञानात् पक्षधर्मताज्ञानं दुर्लभमसिद्ध एव पाके पाकत्वावच्छेदेन हेतुमत्त्वज्ञानात्। समानप्रकारकज्ञानस्यैव विरोधितया विशेषतो व्यातिरेकग्रहेऽपि सामान्यतोऽत्वयधीस्वीकारात् । अन्यथा इयन्त एव पाका इत्यनवाधारणे वस्तुगत्या पाकान्तराभावे सिद्धेषु तेन रूपेण बाधावतारो धूमस्याप्यसंभवे अप्रवृत्त्यापत्तेः।

न चैवं पक्षधर्मताभ्रमादनुमितिभ्रमापत्त्या विसंवदिप्रवृत्त्यापत्तिः। पाकत्वाधिकरणाधिकरणात् लक्षणापरंपरा संबन्धस्याविद्यमानस्यैव विषयीकरणेन प्रतीतेरभ्रान्तत्वात्। सति सध्यपक्षधर्मताभ्रान्तिरप्यनुमितेरभ्रान्तत्वाच्च।

न च संसर्गे भ्रान्ते गुरुनये कथं अगृह्यमाणा संसर्गधर्मधर्मिविषयकैकज्ञानात्मकपक्षधर्मताधीः, कथं वा असंसर्गे सति तदुभयज्ञानमेकमन्यथाख्यात्यापत्तेरिति वाच्यम्। उक्तपरंपरासंबंध सत्वेनैव सर्वसामञ्जस्यादसंसर्गस्यापि संसर्गस्य साक्षात् सम्बन्धात्मनो विरहरूपत्वात्। अत एव एकाकारमपि लोहितः स्पटिक इत्यादिज्ञानं संसर्गाभेदेन प्रमा अप्रमा चेति सर्वदर्शनसिद्धान्तः। अप्रमा चान्यथाख्यत्तिर्वा ज्ञानं द्वयं वेत्यन्यदेतत्।

न चैवं साध्यभावमप्येवमुक्तम्, तत्कथमनागतलाभ इति वाच्यम्। यत्सम्बन्धपुरस्कारेण हि व्याप्तिज्ञानसाध्यविषयः सामानाधिकरण्यप्रतियोगितया तद्व्याप्तिज्ञानजन्यायामनुमितौ पक्षे तत्तसाध्य ------ सम्बन्धो भासते। अन्यथाऽनुमितौ सम्बन्धभाने नियमो न स्यात्। कदाचिदनुमितिः साक्षात्सम्बन्धं विषयीकरोति काचित्परंपरासम्बन्धमाद्यामपि काचित् संयोगं काचित् समवायादिकमन्त्यायामपि परमपरया क्वापि संयोगघटिता, क्वापि चान्यघटितेत्यादिनियमो व्याप्तिप्रविष्ठसाध्यसद्धिनियामकत्वं विनाऽनुपपन्न एवेति सर्वसिद्धमितीहापि प्रतिसाक्षात् सम्बन्धपुरस्कारेण व्याप्तिरवसितेति कथं तत्परम्परासम्बन्धोऽनुमितिविषयः। तथा च सिद्धे बाध एवेत्यानायत्यैवानागतसिद्धिः। वस्तुतः सिद्धे सामान्यप्रकारेणाकृतिसाध्यताबोधेऽपि न प्रकल्प्यं प्रवृत्ति विषयविशेष्यकज्ञानस्यान्वयव्यतिरेकाभ्यां प्रवर्त्तकत्वावधारणाम्।

न च प्रवृत्तिविषयतावच्छेदकावच्छिन्नविशेष्यकत्वं तथा गौरवात् पाकत्वादेरतिप्रसकतत्वेन तदनवच्छेदकत्वाच्च।

ननु परम्परासम्बंन्धघटकानागतव्यक्तेरभाने तद्दोषतादवस्थ्यमिति चेन्न, वैशिष्ट्यस्याज्ञानस्यैव विशिष्टादिविषयत्वाभ्युपगमात् विशेषणज्ञाने विशेष्यभानं संसर्गाग्रहे सति विशिष्टज्ञानसामग्रीत्वात्। न तु तदिंन्द्रियसंन्निकर्षस्याप्यधिकस्यापेक्षा।

वस्तुतस्त्वन्मते वैशिष्ट्यविशिष्टबुद्धौ विषय इति नियम एव नास्तीत्यनागतभानापेपेक्षापि नास्ति। अगृह्यमाणसंसर्गयोरुक्तलक्षणपरम्परासम्बन्धवतो हेतुपक्षयोरेकज्ञानस्य पक्षधर्मताज्ञानत्वात्।

किं चोक्तरूपरम्परासंबन्धग्रहो नानागतव्यक्तिभाननियमः सिद्धस्यापि तस्य तद्घटकत्वात्सामान्यतो ज्ञातस्यापि तव प्रत्ययाजननो अनागतव्यक्तेर्वस्तुगत्या अभावेनानवधारणादत्रायमीदृशी प्रतीतिरेव न स्यात्।

न चेदमुभयोरन्यतरस्याप्यनुमतमेवं च क्लृप्तसामग्र्यैव सर्वसामञ्जस्ये पक्षातावच्छेदकज्ञानं न तदवच्छिन्नं किंचिदसंसर्गाग्रहो हेतोरित्यनुमितिसामग्र्यन्तरकल्पनमानादेयम्। सामान्यतो संसर्गाग्रहवत् सामान्यतो विशिष्टधीसंभवादि यत एवेत्यनवधारणदशायामुक्तक्रमेणाव्यापकत्वाच्च।

किं चास्यानुमितिसामग्रीग्रहे हेत्वभावेनान्यथाख्यातिनिराकरणमुक्तं भज्येतेति तदापत्तेः अशक्यसमाधेयतापत्तेरिति संक्षेपः।

अत्र केचित् - मा भूदुक्तानुमानादनागतसिद्धिः, अन्यया तद्भीर्भविष्यति । तथा हि सुखत्वप्रकारक सिद्धसुखज्ञानादिच्छास्वाभाव्यादनागते सुखे इच्छासामानप्रकारकत्वस्य नियामकत्वमिति तत्सिद्धता। तथा च यदीच्छानुव्यवसायेनेच्छाविशेषणत्वेनानागतसुखज्ञानं ततस्तत्पक्षकभेदज्ञानसाध्यत्वानुमित्या पक्षधर्मताबलादनागतभोजनसिद्धौ तत्पक्षकौदनसाध्यतानुमानानन्तरं तत्पक्षसाध्यात्वानुमित्योः उक्तरीत्या अनागतपाकसिद्धावुक्तानुमानेन कृतिसाध्यातानुमानम्।

न च सुखेच्छानुरोधेन समानप्रकारकतैव नियामिका, न समानविषयतापीति यदि तदा किमनुमानेन सिद्धकृतिसाध्यताज्ञानादेवासिद्धगोचरचिकीर्षासंभवादिति वाच्यम्। कृत्यनन्तरभविष्यत्व-भविष्यत्वस्य इच्छाप्रकारकत्वात्। तद्ज्ञानस्य चातादृशत्वात्।

न चैतदनुमानं परम्परापेक्षयोक्तमेकमेवानुमानं लघुतरमिति ग्रन्थेनैककल्प्यो लिखित इति वाच्यम्। एतावताप्यस्य कल्पस्यादृष्टतयोक्तानुमानस्पुरणादशायामस्या एव परम्परायाः प्रवर्त्तकत्वेन ग्रन्थे निबन्धनापत्तेरिष्टसाधनत्वहेत्वनुरोधेन तादृशसुखोपस्थित्यावश्यकत्वे तत्पक्षकपाकसाध्यौदन-साध्यत्वानुमितेरेकस्या एवोक्तसामग्रीबलेनावच्छेदकीभवेनापि तत्तदनागतपाकादि विषयत्वाच्च ।

नन्विच्छा न्यायनयेऽपि न प्रत्यासत्तिः, कुतो ज्ञानस्याप्यप्रत्यासत्तित्ववादिनां गुरूणाम् । न चेच्छा न्यायनये प्रत्यासत्तिरेव, कथमन्यथा सुखमिच्छामीति धीः ज्ञानलक्षणाप्रत्यासत्तिरित्यत्र च गन्धज्ञानविषपदं विषयिपरं गुरूणां तु ज्ञानं तथा मा भूदिच्छा तु स्यादिति वाच्यम्। न्यायनयेच्छाविषयिका, किं तु ज्ञानमेवेति तदेव प्रत्यासतिः, नेच्छा । गुरूणां तु विशिष्टवैशिष्ट्यनिर्वाहाय विशेषणतदवच्छेदकधीध्रौव्ये तत एव सुखमिछामीति बुध्युपपत्तौ तत्कल्पनाया असंभवादिति, मैवम्। विशेषणतावच्छेदकज्ञानेन हि नेछाविषयो विषयीकृत इति सिद्धम्। सुखविषयकं सुखमिच्छामीति ज्ञानं स्यान्न त्विच्छाविषयसुखविषयं तथा भवे चान्यथाख्यात्यापत्तेरित्यागतसन्निकर्षत्वमिच्छाया ध्रुवमिति।

किञ्च तवापीष्टसाधनताज्ञानात् कथं वृष्ट्यादाविच्छा सिद्धत्वस्येच्छाविरोधित्वात् अनागतस्य ज्ञातुमशक्यत्वात्। अत एव सिद्धासिद्धविषयत्वनिरासेन सुखादिज्ञानात् फलेऽपि नेच्छेति न वृष्ट्यादाविष्टसाधनतापि।

न च वृष्ट्यादिसाध्येष्टज्ञानात् वृष्ट्यादाविच्छा। इच्छायाः सिद्धासिद्धवृष्ट्यादि तत्फलविषयत्वविकल्पग्रासात्। अथ सामान्यलक्षणप्रत्यासत्त्या वृष्ट्यादित्वेन सुखादित्वेन च सिद्धासिद्धवृष्ट्यादितत्फलविषयकं ज्ञानमुत्पन्नं तेन सिद्धं विरोधिनं त्यक्त्वा असिद्धविषयेच्छोत्पद्यते।

यदि च सामान्यलक्षणा नास्ति तदा येन रूपेणेष्टसाधनत्वग्रहः तेन रूपेण ज्ञाते सिद्धे वेच्छोत्पद्यते। अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात् सुखेच्छायामप्येवं इति चेत् - तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा तच्च ज्ञानं सकलपाकविषयं सन्निकृष्टपाकविषयं वेत्यन्यदेतत्।

अत्र ब्रूमः - पाककृतौ मानसप्रत्यक्षायां वा कस्यैवेति कण्ठरवेणैव लिखनात् फलतो नेच्यादमपि विषयवैशिष्यानुभावः। किं तु तटस्थविशेषणावाच्छेदक प्रकारकज्ञानोपस्थितसिद्धसुखासंसर्गाग्रहमात्रमिति नेछा प्रत्यासतिर्येन तदुपनीतसुखपक्षकानुमितिपरम्परयाभिमतसिद्धिः।

किं चैवं सत्यपि पक्षविशेष्यकज्ञानमिति हेतुतया तदिच्छाविशेषणात्वेन ज्ञातं किंचित्कालेन चेच्छाविष,यः सुखमित्युत्तरकालिकमानसव्यवसायात्तद्विशेष्यकः, तेषामुपतीतविशिष्टानुभवानभ्युपगमो यत्सुखमुपस्थितं न तद्भासेत। तच्च सिद्धमेवेति कथमुक्तप्रकारसंभव इति दिक् ।

असिद्धस्येति । पर्वतवह्निसास्त्रादिवद्व्यक्तिपक्षगोत्वप्रकृतसिद्धयः क्रमेणोदाहरणीयाः।

बालस्य व्याप्त्याद्यग्रहेणाद्या प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरसंस्कारजन्यात् स्तनपानं कार्य्यमिति स्मरणात् तवापीष्टसाधनतास्मरणात् तत्र प्रवृत्तिः अनन्यगतिकत्वात्। न च जन्मान्तरेऽपि पर्य्यनुयोगः। जन्मधाराया अनादित्वात् प्रत्यक्षानुमानमूलकत्वाच्च नान्धपरम्परा।

स्तनपानमिति । नन्विदं स्मरणं किंचित्करमिदानीमन्तर्भावेन ज्ञानस्य प्रवर्तकत्वात् ।

न च स्मृतौ तदस्ति। किं च स्वविशेषणवत्ताप्रतिसन्धानजम्। तथा च स्मरणं तज्जन्यं तज्जन्यताया समानकाल परत्वेऽप्याद्यदोषस्यानुद्धारादिति, मैवम्। न ह्युक्तस्मरणस्य प्रवर्त्तकत्वपर्यन्ते ग्रन्थतात्पर्यम्, किं नामैवं स्मरणे स्तरपानमिदानीं मत्कृतिसाध्यकार्यत्वे परकीयकृत्यजन्यत्वे च सतीष्टसाधनत्वादिप्यनुमानलिङ्गे विशेषणविषयकतया स्मरणेनोत्थाप्यत इत्येव तदपेक्षेति भावः।

यद्वा स्मरणानुरोधेनैव योग्यतानिर्वचनाय यथाश्रुत एव ग्रन्थो ग्राह्यः। इदानीं कालस्त्वननुभूतापि स्मृतिविषय इत्युक्तद्वापि निराकृतिसाध्येष्टसाधनता ज्ञानस्य प्रवर्तकतया स्मारकमपि इदानीं कृतिसाध्यत्वांशेऽनुमेय एव। तत्स्मरणं तु विशेष्टलिङ्गोत्थापकमित्यवधेयम्।

ननु स्तनपानकार्यत्वस्मृतिरेवानुभवसमानविषयत्वानुरोधेन दृष्टसाधनतागोचरा। न चानुभवस्यैव तद्विषयत्वेमानाभावो लिङ्गोपधानस्यानुमितौ नियतत्वेन कार्यकानुमितेरिष्ठसाधनत्वलिङ्गविषयत्वात्।

न चाविरोधे। तथा च साध्यत्वसाधनत्वविरोधानैवमिति। अन्यथा जितं तार्किकैरिति वाच्यम्। तटस्थज्ञानगोचरतयापि विशेषणत्वे स्मरणस्य तदुभयविषयतानियमात्। अन्यथा संज्ञासंज्ञिविशिष्टस्मरणानापत्तेः।

न चानुभवन्याय तत्र स्मरणेऽपीति वाच्यम्। एवमपि तत्रेवात्रापि तदुभयस्मरणनियमात्। तथा चोभयसत्त्वेऽपि कर्यत्वस्मृतिरेव प्रवर्तिका। न त्विष्टसाधनतानियमात्। अन्यथा स्मृतिरिति किं विनिगमकमित्यस्वरसात् तदाह - **वस्तुतस्त्विति**।

वस्तुतस्तु शुष्ककण्ठतया बालो दुःखमनुभवन् विरोधितया सुखं स्मरति, ततः सुखत्वज्ञानात् सुखवृत्तिकार्य्यत्वं सुखवृत्तितया। अन्तरङ्गत्वात् न तु स्तनपानमिष्टसाधनमिति स्मरणम्। सुखावृत्तित्वेन वहिरङ्गत्वात् सुखकार्य्यत्वञ्च स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्य्यत्वस्मरणे स्तनपानमपि विषयः तेन स्तनपाने कार्य्यत्वज्ञानादेव प्रवृत्तिः इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् एवञ्चाद्यप्रवृत्तौ कार्य्यत्वज्ञानादेव प्रवृत्तिः। इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् एवञ्चाद्यप्रवृत्तौ कार्य्यत्वज्ञानं प्रयोजकं क्लृप्तमित्यग्रेऽपि तदेव प्रवर्त्तकं क्लृप्तत्वात्।

नवीनास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकं अनागतविषये प्रत्यक्षानुमानयोरसम्भवात्। किन्तु यादृशस्य पुरुषस्य कृतिसाध्यं यदृष्टं तादृशत्वमात्मनः प्रतिसन्धाय तत्र प्रवर्त्तते। तथाह्योदनकामस्य तत् साधनताज्ञानवतश्च तण्डुलाद्युपकरणवतः पाकः कृतिसाध्यः अहमपि च तादृश इति ज्ञानात् पाके प्रवर्त्तते।

सुखकार्यत्वस्मृतिरेव स्तनपानकार्यत्वगोचरता। तद्द्वारा तस्य कार्यत्वात्। न तु स्तनपानविशेष्यककार्यत्वस्मृतिः। येन तज्जनककार्यत्वानुमितिजन्यसंस्कारवशाल्लिंगांशस्मरणमिति विनिगमकमिति भावः।

अन्तरङ्गत्वात् सम्बन्धत्वादिष्टेति। पराभिमतेष्टसाधनताज्ञानस्येत्यर्थः। परो हीच्छाविषयविशेष्यकं कारणं ब्रूमः। तेन चेह तथाज्ञानं सुखकार्यतास्मृतेरेव विशेषसत्त्वेन तद्विषयत्वात्। इष्टसाधनता तु तस्या अपि विषयः। स्वरूपसदिच्छाविषयीभूतप्रकृतसुखविशेषसाधनतां स्तनपानस्य गृहीत्वा तद्वारा सुखं कार्यमिति प्रत्येतुमशक्यत्वादिभावः।

ननु भविपाकः प्रवृत्तिविषयस्तथा च तत्प्रकारका धीः मृग्यते । सा च न संभवति। कथितप्रकारस्यापि पाकत्वेन भाविगोचरत्वादिप्यत आह -- **प्रवृत्तीति** ।

वस्तुतः प्रवृत्तिविषयः पाकत्वेनादिना प्रकोरण भाविकालसम्बन्धोऽपि तेन रूपेण ज्ञातः, पाकादिज्ञायत इत्यर्थः। **प्रवृत्तीति**। प्रवृत्तिश्च भावादित्यर्थः।

एवञ्चान्यकृतपाके कृतिसाध्यताज्ञानं आत्मनः पाके कृतिसाध्यत्वप्रयोजकविशेषणवत्त्व-ज्ञानञ्च प्रवर्त्तकम्। कान्यत्रापि प्रवृत्तिरेवमेवेत्यनादितैव। अत एव सञ्जातबाधश्चैत्यवन्दने विषभक्षणे च न प्रवर्त्तते इष्टसाधनताज्ञानवतो हि तत् कृतिसाध्यम्। न च सञ्जातबाधस्तत्र इष्टसाधनताज्ञानवान्। एवं तृप्तोच्छावतोऽपि भोजनं कृतिसाध्यं तृप्तश्च न तृप्तोच्छावत्त्वमात्मन्यवैतीति न भोजने प्रवर्त्तते।

अतिनवीनास्तु यादृशस्येत्यादौ अविगीतत्वं तत् कृतौ विशेषणमाहुः। सञ्जातबाधस्तु विषभक्षणं चैत्यवन्दनञ्च विगीतकृतिताध्यत्वेनैव जानातीति तत्र न प्रवर्त्तते।

प्रवृत्तिविषयश्च सामान्यतः कालासम्भिन्नः पाकादिर्ज्ञायते, प्रवृत्तिमहिम्ना चानागतपाकसिद्धिः। चिकीर्षा च कालासम्भिन्नविषया, न तु भाविनं कृत्यासाधयामीत्याकारैवेति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे विधिवादपूर्व्वपक्षः।।

ननु प्रवृत्त्यनुरोधात् तथाज्ञानं मा मृग्यताम्। चिकीर्ष तु भाविकालप्रविष्टपाकादिति गोचरा तादृशाज्ञानं विना न स्यादित्यत आह -- **चिकीर्षेति**। सापि प्रवृत्तिः वस्तुतस्तत्कालावच्छिन्नविषयता तेन रुपेणेत्यर्थः।

न त्विति । तज्जन्यत्वस्य तत्कारणत्वपर्यवसन्नतया कारणत्वस्यानन्यथासिद्धिनियमादिगर्भितया गौरवादित्यर्थः। सामान्याभावे साधनत्वसामान्यभावे विशेषस्यान्यथा साधनत्वस्य भावप्रसङ्गादित्यर्थः।

विधिवादसिद्धान्तः।

अत्रोच्यते। विषभक्षणादिव्यावृत्तं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषयतयावच्छेदकं लाघवात्, न तु स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वं गौरवात्।

न च सिद्धासिद्धावस्थयोः साध्यत्व - साधनत्वयोर्विरोधः, निर्विशेषितयोस्तयोरविरोधात्। पाकोऽसिद्धः साध्यः सिद्धः साधनञ्चेत्यनुभवात्। तदा साध्यत्वं हि तदा साधनत्वस्य विरोधि नियमतस्तेनैव तस्य प्रतिक्षेपेण सहानवस्थाननियमात्, न तु साधनत्वस्यान्यदा साधनत्वस्य वा, तयोरप्रतिक्षेपात्। अन्यदा साधनत्वेऽपि साधनत्वमस्त्येव सामान्याभावे विशेषाभावप्रसङ्गात्। एवन्तदा असिद्धत्वस्य तदा सिद्धत्वं विरोधि नियमतस्तस्यैव प्रतिक्षेपात्, न तु सिद्धत्वमात्रं, अन्यदापि तत्र सिद्धत्वाभावप्रसङ्गात्, निर्विशेषितयोर्विरोधे च सिद्धत्वासिद्धत्वयोश्चान्यतरदेव पाकादौ स्यान्न तु समयभेदेऽप्युभयम्।

न च तदा कृतिसाध्यत्वे सति तदेष्टसाधनत्वज्ञानं प्रवर्त्तकं, अत एव वाजपेयेन यजेतेत्यत्र यागस्य करणावस्थायां सिद्धत्वेन न वाजपेयस्य साध्यता एकदा तयोर्विरोधादिति कर्म्मनामधेयत्वं, न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः यागस्वरूपे तयोः सत्त्वात्।

न चेति । यद्यपीदानीं कृतिसाध्यत्वे सतीदानीमिष्टसाधनत्वज्ञानमेव भावियौवराज्यप्रवृत्यति-प्रसङ्गभङ्गाय प्रवर्तकमित्येकावच्छेदेनैवोभयग्रहः। तथापि नेदानीं इति क्षणरूपः कालोपाधि-प्रत्ययापत्तेरकिंचित्करत्वाच्चेति स्थूल उपाधिव्याख्यानतदवच्छेदनापि द्वयोर्विरोध एकमुहूर्त्तादावप्युभय-समावेशादित्यवधेयम् ।

अत एवेति । यत एवैककालो तयोर्विरोधः। अत एव वाजपेयेन यजेतेत्यत्र तृतीयोपस्थाप्य-वाजपेयकरणत्वान्वये वाजपेयसाध्यत्वविशिष्टयागस्य नेष्टसाधनताबुद्धिं विशिष्टवैशिष्ट्यस्य कालाभेदपर्यवसन्नतया तत्र तयोर्विरोधात्। अतः यत्र वह्निनौदनं पचेतेत्यत्र विशिष्टवैशिष्ट्यं तत्र पाके ओदनसाधनत्वं वह्निसाध्यत्वं युगपदेव भासते एवातिविरोधात् । न हि पाकस्य वह्निसाध्यत्वनियमाद्यागस्य वाजपेयसाध्यतानियमो येन विशिष्टवैशिष्ट्यमपि विवक्षितमत्रैव तत्रापि स्यान्न वा पाकमात्रमौदनसाधनवत् यागमात्रस्य स्वर्गविशेषसाधनत्वं, येन तद्वदिहाप्येकस्य द्वयमित्यर्थः स्यात्।

अथ विरुद्धयोरवच्छेदभेदमादाय एकत्र प्रतीतिः स्यात्। न च कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादायैकत्र प्रतीतिरस्ति, तथा लिङ्गाभावादिति चेत्, न, साध्यत्व-साधनत्वयोरविरोधस्योक्तत्वात्, एवं सिद्धत्वासिद्धत्वयोर्भावभावरूपत्वेऽपि न विरोध एकधर्म्मिगतत्वेन मानसिद्धत्वात्। तस्मात् संयोग-तदभावयोरिव येन प्रकारेण ययोर्विरोधः तेन तयोरेकधर्म्मिगतत्वं न प्रतीयते, न तु रूपान्तरेणापीति।

अपि च यदि साध्यत्व-साधनत्वयोर्विरोधस्तदा तवापीष्टसाधनत्वेन कार्य्यसाधनत्वेन वा कार्य्यत्वं नानुमीयेत हेतु-साध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः पक्षे साध्य-साधनयोरन्यतरसत्त्वे बाधासिद्ध्योरन्यतरप्रसङ्गाच्च।

न च वाच्यमिदानीं मत्कृतिसाध्यत्वं साध्यमग्रे मदिष्टसाधनत्वं हेतुः दैवाद्यनधीनत्वे सति यदग्रे मदिष्टसाधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तिः, तथा च समयभेदमादाय साध्यत्व-साधनत्वयोरवगम इति इदानीमग्रिमपदार्थयोर्नानात्वादनुगतरूपाभावेन व्याप्तेरग्रहात्, पाकन्यायेनान्यत्रापि तत्तत्समयान्तर्भावेन साध्यत्व-साधनत्वयोरप्रतीतिः, प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यग्रे इष्टसाधनमिति ज्ञानं प्रवर्त्तकमस्तु।

न च पाके साध्येकत्वेन कृतिसाध्यत्वमनुमेयं, असिद्धावस्थावतो हि पाकादिष्टानुत्पत्तेः पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यमसिद्धत्वञ्चावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्व्विरोधोऽत्रापि दुर्व्वारः।

तथा च वाजपेयसाध्यस्य यागविशेषस्यैव स्वर्गविशेषसाधनतया तद्विशिष्ट एव तद्बोद्धयम्। तद्बोधश्च विरोधात् संभवति इति विशेपयागवाचकत्वं वाजपेयपदस्य कल्प्यते । तेन वाजपेयपदवाच्ययाग इष्टसाधनमित्यर्थः पर्यवस्यति। न च तृतीयानन्वयदोषः, आख्यातोपस्थाप्यकरणकत्वानुवादकत्वात्तस्याः प्रयोगसाधुत्वाच्चति भावः।

नन्विष्ठसाधनत्वमप्यनन्यथासिद्ध्यादिगर्भमिति विनिगमको हेतुरितीष्टसाधनताज्ञानत्वेन हेतुत्तम्, अपि तु कृतिसाध्यत्वप्रकारकेच्छाजनकज्ञानहेतुत्वेनेति पर्वास्वरसात् व्यवस्थापयति - **अपि चेति**। इच्छाकारणसखत्वदुःखाभावत्वज्ञानापेक्षया इच्छाकारणत्वमात्रं लघुतरम् । एवमुभयचिकीर्षा-साधारण्येनेकैव सामग्री, न तदुभयमित्यर्थः।

अपि च स्वविशेषणधीजन्यकार्य्यताज्ञानाभावात् सुखे कथं चिकीर्षा, न हि कृतिसाध्यताज्ञानमात्रात् सा, सञ्जातबाधस्य विषभक्षणादौ चिकीर्षाप्रसङ्गात्।

अथोपायचिकीर्षायां तत्कारणं इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा नो चेदिच्छामात्रमिति द्वयमेव चिकीर्षाहोतुरिति चेत्, तर्हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं भासते तदा चिकीर्षा नो चेदिच्छामात्रमित्येव सुख-तदुपायचिकीर्षाकारणमस्तु लाघवात्, सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात्।

अत एव पाके इष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति तत्र चिकीर्षा न तु वृष्ट्यादिज्ञाने तद्विषयत्वमितीच्छामात्रं, सुखचिकीर्षायामच्छाकारणज्ञान कृतिसाध्यताविषयके चिकीर्षाजनकत्वा-धारणात्। अन्यथा तत्र चिकीर्षानुत्पत्तेः।

वस्तुतस्तूपायचिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छात्वात् वृष्टीच्छावत्।

न च भोगचिकीर्षावत्तेन विनापि स्यादित्यप्रयोजकत्वं, उपायेच्छायास्तदन्वय-व्यतिरेकानुविधानात् दृष्टेश्च स्वतोऽसुन्दरत्वेनेच्छानुत्पत्तेः अनुगतोपायेच्छायां अनुगतस्य प्रयोजकत्वे सम्भवति बाधकं विना त्यागायोगाच्च।

न च चिकीर्षान्यत्वे सति उपायेच्छात्वं इच्छात्वं वा तज्जन्यत्वे प्रयोजकं, गौरवात् सुखेच्छायां तदभावाच्च।

नन्विच्छाकारणत्वमुपजीव्य प्रवृत्तिकारणताग्रहे इच्छाकार्यताया: कल्प्यत्वेन तदुभयसामग्रीत एव विशिष्ट कार्यसंभवे तन्निर्वाह: विशिष्टकारणताग्रहे गौरवग्रस्त इति मनसिकृत्याह - **वस्तुत** इति।

अस्त्यावश्यकमुपायफलेच्छयोरिष्टसाधत्वसुखत्वदिज्ञानं सामग्री। तथा च कृतिसाध्यतज्ञानमात्रं चिकीर्षामात्रसामग्रीति परस्परसहकारिभूताभ्यां निर्वाहो लाधवात् तदवच्छेदेन हेतुताग्रहात्। न तु विशिष्टं कारणं गौवरवात्। अन्यथा एकविशिष्टहेतुतालाघवेन चक्रादेरपीतरसहितत्वावच्छेदेन जनकत्वे सहकार्युच्छेदापादादिति भाव:।

एवञ्चोपायचिकीर्षायामिष्टसाधनत्वज्ञाने ध्रुवेऽतिप्रसङ्गवारणार्थं कृतिसाध्यत्वनिर्व्वाहार्थञ्च कृतिसाध्यत्वमपि विषयतयावच्छेदकमस्तु न तु तद्विहाय तन्मात्रं, क्लृप्तकारणं विना कार्य्यानुपपत्तेः।

एवं चेति। उपायचिकीर्षायामप्युपाधेछात्वलक्षणकार्यतावच्छेदकस्वत्त्वादीष्टसाधनतज्ञाने स्वरूपयोग्ये ध्रुवे तावन्मात्रनियामकत्वे वृष्ट्यादावपि चिकीर्षातिप्रसङ्गवारणार्थं फलोपाधाननियम-लक्षणाकारणातायां विषयतया कृतिवाच्यत्वमप्यवच्छेदकं तद्विशिष्टस्यैव फलोपधानान्न तु स्वरूपयोग्यतावच्छेदकपरो ग्रन्थ उक्तदोषेणाविशिष्टस्यातथात्वात् । षलोपधाने तु वैशिष्ट्यमेवावछेदकं स्फुटम्। घटोपादने चक्रादिविशिष्टदण्डत्ववत् ततोधिवाक्यस्यप्रवृत्तिषलोपधानार्थं प्रवृत्तस्य विशिष्ट एव शक्तिस्तादृशत्व फलोपाधानावच्छेदकत्वादित्यशेषपर्यवसितार्थः अनतिप्रसङ्गः कृत्यसाध्यज्ञानभावेनापि निर्वहतीति कृतीत्याद्युक्तम्।

ननु किं जनकज्ञानसमानप्रकारिकेच्छा वेति नियमोऽथ स्वप्रकारिकज्ञानसाध्यैव इच्छेति। आद्ये इष्टसाधनतादिजन्यायामतत्प्रकारकेच्छायां व्यभिचारः। अन्त्ये स्ववृत्तित्वप्रकारकफलेच्छायां सः।

न हि स्ववृत्तित्वेनाज्ञानमेव सुखादिस्ववृत्तित्वेनेष्यत इति चिकीर्षा निर्वाहाय कथं तत्प्रकारकं ज्ञानमिति।

अत्राहुः - क्वाचित्को धर्मो साधरणसमग्रीसापेक्षः, न तु स्वाभाविकस्तस्य सामान्यसामग्रीत एव निर्वाहात्। अत इच्छात्ववदसिद्ध इति। विषयत्ववत् स्ववृत्तित्वप्रकारकत्वमपि सामान्यसामग्रि-निर्वाह्यमेव कृतिसाध्यत्वोपायविषयादि तु कादाचित्कमित्यवधारणसामग्री कल्प्यते।

न च पाकादाविच्छाया मत्प्रकारकत्वे तदपि क्वाचित्कमिति वाच्यम्। पाकौमन्नस्य भवत्वित्यनुभवात्। इयांस्तु भेदः - यत् फलसाक्षादुपाधेयपरम्परया स्ववृत्तित्वं स्ववृत्तित्वप्रकारकत्वं च तद्वैशिष्ट्यावगाहित्वम्, अतो नाव्याप्तिः।

अत एव स्तनपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनत्वज्ञानस्यापि कल्पनं दृष्टानुरोधित्वात् कल्पनायाः।

ननु साधनत्वमिच्छाविरोधि तस्य सिद्धधर्मत्वात् वृष्ट्यादौ तत्साध्येष्टज्ञानादिच्छेति चेत्, न, निर्व्विशेषतयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात्। तदाऽसिद्धत्वंतदा सिद्धत्वञ्च नेच्छासाधनत्वयोः प्रयोजकमिति तथा न ज्ञायत एव।

यत्तु - कैश्चिदुक्तं फलोच्छायामपि न स्ववृत्तित्वं प्रकारः, उपायज्ञानस्य तदन्तर्भावसंभवेऽपि सुखादिज्ञानस्यातद्विषयत्वात्। तस्यैवेच्छाजनकत्वादज्ञाते च तदभावादिति तत्तुच्छम्। उक्तन्यायेनाज्ञातस्यापि स्वस्य विषयत्वात् स्ववृत्तितयेष्यत इत्याकारस्य तत्र सर्वसिद्धस्य साक्षित्वात्।

वस्तुतः सिद्धवधीरिति इच्छाहेतुः, तच्च स्वावृत्तित्वं स्ववृत्तिश्चेति द्विरूपेत्युक्तमतत्वं ज्ञातमेव न स्वतन्त्रेच्छाहेतुः, सिद्धत्वज्ञानस्य तदविरोधित्वापत्तेः। जनकज्ञानमिति न्यायात्।

न च बाधन्याय इच्छायाः सिद्धत्वज्ञानस्य विषयविरोधश्च वा इत्यन्यत्र विस्तरः।

कारणं सामग्रीमित्यर्थः।

अत एवेति। तेन कार्यतामात्रस्मारकमुपन्यस्तः। न्यायोऽपि वृद्धाप्रमाणवदिति न्यायादित्यर्थः। सिद्धधर्मत्वासिद्धत्वव्याप्यत्वात्। अन्यथावृत्तित्वस्यापि सिद्धधर्मितया कथमपि तत्रेच्छाभावापत्तेरिति भावः।

निर्विशेषितेति । एतच्च समाधिसौकर्यादुक्तम्। वस्तुतः साधनत्वमप्यसिद्धेत्येवान्यथा अनागतं सुखं कादाचित्कमुभदसिद्धम्। तथा च कादाचित्कत्वे न सहेतुकत्वानुमानं तत्रैव भज्येत।

न चेदानीं सहेतुकत्वं साध्यं विशेषितां सिद्धावस्थासाधनत्वेऽप्युपन्नमिति वाच्यम्। मयाप्यविशेषिततत्पूर्वस्वाभ्युपगमादिति ध्येयम्।

सिद्धेति। इदमपि समाधिसौलभ्यादेव। वस्तुतः कार्यत्वकारणत्वयोः समानसंवित्संवेद्यत्वादेव नेयं शंकापीति ध्येयम्।

यत्तु तत्साध्येष्टज्ञानाद्वृष्ट्यादाविच्छेति, तत्तुच्छं, असिद्धावस्थाद्वृष्ट्यादेरिष्टानुत्पत्तेस्तस्यावश्यं सिद्धत्वमवगन्तव्यमिच्छानुरोधित्वाच्चासिद्धत्वमिति, तत्रापि विरोध एव। वृष्टौ सत्यामिष्टं तया विना नेत्यन्वय-व्यतिरेकग्रहस्य वृष्टिसिद्धत्वमादाय दृष्टिनिरूपितेष्टसाध्यकत्वग्राहकत्वत्।

किञ्च चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थप्रतिपादकं 'मण्डलीं कुर्यादिति वाक्यं प्रमाणं स्यात् विषयाबाधात्।

एतेन नवीनमतमप्यपास्तं, परस्य हि कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधनताज्ञानानां ज्ञानं तथा आत्मन ओदनकामनावत्त्वेष्टसाधनताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात्, किन्तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव लाघवात्, यथा च साध्यत्व-साधनत्वयोरविरोधः अनागतस्य पाकादेः कृतिसाध्यताज्ञानञ्च तथोपपादितमेव ।

ननु इदं न युक्तम्, सुखत्वस्येव सिद्धस्यापि वृष्ट्यादेरवच्छेदकतया इच्छाविषयत्वसंभवात्। सुखत्वस्यैव वृष्टिसाध्यस्यापीच्छाप्रकारकत्वेन वृष्टिघटितस्यावच्छेदकत्वादिति, मैवम्। वृष्ट्यादेः स्वातन्त्र्येणापि तद्विषयत्वादस्तु मे वृष्ठिरित्याद्यभावात् । सुखं तु स्वातन्त्र्येण तद्विषयानानुभूयत इति तस्यावच्छेदकत्व ध्रौव्यादिति भावः।

नन्विष्ठसाधनातामात्रं तवापि स्वातन्त्र्यम्, अपि तु बलवदनिष्ठाननुबन्धित्वगर्भम्। तच्चान्योऽन्यात्यन्ताभावभेदेन भिन्नम्, उभयमपि विनिगमानाभावात्कारणां वाच्यम्। तथा चातिगौरवमिति तदपेक्षया स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वमेव लाघवादवच्छेदकमस्तु।

न च तवापि तल्लिंगविशेषणमिति समोऽनुयोगः अनुगतानामपि व्याप्यत्वेऽननुगतानामनुमितिजनकत्वे तत्तदनुमितीनां चोक्तरूपेणानुगमे दोषसामान्याभावादित्यरवरसादाह - **किं चेति**।

तत्प्रतिसन्धानजन्यत्वं ज्ञानगतं न लिङ्गप्रत्ययवाच्यम्। तथा चान्यत्रास्तु यथातथा। शब्दस्थले तत्प्रतिसन्धोनाक्षेपकाभावत् कृतिसाध्यत्वज्ञानं प्रवर्त्तकमपि प्रमाणं भवेद्विषयाबाधादित्यर्थः। इदमपि यथाश्रुतेन दूषणक्षमम्। तथा हि प्रमाणत्वं यद्यबाधितविषयत्वं तदा साध्यविशेषः, इष्टापत्तिश्च।

किञ्च परकृतिसाध्यत्वमज्ञात्वापि स्वकृतिसाध्येष्टसाधनताज्ञानात् स्वकल्पितलिप्यादौ यौवने कामोद्रेकात् सम्भोगादौ प्रवृत्तेश्च तदेव प्रवर्त्तकम्।

वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात् कथं कृत्या साधयामीतीच्छा सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात्। अथ सिद्धविषयादेव कृतिसाध्यताज्ञानात् असिद्धविषया कृतिसाध्यत्वेनेच्छा ज्ञायते इच्छाया असिद्धविषयत्वस्वभावत्वादेकप्रकारकत्वेन ज्ञान - चिकीर्षयोः कार्य्य - कारणभावो न त्वेकविषयत्वे सति गौरवात्, इच्छाया अनागतविषयत्वात् तस्य चाज्ञानात् तथात्वदर्शनात् सुखादीच्छायामप्येवमिति चेत्, न, असिद्धविषयेच्छानुरधेनानागतज्ञानोपायस्य दर्शितत्वात्।

अस्तु चैवं, तथापि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव व्यावर्त्तकमस्तु स्व-परकीयेष्टसाधनताज्ञान-फलकामनाज्ञानापेक्षया लघुत्वात् इष्टसाधनताज्ञानज्ञानस्य फलकामनाज्ञानस्य च हेतुत्वे मानाभावाच्च।

अथ प्रवर्त्तकत्वं तदोक्तप्रतिसन्धानजन्यज्ञाभाबावादेवापादकाभावः। स्वर्गकामादिनियोज्य-समभिव्याहारे इष्टापादनं चेति। यद्यपि यथापीष्टसाधनत्वं ज्ञानस्यातन्त्रत्वे जीवित्वादिप्रतिसन्धानसाधारण-स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वस्य नियामकस्य सन्ध्योपासनविधिसाधारण्य अहरहर्मण्डलं कुर्यादित्यादिविधेरुक्त-नियोज्यासमभिव्यावृतस्यापि प्रवर्त्तकत्वलक्षणं प्रामाण्यं त्वन्मते प्रसज्येत। तन्निष्फलेऽपि प्रवृत्त्या विषयबाधाभावादित्येतत् परोऽयं ग्रन्थः ।

ननु परकीयज्ञानादीनां न हेतुता, किं तु प्रकृतपुरुषविशेषणसजातीयविशेषणवत्त्वं स्वीयं प्रतिसन्धानं प्रवृत्ति हेतुरिति तदवच्छेदककोटिप्रविष्टमिति नोक्तगौरवं स्यादित्यरुचेराह - **किं चेति** ।

नन्विदमपि प्राक्भवी संस्कारात् यथा स्मृतिस्तथा चैत्रत्वादिना अमृतस्यापि सामान्यतः स्मर्यमाणसम्वन्धितया स्मृतमेवेति दूषणक्षमम्। लिप्यादौ तु व्यभिचार एव न तज्ज्ञातीयकर्तुदेर्शनादेवेत्यन्यं दोषमाह -- **वस्तुतस्त्विति** ।

स्वपरकीयेति । तदहेतुत्वेऽपि प्रजोजकतया तावद्ज्ञानराशिकल्पनागौरवमिति भावः।

नव्यास्तु स्वकृतिसाध्यताज्ञानमेव प्रवर्त्तकं तेन स्वकृत्यसाध्ये वृष्ट्यादौ कारीर्य्याञ्च कृषीबलस्य न प्रवृत्तिः।

न च सञ्जातबाधस्य विषभक्षणे प्रवृत्तिप्रसङ्गः, स्वकृतिसाध्यताज्ञानविषये इष्टत्वस्य स्वरूपसत्तः प्रवृत्तौ सहकारित्वात्।

न च सञ्जातबाधस्य विषभक्षणादाविच्छास्ति, इष्टसाधनत्वेनाज्ञानात् अतीतभोजनेऽप्यत एव न प्रवर्त्तते तृप्तेः सिद्धतया इच्छाविरहेण भोजने तदुपाधिकेष्टत्वाभावादतीततृप्ताविच्छा नास्तीति तत् साधनेऽपीष्टत्वाभावादेव न प्रवृत्तिः।

न चैवं पाके न प्रवर्त्तेत तस्य स्वरसत इष्टत्वाभावादिति वाच्यम्। इष्टसाधनत्वज्ञानेन तस्यापीष्टत्वात्। हन्तैवं प्राथमिकत्वादिष्टत्वार्थमवश्यापेक्षणीयत्वाञ्च कृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकीर्षाकारणमस्त्विति चेत्, न, इष्टसाधनत्वाभावेऽपि भोगे चिकीर्षासत्त्वात् तस्यां स्वकृतिसाध्यत्वज्ञाने सतीष्टत्वमेव कारणं न त्विष्टसाधनत्वं व्यभिचारात्। पाकादौ तदन्वय-व्यतिरेकावपीष्टत्वोपक्षोणौ, एवं भोगेऽपि प्रवर्त्तेतेति चेत्, न, इष्टसाधनतापक्षेऽपि मुक्तिरूपेष्टसाधने सुखे प्रवर्त्तेतेति तुल्यम्। सुखे चिकीर्षा भवत्येव कृतिस्तु न भवति कृतेः सिद्धवृत्त्यसिद्धक्रियाविषयत्वनियमादिति चेत्तुल्यम्।

तस्मात् स्वकृतिसाध्यत्वं विधिरिष्टत्वं सहकारीति, मैवं, इष्टसाधनताज्ञानस्योपायेच्छायां हेतुत्वावधारणात्तस्यास्तज्जन्यत्वनियमादिच्छायाः स्वविषयेच्छानुत्पादकत्वनियमाच्च।

ननु सिद्धौदनः कुतः पाके न प्रवर्त्तते, ओदनमात्रस्य सिद्धत्वेनेष्टत्वाभावात्।

अत एवातीतभोजनादौ न प्रवर्त्तते अतीततृष्णादाविच्छाविरहात्।

सामुद्रिकविदाख्याते भावियौवराज्ये भोगसाधने स्वकृतिसाध्यत्वे सतीष्टसाधनत्वज्ञानात् कुतो न प्रवर्त्तते, भाविराज्यस्यासिद्धत्वात् प्रवृत्तेः सिद्धविषयत्वनियमात् राज्योपायापरिचयाच्च।

इच्छाया इति। सुखेच्छायां न धारावाहिकत्वमिति छायामन्यस्य गौरवेण सामनविषयकेच्छा यदि च तयोः पौर्वापर्यं तदा तद्व्यापकसामग्रीबन्धनव्यवधानेन तदुभयानुभवस्थले चिकीर्षैव न स्यादिष्टत्वार्थं इष्टसाधनत्वज्ञानापेक्षयां तदनुभावकसामग्र्या कृतिसाध्यताधीविनाशादेवं तद्भावनिबन्धनसामग्र्याप्यस्येति नायं पन्था सिद्ध्यतीत्यनन्तरमिदानीमिति विशेषः।

ननु तत्परिचये च प्रवर्त्तत एव देवताराधनादाविति चेत्, न, सिद्धे चिकीर्षाविरहेण यागादावप्यप्रवृत्तिप्रसङ्गात् देवताराधनादेरप्यसिद्धत्वेन तत्राप्यप्रवृत्तिप्रसङ्गाच्च।

किञ्च राज्योपायापरिचये तत्र मा प्रवर्तिष्ट स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाने राज्ये प्रवृत्तिप्रसङ्गे किमायातम्। न हि कृतिसाध्येष्टसाधनत्वेन ज्ञानेऽपि तदुपायज्ञानं तत्र प्रवर्त्तकं, गौरवात् भिन्नविषयत्वाच्चेति चेत्, मैवं, यौवने हि तावत् प्रवर्त्तत एव राज्ये, बाल्ये तु राज्योपायमकृत्वा मत्कृत्येदानीं राज्यं न सिध्यतीति स्वकृत्यसाध्यताज्ञानादेव न प्रवर्त्तते यथा तण्डुलं विना पाके स्वकृत्यसाध्यताज्ञानात्, राज्योपाये तु स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाने देवताराधनादौ प्रवर्त्तत एव।

अत एव व्रीह्यवघातमकृत्वा पुरोडाशस्तमकृत्वा यागस्तमकृत्वाऽपूर्व्वं साधयितुं न शक्यत इति क्रमशोऽवघातादौ प्रवर्त्तते न युगपत् सिद्धत्त्यसिद्धक्रियाविषयस्वभावत्वात् प्रवृत्तेः यागानन्तरञ्च नापूर्व्वे प्रवर्त्तते। कृत्यन्तरं विनैव यागकृतितस्तत्सम्भवात्। इष्टसाधने चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं विशेषणं, न तु तज्ज्ञानाभावः कारणं, किन्तु तदेव विषयतया कारणतावच्छेदकं लाघवात् तेन मधु- विषसम्पृक्तान्नभोजने न प्रवृत्तिः, परेणापि प्रवृत्तिपूर्व्वं लिङ्गविशेषणत्वेन अन्यथा वा तज्ज्ञानविनियोगस्वीकारात्। एवञ्चाल्पायाससाध्यादि-ष्टोत्पत्तिसम्भवे वह्न्यायाससाध्ये न प्रवृत्तिः।

अत एव श्रुतस्वर्गफलकत्वेऽपि बहुवित्तव्ययायाससाध्ये ज्योतिष्टोमादौ फलभूमा कल्प्यते अन्यथाल्पायाससाध्यादेव स्वर्गसिद्धिसम्भवे तत्राप्रवृत्तौ अननुष्ठानलक्षणमप्रामाण्यं तद्विधेः स्यात्।

बलवदनिष्टाननुबन्धित्वञ्च न विशेषणं बहुवित्तव्ययायाससाध्यबहुतर-दुःखस्याप्यबलवत्त्वं क्वचिदल्पदुःखस्यापि बलवत्त्वं इत्यनुगतस्य तस्याभावात्।

न चेष्टापेक्षयानिष्टस्याधिकत्वं बलवत्त्वम्। तस्याप्युक्तातिरिक्तस्याननुगमात्।

इष्टेति। न च केवलसुखजनके प्रतियोग्यप्रसिद्धिरतस्तदधिकदुःखजनकत्वं प्रसिद्धम्। नातृचव्यत्यये नेष्टोत्पत्यनान्तरीयजनकत्वस्य विवक्षितत्वात्। न चाजनकत्वं जनकत्वात्यन्ताभाव-रूपजनकान्योऽन्याभावरूपं च। तथा च विनिगमकाभावात् सर्वत्रोभयहेतुतायामननुभवः प्रत्येकतोपि फलसिद्धेश्च । प्रत्येकहेतुतायामननुगम इति वाच्यम्। योग्यतावत्प्रत्येकहेतुत्वेऽपीष्टोत्पत्यनान्तरीयक दुःखजनकत्वज्ञानविरोधित्वनानुगमात्। अत एव परेणापीति तुल्यत्वमापादितम्। तत्रापि प्रत्येकव्याप्यत्वसंभवात्।

आस्तिकस्य निषिद्धत्वेन ज्ञातेऽपि प्रवृत्तिः राग-द्वेषयोरुत्कटत्वेन नरकसाधनत्वज्ञान-निरोधानात्।

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिः तद्भक्षणस्य तृप्तिरूपेष्टसाधनत्वात्।

न चासुराविद्यादिवत् पर्य्युदासलक्षणया विरोध्यनिष्टसाधनत्वबोधनं, नञोऽसमस्तत्वात् क्रियासङ्गतत्वेन प्रतिषेधवाचकत्वव्युत्पत्तेश्चेति चेत्,न, विशेष्यवति विशिष्टनिषेधस्य सविशेषणे हीति न्यायेन विशेषणनिषेधपर्य्यवसायितया कलञ्जभक्षणमिष्टोत्पत्तिनान्तरीयकदुःखातिरिक्त-दुःखसाधनमिति न कलञ्जं भक्षयेदित्यनेन बोधनात्।

इष्टसाधनतावाचकस्य विधेः सामान्यतो निषेधानुपपत्तेर्बलवदनिष्टाननुबन्धीष्टसाधनत्व-विशेषनिषेधतात्पर्य्यं, तथा चाशक्यविशेषनिषेधपरत्वं नञ इति कश्चित्। तन्न। यथा ह्ययोग्यतया सच्छिद्रं विहाय घटत्वेन तदितरान्वयो न तु छिद्रेतरत्वेन युगपद्वृत्तिद्वयविरोधात् तथात्रापि बलवदनिष्ठाननुबन्धित्वेनानुपस्थितौ कथं तन्निषेधः।

अस्तिकेति । ननु नरकसाधनताज्ञानविरोधिनमिति यथाश्रुतमन्वयबाधितं तस्येष्ठोत्यत्यनन्तरीय नरकजनकत्वेऽपि तद्जनकत्वज्ञानमेव तिरोधानं यदि तदस्य सिद्धं नरकं तदनन्तरीयकतया निषिद्धं च जानतः तथाज्ञानाभावात्। न च तद्ज्ञानवत इति विशेषणमेव नेति वाच्यम् । अनुभावदेवं च परकीयस्त्रीविशेषजन्य सुखविश्षणान्तरीयकतया नरकस्य तादृशस्थले प्रवृत्त्यापत्तेः । मैवम्। इष्टोत्पत्यनातरीयकत्वेन बलवद्वेषविषयत्वस्य विषभक्षणात्। न च नान्तरीयके बलवान् द्वेषो यथा च बलवत्त्वं विशेषणं तथोक्तमधस्तात् । बलवत्त्वं च प्रतिबन्धकतावच्छेदको जातिविशेषः संभवति प्रागन्धस्योत्कटरागतया नरकदुःखेष्वनुत्कटो द्वेष इति। एवं च द्वेषोत्कटतया निवृत्तिः, इछोत्कटतया च प्रवृत्तिरिति तदयं निर्गलितार्थः।

स्वरूपसद्बलवद्वेषविषयः दुःखजनकत्वे सति तादृशेच्छाविषयसाधनमिति ज्ञानं प्रवर्तकमित्येकत्रापि विषये पुरुषभेदसमयभेदाभ्यां द्वेषेच्छयोः जानिविशेषरूपौत्कट्यवशात् तदुक्तप्रतिज्ञानसत्त्वासत्त्वाभ्यां प्रवृत्त्यप्रवृत्तीति भावः।

श्येनेनाभिचरन् यजेतेत्यत्र कथं विधिप्रवृत्तिः हिंसाया बलवदनिष्टानुबन्धित्वात् इति चेत्, न, तत्र कृतिसाध्यत्वे सतीष्टसाधनत्वमेव योग्यतायान्वेति न तु बलवदनिष्टाननुबन्धित्वमपि अयोग्यत्वात्। निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टानुबन्धित्वावगमात्। अत एव विहितेऽपि श्येने विगानान्न तात्त्विकप्रवृत्तिः। राग-द्वेषयोरुत्कटत्वेनानिष्टानुबन्ध्यंशस्य तिरस्कारात् कस्यचित् प्रवृत्तिरित्येके।

अत्रैवं सति यद्यपि बलवदनिष्ठानुबन्धित्वज्ञानस्याभावो हेतुरिति युज्यते, न च तदभावज्ञानं प्रवृत्तिसामग्र्योः सत्प्रतिपक्षवत् साक्षाद्विरोधित्वात्। अन्यथा असत्प्रतिपक्षितत्त्वज्ञानस्यानुमितिहेतुतापत्तेः। साक्षादविरोधिन एव ज्ञानस्य जनकज्ञानविघटकतया प्रतिबन्धकत्वादुक्त्युक्त्या प्रतिबधकत्वध्रौव्ये तदभावहेतुत्वगौरवस्यापि सप्रमाणत्वात् तथात्येवमिष्टसाधनतामात्रस्य विधित्वे न कलञ्जमित्यादौ बाधापत्तेः। न च मीमांसकवन्न तदर्थमाख्यातान्वयस्तेन कलञ्जभक्षणाभाव इष्टसाधनमित्यन्वयमिति वाच्यम्। प्रत्ययाना प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः, विभक्त्यन्वयगर्भत्वनियमाच्च।

अन्वयस्येति । सिद्धान्तादननुबन्धित्वज्ञानं हेतुरिति।

अनेनेति । विशिष्टाभावरूपलिङ्गोत्थापनद्वारा न तु साक्षादशक्यत्वादित्यवधेयम्।

यद्यपि विशिष्टनिषेधेऽपि न विशेषणाभावसिद्धिः, किं त्वनुमानात् तत्सिद्धिरित्यत्रापि विशेषतात्पर्यात् तदनुमानसंभवस्यापि तात्पर्याविशिष्टाभावादनुमानं, तेन च विशेषणाभावानुमानगौरवान्नेदं युक्तमित्यत्र तात्पर्यम्, वस्तुतो विशिष्टस्य प्रवर्तकतया तत्रैव विधिपदशक्तौ विशिष्टनिषेध एव प्रकारो नान्य इति स्मर्तव्यम् ।

अयोग्यत्वादिति । न च पदार्थः पदार्थेनान्वेतीति व्युत्पत्तेः कथमेकदेशागिना इष्टसाधनत्वमात्रेणान्वय इति वाच्यम्। गौर्दव्यमित्यत्र विशेषणमात्रेणान्वयस्य विशेषणान्वयेऽपि दर्शनात्। न तु विशेष्यान्वये विशेषणमात्रेणापरपदार्थान्वयान्वितत्वेनोपस्थित्या निराकाङ्क्षत्वादित्युक्तव्युत्पत्तिविरोध-बीजत्वात् ।

अन्ये त्वभिचारस्य वैरिबधफलकत्वेन श्रुतत्वात् बधसाधनत्वेन श्येनो विधीयते न तु बधसाध्यनरकसाधनत्वेन नरकस्य फलत्वेनाश्रुतेः। न च जनकजनकस्य जनकत्वनियमः, कुम्भकारपितृपरम्परायाः कुम्भजनकत्वापत्तेः विधिनैव श्येनस्य बलवदनिष्ठाननुबन्धित्वबोधनाच्च।

न च श्येनस्य नरकाहेतुत्वे अपेक्षितवैरिबधहेतुत्वे वा अविगानेन प्रवृत्तिः स्यादिति वाच्यम्। श्येनाद्बधो बधाच्चावश्यं नरक इति प्रतिसन्धानेन विगानात्।

ननु श्येनोमरणफलकव्यापारत्वेन हिंसा सा च नरकजनिकेति चेत्, न, न हि साक्षात् - परम्परारणमरणफलकव्यापारो हिंसा, कूपादौ विनष्टे गवि तत्कर्त्तुर्गोबधकर्त्तृत्वापत्तेः बध्यस्यापि हन्तुर्मृत्युत्पादनद्वारेणात्महन्तृत्वप्रसङ्गाच्च।

न चेष्टसाधनत्वमेव विशेषणम्, तदननुबन्धित्वमेव विशेष्यमस्तु शक्तिविषय इति वाच्यम्। वृष्टीच्छायामिष्टसाधनत्वप्रकारकज्ञानस्य हेतुकल्पनात्। तद्विशेष्यक एव विशिष्टो लिङ्शक्तेरिति भावः।

केचित्तु - विशिष्टं न शक्यम्, किं तु प्रत्येकं कृतिसाध्यत्वप्रकारकज्ञानहेतुतया आख्यातत्वेन रूपेण कृतिशक्ततया कृतिसाध्यस्यापि पृथगेव शक्यत्वात्। तथा च तदंशे निषेधान्वयेन कोऽपि व्युत्पत्तिविरोध इति, तन्न। कृतिसाध्यत्वे बीजसंभवेन तथाभावेप्यत्र लाघवेन विशिष्टशक्तेः ।

वस्तुतः कृतिसाध्यत्ववैशिष्ट्यज्ञानत्वेनैव हेतुत्वात् तत्र विशिष्ट एव शक्तितत्वाख्यातत्वेन कृतिलिङ्शक्येति। तन्न, तथा सति लिङादिवद्विषयत्वेन कृतौ धात्वर्थान्वयो न साध्यत्वेन पृथग्व्युत्पत्तौ पृथक्छक्त्यावश्यकत्वादिति।

नन्वस्त्येव व्युत्पत्तिविरोधस्तदवछिन्नान्वयजनकत्वस्य पदानां निरूढत्वात्। गौर्दव्यमित्यत्रापि गोत्वे द्रव्यत्वानन्वयेऽपि गोत्वावच्छिन्नान्वयादिति अस्मिन् पक्षे अस्वरसमुद्भाव्य मतान्तरमाह - **अन्ये त्विति**। इहाप्यस्वरसोद्भावनं स्पुटम्। तद्बीजं तु बलवदनिष्टाननुबन्धित्वं न तदजनकत्वमात्रमिति प्रसङ्गादिति तदप्रयोकजकत्वं वाच्यम्। तथा च जनकजनकत्वेऽपि श्रुत्यर्थबाध इति । तथा चैकेऽन्ये चैवं वदन्ति। मम तु मते बलवद्द्वेषविषयत्वविवक्षया दोष एव नायमाशङ्कामारोहतीति हृदयम् ।

न हि अनुत्पादितमन्युः कश्चित् कमपि व्यापादयति, किन्त्वनुनिष्पादिमरणफलको व्यापारो हिंसा यदनन्तरं मरणं भवत्येव।

न च श्येनस्तथा, किन्तु खड्गहननादिकमेव। अथ मरणानुकूलव्यापारो मरणोद्देशेनानुष्ठीयमानो हिंसो श्येनश्च तथा कूपादौ च न मरणोद्देशेनानुष्ठीयमानत्वमिति चेत्, न। एवं सति गौरवात् मरणानुद्देशेन क्षिप्तनाराचाद्धतब्राह्मणे च हिंसा न स्यात्।

किञ्च हिनस्तिधात्वर्थे अवच्छेदकं फलमव्यवहितमेव मरणं अव्यवहितफलकस्यैव व्यापारस्य धातुवाच्यत्वात् । अन्यथा परम्परया विक्लित्तिफलकान्नकामेष्टतण्डुलक्रयादावपि पचतीति प्रसङ्गात्। एवं खड्गाभिघातानन्तरं यत्र विलम्बेन मरणं व्रणपाकपरम्परया वा अन्ने विषप्रयोगेण वा तत्र हन्तृत्वं प्रायश्चित्तादि च न स्यात् इति चेत्, न। प्रायश्चित्ततुल्यतार्थं हि तत्र हन्तृव्यपदेशो गौणः, विनिगमकञ्च लाघवमेव।

अभिचरन्निति । वैरिवधकामनाया नियोज्यविशेषणत्वेन यदा वैरिवधमिच्छेत् तदा श्येनेन यजेतेति वाक्यार्थः । तथा च न तत्कार्यमस्य तन्नरकदुःखं न बलवत्तदा तस्य उत्कटद्वेषाभावात् प्रबलवैरिवधरागवत्त्वात्। अत एव दैक्ष्यपश्वालम्भनवन्न सामान्यविशेषन्याय एकविषयकविधिनिषेधयोः तत्संभवादिहेतुवधस्याविधानादिति सर्वं सुस्थम्।

ननु श्येनस्य वैरिवधकल्पकत्वेऽपि वैरिवधत्वमस्त्येव। तथा च तद्दोषतादवस्थ्यमिति मनसिकृत्य शंकते - **नन्विति**।

किं त्विति । नचैवं खड्गघातेऽपि न हिंसा स्यात्, तस्याव्यवहितमरणफलकत्वाभावादिति वाच्यम्। अनुनिष्पाद्यव्यवहितं मरणफलं यस्य तादृशो व्यापारो यस्यति मध्यमपदलोपिसमासाश्रयणादिति भावः । वृणपाकपरं परामरणसंग्रहपक्षे अन्वित्यादिविशेषणध्रौव्ये सत्याह -- **गौरवादिति** ।

तत्संग्रहपक्षे तद्विशेषणाप्रवेशदोषान्तरमाह -- **मरणेति**।

कत्रेष्टापत्तौ दोषान्तस्माह -- **किं चेति**।

वस्तुतस्तु मरणोद्देशेन कृतेऽदृष्टाद्वारकस्तदनुकूलव्यापारो हिंसा श्येनश्चादृष्टद्वारा मरणसाधनमतो न हिंसा। यदि चादृष्टद्वारापि मरणसाधनं हिंसा स्यात् तदा सप्तमी तैलाभ्यङ्गस्यादृष्टद्वारा इष्टभार्य्याविनाशहेतुत्वादभ्यङ्गकर्त्तुर्हिंसकत्वापत्तिः।

अत एव कूपादौ गोमरणेऽपि न बधकर्तृत्वं तत्कर्त्तुः, गललाग्नान्नमरणे न भोक्तुर्न वा परिवेषयितुरात्महन्तृत्वं ब्रह्महन्तृत्वं वा व्रणपाकपरम्परया विलम्बेन विषप्रयोगेण च हन्तृत्वं मुख्यमेव न त्वनुनिष्पादिमरणफलकत्वं गललाग्नान्नमरणे स्वहन्तृत्वापत्तेः। अन्योद्देशेन क्षिप्तनाराचेन हते ब्राह्मणे ब्रह्महन्तृत्वं न स्यादिति चेत्, न, इष्टापत्तेः व्यपदेशस्तु गौणः प्रयोगो लक्षणायापि समर्थयितुं शक्यते तत्पक्षेऽतिप्रसङ्गो वारयितुं न शक्यत इतीदमेव विनिगमकम्।

अत एव अतदुद्देशेन कृतेऽपि निषिद्धे प्रायश्चित्तार्हमुक्तम्।

तथा च तत एवातिप्रसङ्गभङ्गे किमुद्देश्यपर्यन्तेनेति भावः। लाघवादनतिप्रसपादकत्वाच्च उद्देश्यगर्भमेव लक्षणं, न त्वव्यवधानगर्भमतिप्रसङ्गागादित्याह - **एवमिति**।

न प्रायश्चित्तेति । न चैवं श्येनस्य हिंसात्वे श्रुत्यर्थबाधतादवस्थ्यमेव निव्यूढमिति कथं पूर्वपक्षास्कन्द दति वाच्यम्। एतस्य वधकामकर्त्तव्यत्वेन श्रुत्या मरणोद्देशेन क्रियमाणत्वादिति भावः।

ननु मरणव्यापारकामनायामपि मरणकामनास्त्येव, अन्यथा स्वतो सुन्दरे तत्रैव कामनानुदयादिति श्येनस्य हिंसात्वमेव। न तग्रमित्यस्वरसादाह - **वस्तुतस्त्विति**।

यदि चेति । यद्यपि सप्तमीतैलाभ्यङ्गानुद्देशकृतश्चेत्तदा प्रथमविशेषणेनैव वारितः, यदि च तदुद्देशेन कृतस्तदा असंभवः। इष्टमरणस्यानुद्देश्यत्वात्।

श्योनतुल्यत्वादिति। न तदुपष्ठम्भेनादृष्टाद्वारकत्वं विशेषणम्, तथापि मरणानुकूलव्यापारमात्रम्। न हिंसेत्यस्य मरणानुकूलमात्रं नरकसाधनमित्यर्थः। अन्यथातिप्रसङ्गापादनस्यानुत्तरतापत्तेः। तथा चात्र नरकविशेषजनकताप्रयोजकं रूपमिह लक्ष्यते। तस्यैवात्र प्रकृतत्वात्।

अपरे तु अनभिसंहितनरान्तरव्यापारमद्वारीकृत्य मरणसाधनं हिंसा खड्गकारस्यानभिहित-नरान्तरव्यापारद्वारा मरणसाधनत्वं तस्य हि नरान्तरव्यापारो नाभिसंहितः किन्तु धनलाभ इति खड्गकारो न घातकः। विषस्यान्ने प्रक्षेपेण नरान्तरव्यापारो भोजनमेवाभिसंहितः अनेनेदं भोक्तव्यमित्यभिसन्धाय विषप्रयोगादिति हिंसैवान्ने विषप्रयोग इति। तन्न। गललग्नकवलाद्यत्र मरणं तत्र परिवेषयितुर्घातकतापातात् ।

न च तत्तदनुकूलव्यापारमात्रम् । उक्तव्यापारो हि नरकविशेषहेतुरनिच्छानिबन्धनेतिप्रसंगात् तत्रापि फलश्रवणात् तद्व्यापारकरेव तन्नरकविशेषयोगित्वात् । तर्काश्च तदिच्छापूर्वकतद्विषयकृतिमान् न तु कृतिमन्मात्रमतएव तत्र व्यपदेशो मत्तोभूत् न तु मया कृतमिति न तथाश्रुतदुर्दशापूर्वकत्वम्। तथा दृष्टाद्वारकत्वमप्यदृष्टद्वारककृते कर्तृत्वानिर्वाहकत्वादत एव घटभोक्ता न तत्कर्ता व्यपदिश्यते। तथा च नरकविशेषजनकताप्रयोजकं तद्व्यापारकर्तृत्वम्। अतः तत्कर्तृत्वप्रयोजकं रूपमिदमुक्तम् । अत एव भगवहेतस्तत्प्रवृत्तिनिमित्तं व्यापारमात्रं हिंसानरकविशेषजनकतायां च शब्दबलसिद्धम्। तत्तदनुगतमेव प्रयोजकमित्याह -- **तदनुसारितया**।

यद्यपि तमेवार्थमनुगतरुपेणाह -- एवं च तदनुरोधाद् दृष्टद्वाराकत्वे निरूढे सति श्येनेति तैलाभ्यङ्गे नातिप्रसङ्ग इत्याशयः। न तु सप्तमी तैलाभ्यङ्गवारणार्थमेव तद्विशेषण प्रवेश इति नोक्तदोषावकाशः।

वस्तुतः श्रुत्यर्थबाधभयेनैव श्येने वारणीये अदृष्टाद्वारकत्वं विशेषणमावश्यकमिति सप्तमीतैलाभ्यांगोऽवधारितोऽपि पुनर्वार्यते। न तु तद्वारणार्थमेव विशेषणदानम्, येन तद्वैयर्थं तदुपष्टम्भकत्वासंभवोऽपीति निगर्वः।

अनभिसंहितेति । श्येने तु नरान्तरस्य वैरिणो व्यापारो विशेषाकारेणाभिसंहितमेव द्वारमिति न तत्र प्रसङ्ग इति भावः।

अनेनेदं भोक्तव्यं इत्यभिसन्धाय परिवेषेणाद्भोक्तुरात्महन्तृत्वापत्तेश्च अनभिसंहितनरान्तर-व्यापारमद्वारीकृत्य मरणानुकूलान्नभक्षणानुष्ठानात्।

अत एवाव्यवहितप्राणवियोगफलको व्यापारो हिंसा व्रणपाकपरम्परया मृते तु हन्तृत्वं व्यापारस्याव्यवधायकत्वादिति निरस्तम्।

स्यादेतत् नेष्टसाधनता विधिः नित्ये सन्ध्योपासनादौ फलाभावात्। अथ नास्त्येव तत् नित्यं यत्रार्थवादादिकं विधिवाक्ये वा न फलं श्रुतमस्ति --

'सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ।।'
इत्याद्यर्थवादात्

'दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्'

इत्यादिविधिवाक्यश्रवणाच्च, कृत्वाचिन्तयातूच्यते, यत्र न फलश्रुतिस्तत्र विश्वजिन्न्यायात् स्वर्गः फलमिति चेत्, न, कामनोपाधिकार्य्यत्वेन यागवन्नित्यताभङ्गप्रसङ्गादहरहः श्रुत्या हि तत्कालजीविमात्रकृतिसाध्यं सन्ध्यावन्दनमवगतं, कामनोपाधिकार्य्यत्वे च यदा फलकामना नास्ति तदा तत्समय एव तत्कर्त्तव्यता न स्यात्, न हि तत्काले फलकामनावश्यम्भावः, प्रमाणाभावात्।

किञ्च प्रथमप्रवृत्तेतरनिरपेक्षाहरहः श्रुत्या जीविमात्रस्याधिकारोऽवगतस्तथा च तत्सापेक्षचरमप्रवृत्त्यर्थवादोपनीतफलकामस्य न तत्राविकारः प्रथमप्रवृत्ताहरहः श्रुतिविरोधान्नित्ये फलश्रुतेरर्थवादस्य च स्तुतौ तात्पर्य्यम्। अत एव प्रत्यवायपरिहारोऽपि न फलं तत्कामनोपाधिकार्य्यत्वे नित्यताक्षतेः।

नन्वभिसन्धानमयं व्यापरो मरणं जनयत्वित्येवमाकारकं तिक्कपरिवेषयितरि प्रसङ्ग इत्यरुचेर्दोषान्तरमाह -- **भोक्तुरिति** । नरान्तरव्यापारो नैव विशिष्टाभावसत्त्वादिति भावः।

अव्यवहितेति । पूर्वकालाव्यवधानमित्याह अन्यथासिद्धिप्रयोजकव्यवधानाभावोऽत एव व्यापारोऽप्युक्तमित्यपौनरुक्त्यम्। न तु संवलिताधिकारे अर्थवादबलात् सिद्धेरित्येव तदनुष्ठानमेव कामनावश्यंभावे प्रमाणं भविष्यतीति संवलताधिकारमेव दूषयति -- **किं चेति** ।

किञ्च नित्ये कर्त्तव्यताबोधनात् प्राक् न प्रत्यवाये प्रमाणमस्ति विधेः कर्त्तव्यत्वमवगम्य कर्त्तव्याकरणे प्रत्यवायकल्पनं, विधिश्च फलाभावेन प्रथमं मूक एव, एवञ्च प्रत्यवायप्रमितौ विधिप्रवृत्तिः तत्प्रवृत्तौ च कर्त्तव्याकरणे प्रत्यवायकल्पनं इत्यन्योन्याश्रयः।

अपरे तु न विधेः कर्त्तव्यत्वमवगम्य कर्त्तव्याकरणे प्रत्यवायकल्पनं येनान्योन्याश्रयः किन्तु निन्दार्थवादेन प्रायश्चित्तोपदेशेन चोपासनस्य प्रकृत्यर्थस्य तावद्व्यापारस्वरूपस्याभावः प्रत्यवायहेतुरवगतः, तथा च सन्ध्योपासनाभावः प्रत्यवायद्वारा दुःखसाधनं, तदभावः सन्ध्योपासनं दुःखसाधनाभावत्वेन फलं, प्रायश्चित्ते पापध्वंसवदिति तत्साधनत्वेन कृतिर्बोध्यते विधिना।

न चैवं प्रत्यवायपरिहार एव फलमस्त्विति वाच्यम्। परिहारस्य प्रागभावरूपत्वेन अनादितया असाध्यत्वात्। न च उपासनाकरणं प्रत्यवायहेतुर्नोपासनाभावः तथा च दुःखसाधनाभावत्वेन कृतिरिष्टा न तूपासनमिति वाच्यम्। निन्दार्थवादस्योभयत्र सत्त्वेन उभयस्यापि तथात्वादिति, तन्न, एवमपि काम्यत्वे नित्यताक्षतिप्रसङ्गात्।

प्रथमतो जीवमात्राधिकारप्रतीत्या निराकाङ्क्षत्वेन कामनाया अधिकारत्वेनानन्वयात् यथाङ्गानां फलश्रुतिः श्रुतिमात्रं तथेहापि। तत्रापि हि जुद्वज्जुहोति इत्यत्र जुहुमात्रस्य निरपेक्षितायाङ्गत्वेनान्वये यस्य पर्णमयी जुहुर्भवति न स पापं श्लोकं शृणातीत्यर्थवादोपस्थितफलानन्वयो नाकाङ्क्षत्वादिति बीजम्, तद्वदिहापि अन्यथा तत्रप्यत्रैव फलान्वयापत्तेरिति भावः।

ननु प्रत्यवायो मे स्यादकारण इत्यभिसन्धायैव प्रवृत्ते स्तनप्रतिसन्धौ नित्यं तत्करणं नास्त्येवेति इष्टापत्तिरिति दोषान्तरमाह-- **किं चेति।** निन्दार्थवादने विनिन्दार्थवादोपस्थापिततद्विषयत्वलक्षणलिङ्गेन प्रायश्चित्तेति सन्ध्योपासनभावे प्रायश्चित्तमिति शब्दात्प्रतीते सति प्रायश्चित्तपदार्थालोचने च क्रियमाणे प्रायः पापं विजातीयान् चित्तं तस्य विशेधनमिति तदर्थसङ्केतग्राहकार्थवादप्रवृत्तौ पापनाशककर्मप्राप्तौ पापस्य हेत्वाकाङ्क्षायामुपस्थितसन्ध्यावन्दनभावस्य हेतुताग्रह इति भावः।

किञ्च 'अकुर्व्वन् विहितं कर्म्मेत्यादिना 'नोपास्ते यश्च पश्चिमामित्यादिना च कारणाभावस्यैव प्रत्यवायहेतुत्वं बोध्यते न तु तद्विषयाभावस्य, अन्यथा अकर्त्तुः प्रत्यवाये। नान्यस्येति कथं स्यात् विषयाभावस्य साधारण्यात्।

वस्तुतस्तु कृतिसाध्यत्वे सतीष्टसाधनताज्ञानं प्रवर्त्तकत्वेन निर्व्यूढम्। न च कृतौ कृतिसाध्यत्वमस्तीत्यतो न किञ्चिदेतत्।

नव्यास्तु नित्यापूर्व्वप्रागभावो दुरितद्वारा दुःखसाधनं तदभावोऽपूर्व्वं दुःखसाधनाभावत्वेनेष्टं तत्साधनत्वेन कृतिसाध्यत्वेन च सन्ध्योपासनं विधीयते इति, तन्न, निन्दार्थवादादिना सन्ध्योपासनाभावस्तदकरणं वा प्रत्यवायहेतुरवगतो न त्वपूर्वाभावः प्रथमं प्रमाणाभावेन तदनुपस्थितेः विधेः इष्टसाधनत्वबोधकत्वात् परिशेषेणापूर्वमिष्टं कल्प्यत इति चेत्, तर्हि विश्वजिन्न्यायेन स्वर्ग एव फलं कल्प्यतां काम्यत्वस्य त्वयापि स्वीकारात्, किञ्च विधिप्रवृत्तावपूर्वज्ञानं अपूर्वज्ञाने च विधिप्रवृत्तिरित्यन्योन्याश्रयः।

यावन्नित्य नैमित्तिकनिर्वाहस्य तदाश्रमविहितकर्मणां सम्यक् परिपालनस्य च ब्रह्मलोकावाप्तिः फलं श्रूयते, तथा च नित्यस्य सफलत्वमिति केचित्। तन्न। तस्य विधेर्नित्यविधिमुपजीव्य प्रवृत्तिस्तस्य च फलाभावेन प्रथमं मूकत्वात्, अन्यथा परस्परसापेक्षत्वेनान्योन्याश्रयः तस्मात् कार्य्यतैव विधिः।

उक्तयुक्त्या नित्यताक्षतिर्न दोषायेति दोषान्तरमाह -- **किं चेति** ।

नोपास्त इति। आख्यातस्य कृतिवाचकत्वेनोपासनविषयकयत्नवानित्यर्थः।

ननु कृतिविषयीभूतोपासनाभावो हेतुर्नोपासनाभावमात्रम्, तत्कुतः साधरणामिप्यरुचेराह -- **वस्तुत** इति । विशिष्टाभावोऽप्युपासनाकृतिविषयत्वरूपविशेषणाभावपर्यवसन्न इति विवक्षितविवेकेन कृतिविषयत्वं दुःखसाधनाभावतया इष्टं पर्यवसन्नम्।

न च तत्साधनत्वं कृतेरिति दूषणं स्फुटत्वादुपेक्ष्य कृतिसाध्यत्वानन्वयित्वमेवोक्तमिति भावः। वस्तुतो विधिप्रवृत्तिं विनोपासनात्मकव्यापारविशेषो दुष्परिचयः। अत एव पापाभावो न फलमिति। तथा चान्योऽन्याश्रय इति ज्ञातव्यम्।

ननु नित्ये वेदात् कार्य्यताज्ञानेऽपि प्रयोजनज्ञानं विना कथं प्रवृत्तिः, न हि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्त्तते इति चेत्, न, नित्ये फलबाधेन प्रवृत्तिमात्रे प्रयोजनज्ञानस्याप्रयोजकत्वात्, काम्येऽपि प्रयोजकज्ञानं न साक्षात् प्रवर्त्तकं उपायाविषयत्वात् प्रयोजनेऽप्रवृत्तेश्च, किन्त्विष्टसाधनताज्ञानद्वारा कार्य्यताज्ञाने उपक्षीणमेव, कथमयं निश्चयः नित्ये इष्टसाधनताज्ञानासम्भवात् कार्य्यताज्ञानस्य वेदादपि सम्भवात्। ननु निष्फले दुःखैकफले वा प्रेक्षावतां कथं प्रवृत्तिः, वेदाधीनकार्यत्ताज्ञानसत्त्वात् सफलप्रवृत्तावपि तस्यैव तन्त्रत्वात्।

यत्तु लौकिके निष्फले दुःखैकफले वा न प्रवर्त्तते तदिष्टसाधनतालिङ्गकस्य कार्य्यताज्ञानस्य वेदाधीनस्य वा अभावात्। न च दुःखैकफलत्वज्ञानं प्रवृत्तिप्रतिबन्धकं, सति कार्य्यताज्ञाने तस्य प्रतिबन्धकत्वादर्शनात्।

अथ वा काम्ये लिङ्गोऽपूर्ववाचकत्वान्नित्येऽपि लिङ्गोपासनादिविषयकमपूर्वं बोध्यते, तच्च निष्फलमपि स्वत एव सुखवत्प्रयोजनं नित्यमभ्यर्थ्यमानञ्चेति।

उच्यते। सर्वत्र नित्ये फलश्रवणाज्जीविफलकामस्य सम्बलिताधिकारः यथोपरागे नैमित्तिकं स्नान-आङ्गादि फलश्रुतेः काम्यं अकरणे प्रायश्चित्तादिश्रुतेश्च नियतकर्त्तव्यताकम्, यथा वा षोडशश्राद्धस्य प्रेतत्वविमुक्तिकामनाश्रुतेः प्रेतत्वविमुक्तिहेतुषोडशश्राद्धे सङ्कल्पं विधाय महाजननामाचारात् काम्यत्वं निन्दार्थवादेनाकरणे प्रत्यवायश्रुतेरवश्यकर्त्तव्यत्वं तथा सन्ध्योपासनमपि फलश्रुतेः काम्यं अकरणे नरकश्रुतेः प्रायश्चित्तोपदेशाच्च नियतकर्त्तव्यताकम्।

यत्तु यागे काम्यत्वेऽपि न नियतकर्त्तव्यताकत्वं तदकरणे प्रायश्चित्तानुपदेशात्।

ननु यदि निष्फले फलज्ञानाभावेन मनःप्रवृत्यभावः, किं तु कार्यताज्ञानाभावेन तदा मण्डलीकरणादौ जलताडनादौ च दुःखैकफलतयाज्ञातोऽप्यापातोदीरितशब्दविशेषजन्यकार्यताज्ञानात् प्रवृत्त्यापत्तिरिति नित्येऽपि फलमाह -- **अथ वेति**।

नन्वपूर्वस्यापि कामनावश्येभावे स्वर्गादिनार्थवादिकेन किमपराद्धम्। येन तदुपस्थित-मुपेक्ष्यानुपस्थितमपूर्वफलं कल्प्यते । अथ नियमतस्तत्र न कामना, तर्हि तवापि नित्यताक्षतिस्तत्र तुल्येत्यत आह -- **नित्यमिति** ।

न च नित्ये फलकामनाया असम्भवः, त्रिकालकाम्यस्तवपाठवत् नित्ये फलकामनामसम्भवात्। यत्तु प्रथमप्रवृत्ताहरहःश्रुत्या तत्कालजीविमात्रस्याधिकारबोधनात् न फलकामस्याधिकार इति, तन्न, अहरहः श्रुत्यर्थवादयोः प्रथमगृहीतैकवाक्यताबलेन तत्कालजीविफलकामस्य सम्बलिताधिकारात् अर्थवादोपस्थितफलान्वयं विनैकवाक्यताभङ्गात्।

न चार्थवादस्य स्तुतिपरत्वान्नैकवाक्यता, बाधकं विना स्वार्थापरित्यागात् विधिवाक्योपस्थिते फले विधिवाक्यस्थ फलमादायौवाहरहः श्रुत्या कार्य्यताबोधनात्।

नन्वेवं तत्कालजीविकामिनोऽधिकारे यदा फलकामनाविरहस्तदा अशुचेरिवाधिकाराभावान्नियतकर्त्तव्यता न स्यात् अधिकृताकरणे प्रत्यवायो न त्करणमात्र इति चेत्, न, नैमित्तिकेऽपि तत्काले कस्यचित्कामनाविरहिणोऽनियतकर्त्तव्यतापत्तेः।

अथापवादभावेनौत्सर्गिकी फलकामनास्त्येव फलज्ञानस्य सवविषयकेच्छाजनकस्वभावत्वात् यस्य तु मुमुक्षापवादेन फलान्तरे कामना नास्ति तस्याकरणेऽपि न प्रत्यवाय इति न तन्नियतकर्त्तव्यताकत्वं नैमित्तिके तथा नित्येऽपि मुमुक्षया फलकामनाबाधेनाकरणेऽपि न प्रत्यवाय इति तुल्यम्।

धर्मिग्राहकमानेन नियतेच्छाविषयत्वेनैव तत्सिद्धम्। न तु स्वर्गादि तदर्थमिति भावः।

जीवंति प्रयोजनज्ञानस्य प्रवर्तकतया जीविमात्रस्याधिकारसंभवाद्विशिष्टोऽधिकारः इष्टसाधनत्वस्य विधित्वादन्यथोक्तम्। मण्डलीकरणादिव्यभिचारस्य दुर्वात्वात्। अत एव नानाकाङ्क्षतया फलनन्वयः। इष्टसाधनत्वस्य सामान्यतः प्रतीतस्य विशेषसाकाङ्क्षत्वात्। अन्यथा विश्वजिन्न्यायेऽपि का गतिः ।

यत्तु अङ्गवत् फलश्रुतिरर्थवादमात्रमिति, तन्न। वैषम्यात्। तथा च जुह्वामपि प्रधानमफलेन फलवत्तया फलान्तरनिराकाङ्क्षत्वात्। अत एव यत्र फलान्तरवत्वेन प्रगुपस्थितिस्तत्र प्रधानफलस्यैवानाकाङ्क्षतया अन्वयेनाङ्गत्वम्। किं तु प्रधानत्वमेव। इदमेव यागप्रधानभावबीजं यत्फलान्तरसंभवासंभवाविति।

किञ्चार्थवादोपस्थितफलोपाधिकर्त्तव्यत्वेऽवगते 'अकुर्वन् विहितं कर्मेत्यादिवाक्याच्छौचे सति सन्ध्याब्धनाकरणे निन्दार्थवादेन च नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायः कल्प्यते तत्फलकामनाविरहेऽपि प्रत्यवायपरिहारार्थं नियमतः प्रवर्त्तते विधिप्रवृत्त्यनन्तरं प्रत्यवायस्य प्रामाणिकत्वात् अकरणोन्मुखस्य' कारणेन प्रत्यवायप्रागभावस्य साध्यत्वात्, नैमित्तिके फलोपाधिकर्त्तव्यत्वे कामनाविरहेऽपि नियतकर्त्तव्यतावत्।

यत्तु निष्फलेऽपि नित्ये वेदाधीनकार्य्यताज्ञानात् प्रवर्त्तत इति, तन्न, दुःखैकफलत्वेन ज्ञायमाने प्रेक्षावतां कृतेरनुत्पादनियमात् अयोग्यतया नित्ये कृतिसाध्यत्वस्य बोधयितुमशक्यत्वात्। अत एव सन्ध्योपासनमफलमपि क्रियते वेदबोधितकर्त्तव्यताकत्वादित्याशङ्क्य गुरुमतमेतन्न गुरोर्मतमित्यभिप्रायेणोपेक्षितवानाचार्य्यः।

यत्तु पाण्डापूर्वं स्वत एव प्रयोजनं इत्युक्तं, तदपि न, एवं तवापि काम्यत्वे नित्यत्वहान्यापत्तेः।

वस्तुतस्तु पूर्ववर्तितया नियतस्य यन्त्राङ्गत्वं तदन्यथासिद्धत्वेन कारणत्वस्याङ्गतया तत्प्रविष्टांशद्वयस्य नियमेनाङ्गतापत्तेः। अन्यथासिद्धिषु परिशेष्यादन्त्यं प्रति पूर्ववर्त्तित्वग्रह इत्यसावेववाच्या। तथा च प्रधानफलपूर्ववर्तित्वे प्राग्गृहीते न फलान्तरं प्रत्यनन्यथासिद्धत्वमिति न तज्जनकत्वमतोऽङ्गत्वं तदेव प्रतिपूर्ववर्त्तित्वे प्रधानफलं प्रत्येव नान्यथासिद्धत्वमिति नाङ्गत्वम्।

न चैतत् तथा। सामान्यतः प्राप्तेषु विशेषाकाङ्क्षायामश्वमेधादीनामिव अर्थवादिकफलोपस्थितौ संवलिताधिकारात् दर्शादौ तत्तत्कालजीवनसंवलनेन कामनाया अधिकारत्वादिति भावः।

न चैकस्य द्वैरूप्यमदृष्टचरमिति दृष्टान्तेनाह -- **यथेति** ।

यदि तत्र कर्मद्वयमेव तन्त्रेणोपपत्तिरिति ब्रूयात् तदा अदृष्टान्तान्तरमाह -- **यथा चेति** ।

न चात्रापि श्राद्धद्वयमकृतयादृशश्राद्धस्य श्राद्धान्तरानधिकारादिति भावः।

मुमुक्षोरपि यवन्नित्यनैमित्तिकानुष्ठानादित्यस्वरसादाह -- **किं चेति**।

किञ्च सुखं दुःखाभावश्च मुख्यं प्रयोजनं तत्साधनञ्च गौणं नित्यूपूर्वन्तु तेषु नैकमपि पण्डापूर्वत्वात्, काम्यापूर्वञ्च सुखहेतुर्गौणं प्रयोजनम्। प्रवर्त्तकविध्यनुरोधेन तदपि प्रवर्त्तकं कल्प्यत इति चेत्। न। प्रवर्तनीयेन लोकेन तस्य प्रयोजनत्वेनाज्ञानात् गुरुणा नित्यापूर्वं प्रयोजनमुक्तं इत्युच्यमानेऽपि नादरः प्रक्षावताम्। मुक्ति-स्वर्गौ चालौकिकावपि सुख-दुःखाभावसजातीयतया प्रयोजने, तस्मादेवं वदन् गुरुरपि लघुरेव। तदयं सङ्क्षेपः नित्ये दुःखैकफलत्वेन प्रवृत्त्यनुपपत्तेः फलोपाधिकर्त्तव्यता तच्च फलं दुःखसाधनाभावाः पाण्डापूर्वं वेति तदिच्छा प्रवृत्त्यर्थं प्रत्यहमुपेया तां विना प्रवृत्त्यनुपपत्तेः, तथाचार्थवादिकं विधिवाक्यश्रुतञ्च फलमस्तु कृतमन्येन।

न च कामाविरहे नियतकर्त्तव्यता न स्यात्, अपूर्वादीच्छाविरहेऽपि तुल्यत्वात्, प्रत्यवायपरिहारार्थं नियमतः प्रवृत्तिस्तुल्यैव। यत्र च न फलश्रुतिस्तत्र विश्वजन्न्याय इति।

नन्विदमिष्टसाधनमिति ज्ञानादेतत्साध्यमिष्टमिति ज्ञानाच्च प्रवृत्तिदर्शनात् प्रथमस्यैव प्रवर्त्तकत्वे किं विनिगमकं, उच्यते, फलेच्छायां स्वविषयविशेष्यकज्ञानस्य हेतुत्वेन क्लृप्तत्वात् उपायचिकीर्षापि बाधकं विना तथा।

वस्तुतस्तु कृतिसाध्ययागस्य साध्य इष्ट इति ज्ञानस्य प्रवर्त्तकत्वे यजेतेति पदात् प्रथमं कृतिसाध्यो याग इति ज्ञानं ततः कृतिसाध्ययागस्य साध्य इष्ट इति ज्ञानं विशेषणज्ञानसाध्यत्वात् विशिष्टज्ञानस्येति ज्ञानद्वयं तव, मम तु यागः कृतिसाध्य इष्टसाधनमित्येकमेव ज्ञानम्।

यदि संवलिताधिकारं बूयात् तद्दूषणं ब्रूमोऽधिकारयोः संवलनं तथा चाधिकाराभ्यामन्यतरेणाप्यधिकृतस्याकारणं पापहेतुरिति भावः। यद्वा अकरणमात्रं न तत्र तन्त्रम्, अपि अधिकृताकरणमित्यपि श्रौतोऽर्थः। तथा च संवलिताधिकारत्वे कुर्वन्विहितमित्यादावप्रसक्तप्रतिषेधापत्तिः।

न हि समर्थस्य फलकामस्याकरणं प्रसक्तं येन पापहेतुत्वप्रतिपादनेन तन्निवार्येत। तथा चाधिकारैकदैशवतः फलकामनाविरहेऽपि करणाभावे पापमिति तत्तात्पर्यान्नयनादनधिकृतकरणमपि प्रत्यवायोत्पत्तौ तन्त्रमिति, न। नित्यवदनुष्टानभङ्ग इति भावः।

नन्वेवं शब्दस्थले उक्तानुपपत्तेरस्तु लिङ् इष्टसाधनताशक्या। न तु तेन रूपेण प्रवर्तकत्वम्, गौरवात्। अपि तु लाघवादिष्टप्रतियोगिकहेतुताविषयकज्ञानत्वेन । तच्च विशेषणविशेष्यभावभेदेऽप्यक्षतम्।

न च कृतिसाध्यत्वं यागे बोधयित्वा कृतिसाध्ययागस्य साध्य इष्ट इति लिङा बोधयितुं शक्यमपि, एकस्वार्थान्वयमपरपदार्थे बोधयित्वा तदन्वितापरस्वार्थान्वयबोधकत्वस्य पदेऽव्युत्पत्तेः यजिपदे च कृत्या सह यागान्वयं बोधयित्वा पर्य्यवसिते पुनः स्वार्थान्वयबोधकत्वे आवृत्तिप्रसङ्गः।

अथ साध्यमिष्टं यस्येति साध्येष्टकत्वं शक्यं, तथा च बहुव्रीह्यर्थापेक्षया इष्टस्य साधनमिति षष्ठ्यर्थस्य लघुत्वात्तदेव शक्यम्।

किञ्च तत्साध्यत्वं न नियमतस्तदुत्तरसत्त्वं दण्डसाध्ये घटे व्यभिचारात्, नापि तदवच्छिन्नक्षणोत्तरक्षण एव सत्त्वं एवकारव्यवच्छेद्यतदनुत्तरसमयस्याकाशेऽप्रसिद्धेः शब्दस्य तदसाध्यत्वापत्तेः।

अत एव न तदभावव्यापकाभावप्रतियोगित्वं रूपे रससाध्यत्वापत्तेश्च। नापि तदवधिकोत्तरत्वव्याप्यसमयसम्बन्धः, उत्तरत्वव्याप्यत्वं ह्युत्तरत्वानधिकरणकालावृत्तित्वं तच्चाकाशेऽप्रसिद्धं गुरुतरञ्च। तस्मात् तत्साधनकत्वमेव तत्साध्यत्वं, एवञ्च लाघवात् तत्साधनत्वज्ञानमेव प्रवर्त्तकं न तु तत्साधनकत्वज्ञानमिति। स्यादेतत्, इष्टत्वज्ञानस्य प्रवर्त्तकत्वे तृप्तोऽपि भोजने प्रवर्त्तेत मनसा तृप्तेरिष्टत्वज्ञानात्।

अथ स्वरूपसत्यपि फलेच्छा कारणं सा च सिद्धतया तृप्तौ नास्तीति चेत्, तर्हि हन्तैवमावश्यकत्वात् फलेच्छैव कारणं न तु तज्ज्ञानं गौरवात्।

किञ्च इच्छाज्ञानस्य कारणत्वे इच्छाकारणं न स्यात् स्वज्ञानेन तन्नाशात् इच्छातज्ज्ञानधाराकल्पनेऽनवस्थानात्।

तथा च शब्दस्थले इष्टसाधनता ज्ञानादेवान्यत्र द्विरूपादपि प्रवृत्तिरास्तामित्यरुचेराह-- **किं चेति** ।

इदमपि तेन रूपेण जनकत्वे यदि सामान्येन रूपेण, तदपि तदा न दोष इत्यवधेयमिति भावः।

अथ इष्टसाधनत्वशक्तेन लिङ्पदेनेष्टत्वज्ञानसावश्यकत्वात् तस्मिन् सत्यपि प्रवृत्त्यभावे नेच्छापि कारणमस्त्वित्यत आह -- **किं चेति**।

अपि चेच्छाविषयः सुखं इति ज्ञानं न मानसं सुखस्यासिद्धतया तद्विशेष्यकसाक्षात्कारस्य तत्सन्निकर्षं विना अभावात्, ओदनादावपीष्टत्वज्ञानं न सम्भवति मनसोवहिरस्वातन्त्र्यात्।

नापि चक्षुरादिना ज्ञातः कृत इतिवत् इष्टत्वज्ञानं, तत्र विशेष्यसन्निकर्षात्।

वस्तुतस्तु इष्टस्य विशिष्य सुखत्वादिना अज्ञाने याग-पाकादाविष्टसाधनताज्ञानेप्य-प्रवृत्तिप्रसङ्गः इष्टस्याल्पाधिकभावेन नानाप्रकारत्वेन च विशिष्यानध्यवासायात्।

न चेष्टविषयतावच्छेदकसुखत्वादेरुपलक्षणमिष्टत्वं, सुख-दुःखाभाव-तत्साधनेषु अनुगतस्योपलक्ष्यस्याभावेनाननुगमादिति। उच्यते। यत्रेच्छा तत्साधनताज्ञानमेव लोकवेदसाधारणं प्रवर्तकं तेषां सुख-दुःखाभाव-तत्साधनत्वेनेच्छाविषयाणां अननुगतानामपि वस्तुसदिच्छाविषयत्व-मेवानुगमकं एवं यदा सुखादाविच्छा भवति स्वकृतिसाध्यत्वे सति सुखादिसाधनमिति ज्ञानं तदा पाकादौ प्रवर्त्तते।

नन्विछायाः स्वज्ञानं व्यापारोऽस्त्विति्यरुचेराह -- **अपि चेति**।

ननु सुखस्येष्ठत्वज्ञानाभावो न क्षतिकरः, तत्साधनस्यौदनस्यासिद्धत्वेन प्रवृत्त्यगोचरत्वात्। ओदनस्य इष्टत्वाज्ञानं मृग्यते । तदुपाये पाके प्रवृत्तेश्च संभवत्येवेत्यत आह -- **ओदनेति** ।

तत्रेति । इहत्वसिद्धतयौदनस्य तदभावात् ।

नन्वोदनं सुखं चेच्छामीत्यनुव्यवसायेन तद्विषयत्वमिच्छायां गृहीतं तुल्यवित्तिवेद्यतया तद्विषयत्वमपि सुखौदनादौ गृहीतमित्यरुचोराह -- **वस्तुत** इति।

वस्तुसदिति। न चेदमसंभवि, इष्टसाधनताज्ञानफलेच्छातद्विषयप्रत्यक्षाणां प्रवृत्तिहेतुत्वात्।

न चैतेषामात्मविशेषगुणानां सह संभव इति वाच्यम्। इच्छोत्पत्त्यनन्तरं तद्विरोध्यनुत्पादसमयावच्छिन्नत्वस्यैव स्वरूपसदिच्छाविषयत्वेन विवक्षितत्वादिति भावः।

नन्वेवं प्रवर्त्तकज्ञानविषयस्य नानात्वेन तच्छक्तस्य विधिप्रत्ययस्य नानार्थत्वप्रसङ्ग इति चेत्, न, सुखत्वादिनाननुगतं इष्टत्वेनानुगतं फलं प्रति साधनत्वस्य यागादेर्लिङादिना बोधनात्, तथा च फलानामनुगमार्थं फलेच्छा शक्या न त्विच्छाज्ञानकारणत्वेन।

अथैवं सुखादिसाधनत्वेन ज्ञानं प्रवर्त्तकं तन्न शक्यं अननुगमात्, यच्च शक्यमिष्टसाधनत्वं तज्ज्ञानं न प्रवर्त्तकं इति विधेः प्रवर्त्तकता न स्यात् इति चेत्, साक्षादेवमेव किन्त्विष्टसाधनं याग इति लिङा बोधिते इष्टाकाङ्क्षायां काम्यत्वेन श्रुतः स्वर्ग एव इष्टत्वेनावगम्यते, तदनन्तरं स्वर्गकामपदसमभिव्याहारात् स्वर्गसाधनं याग इति ज्ञानं प्रवर्त्तकमुत्पद्यते।

तदनन्तरमिति । स्वर्गस्य कामनाविषयत्वेनोपस्थितस्यासिद्धत्वेनोपस्थित्या लिङ्बोध्येष्टेन सहाभेदान्वयस्वरूपेष्टसाधनमित्यन्वयः स्यादित्युत्तरकाले महावाक्यार्थं ज्ञानरूपं शाब्दं ज्ञानमुत्पाद्यते।

न च विधिजन्येत्यादिविरोधः। विधिजन्यं धात्वाख्यातार्थान्वयज्ञानरूपमवान्तरवाक्यार्थज्ञानं तज्जन्यमुक्तरूपमहावाक्यार्थज्ञानं प्रवर्त्तकमित्येतत्परत्वात् तस्येति भावः।

यदिष्टस्य पदार्थैकदेशतया स्वर्गस्य चान्यान्वितित्वेनानाकाङ्क्षतया नैवमन्वयः, तदा तज्जन्यमानुमानिकं मानसं वा ज्ञानं प्रवर्त्तकमिति तदर्थोऽयमवसेयः। तस्य विधिजन्यशाब्दधीजन्यत्वात् न वयं त्वित्यादिना अनुमानमाशङ्क्य तन्निषेधप्रतिपादनविरोधः। स्वांशानुरोधेनानुमानावश्यकत्व-निराकरणपरत्वात् तस्येति सर्वं सुस्थम्।

अन्ये त्वित्यस्वरसोद्भावनम्। तद्बीजं तु विश्वजिन्न्यायादीनामनवतारसाधनत्वमत्रे प्रतीते साध्यान्तरस्यापि संभवात्।

न च प्रवर्तकत्वतात्पर्यग्रहादन्यस्य बाधात् स्वर्ग एव साध्य इति वाच्यम्। तर्हि प्रवर्त्तकतात्पर्यग्रहादिष्टसाधनत्वमेवाक्षिप्यताम्, कृतं साधनत्वांशेऽपि शक्तया अविधिप्रत्ययेन विना तत्सार्थकत्वेन च विना तदेव दुर्ग्रहम्। तदा तदिष्टसाधनत्वमेवार्थोऽस्तु। प्रवृत्तिबलेन विशिष्ट एव प्राक् शक्तिग्रहात् । तथा च प्राथमिकशक्तिग्रहानुरोधश्चेत् विशिष्टमेव शक्यम्, अग्रेऽन्यथासिद्धिश्चेत् साधनत्वेऽपीत्यादि।

एवञ्च विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्त्तकम्।

यत्तु सर्वेषामेव विधेर्न साक्षात् प्रवर्त्तकत्वं विधिबोधकात् स्वकृतिसाध्यत्वादेरनवगमात्, स्वेष्टसाधनत्वञ्च अहं इष्टसाधनयागकः स्वर्गकामत्वाद्दर्शवाक्यावगतस्वर्गकामवदित्यनन्तरमर्थात् प्रतीयते। तन्न। यथेच्छा तत्साधनमिति शाब्दज्ञानादेव प्रवृत्त्युपपत्तेस्तत्प्रतीतिर्निष्फला।

अन्ये तु साधनत्वमात्रं विध्यर्थः, स्वर्गादिसाधनतालाभस्तु समभिव्याहारात् इष्टसाधनतापक्षेऽपि तस्योपजीव्यत्वात्, तथा हि यजेतेत्यनेन यागः कृतिसाध्यः साधनञ्चेति बोधिते साधनस्य साध्याकाङ्क्षायां कामनाविषयत्वेन श्रुतीऽसिद्धः स्वर्ग एव साधनाकाङ्क्षी साध्यत्वेनावगम्यते उपस्थितत्वात्।

न च यागस्य साधनाकाङ्क्षा, कृतिसाध्यत्वेनैवोपस्थितेः। अत एव विश्वजिदादौ स्वर्ग एव साध्यत्वेन कल्प्यत इति। इष्टसाधनताविधिपक्षेऽपि 'तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इत्याद्यर्थवादे विधिबोध्येष्टसाधनत्वस्यार्थवादादेवावगमात्। कुतो विधिकल्पनमिति चेत्। न। अविनाभावात्, तथाभूतसाधनत्वस्य विधेयत्वव्याप्तत्वात्, व्यापकानुपलम्भबादोद्धाराय वा प्रयोजनाभावान्न तत्कल्पनं तत्रेत्यप्याहुः।

यत्त्विष्टसाधनत्वाभिधाने करणे लिङोऽनुशासनात् दर्शपौर्णमासाभ्यामित्यनभिहिताधिकार-विहिता तृतीया न स्यादिति। तन्न। उपायतामात्राभिधानेऽपि तद्विशेषकरणत्वानभिधानात्। वस्तुतत्त्वभिहितान्वयलभ्यं यागेष्टसाधनत्वं इष्टसादनत्वमात्रस्य विध्यर्थत्वात्।

किं च साधनत्वमात्रमपि न शक्यम्, पार्थक्येन कुत इष्टसाधनत्वम्। बलवदनिष्टपदस्य स्वजन्येष्टोत्पत्तिगर्भार्थतया क्रियेष्टसाधनस्य बलवदनिष्ठाजनकत्वप्रविष्टत्वात्। तद्विध्यर्थस्य यागवाच्यत्वात्।

ननु यदि करणत्वं न लिङा बोधितं तर्हि दर्शपूर्णमासाभ्यामिति तृतीया कुतः प्राप्तमनूद्यते वा, प्रयाणे वाक्यभेदापातादि त्यस्वरसदाह -- **वस्तुत** इति।

यागेष्टसाधत्वं यागेष्टकरणत्वम्। इष्टसाधनत्वमात्रस्य - इष्टोपायनामात्रस्येत्यर्थः। सामानशक्त्यैव लिङा साक्षादसाधने व्यापारान्तर्भावेनैव तद्बोधनं करणत्वपर्यवसन्नतया प्राप्तं तृतायया अनूद्यते। फलायोगव्यवच्छिन्न व्यापारवत एव करणत्वादिति भावः ।

नव्यास्तु चिकीर्षाद्वारा ज्ञानस्य कृतौ हेतुता चिकीर्षा च कृताविच्छा सनः प्रकृत्यर्थगोचरेच्छावाचित्वात् पिपक्षादिवत्। न तु कृतिविषयपाकादिविषये कृतिसाध्यत्वप्रकारकेच्छाभिधायकत्वं पाकादेः प्रकृत्यनभिधेयत्वात्।

न हि कृतिवाचकस्य तद्विषयवाचकत्वं, करोतीत्युक्ते तद्विषयसंशयात्। एवञ्च कृताविच्छेष्टसाधनताज्ञानात् तत्साध्येष्टज्ञानाद्वा वृष्ट्यादौ तथा कल्पनात्। यदा च कृताविच्छा तदा सैव चिकीर्षा अन्यत्रेच्छामात्रं न तु कृतिसाध्यताज्ञानात् कृतौ कृतिसाध्यत्वाभावात्।

अथ पाकं कृत्या साधयामीतीच्छानुभवसिद्धा अनुभवापलापे उपेक्षणीयत्वापत्तेः, सा च कृतिसाध्यताज्ञानात्, सा च चिकीर्षापदाप्रतिपाद्यापि कृतिहेतुः समानविषयत्वात् न तु कृतीच्छा कृतिहेतुः कृतिविषयाविषयत्वादित चेत्, अस्ति तावत्पाककृताविच्छा वृष्टीच्छावत्, अस्ति च कृतिसाध्यत्वप्रकारिकेच्छा, पाके तथापि कृतीच्छैव कृतिकारणं लाघवात् न तु कृतिसाध्यत्वप्रकारिकेच्छा गौरवात्। धात्वर्थानुपरक्ते कृतिस्वरूपे इच्छैव नोदेतीति चेत्, न। पाकादिकृतीष्टसाधनताज्ञानात् पाककृताविच्छा ततः कृतिरित्यभ्युपगमात्।

न चावगति - प्रवृत्त्योः समानविषयत्वं उभयसिद्धं, तस्यैव विचार्य्यत्वात्। कथं तर्हि पाकं कृत्या साधयामीतीच्छा, यथा वन्हिसाध्यत्वेन इष्टसाधनतावगमात् वन्हिना पाकं साधयामीतीच्छा तथा कृतिसाध्यत्वेन इष्टसाधनत्वात् पाकस्य पाकं कृत्या साधयामीतीच्छा अन्यथा तत्तदुपायसाध्यत्वेन इच्छा पाकादौ तत्तदुपायसाध्यत्वप्रकारकज्ञानात् स्यादित्यनन्तरकारणकल्पना स्यात्। मम तूपायेच्छायामिष्टसाधनताज्ञानमेव हेतुः क्रियाद्वारा कृतेरिष्टसाधनत्वज्ञाने क्रियाया अपीष्टसाधनत्वं विषय इति कृतीच्छा भवन्ती क्रियाविषयापि भवतीति ज्ञानेच्छाप्रयत्नानां समानविषयतापि। अत एव पाकं चिकीर्षतीति चिकीर्षाविषयतया पाकः प्रतीयते।

वयं त्वव्याख्यातेन कर्तृकरणादावुक्ते प्रथमेत्यस्य कर्त्रादिसंख्यायामभिहितायामित्यर्थोऽवश्यं वाच्यः। कर्त्रादीनामाख्यातावाच्यत्वात् । तथा वाभिहितान्वयलभ्यं योगेष्टसाधनत्वमात्रम्, न तु करणात्मनो यागस्य संख्यापि कथमेतदित्याशंकायामिष्टसाधनत्वमात्रस्य विध्यर्थत्वादिफक्किका । तदर्थस्तु तावन्मात्रस्य शक्यत्वान्न तु संख्याया अपीत्यर्थं ब्रूमः । अन्तरङ्गत्वादिष्टसाधनत्वं कृतवेवान्वेति। तदुत्तरं तु यागे तदुध्यत इत्याख्यानेन यागेष्टसाधनत्वमनभिहितमेवेति तृतीयाप्युपपन्नेत्यप्याहुः।

यद्वा इच्छाविषयविषयतया पाकः प्रतीयते इति तस्य कर्म्मता ग्रामं जिगमिषति शत्रुं जिघांसतीत्यत्र ग्रामादेरिव, न हि ग्रामादाविच्छा, सिद्धत्वात्।

अत एव भोगे सुखे च चिकीर्षा तदनुकूलकृतेरिष्टहेतुत्वात् अन्यथा कृतिसाध्येष्टसाधनतापक्षे तच्चिकीर्षासामग्र्यन्तरं कल्प्येत। एवञ्च सन्ध्यावन्दनं दुःखसाधनावन्दनाभावरूपत्वेनेष्टं तत्साधनं कृतिरिति लिङर्थः, अन्यथा कृतिर्न कृतिसाध्या सन्ध्यावन्दनञ्च नेष्टसाधनमिति कस्य कृतिसाध्यत्वे सतीष्टसाधनत्वं विध्यर्थः स्यात्।

अत एवैकप्रत्ययाभिधेयत्वप्रत्यासत्तेरन्तरङ्गतया विधिप्रत्ययाभिधेयेष्टसाधनत्वस्य कृतावेवान्वयो न प्रकृत्यर्थे तथैव चिकीर्षाकारणज्ञानजनकत्वात् प्रकृत्यर्थस्य च कृतौ विषयत्वेनान्वय इति।

उच्यते। वन्हिसाध्यत्वेन कृतिसाध्यत्वेन वा न पाकस्यौदनसाधनता इत्युक्तम्। कथं तर्हि वन्हिना पाकं साधयामीतीच्छा इति चेत्, न, इष्टसाधनत्वेन ज्ञाते यत्र यत्साध्यत्वं ज्ञायते तत्र तत्साध्यत्वेनेच्छा भवतीति, यथेष्टसाधनत्वेन ज्ञाते पाके वन्हिसाध्यत्वज्ञानात् वन्हिना साधयामीतीच्छा एवं कृतिसाध्यत्वेनावगते इष्टस्य साधनताज्ञानात् कृत्या साधयामीतीच्छा तथाचेष्टसाधनत्वेन कृतिसाध्यत्वेन च ज्ञाते कृतिसाध्यत्वप्रकारिकेच्छा न त्विष्टसाधनता-ज्ञानात्रादिति।

ननु पाकं चिकीर्षतीति पाकस्य तद्विषयत्वमायाति, न तु तद्बलात् कृतीष्टतायां चिकीर्षात्वं कृतिसाध्यत्व प्रकारकेच्छाविषयत्वेनापि तत्प्रत्ययोपपत्तेरित्यस्वरसादाह -- **यद्वेति** । तथा च कृतीछायैव तद्विषयत्वं पाकस्य नान्यत इति भावः। न प्रकृत्यर्थ इति साक्षदिशेषः परम्परया च पाकाद्यन्वितकृताविष्टसाधनत्वान्यथा तयादस्त्येवान्यथा प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तिरपि भग्नः स्यादित्यवधेयम्।

तथा चेति । न च सन्ध्यावन्दनस्थले इष्टसाधनत्वबोधानुपपत्तिः। तस्य नित्यत्वेऽपि फलजनकत्वविरोधस्यापातस्तत्वादिति भावः ।

आचार्य्यास्तु प्रवर्त्तकमिष्टसाधनताज्ञानमेव लिङर्थस्त्वाप्ताभिप्रायो लाघवात् पाकं कुर्य्याः कुर्य्यामित्यत्र विधिलिङः सम्बोध्य-स्वकर्तृकक्रियेच्छाभिधायकत्वेनाज्ञाप्रार्थनाशंसनादिलिङो वक्त्वादीच्छाभिधायकत्वेन लिङ्मात्रस्येच्छावाचकत्वकल्पनाच्च।

एवञ्च स्वर्गकामो यजेतेत्यस्य स्वर्गकामस्य कृतिसाध्यतया यागो यागयत्नो वा आप्तेष्ट इत्यर्थः। ततो यो व्यापारः यस्य कृतिसाध्यतया यद्व्यापारविषयकः प्रयत्नो वा यस्याप्तेनेष्यते स तस्य बलवदनिष्टाननुबन्धीष्टसाधनमिति व्याप्तिग्रहात् यागस्येष्टसाधनत्वमनुमिनोति। तथा हि यागो मदिष्टसाधनं मत्प्रयत्नविषयतया आप्तेनेष्यमाणत्वात् यथा मत्पित्रा मत्प्रयत्नविषयतयेष्यमाणं मद्भोजनं मदिष्टसाधनं तथाचेदं तस्मात्तथा। एवं न कलञ्जं भक्षयेदित्यस्य मम कलञ्जभक्षणप्रयत्नो नाप्तेच्छाविषय इत्यर्थः। ततः कलञ्जभक्षणं मम बलवदनिष्टसाधनं मदिष्टसाधनत्वे सत्यप्याप्तेन मत्प्रयत्नविषयतया अनिष्यमाणत्वात् यथा मत्पित्रा मत्प्रयत्नविषयतया अनिष्यमाणं मधु-विषसम्पृक्तान्नभोजन मम बलवदनिष्टसाधनं तथा चेदं तस्मात्तथा, स चाप्तो वेदव्याख्याता भगवानीश्व एव।

यस्तु वेदे पौरुषेयत्वं नोपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिकुमार्य्याः पुंयोगे प्रमाणम्। न तर्हि लाघवं तात्पर्य्यगौरवादीश्वराद्यनन्तरकल्पनादिति चेत्, न, लाघवादिनेच्छाबोधकत्वेन लोके लिङः प्रमाणसिद्धत्वेन फलमुखगौरवस्यादोषत्वात्। न तु कर्त्तुरस्मरणं बाधकं प्रागेव निरासात् तृप्तिकामनया विषभक्षणप्रवृत्तस्य विषभक्षणं तत्कृतिसाध्यतया नेश्वरेणेष्यते ततो विषभक्षणस्य ईश्वरेच्छाविषयत्वेऽपि न तेन व्यभिचारः।

वस्तुतः पाकादेरिष्टसाधनतां विना तत्कृतेस्तद्बोध्यसंभवेन तत्प्राथमिकत्वे जन्यत्वलक्षणे गृहीते इष्टसाधनीभूतपाकजनिका कृतिरिति तत एव कृतिसाध्यत्वेष्टसाधनत्वयोः प्रत्यये तेनैव तद्धेतोरिति न्यायेन प्रवृत्तौ न संभवन्यायात् न तत्कृतिगोचरेष्टसाधनत्वज्ञानपर्यन्तापेक्षागोचरत्वात्। न च पाकजनिकाकृतेरिति ज्ञानविपाकः।

कृतिजन्य इति। ज्ञानाभावः समनवित्तिवेद्यतया तद्विशेष्यकज्ञानाभावेऽपि तज्जन्यत्वस्य तेनावगहनात्।

यद्वा यत्कामकृतिसाध्यत्वेन यो व्यापार आप्तेनेष्यते स तस्येष्टसाधनं विषभक्षणञ्च तृप्तिकामकृतिसाध्यत्वेन नेश्वरेच्छाविषयः मानाभावात्।

अत एव न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणं तृप्तिकामनया भक्षणप्रवृत्तस्य कृतिसाध्यत्वेनाप्तेच्छाविषयो नेति तस्येश्वरेच्छाविषयत्वेऽपि विशिष्टनिषेध उपपद्यते, अभिप्रायविधिपक्षे बलवदनिष्टाननुबन्धित्वमानुमानिकं इष्टसाधनताविधिपक्षे तु तदपि शक्यमिति गौरवमिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे विधिवादः समाप्तः।

न च तद्विशेष्यकज्ञानस्य प्रवृत्यौपाधिकतयोक्तक्रमेण कृतिसाध्यताज्ञानेऽपि प्रवृत्त्यलाभः, लाघवेन तदुभयवैशिष्ट्यज्ञानत्वेन जनकत्वात्। न तु तद्विशेष्यकज्ञानत्वेन गौरवादिति नवीनमतभङ्ग्युक्तिः यागयत्नो वेति मनान्तरेण तत्र कृतिसाध्यत्वेनेति यागमात्रान्वयीत्यवधेयम्।

तृप्तीति । बलवदनिष्टाननुबन्धीतृप्तीत्यर्थः, अतो नासिद्धिरेवमग्रेऽपीति सर्वमवदातम्।

स्वर्गोक्तान्तरभविफलकर्मसमभिव्यहृतवैदिकविधिप्रत्ययप्रतिपाद्यप्रवर्तकज्ञानप्रकारीभूतधर्मः प्रकृत्यर्थान्वित तदन्यान्वयि वेत्यर्थः। तेन लौकिकविध्यर्थे प्रायश्चित्तादि बोधकविध्यर्थो वा नांशतो बाध इत्यर्थः । आहत्यसाक्षात् अपूर्वकार्यताया एव यागकार्यतां विना दुर्ज्ञेयत्वात्। सा च लिङनुपपत्तिद्वारा परंपरया बोध्यैवेति भावः।

अथापूर्व्ववादः।

अथ स्वर्गकामो यजेतेत्यादाविष्टसाधनत्वं कार्य्यत्वं वा यद्विधिः स समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा।

स्वर्गकामेति । स्वर्गकामस्य नियोज्यस्य योऽन्वयो नियोज्यत्वरूपेण तत्र योग्यताज्ञाना-भावादित्यर्थः।

ननु कर्तृत्वाधिकारित्वाभ्यामन्वयसंभवेन किं नियोग्यत्वेनेति चेदत्राहुः - स्वर्गकाम इत्यत्र कामनाविशेषणमुपलक्षणं वाक्येन्त्यनियतोपलक्ष्यान्तराभावात् आत्ममात्रस्योपक्ष्यत्वे विरोधापत्तेः। आद्ये चासंभवात्।

न हि कृतिसमवायिलक्षणं कर्तृत्वं स्वभागिरूपफलत्वलक्षणवदधिकारित्वं वा कामनायां सभवति।

न च विशेष्यान्वयेनान्वयेऽपि विशेषणवत्त्वम्।

न च कर्तृत्वेन कृतिजनकत्वेनान्वयोऽस्तु। तच्च विशेषणांशेऽपि संभवतीति वाच्यम्। न हि न्यायनय इव फलकामना। गुरुनयेऽपि साक्षात् प्रयत्नहेतुः। किं तु ममेदं कार्यमिति बोधद्वारेत्यस्यापि वक्ष्यमाणनियोज्यत्व एव विश्रमः।

न च बोधृत्वमपि न बोधसमवायित्वं, विकल्पग्रासात्। अपि तु तज्जनकत्वम्। तथा च कृतिजनकत्वमेवास्तामिति वाच्यम्। एतद्ज्ञानद्वारा कृतिजनकत्वमिति बोधजनकत्वज्ञानध्रौव्येण करणत्वस्वीकारात्।

न चेदनियोज्यत्वमनुपस्थितं कथमन्वयप्रकार इति वाच्यम्। योग्यतावच्छेदकप्रकारेणोपस्थित एवेतरान्वय इति घटेच्छिद्वेतरत्ववत् स्वर्गकामनियोज्यत्वस्य योग्यताबलादेवोपस्थितेः।

अत्र गुरवः - नाहत्य क्रियाकार्य्यतया लिङा बोधयितुं शक्यते स्वर्गकामनियोज्यान्वय-योग्यताज्ञानविरहात्, कामनाविशिष्टस्य हि ममेदं कार्य्यमिति बोद्धृत्वं नियोज्यत्वम्। तत् कामनायास्तद्बोधोपयोगे सति भवति स च कामनानन्तरं काम्यसाधनताबोधात् कार्य्यताबोधे सति स्यात्। एवञ्च स्वर्गसाधताबोधे सति स्वर्गकामनियोज्यान्वययोग्यता।

न च कालान्तरभाविस्वर्गे क्रिया साक्षात् परम्परया वा साधनमिति शब्दो बोधयितुमर्हति, आशुविनाशित्वात् परम्पराघटकानुपस्थितेश्च तृतीयप्रकाराभावाच्च। अन्यथा तमादाय साधनत्वसम्भवात् कल्प्यमप्यपूर्व्वं न स्यात्, इष्टसाधनताविधिपक्षे स्फुटैवानुपपत्तिः। कार्य्यताविधिपक्षे अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न कश्चिद्विशेषः। अतः क्रियतोऽन्यत् स्वर्गसाधनतार्हं क्रियाकार्य्यतानिर्व्वाहकं लिङाद्यर्थः।

न च ममेदं कार्यमिति बोधः। फलमेव कथमवच्छेदकमिति वाच्यम्। उपस्थितस्य फलस्यापि तत्वविरोधादुपस्थितिहेतुत्वयोग्यतेत्युक्तम्। तदयं पर्यवसितार्थः - स्वर्गकामः स्वनियोज्यकार्यायोगः, न तु स्वर्गकामनानियोग्यको योगः कार्य इति पृथान्तस्यैवाख्यातान्व येविशेष्यत्वात्। अन्यथा आख्यातोपस्थाप्यसंख्यन्वयानुपत्तेः। तत्र तस्यैव नियामकत्वात्।

नन्वेवं नियोज्यतयैव स्वर्गकामान्वयोऽधिकारिणो लोभे प्रवर्त्तकत्वायोग इति चेत्, न। प्रथमतस्तदनन्वयेऽप्युपादानबलेन कर्तृत्वाधिकारित्वयोरपि लाभादिति ।

कामनाया इति । न हि कामनातद्बोधे साक्षात्तद्धेतुरिति तदन्वययोग्यतावच्छेदकमपि योगः स्वर्गसाधनत्वम्। न हि तदसाधने ममेदं कार्यमिति ज्ञानान्वयः, तद्ग्राहकाभावात् । तथा च योग्यतावछेदकनियोज्यत्वमिव स्वर्गकामे यागे सर्वसाधनत्वमप्यवश्यमुपस्थितमपेक्षणीयम्।

न हि तदन्वयो शाब्दो, येन योग्यतावच्छेदकान्वयानुरोधेन योग्यतावच्छेदकान्तरं नाक्षिप्येत। उपादानस्यापि शाब्दबलप्रवृत्तिकत्वात् शाब्दज्ञानमात्र एव च योग्यतावच्छेदकधर्मोपस्थितिः ध्रुवा। अत एवमुपादाना केवलान्वयानुपपत्तेरर्थापत्तित्वाच्च । साधनत्वमेकविशेषणाय अपरघटकानुपस्थिता-वशक्यप्रतिपत्तिकं परंपरासाधनत्वलक्षणयोग्यतावच्छेदकधर्मप्रत्यपादितत्प्रत्ययानुरोधेन परंपरार्थघटकमवश्य-मुपस्थापनीयमिति तदुपस्थापकान्तराभावा लिङ एव तदुपस्थापके परंपराघटके शक्तिरित्याखण्डलार्थः।

ननु स्वजातीयेऽन्वयदर्शनं योग्यता दृष्टञ्च घृतपानस्याशुविनाशिनः कालान्तरे पुष्टिहेतुत्वमिति चेत्, न। यथाकथञ्चित् साजात्यस्यायोग्येऽपि सत्त्वेन योग्यताया अव्यावर्त्तकत्वापत्तेः पदार्थतावच्छेदकेन साजात्यस्याद्यजातः पयः पिबतीत्यादौ प्रकृते चासम्भवात् तस्मादन्वयप्रयोजकरूपवत्त्वं साजात्यम्।

अत एव द्रव्यद्रव्यत्वं सेककरणत्वे प्रयोजकं इत्ययोग्यो वन्हिः, तदिहाशु विनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायिव्यापारजनकत्वं प्रयोजकमतोऽपूर्व्वं विना साजात्यमेव न गृह्यते घृतपानस्य तु वैद्यकोपस्थितधातुसाम्यमादाय पुष्टिसाधनत्वयोग्यताज्ञानं विज्ञस्य। अथ बाधकप्रमाणाभावो योग्यता।

न च साधनत्वमात्रे बाधकं, साक्षात्तद्बाधेऽपि परम्परासाधनत्वमादाय सद्विश्रान्तिसम्भवात्।

न च योग्यानुपलब्ध्या द्वारस्य बाधात् परम्परासाधनत्वमपि बाधितं, संस्कारस्येव तस्य सम्भवात्। अन्यथा वाच्येऽप्यपूर्व्वे क्रिया कामिकार्य्या न स्यात् काम्यासाधनत्वात्।

न हि यदेवायोग्यं तत्पश्चात् योग्यं, अयोग्यत्वे च निष्फलः प्रयासः।

अद्येति । यथा चैत्तथा व्याप्यातं योग्यतालक्षणे।

अन्यथेति। योग्यतावच्छेदकेत्यर्थः । तच्च यदवछेदेनायोग्यतानिश्चयो न ज्ञातोऽस्ति तदेवेति भावः।

विज्ञस्येति। विज्ञस्य तदवच्छेदेनायोग्यतानिश्चय एव नेति घृतपानत्वादिकमेव योग्यतावच्छेदकमिति भावः।

संस्कारस्येवेति । तथा च द्वारसंदेहान्न द्वाराभावनिश्चय इति भावः । याग इति भावः। फलेच्छया तत्साधनप्रवृत्तिर्भवतीति न यागे तदसाधने सा स्यादिति भावः।

न च सेति । नन्वन्वयप्रयोजकरूपवत्त्वेन स्वरूपयोग्यतावच्छेदकं नाप्तोक्ते पयसा सिञ्चतीत्यादौ द्रवद्रव्यत्वादिसत्वेऽपि बाधकप्रमाणासद्भावात् । किंत्वन्वयव्याप्यधर्मवत्वम्। तच्च फलपर्यन्तस्यापि व्यापारत्वं लक्षणम्। लक्षणक्षयिणः कर्मण इति तदुपस्थितौ कथं योग्यताग्रह इति भावः।

न च कामिकार्य्यमपूर्व्वं तदर्थिकार्य्या च क्रियेति वाच्यम्। यागे रागादित्यनेन विरोधात्। तथापि द्वारानुपस्थित्या परम्परासाधनमिति ज्ञानं न भवेदिति चेत्, सत्यं, किन्तु स्वर्गसाधनं याग इति ज्ञानं साक्षात्परम्परोदासीनं वस्तुगत्या परम्परासाधनत्वविषयकमुत्पद्यमानं नायोग्यतया परिभवितुं शक्यम्।

यदि च साक्षात्परम्पराविशेषद्वयव्यतिरिक्तं सामान्यं नास्त्येव तदा अननुगमः, किं वा विशेषयसि साक्षात्परम्परया वेति।

न च यावद्विशेषबाधे तद्बाधितं, परम्परासाधानत्वेऽबाधादिति। मैवम्। योग्यता हि स्वबाधकप्रमाविरहो वा सकलबाधकप्रमाविरहो वा, आद्ये वन्हिना सिञ्चतीत्यादौ स्वबाधकप्रमा-तद्विरहौ समयभेदेन स्त इति तदेव योग्यमयोग्यञ्चेति प्राप्तं, द्वितीये तु योग्यानुपलब्ध्या तन्निश्चयोऽशक्यः परप्रमाया अयोग्यत्वात्।

न च वाच्यं सकलबाधकप्रमाविरहः स्वरूपसन्नेव प्रयोजक इति, अयोग्ये योग्यताभ्रमादन्वयबोधाभावप्रसङ्गात् अन्यस्य तत्र बाधकप्रमासत्त्वात्। अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमाविरहो निश्चीयते इति चेत्, तर्हि प्राथमिकत्वात् सैव योग्यता। न च सा प्रकृते सम्भवतीत्युक्तं।

किञ्चैकविशेषबाधे शाब्दसामान्यज्ञानं तदितरविशेषप्रकारतानियतं छिद्रबाध छिद्रेतरघटज्ञानवत्। न च द्वारानुपस्थित्या प्रकृते तथा घटते।

एतेन यदुक्तं प्रशस्तरूपवान् चैत्र इत्यत्र गौर-श्यामविशेषानवगमेऽपि रूपमात्रमवगम्यते तद्वत् विशेषानवगमेऽपि साधनत्वमात्रमिति तत्प्रयुक्तं, तत्रैकविशेषबाधाभावेनौदासीन्यसम्भवात्।

एतेन स्वर्गकामान्वयबलात् क्रियायाः फलसाधनत्वं तद्बलाच्च पटोः संस्कारस्येव स्थायित्वं कल्प्यतां किमपूर्व्वेण सङ्कल्पविशेषस्य यागस्याग्रे प्रत्यक्षानुपलब्धिरात्मविशेषगुणानां प्रथमक्षण एव स्वविषयकप्रत्यक्षजननस्वभावात् अस्तु, न चैवं क्रियान्तरमपि तथा, प्रमाणाभावात्,

ननु योग्यताज्ञानमात्रं शाब्दधीहेतुः वास्तवियोग्यतातत्प्रमाणप्रयोजिकेत्यरुचेराह -- **किं चेति।** एकविशेषबाधे सामग्री तदितरविशेषप्रकारकज्ञानजनकत्वनियतेत्यर्थः। यथा श्रुतिविरोधादिति भावः।

ननु नान्योऽन्याश्रयत्वं स्वर्गसाधनत्वान्वयानन्तरं भिन्नकल्पना । किन्तु स्वर्गकामान्वयानुपपत्या अपूर्वे लिङ्वाच्यताकाले धर्मिकल्पनात इति न्यायात् ।

एवं लोकप्रसिद्धक्रियाकार्य्यत्वव्युत्पत्तिरपि भग्ना न भवतीति परास्तम्। स्वर्गसाधनतायोग्यतया स्वर्गकामान्वयः तदन्वये च स्थायित्वं इत्यन्योन्याश्रयात् लोके धर्म्मिग्राहकमानेन क्रियायाः क्षणिकत्वनिश्चयाच्च।

ननु देवपूजार्थो यजिः, पूजा चाराधना गौरवितप्रीतिहेतुः क्रिया, अतो देवताप्रीतिद्वारा यागस्य स्वर्गसाधनत्वं, प्रीतेः क्षणिकत्वेऽपि प्रीत्यनुभवजनितसंस्कारद्वारा तत्सम्भवात्। अत एवाग्नेयादौ प्रीतिभागितया अग्न्यादेरुद्देश्यत्वमिति चेत्, न, यज् देवपूजायां इति हि शाब्दिकस्मृतिः स्मृतित्वादेव न स्वतः प्रमाणम्।

न च यागस्य देवताप्रीतिहेतुत्वे स्वर्गस्य देवताप्रीतिसाध्यत्वे वा मानान्तरमस्ति।

वस्तुतस्तु चेतने देवे मानमेव नास्ति । यत्र च विष्णुप्रीतिकामादिवादोऽस्ति तत्र विष्णुरेव प्रीतिः, न तु विष्णोः। षष्ठ्यर्थलक्षणादोषात्। विष्णुशब्दस्य प्रीतिविशेषवाचकत्वं वेद एव कल्प्यते।

क्रियया एव स्थायित्वं कल्प्यतामित्यरवरसेन हेत्वन्तरमाह-- **लोक** इति । तथा च प्रमाणान्तरबाधेन धर्मिकल्पनैव ज्यायसी प्रमाणिकत्वादिति । अन्यथा प्रतीतनाशनमपि लोके तिरोधानमात्रकल्पने सत्कार्यवादापातादिति भावः।

गौरवितेति । न च गौरवितत्त्वगर्भं गुरुप्रीतिहेतावधर्मप्रवर्त्तनारूपायां क्रियायां तथा अप्रयोगात्। इदं चोपलक्षणीभूतं व्यावर्तकम्, न तु विशेषणाम्। तेन पूजादेव प्रीतिहेतुक्रियेत्यन्वयः। अन्यथा गौरवीतेन समं देवस्य पदार्थैकदेशतया अन्वयः। अन्यथा च तत्संभवेऽर्थासङ्गतेन चेश्वरमुपासीतेत्यत्र विरोधः प्रतिहेतु तद्योग्यत्वस्य विवक्षितत्वादिति।

ननु सक्ते ग्रहे व्याकरणोपायतायां सर्वसंमतेः। तत्प्रमाणमस्त्येव । अस्माकं तु स्वर्गादौ भगवत एव व्याकरणे प्रणेतृत्वात् तत्प्रत्यक्षमूलकत्वादेव प्रामाण्यमक्षतम्।

प्रीतेरिष्टजनकत्वं च प्रसिद्धतरमित्यरुचेराह -- **वस्तुतस्त्विति** ।

तथा च प्रमाणविरोधेन वेदविरोधिस्मृतिवदेकदेशप्रामाण्येऽपि नेह व्याकरणस्मृतिरादरणीयेति भावात् देवताचैतन्ये मानमन्यथासिद्धमिति ।

न च देवपूजार्थयज्यन्वयबलात्तथा, अन्योन्याश्रयात्।

नन्वेवं आग्नेयादीनां षण्णां क्षणिकत्वात् योग्यतानवगतौ परमापूर्व्वकारणत्वानवगमे कथमपूर्व्वकल्पनेति चेत्, न। काम्ये अपूर्व्ववाच्यत्वस्थितौ आग्नेयादौ तद्द्वारा साधनत्वस्य योग्यतासम्भवात् न तु प्रथमम्।

ननु यो ब्राह्मणायावगुरेत्तं शतेन यातयेदित्यत्र ब्राह्मणबधोद्यमस्य शतयातनाहेतुत्वावगमे यथा दुरितापूर्व्वं कल्प्यते तथोहापीति चेत्, न।

यत्रेति। विष्णुशब्देति। विष्लुव्याप्ताविति धात्वनुसारात् व्यापकसुखवाचकमित्यर्थः। अत्र यद्यपि प्रीयते भगवान् हरिः इत्यर्थवादस्थले तत्प्रीतिरेव फलम् । अत एव देवताचैतन्यमपि । तथापि तस्याद्वारत्वमधिकम्। प्रीतेराशुविनाशितया तदनुभवसंस्कारपर्यवसाने तस्य च स्मृतिमात्रजनकत्व-मित्यग्रेतनयुक्त्यवष्टम्भेन इदमप्युक्तम्।

नन्वेवम् आग्रेयादीनामिति। अथाग्रेयोऽष्ठा कपालो भवत्यमावास्यायाम् ऐन्द्रं दधि भवत्यमावास्यायाम् इत्याद्यषडुत्पत्तिवाक्यानि द्रव्यदेवतासम्बन्धरूपयागप्रतिपादकानि प्रथमप्रतीते-रेवोत्पत्तित्वात् । तानि दर्शपूर्णमासाभ्यां यजेतेत्यादिप्रधानविधिवाक्यार्थीभूतप्रधानापर्वं भवतीत्यादिना अनूद्य ऐन्द्रं दधि भवत्यमावास्यायाम् इत्यादितः तत्परतयो भवतीत्यादिना अनूद्य ऐन्द्रं दधि भवेत्यमावास्यायाम् इत्यादितस्तत्परतयोपस्थापनात् परमापूर्वहेतुतामप्युपस्थापयति । पश्चात् प्रतीतितत्साधनत्वानुपपत्या षडुत्पत्यपूर्वाणि कल्प्यन्त इति तव सिद्धातः। स नः स्यात्। क्षणिकत्वेन परमापूर्वकारणत्वस्यायोग्यतया ज्ञानाभावात् भावे वा न तद्वत् स्वर्गसाधनत्वमपि यागे गृहीत्वा तत्राप्यपूर्वं कल्प्यतामित्यर्थः।

काम्य इति। दर्शपूर्णमासाभ्यां यजेतेत्यत्र पूर्वानुपपत्या योग्यताघटकोऽपूर्वोपस्थितो भवतीत्यादिना तदपूर्वमनद्य तद्धेतुत्वं बोध्यते। तथा च पूर्वोपस्थितिध्रौव्ये तज्ज्ञातीयद्वारजनकत्वसंभावनायां न योग्यतानिश्चियात् दर्शपूर्णमासाभ्यामित्यादिविधिप्रवृत्तौ प्रचुरपदार्थत्वबाधादपूर्वस्यानुपस्थित्या तज्ज्ञातीयद्वारा

जनकत्व संभावनाविरहात् अयोग्यताज्ञानात् योग्यताघटकापूर्वोपिस्थित्यर्थं तस्य लिङभिधेयता उत्पत्त्यपूर्वाणां तु कल्प्यत्वमित्यर्थः।

नत्विदमसङ्गतम्। तथा हि दर्शपूर्णमासाभ्यां यजतेति प्रधानविधेः प्रथमप्रवृत्तौ भवेदेवं परं दधि भवत्यमावास्यायामित्यादिभिः उत्पत्तिवाक्यैः षडाग्नेयादियागाः पौर्णमास्याममावास्याकालसम्बन्धीत् विहिताः। ते च विधेयइष्टोपायतारूपाः स वाक्ये चेष्टमनासाषयं तस्यापेक्षाः।

एवमाद्या राज्योत्पत्तिविधयोऽपि कालविशेषसम्बन्धा इष्टापेक्षायैव। अतो दर्शपूर्णमासाभ्यां यजेत स्वर्गकाम इत्यादिप्रधानविधिना कालविशेषणसम्बन्धोत्पन्नानुदितानां फलसम्बन्धो विधीयते। दर्शपूर्णमासपदेन करणषट्कमेवोच्यते न त्वाधारादि । तेषां फलवत्सन्निधविति न्यायात् अङ्गत्वात्। तथा चैन्द्रं दधि भवतीत्यादीनामेव प्रवृत्तिकत्वात्।

कथमेवं द्वितीयादिकाप्येवमिति चेन्मैवम्। षडुत्पत्तिवाक्यानां प्रथमपठितत्वेन तदर्थस्य प्रथमोपस्थितावपि वाक्यैकवाक्यतया दर्शपूर्णमासाभ्यां यजेत स्वर्गकाम इति प्रधानविधेरेव प्रथमप्रवृत्तेः। तथा हि पाठक्रमेणा इष्टदेवतासम्बंन्धप्रतिपादकवाक्यात् तदर्थप्रतीतौ फलसम्बन्धाप्रतीतेः।

प्रतीत्यपर्याप्तौ प्रधानविहितासमभिव्याहृते फलसाधनत्वे बोध्यमाने स्वर्गकामनियोज्यान्वययोग्यता-ज्ञानविरहात् उक्तरीत्या यागविषयकं कार्यमलिङ्गात् बोधितं तत्कथं भविष्यतीत्याकाङ्क्षायां तदेकवाक्यतापन्नानि षडुत्पत्तिवाक्यानि उपस्थितानि । तानि च वदीत्यादिना अपूर्वमनद्य तद्धेतुतया आग्नेयादीनि बोधयन्ति। तदानीं पूर्वजातीयोपस्थित्या तज्जातीयत्वद्वारकत्वसंभावनायां नायोग्यताज्ञानमिति प्रत्यहेतुत्वं तन्निर्वाहतापूर्वं कल्पयन्ति। एवमाधारादिविधयोऽप्यपूर्वं कल्पयन्तीति सर्वं सुस्थम्।

यो ब्राह्मणायेत्यपूर्वानुपस्थित्या साक्षादसाधनस्य यागस्या योग्यतेव ब्राह्मणायागोणस्य ज्ञातयातानाधारद्वारा अनुपस्थित्या अयोग्यता । तथा च द्वयोस्तुल्यत्व एकत्रापूर्ववाच्यता, परत्र दुरितकल्पनेति कथं वैषम्यमिति भावः।

अवगुरेत् यातयेत् इत्यत्र हेतु- हेतुमतोर्लिङित्यनुशासनात् लिङा अवगोरण-शतयानतयोर्नियतं पौर्वापर्य्यं बोध्यते प्रत्यक्षेणानुभवस्मरणयोरिव, तच्च साधनत्वे साधनसाधनत्वे वा उभयमपि मध्यवर्त्तिघटितमिति दूरितकल्पनं संस्कारवत्, इह तु विध्यनुशिष्टा लिङ् कार्य्यतामाह।

किञ्च कामी काम्यदन्यत् काम्याव्यवहितसाधनतया ज्ञातमेव कर्त्तव्यतयाऽवैतीति नियमात् न क्रियायां कामिनोऽन्वयो योग्यः। न च तृप्तिकामस्य पाके प्रवृत्तेर्व्यभिचारः, ओदनकामस्य तत्र प्रवृत्तेः, तृप्तिकामना तु तत्कामनोपयोगिनौ न तु साक्षात्, अन्यथा साधनसाधने प्रवृत्तिर्न स्यात्। काम्यसाधनत्वं प्रवर्त्तकं लाघवादिति चेत्, न। भोजनकामस्य सिद्धौदनस्य पाके प्रवृत्तिप्रसङ्गात् तस्यौदनद्वारा भोजनसाधनत्वाविशेषात्, विशेषणे तु यत्राव्यवहितसाधनं पाकः तत् न काम्यं यच्च काम्यं तत्र नाव्यवहितसाधनं पाक इति न प्रवृत्तिः।

अपगुरेदिति । हेतुहेतुमतोः लिङित्यन्यशासनस्थलत्व यो ब्राह्मणाया अपगुरेत् यो ब्राह्मणाय वधोद्यमप्रागभाववान् तदुत्तरवर्तिशतयातनावानितिबोध्यते। हेतुत्वे पूर्ववृत्तित्वे हेतुमत्त्व उत्तरवर्तित्वे च लिङनुशासनात् नियमश्च यद्योगप्राधम्यव्युत्पत्तिबललभ्य एवमयोग्यताविरहेण नियतपौर्वापर्येण उपस्थितौ पञ्चविधान्यथासिद्ध्यभावेन अन्यथासिद्धनियतपूर्ववर्तित्वं सिद्धमनुपपद्यमानंव्यापारत्वेनादुरितापूर्वं कल्पयति। तच्च साधनत्वे साधनसाधनत्वे वेत्यनान्यथा। वस्तुसूक्तरीत्या साधनत्व एव पर्यवसानमिति ।

नन्वेवमवं वैयर्थ्यम् - एतत्फलस्य ब्राह्मणवधोद्यमप्रवृत्त्यभावस्य अनेनाजननादिति चेन्न, बलवदनिष्टाननुबन्धीष्टसाधनत्वेन। न हि लिङ्गेन कार्यताधीबलेन चानिष्टानुबन्धित्वे बोधिते लिङानुभावेन कार्यताज्ञानाभावात् अप्रवृत्तिजननसंभवात्। अत एवानिष्टपरम्परासम्बन्धस्यापि प्रवृत्तिप्रतिबन्धकत्वेन साधनतत्साधनसाधारणं पौर्वापर्यमत्र बोध्यते। अतो न योग्यताधीः विधौ काम्याव्यवहितज्ञानमपेक्षितति विशेषमाह - **किं चेति**।

अन्यथेति। साधनसाधने साधनत्वस्याभावात् अव्यवहितत्वाभावात् अव्यवहितत्वानुपादाने त्वन्मतेऽपि तत्र प्रवृत्त्यर्थमुक्तपरकाराश्रयणादित्यर्थः।

काम्यसाधनत्वमिति । निवर्तकानिष्ठपूर्ववर्तित्वमात्रप्रतिबन्धकमित्यर्थः।

ननु पाकस्य सिद्धौदनद्वारा भोजनसाधनत्वं न सम्भवति द्वारस्यासाध्यत्वात् ओदनान्तरद्वारा च तथा प्रतिसन्धाने अव्यवहितविशेषणेऽपि कुतो न पाके प्रवर्त्ते ओदनान्तरे द्वारे साक्षात्साधनत्वादिति चेत्, न, पाकस्य भोजनसाधनत्वे विशेषस्याप्रयोजकतया ओदनमात्रस्य द्वारत्वात् तस्य च साध्यत्वाविवादात्। ओदनविशेषे च सिद्धे ओदनकामनाविरहात् न तुल्यत्वम्। नन्वोदने सिद्धत्वात् यथा न कामना तत एव द्वारतापि न, अथौदनान्तरस्यासिद्धत्वमादाय द्वारता तर्हि कामनापि स्यात् तस्यासिद्धत्वादिति चेत्, न। पाकस्यकविशेषद्वारताबाधो न विशेषान्तरद्वारताविरोधी सकलविशेषस्यैकत्र द्वारत्वासम्भवात्, एकविशेषसिद्धौ तु एकविशेषसिद्धौ तु तन्मात्रकामना विच्छिद्यते।

न हि सकलविशेषसिद्धत्वेन सामान्यकामनाविच्छेदः, सकलविशेषसिद्धेरसम्भवेन तदनुच्छेदप्रसङ्गात्।

अथ वा काम्याद्यत् साक्षादसाधनत्वेन ज्ञायमानं यत्कर्त्तव्यतया कामी बुध्यते तत्काम्याव्यवहितसाधनमन्तरा कृत्वैव। यद्वा काम्यादन्यत् कामी प्रथमं काम्याव्यवहितसाधनं कर्त्तव्यतयाऽवैति पश्चात् तद्द्वारा अव्यवहितसाधनमिति प्रथमं यागे कामिकार्य्यताबोधोऽयोग्यतापराहत एव।

उत्तानास्तु विवादविषयो लङ् समभिव्याहृतक्रियान्वितकार्य्यताबोधिका प्रमाणलिङ्त्वात् लौकिकलिङ्वत्, लिङुपस्थाप्यं कार्य्यत्वं समभिव्याहृतक्रियान्वितं लिङुपस्थाप्यकार्य्यत्वत्वात् पचेतेतिकार्य्यत्ववत्, यागो वा कार्य्यत्वान्वितः लिङ्सम्बलितधातुप्रतिपाद्यत्वात् पाकवदित्यनुमानात् क्रियाकार्य्यत्वावगमेनापूर्व्वं कल्प्यमिति, तत्र प्रथमे यागान्वितकार्य्यत्वबोधकत्वं लिङो बोध्यते न तु क्रियते।

न च योग्यताज्ञानं विना तत्सम्भवतीत्युक्तमेव। न हि योग्यतादिकं विनैव तदनुमान-प्रामाण्यप्रयोजनमात्रादन्वितमभिधीयते शब्देन, नान्त्यौ, कुर्य्यादित्यत्र व्यभिचारात् वेदस्यानुवादक-तापाताच्च।

नन्वेवमौपादानानिकबोधोऽपि यागकार्यता न भासेत। काम्यावहितसाधनत्वाभावादित्यरुचेराह - **अथ वेति।**

नन्वपूर्व्वे व्युत्पत्तिविरहः तथा हि प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्या उपस्थिते शक्तिर्ग्रहीतव्या। न च शाब्दानुभवात् पूर्व्वं अपूर्व्वमुपस्थितम्। मानाभावात् अपूर्व्वत्वव्याघातात् अवाच्यत्वापाताच्च।

न च लिङादिना तदुपस्थितिः, व्युत्पत्त्यनन्तरं तत्प्रवृत्तावन्योन्याश्रयात्।

न च कार्य्यत्वेनोपलक्षिते तत्र शक्तिग्रहः, उपलक्षणं हि स्मरणमनुमानं वा अगृहीते सम्बन्धाग्रहादशक्यमिति। मैवम्। कार्य्येधर्म्मिणि कार्य्यत्वेन शक्तिग्रहात् कार्य्यत्वविशिष्टं चोपस्थितमेव ततोऽन्विताभिधानदशायां यागविषयकं कार्य्यमित्यनुभवः स्वर्गकामान्वयायोग्यतया घटादिकं तिरस्कृत्य क्रियाभिन्ने योग्यतावशाद्यागविषयकापूर्व्वे पर्य्यवस्यति न त्वपूर्व्वत्वेन शक्तिग्रहः।

न चापूर्व्वं कार्य्यमित्यनुभवः, भवति च सामान्यतः सम्बन्धबुद्धिः सहकारिवशात् विशेषबुद्ध्युपायः यथा तवैव कर्तृमात्रे सम्बन्धग्रहात् कर्तृविशेषसिद्धिः।

ननु कार्य्यत्वेनापि किं घटादौ शक्तिग्रहः उतापूर्व्वे उभयत्र वा। नाद्यः अन्यप्रतिपत्तावन्यशक्तिग्रहानुपयोगात्। नान्त्यौ प्रागनुपस्थितेरिति चेत्, न। येन हि रूपेण शब्देनानुभवो जन्यते तेन रूपेण शक्तिग्रहः पदार्थस्मरणाञ्च शाब्दानुभवहेतुः, न हि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मरणञ्च घटत्वेन शाब्दानुभवहेतुः।

अन्तराकृत्यैवेति। ज्ञानाकारमानस्य मेयाजनकत्वादित्यभिसन्धायाह - **उक्तानामिति।**

मीमांसकोक्ताना: प्रमाणलिङ्त्वात् विधिलिङा लिङन्तरस्य सिद्धार्थत्वेनाप्रमाणत्वात् । अत एव कुर्यादित्यत्र व्यभिचारं वक्ष्यति। अन्यथा तत्र प्रकृतिप्रत्ययाभावेनाप्रमाणतया क्व व्यभिचार: स्यादिति भाव:।

याज इति। यजेतेति प्रतिपाद्य इत्यर्थ:। कार्यान्वितधीविषय: लिङ्शबलेति लिङ्सम्बन्धेत्यर्थ:।

वेदस्येति। क्रियाकार्यत्वस्य लौकिकप्रमाणगम्यत्वादित्यर्थ:।

अवाच्यस्येति। अपूर्वस्योपस्थितौ तद्द्वारजनकत्वसम्भवेनायोग्यतानिश्चयाभावादित्यर्थ:।

येन हीति। समानप्रकारकत्वस्यावश्यकत्वेन नियामकत्वे संभवति गौरवेण तथात्वाभावादिति भाव:। आवश्यकत्वमेवाह - **न हीति**।

एवञ्च घटादावेव कार्य्ये शक्ता लिङिति शक्तिग्रहस्ततः कार्य्यमिति स्मरणं ततो योग्यतादिवशात् प्रचुरद्रव्य-गुण-कर्म्माणि कार्य्याणि विहाय यागविषयकं कार्य्यमित्यनुभवो भवन्नपूर्वमालम्बते योग्यत्वाच्च तस्य स्थायित्वलाभः।

अत एव वाक्यार्थानुभवमात्रविषयत्वात्तदपूर्व्वम्।

न च स्मृतानामाकाङ्क्षादिवशादन्वयबोधः पदेन क्रियते, न चापूर्वं स्मृतिगोचर इति वाच्यम्। शक्तिग्रह-पदार्थस्मृति-शाब्दानुभवानां समानप्रकारकतामात्रेण हेतु-हेतुमद्भावावधारणात् लाघवादावश्यकत्वाच्च। न तु क्वचित् सहचारमात्रेण अन्वयप्रतियोगिन एवोपस्थितिस्तथा, गौरवात्, गोपदादपूर्वगवाननुभवप्रसङ्गाच्च। विशिष्टवैशिष्ट्यबोधे सर्व्वत्र तथैव, अन्यथा पर्वतीयवन्हिर्व्यापकतया नावगत इति कथं तदन्वयोऽनुमितौ।

ननु सामान्यलक्षणया प्रत्यासत्त्या सर्वा एव व्यक्तयो व्याप्तिग्रहे शक्तिग्रहे च विषयीभवन्ति, कथमन्यथा पर्वतीयधूमव्याप्त्यग्रहे तस्मादनुमितिरिति चेत्, न। येन रूपेण व्याप्तिहस्तेन रूपेण व्याप्यत्वेन वा पक्षधर्म्मताग्रहोऽनुमितौ कारणमस्तु किं तया।

अपि च सा यद्यस्ति ममापि, नास्ति चेत्तवापि।

किञ्च तव दर्शने सास्तीति सुतरामपूर्ववाच्यता कार्य्यत्वेन हि रूपेणापूर्वस्यापि शक्तिग्रहविषयत्वं पदार्थस्मृतिविषयत्वञ्च।

न चैवमपूर्वत्वक्षतिः, यागविषयत्वादेर्विशेषस्य कार्य्ये लिङं विनानुपस्थितेः, यथा पर्वतीयत्वभानं वन्हौ नानुमितिं विना।

ननु कार्यमात्रशक्त्या अनवस्थापिकार्यलाभ इत्यत आह - **योग्यत्वादिति।**अन्वयितया अयोग्यत्वेन क्रियामपहाय कार्यत्वेन शक्तिग्रहे योग्ये कार्ये भवन् यो वस्तुगत्या स्थायी कार्यः तत्र यो भवति अन्यथा क्रियासाधिकारणतया अयोग्यत्वस्य धर्मशक्तिग्रहान्यथानुपपत्तेरिति भावः। क्वचित् जात्यादिपदे तेन रूपेणेति स्वमते तन्मते व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यैव अनुमितिहेतुत्वात् व्याप्यत्वेन इत्यस्मन्मते। तत्र व्याप्यत्वप्रकारकज्ञानस्याधिकरस्याप्यनुमितिहेतुत्वादिति।

ममापीति। प्रमाणस्याचेतनस्यापक्षपातादिति भावः।

ननु कार्य्ये यदि क्रियासाधारणेन लिङ्शक्तिः क्रिया चायोग्येति योग्यापूर्वलाभः तदा नित्यनिषेधापूर्वयोरलाभः।

न हि तत्रायोग्यतया क्रिया त्यक्तुं शक्यते, लक्षणाश्रवणात् कल्पनायाञ्च वीजाभावात्।

न च एकत्र निर्णीतः शास्त्रार्थोऽन्यत्र तथैवेति न्यायात् तत्राप्यपूर्वमेव लिङर्थ इति युक्तं, न ह्यपूर्वत्वेन शक्तिग्रहः, किन्तु कार्य्यत्वविशिष्टे धर्म्मिणि क्रिया च तथा भवत्येव।

न च कार्य्येण समं क्रियाया अन्वयानुपपत्त्या अपूर्वे पर्य्यवसानं, अभेदस्याप्यन्वयादिति। मैवम्। न हि लोके पचेतेत्यादौ कार्य्ये धर्म्मिणि शक्तिः कल्पिता, किन्त्वनन्यलभ्ये कृतिरूपे कार्य्यत्वमात्रे धर्म्मिणः पाकादेर्धातोरेवोपस्थितिसम्भवात् क्रियाकार्य्यत्वस्यान्विताभिधानलभ्यत्वात्तथा च धर्म्मिणि वेदे शक्तिः कल्पनीया सा च क्रियानिरासेनैव। न हि क्रियायाः कार्य्यत्वान्वययोग्यत्वे धर्म्मिणि शक्तिः कल्पयितुं शक्यते, तस्मादयोग्यतया क्रियानिरासानन्तरं तदतिरिक्त एव शक्तिः कल्पनीया।

न च क्रियातिरिक्तकार्य्यात् कार्य्यमात्रं लघु ततः क्रियापि शक्यैवेति वाच्यम्। यतो न ब्रूमः क्रियातिरिक्तकार्य्यत्वेन शक्तिः किन्त्वयोग्यतया क्रियायां निरस्तायां धर्म्मिणि शक्तिकल्पनसमये यत् क्रियातिरिक्तं तत्र शक्तिः न तु शक्तिग्रहे क्रियाप्रवेशः। न हि यत्प्रयुक्तानुपपत्त्या यत्कल्पनं तदेव तस्य विषयः।

न हीति। शक्तिरनुभवजननसामर्थ्यम्। सामर्थ्यस्याजनकत्वात्। तथा च क्रियासाधारणकार्ये शक्तिः क्रियासाधारणकार्यस्य अनुभवजननसामर्थ्यम्। तच्च लोके नास्त्येव। तव कार्ये शक्त्यकल्पनात्। वेदे त्वयोग्यतया क्रियानिरासे तदन्यकार्यानुभव एव सामर्थ्यकल्पनात् न क्रियाकार्ययोरभेदेनाप्यनुभवजनने शब्दसामर्थ्यमित्यर्थः।

वस्तुतस्तु व्युत्पत्त्यवैचित्र्यात् विषयतया स्वार्थानुभवजननासामर्थ्यमेवेति नित्यम्। न तु नित्यनिषेधस्थलेवत्कार्यत्वमात्रमित्यत आह - **न तु कार्यत्वमात्रमिति**।

धर्मिणीति। तद्विषयकापूर्वबाधकाभावात् । न चैवं लोकेऽपि तत्त्वापत्तिः। लौकिकानामपूर्वे तात्पर्याभावादिति भावः।

एवञ्च कार्य्यत्वेनापि तदतिरिक्तकार्य्ये एव शक्तिकल्पनान्नित्य-निषेधयोरपि तदेवोपासनाद्यन्वययोग्यं लिङाभिधीयते न तु कार्य्यत्वमात्रं धर्म्मिणि बाधकाभावात् लक्षणाप्रसङ्गाच्च।

घटादिस्तु लिङ्शक्तिग्रेह न तिरस्क्रियते न पुरस्क्रियते उभयथापि गौरवात्। अन्विताबिधानदशायान्त्वयोग्यतया तस्याप्रवेशः विधिप्रत्ययस्य च तत्राप्रयोगः केवलस्य तस्यासाधुत्वात्। धातुसमभिव्याहारस्थले च तदर्थेनान्वयबोधजननियमेन घटाद्यप्रतिपादकत्वात्।

अत एवाप्रयोगादेवाप्रयोगोऽपूर्वत्वं वा प्रयोगोपाधिरिति वदन्ति।

अथाप्रतिपाद्यघटादिवृत्तितया न कार्य्यत्वं प्रवृत्तिनिमित्तं प्रतिपाद्यमात्रवृत्तेरेव तथात्वात् । अन्यथा प्रमेयत्वमेव तथास्त्विति चेत्, न। यत्प्रकारिका हि प्रतिपत्तिः पदजन्या तदेव तत्र प्रवृत्तिनिमित्तं फलकल्प्यत्वात् शक्तेः न तु प्रतिपाद्यमात्रवृत्ति सास्नादौ व्यभिचारात्।

ननु बाधकं मा भूत् साधनमपि नास्ति। लिङ्धर्ममात्रोपस्थापनादित्यत आह - **लक्षणेति।** तथा च

कार्यशक्त्यैव लिङ् प्रमाणमित्यर्थः। उभयथापि घटकार्यत्वेन घचान्यकार्यत्वेन वेत्यर्थः।

अन्विताभिधानदशायामस्तु परित्यागः। शक्ते प्रयोगः कदाचित् भवत्येवेति नियमात् कदाचित् समापद्येतेत्यत आह - **विधिप्रत्ययस्येति**। विधिलिङ इत्यर्थः।

अप्रयोगनियमस्य सर्वसिद्धत्वमित्याह - **अत एवेति**।

सामान्यसामग्रीविलम्बादेव प्रयोगविलम्बेन पूर्वप्रयोगरूपकारणान्तरभावो न वा प्रयोगोपाधेरन्यत्र प्रयोगप्रतिबन्धकत्वकल्पनमित्यस्वरसादाह - **वदन्तीति**। **अन्यथेति।** मानान्तर्भाव इत्यर्थः।

यत्प्रकारिका हीति। नियमत इति शेषः। तेन यदि नियमत उपस्थितिः तदा शब्दाश्रयत्वमपि शक्यमिति मते तदपि प्रवृत्तिनिमित्तम्। अन्यथा इष्टव्यान्यत्वादिनाप्युपस्थिते नियम इत्यनेनैव वारणम्। तत्र प्रतिपाद्ये शक्य इति यावत्। अतः प्रतिपत्तिप्रकारीभूतायाः अप्याकृते शक्यावृत्तित्वाद्यवच्छेदः तेन शक्यत्वे शक्यवृत्तित्त्वे शक्योपस्थितिप्रकारकत्वमिति प्रवृत्तिनिमित्तलक्षणमुक्तं भवति। सास्नादौ सास्नासमवेतत्वादौ यथाश्रुते सावयवस्य अवयव्यवृत्तित्वेनासङ्गतत्वापातात्।

न च प्रमेयत्वं तथा, तद्बोधस्याप्रवर्त्तकत्वात्। अत एव लोके लिङ् लाक्षणिकौ क्रियाभिन्ने धर्म्मिणि वेदे शक्तिकल्पनात्। न च लौकिकानामपूर्वे तात्पर्य्यं सम्भवति, पूर्वं प्रमाणान्तरेणाप्रतीतेः, क्रियासाधारणशक्तावपि लोके लक्षणैव पचेतेत्यत्र हि पाककार्य्यतावगम्यते, तत्र कार्य्यत्वे लङस्तात्पर्य्यं लाघवात्। न धर्म्मिणि क्रियाया धातुलभ्यत्वात्।

तदाहुः, तात्पर्य्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्य्यमति, तृतीयायाः करणत्वैकत्ववत् कार्य्यम्। कार्य्यत्वञ्च न स्वतन्त्रं शक्यम्। किन्तु विशिष्टम्। विशिष्टाच्च विशेषणमन्यदेवेति कार्य्यत्वे लक्षणा। न च कार्य्यत्वविशिष्टधर्म्मयुपस्थितावपि धर्म्यं शमपहाय क्रियायां कार्य्यत्वान्वयोऽस्तु किं लक्षणयेति वाच्यम्। न हीतरधर्म्मिगतत्वेनोपस्थितस्य धर्म्यन्तराकाङ्क्षास्ति।

अतः स्वतन्त्रकार्य्यत्वोपस्थितये लक्षणा यथा पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशार्थितया तदन्वितत्वेनोपस्थितस्य कपालस्य नोपवापाकाङ्क्षेति स्वतन्त्रकपालोपस्थितयेऽ-धिष्ठानलक्षणा।

वस्तुतो यथाश्रुतमेव प्रतीतिवैचित्र्येण सम्बन्धभेदेन उभयोर्ज्ञानमात्मनोरिह परस्पराधेयाभ्युपगमादिति भावः। नन्वस्ति प्रतिपत्तिप्रकारकत्वमेव प्रमेयत्वस्यापि । तथा च तद्वारणाय मात्रगर्भत्वमावश्यकमित्यत आह - **न च प्रमेयत्वमिति**। व्यवहाराधीनव्युत्पत्त्या प्रमेयत्वप्रकारकत्वस्यास्फुरणादिति भावः।

क्रियाभिन्न इति। तथा चाशक्यक्रियाप्रतियोगिककार्यभेदबोधिका लिट् लाक्षणिकीत्यर्थः।

ननु यागवत् पाकविषयापूर्वमेव लोके लिहर्थ इत्यत आह - **न चेति**।

ननु पाकः कार्य इत्यनुभवो लिङा जन्यते। स कथं क्रियाभिन्ने धर्मिणि लिङ्शक्तौ लक्षणापि निर्वाह्या। क्रियाभिन्नकार्यस्मृतौ लिङा जनितायां कार्यमात्रस्य स्मृतौ वा । आद्यो योग्यतया नादेधीरज्यत्य क्क तथास्मृतिरित्यत आह - **क्रियासाधारणेति।**

ननु तथापि न लक्षणयोः शक्ययोः एकनिरासे अपरान्वयस्य शक्तिनिर्वाह्यत्वादित्यत आह - **कार्यं कार्यत्वं चेति।**

स्वतन्त्रकार्यत्वेति। पराविशेषणकार्यत्वेत्यर्थः। यत्प्रकारान्वितत्वेनोपस्थितितः न त्तप्रकारका-काङ्क्षा। न हि पुरोडाशप्रयोजनितत्वेनोपस्थितकपाले किमस्य प्रयोजनमित्याकाङ्क्षास्ति।

न च व्युत्पत्तिविरोधः, न हि लोके क्रियाकार्य्यत्वे शक्तिरधारिता, येन विरोधो भवेत्, किन्तु कार्य्यत्वमात्रे क्रियाया धातुलभ्यत्वात्। न च धर्म्मन्तरे शक्तावपि तद्भङ्गः, तस्मात् प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानां गृहीतं प्रत्ययार्थश्चापूर्वमपीति न विरोधः।

अस्तु वा लोके लिङः क्रियाकार्य्यत्वे शक्तिः तथापि तद्भङ्गं विनैव नानार्थन्यायेन वेदे धर्म्मन्तरे शक्तिस्तां विना स्वर्गकामान्वयासम्भवात्।

तेन पुरोडाशकपालमिति प्रथमोपस्थितमपि चतुर्थसमासं निरस्य पुरोडाशस्य कपालमिति सम्बन्धलक्षणा आस्थीयते। स हि कोऽस्याश्रय इत्याकाङ्क्षाप्रतिबन्धिकापि किमस्य प्रयोजनमित्याकाङ्क्षां न व्याहरन्ति। तेन रूपेणानुपस्थितेरत एव कपालपदे अधिष्ठानलक्षणायामपि पुरोडाशपद उक्तचतुर्थ्यर्थलक्षणायामुक्ताकाङ्क्षाभावेन तद्दोषतादवस्थ्यात्। कपालपदं कपालत्वविशिष्टधीजनकमेव। न च घटजनकेन दण्डेन गामभ्याजेति दर्शनात् नैवं वेदे न्यायानुसारितात्पर्यके विचारालौकिके पुरुषाधीनतात्पर्यके च नियमादित्यवधेयम्।

ननु न व्युत्पत्तिर्वरव्युत्पत्तिविषयस्य घटादेः सत्त्वात् अतो व्युत्पत्तिः लोके कार्यत्वे धर्मे वेदे च यो धर्मिणि सा कल्प्यत इति व्युत्पत्तिविरोधमाशङ्क्य,परिहरति - **न च व्युत्पत्तीति।**

न च धर्म्यन्तर इति शक्त्यभिवृद्धावपि प्रथमगृहीतशक्त्यपरित्यागादित्यर्थः। ननु व्युत्पत्तिधीः शक्तिग्रहरूपा पदस्वाभाव्यरूपा च। तत्र शक्त्यभिवृद्धा आद्याया अविरोधेऽपि द्वितीयाया विरोधः। प्रकृत्यर्थगतः स्वार्थानुभावकत्वं हि पदस्वभावः। इह तु लिङ्कार्यत्वं स्वार्थमपूर्वे बोध इति न याग इत्यत आह - **तस्मादिति।** इह कार्यत्वं न स्वार्थप्रकृत्यर्थगतम्, किन्तु कार्यमिति भावः।

अस्तु वेति। प्रथमं लोके कार्यत्व एव शक्तिः। अथ वेदे कार्ये धर्मिणि लोके च कार्यत्वे लक्षणेति कल्पयतीत्युक्तम्। अधुना तु लिङ्त्वावच्छेदेन कार्यत्वे प्रथमक्लृप्तां शक्तिं वेदे वैदिकलिङ्त्वावच्छेदेन कार्ये शक्तिं कल्पयित्वा लौकिकः लिङ्त्वावच्छेदेन सङ्कोचयतीत्तर्थः।

अन्ये तु पचेतेत्यादौ धातुनैव पाकः कार्य्योऽभिधीयते लिङ् तत्र तात्पर्य्यग्राहिका न तु शक्ता नियमतस्तादृश्येव तत्प्रयोगात्, सामान्यशब्दस्य विशेषपरत्वञ्च न वृत्त्यन्तरनिर्वाह्यं। अत एव वर्त्तमानत्वादौ न लङादिशक्तिरिति लोके शक्त्यग्रहात् न व्युत्पत्तिविरोध इति, तदसत्, लिङः कार्य्यत्वेऽशक्तौ पचिपदात् कार्य्यत्वज्ञानानुपपत्तेः युगपद्वृत्तिद्वयविरोधात्। न चाजहत्स्वार्था, उभयसाधारणस्यानुपस्थितेरिति दिक्।

यद्वा ज्ञाने पदानां शक्तिः शक्यत्वात्, एवञ्च लिङ्पदं एकत्रोच्चारणे स्थायित्व-स्वर्गजनकत्व-कार्य्यत्वानां ज्ञाने शक्तमिति व्युत्पत्तिः स्थायिज्ञानादिकञ्चोपस्थितेव, ततो लिङ्पदेन एकत्रोच्चारणे योग्यतादिवशात् यागविषयकं स्थायिस्वर्गजनकं कार्य्यमित्येकं ज्ञानमनुभवरूपं प्रचुरद्रव्य-गुण-कर्म्मविलक्षणविषयं क्रियते।

नानार्थन्यायेनेति। तत्रैकरूपावच्छिन्न एवार्थभेदः। अत्र नानाविशेणणावच्छिन्ने विशेष्य इति भेदः। दिगर्थस्तु उभयसाधारणधर्मसंभवे उभयोः प्राधान्येनान्वयः स्यात्। काकशुनोरिव । न तु कार्यत्वविशिष्टानुभव इति ।

ननु शक्त्यभिवृद्धावपि व्युत्पत्तिविरोधः। कार्यत्वविशेष्यकज्ञानापेक्षया कार्यज्ञानस्यासत्त्वादित्यत आह - **यद्वा ज्ञान** इति।

स्थायीति। स्थायिस्वर्गजनककार्यत्वादीनां ज्ञाने शक्य इत्याकारकव्युत्पत्तौ स्थायिस्वर्गजनकयो (४३१) रतिरिक्तयोः शक्त्यभिवृद्धावपि कर्यत्वे श्रममात्रेण व्युत्पप्तिविरोधः इत्यर्थः। स्थायिस्वर्गजनकं कार्यमित्येवं ज्ञानमनुभवमिति ।

न च कार्यत्वस्य प्रकृत्यर्थयागानन्वयाद्युत्पत्तिविरोधः। पचतीत्यत्र पाकविषयकवर्तमानयत्नानुभवेन समानपदोपात्तकृतिवर्तमानत्वानुभवस्य परम्परया प्रकृत्यार्थान्वायादत्राप्यविरोधादिति भावः।

न चैवं नानार्थवदेकैकज्ञाने शक्तिग्रहादेकैकविषयोऽनुभवो भवेत् न समुदितविषय इति वाच्यम्। शक्तिग्रहकाले एकत्रोच्चारण इति विशेषणमहिम्ना तत्सम्भवात्, नानार्थे तु प्रमाणाभावेन गौरवेन च शक्तिग्रहे तस्याप्रवेशात्। तथाप्यमीषां समूहालम्बनं स्यान्न तु परस्परं वशिष्ट्यज्ञानमिति चेत्, न, साकाङ्क्षधर्म्म-धर्म्मिगोचरैकज्ञानस्यैव विशिष्टज्ञानत्वात्, न च समूहालम्बनस्भेदः। तस्य निराकाङ्क्षविषयत्वात्।

अस्तु वोपस्थितेष्ठगृहीतासंसर्गेषु स्थायित्वस्वर्गजनकत्व-कार्य्यत्वेषु शक्तिः अगृहीतासंसर्गकस्यापि विशिष्टज्ञानसमानशीलत्वात्। अत उक्तन्यायेन तावद्विषयकमेकं ज्ञानं लिङ्पदेन जन्यते। एवमेवालौकिकार्थेषु स्वर्गादिपदेषु शक्तिग्रहः।

ननु भवतूक्तप्रकारेण शक्तिग्रहस्तथापि लिङ्पदात् यागविषयककार्य्यानुभवे सत्यपूर्वलाभात् स्वर्गकामान्वयः सम्भवतीत्युपपादकप्रतिसन्धाने प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्या लिङः कार्य्ये शक्तिकल्पनम्। न हि प्रथममुपपादकप्रतिसन्धानं विनार्थापत्तिः सम्भवति।

न च शक्तिकल्पनात् पूर्वं उपपादकशरीरनिविष्टमपूर्वं ज्ञातमिति चेत्, तत् किं य एव विशेष उपपादकः पक्षधर्म्मताबलात् सिध्यति तत्प्रतिसन्धानमर्थापत्तौ कारणं तथात्वे पूर्वं गृहीतमात्रस्य कल्प्यत्वे क्लपनोच्छेदापत्तिः।

तस्मात् यथा सामान्यतोभोजनस्य पीनत्वसम्बन्धावगमात् उपपादकतर्क्के सति कल्पनातो विशेषावगमः। यथा वा सामान्यशक्तव्यक्तिवाचकपदेन समभिव्याहारवशाद्विशेषाभिधानमेवमत्रापि कार्य्यमात्रवाचकत्वे कार्य्यविशेषलाभः सम्भवतीति तर्क्कितोपपादकप्रतिसन्धानाद्भवत्यर्थापत्त्या शक्तिकल्पनम्। यागविषयकञ्च कार्य्यं न घटादि तस्य सविषयकत्वाभावात्, विषयत्वञ्च ज्ञानघटयोरिव स्वभावसम्बन्धो वा तन्निरूपणाधीननिरूपणत्वं वा तत्सानसंवित्संवेद्यत्वं वा व्यावृत्तसाधनत्वं वेति।

विशेषणमहिम्नेति । अन्यथा का गतिः। आख्यातवाच्यगतिवर्तमानत्वसंख्यादौ का वा तृतीयादिसंख्याकरणतादाविति भावः। अगृहीतेत्युपलक्षणम्। धर्मधर्मिभावापन्नेत्यपि द्रष्टव्यम्। समूहालम्बने धर्मधर्मिभावात्मक-विशेषास्पुरणेन तत एव तत्कारणमिति भावः।

व्यावृत्तसाधनत्वमसाधारणकारणकत्वात्, न तु तेनेति । तथा च न शक्त्यभिवृद्धिरिति भावः।

अस्ति हि याग-दान-होमजन्यापूर्वाणां तुल्यरूपसाधनान्तरव्यवच्छेदेन प्रत्येकमात्रजन्यत्वम्। तदुक्तम् --

'विशब्दो हि विशेषार्थः सिनोतिर्बन्ध उच्यते।
विशेषेण सिनोतीति विषयोऽतो नियामकः। । '
इति।

ननु येन रूपेण शक्तिग्रहः तेन रूपेण कार्य्यत्वशक्ताल्लिङ्पदाल्लक्षणया कार्य्योपस्थितौ योग्यतादिवशादपूर्वलाभोऽस्तु कार्य्यस्मरणं हि अन्विताभिधानोपयोगि न त्वपूर्वस्मरणं । तच्च पदेन पदार्थेन वेति न कश्चिद्विशेषः, कार्यञ्च शक्यकार्य्यत्वसम्बन्धितयावगतमेवेति चेत्, न। लिङो लाक्षणिकत्वेनापूर्वाननुभावकत्वात्।

न चेतरान्वितस्वार्थशक्तस्य यज्यादिपदस्येतरदपूर्वमादायानुभावकत्वमिति वाच्यम्। इतरोपलक्षितस्वार्थान्वयमात्रे हि पदानां शक्तिर्न त्वितरच्च गौरवात् पदान्तरलभ्यत्वाच्च। लक्षणायाञ्च तीरोपलक्षितान्वयशालिस्वार्थानुभवकत्वमितरपदस्य तीरस्य तु संस्कारादुपस्थितिरसन्निहितेनान्विताभिधानाभावात्।

न चापूर्वं संस्कारविषयः। किञ्च यजिपदेन स्वर्गकामकार्य्यविषयो याग इत्यनुभवो भवेत् लक्षणायामितरपदस्य लक्षणीयविशेषणस्वर्थविशेष्यकानुभवजनकत्वात्। न चैतादृशो बोध आकाङ्क्षितः।

न त्वपूर्वे लक्षणया तस्य स्मरणम्। न वानुभवे स्मरणं संभवतीत्यत आह - **कार्येति**। कार्यधर्मिणि लक्षणा, न त्वपूर्व इत्यर्थः।

ननु लक्षणया लक्ष्योपस्थितिशक्येन पदस्य तत्तत्संबन्धात्। तथा च कथं तदनुभव इत्यत आह -- **पदेन पदार्थेन वेति**। लक्षणामात्रोच्छेदात् पदाननुपस्थितोऽप्यर्थः शाब्दधीविषय इत्यर्थः ।

ननु लक्षणयां लक्षणस्मृतिरेव यदि तदानुपस्थिततीराधिकरणकघोषाननुभवापत्तिः। अतो लाक्षणिकस्याननुभावकत्वात् (४३२ क) पदान्तरस्यानुभावकत्वं कल्प्यमित्यरुचेराह -- **किं चेति** ।

न च यागाविशेषितकार्य्यमात्रेण स्वर्गकामान्वयः प्रतीयते, किन्तु यागविषयककार्य्यविशेषे, तथा च तथाविधबोधार्थं लिङः कार्य्ये शक्तिरेवेति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे अपूर्व्ववादपूर्व्वपक्षः।

न चैतादृश इति स्वर्गकामकार्यविषययोग इति बोधो न चिकीर्षाहेतुः। स्वर्गविशेष्यकज्ञानस्यैव चिकीर्षाहेतुत्वात्। तादृशज्ञानस्यैव इच्छाजनकत्वेन सुखेच्छायां निरूढत्वात् । स्वर्गकामस्य यागविषयकं कार्यमित्यनुभवेन त्वपूर्वविशेष्यकेण चिकीर्षायां जनितायां यागोऽपि विषयः। वृष्टिसाध्यसुखेच्छायां वृष्टिवदिति भावः । स्थायिव्यापारवत्वेनोपस्थितिं विना न स्वर्गसाधनत्वान्वयः। तत्रान्वयप्रयोजकं तद्रूपं योग्यतात्वेनापेक्षते । स्वातन्त्र्येण वा योग्यातावच्छेदकरूपज्ञानं हेतुः।

तत्र नाद्य इत्याह -- **अन्यथेति**। नान्त्यः, अग्रे निरस्यत्वात्।

अथापूर्व्ववादसिद्धान्तः

अत्रोच्यते। अन्वयप्रयोजकरूपवत्त्वं न योग्यता अनोप्तोक्ते पयसा सिञ्चतीत्यत्र सत्यप्यन्वयप्रयोजकद्रवद्रव्यत्वे बाधकप्रमायामन्वयाबोधात्।

अथ योग्यत्वेऽपि स्वबाधकप्रमाविरहः कारणं तर्हि सोऽप्यवश्यापेक्षणीय इति लाघवात् सैव योग्यता।

एवञ्च तदेव योग्यमयोग्यञ्च स्यादिति चेत्, सत्यं। दशविशेषे तदेव साकाङ्क्षमनाकाङ्क्षमासन्नमनासन्नञ्च। तथा स्वबाधकप्रमा-तद्विरहदशायां तदेवान्वयबोधे योग्यमयोग्यञ्चाभिधीयते। स्वबाधकप्रमायां तद्विरहे वा योग्यायोग्यताव्यवहारदर्शनात् स्वबाधकप्रमाविरहदशायां योग्यतादिसत्त्वेऽपि वह्निना सिञ्चतीत्यत्रान्वयबोधः अप्रमादोषवत्पुरुषप्रणीतत्वात्।

द्रवदव्य इति। न चान्वयप्रयोजकत्वमनन्वितत्वेनोपस्थितिविरहः। तथा चानन्वितत्वज्ञानेऽन्वय-प्रयोजकज्ञानमेव नास्तीति क्कान्वयव्यभिचारः। तदज्ञाने तु द्रवद्रव्यत्वज्ञानेऽन्वयधीरेवेति क्क स इति वाच्यम्। एवं सत्यनन्वयज्ञाने नान्वयधीस्तदज्ञाने क्क सेति सैव योग्यतेति वक्ष्यमाणे पर्यवसानादिति भेदः।

साकाङ्क्षमिति । एतेनाकाङ्क्षासत्तिसाम्यं दर्शयती तद्वदियं सामान्यसामग्री न प्रमाणसामाग्री सत्यपि दर्शितमिति। सा च सकलबाधकप्रमाविरहः। अत एव वह्निना सिंचतीत्यत्र स्वबाधकप्रमाविरहादन्वयज्ञानेऽप्यन्तत ईश्वरस्य बाधकप्रमासत्वात् न प्रमा स्वबाधकप्रमायां तदज्ञानमेव (४३२ ख) तदभिसंधानवदित्यादि वक्ष्यति।

न चैवं स्वसामान्यसामग्रीत्वे स्वबाधकज्ञानाभाव इत्येव सम्यगिति वाच्यम्। पीतः शङ्खइति ज्ञानवतः श्वेतः शङ्ख इति शब्दादन्वयज्ञानानुत्पत्तिप्रसंगादिति ।

ननु योग्यतावच्छेदकधर्मधीः करणमिति छिद्रेतरघटत्वेनेवान्वय इत्यत आह - **नन्विति**।

सामान्यभानस्य किञ्चिद्विशेषभाननियतत्वात् विशेषाभाने कथं तद्भासत इति चेत्, न। वस्तुगत्या परम्परासाधनं विशेषो भासत एव परम्परासाधनत्वन्तु प्रकारो न भासते । तत्प्रकारभाने हि परम्पराघटकज्ञानस्य हेतुत्वात्। यथा घटेन जलमाहरेत्यत्र योग्यतया छिद्रेतरघटे घटत्वेन भासते। न तु छिद्रेतरत्वेन। तथा सति लक्षणायां युगपद्वृत्तिद्वयविरोधेन घटानन्वयप्रसङ्गात् उभयसाधारणरूपेणानुस्थितेश्च नाजहत्स्वार्था।

अथ संस्कारात्तदुपस्थितिः। न च सुब्विभक्तीनां प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थो नान्वीयेतेति वाच्यम्। प्रकृत्यर्थो हि प्रकृतिप्रतिपाद्यः लक्षणीयान्वयानुरोधात्। स च संस्कारसहकारात् प्रकृतेऽपि। न च तस्यानियतोद्बोधकान्न नियता तदुपस्थितिः। फलबलेन तथा कल्पनादिति चेत्, न, शब्दोपस्थापितेनैव शब्दस्यान्वयबोधकत्वात्।

घट इति । न च छिद्रेतरत्वेनैवान्वयः तीरत्वेन गङ्गातीरस्येव तेन घटस्यैवान्वयादिति वाच्यम्। एवं सति छिद्रेतरत्वस्योपलक्षणतया योग्यत्वं तदुर्थो वाच्यः। छिद्रेतरछिद्रस्यापि कदाचिज्जलाहरणबाधात् तज्जातीये जलाहरणमबाधितमिति छिद्रेतरत्वस्य उपादानापत्तेः। घटजातीयेऽपि तथात्वात्। एवं च जलस्यापि सर्वस्य घटयोग्यत्वम्, आनयनस्यापि सर्वस्येत्येवं योग्य योग्यमयोग्यवदिति घटोन जलमाहरतेति वाक्यर्थः। तथा चाननुभवो विरोधश्चेति योग्यघटेन योग्यजलयोग्याहरणां कुर्विति वाक्यार्थो वक्तव्यः । तथा च युगपत् वृत्तिद्वये विरोधः ।

न चैवं सर्वपदानां युगपत् वृत्तिद्वयध्रौव्ये तस्य दोषत्वमेव नेति वाच्यम्। घटो द्रव्यमित्यादौ वृत्यैक्यसंभवादिति।

उभयेति । तत्संभवेप्युभयोः प्राधान्येनान्वयः स्यात् । न तु विशेषणविशेष्यभावेनेति ध्येयम्। प्रकृतिप्रतिपाद्यो न तु प्रकृतिशक्य इत्यर्थः ।

शब्दोपस्थापितेनेति । शब्दवृत्त्युपस्थापितेनेत्यर्थः । स्थायिव्यापारत्वस्यापि संस्कारवशादेवोप-स्थितावपूर्व (४३३ क) वाच्यतापत्तेः । त्वयोप्येवं स्वीकार्यत्वादिति भावः । न चाननुभावेत्वेनापूर्वेन स्मृतिरिति वाच्यम्। सामान्यस्मरणे योग्यताबलाद्विशेषलाभस्यान्यत्रैवात्रापि संभवादिति ।

न चैवमाकाशपदाशक्यस्य संस्कारोपस्थितस्य शब्दाश्रयत्वस्य कथं शाब्दानुभवविषयत्वमिति वाच्यम्। नियमतो यद्धर्म्मवत्त्वेनोपस्थिते यत्र शक्तिग्रहः तत्स्मरणजनकसंस्कारस्य तद्धर्म्मविषयतानियमेन तदुद्बोधकादेव तदंशेऽपि उद्बोधनियमेनाकाशपदादशक्यस्यापि तस्य भानात्।

अस्तु वा तदपि शक्यं यदि नियमत उपस्थितिः सहप्रयोगस्य वाच्यादिपरत्वेनाप्युपपत्तेः। वस्तुतस्तु नियतोपस्थिरेव नास्ति।

अस्तु वा पदादपि निर्व्विकल्पकं तर्ह्यन्वयबोधदशायामितरान्वयानुपपत्त्यभावादयेऽपि कल्पना न स्यादिति चेत्, तर्हि तवापि कार्य्यताबोधानन्तरं औपादानिकसाधनताबोधो न स्यात् । औपादानिकबोधेऽनुपपत्तिबोधस्य हेतुत्वात्, कल्पनामात्रोच्छेदश्चैवं स्यात् प्रतीतानुपपत्तिमलकत्वात् कल्पनायाः।

आकाशापदमाक्यस्येति । शक्त्युपस्थाप्यत्वमात्रं शाब्दज्ञानविषयत्वेन तन्त्रम्। न तु तद्वृत्तोपस्थाप्यत्वम्, गौरवादिति भावः ।

नन्वेवं गोत्वादिकमपि न शक्यम्, उक्तनियामकेनैव तदुपस्थितिसंभवात्। अतः पदान्नियतोपस्थितिवृत्तिसाध्यैवेत्यरुचेराहा -- **अस्तु वेति** ।

ननु शब्दाश्रयत्वस्य प्रवृत्तिनिमितत्वे आकाशः शब्दाश्रय इति शब्दप्रयोगः पौनरुक्त्यात् न स्यादित्यत आह -- **सहेति** । पिकः कोकिल इत्यत्र पिकः कोकिलशब्दवाच्य इतिवत् सहप्रयोग इत्यर्थः। नियतोपस्थितिरेव नास्तीति कदाचिदष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्युपस्थितेः। तथा च नियतानुपस्थितं न तच्छक्यम् धर्म्यंशोत्पत्तिकयैव शक्योद्बध्यसंस्कारवतः स्मर्यमाणत्वाच्च शब्दधीविषयत्वम्।

यदि च नियतानुपस्थितं न शब्दधीविषयः। तदाह - **अस्तु वेति** । यद्वा वस्तुत इत्यादिकमुपस्थितिरेव न धर्मस्यत्येतत्परञ्च सुगममेव ।

न च निर्विकल्पकस्मृतौ हेत्वभावः। समानप्रकारकस्मृतिं प्रति विशिष्टज्ञानस्य हेतुत्वादिति वाच्यम्। स्वविरुद्धार्थप्रकारकस्मृतिं प्रति जनकत्वात्। अनुभवे तु पदार्थान्तरस्मृतेरेव विशेषणज्ञानत्वेन तज्जन्यत्वाद्विशिष्टधीत्वमेवेति। (४३३ ख)

वस्तुतस्तु .....वरहस्य योग्यतात्वे संशयसाधारणं ज्ञानमात्रमेव तस्याः प्रयोजकं तेन यत्र बाधकप्रमानिश्चयस्तत्रैवान्वयबोधाभावोऽन्यत्र तु तद्बीमात्राच्छाब्दबोध इति यागेऽपि योग्यतासंशयेनान्वयबोधाप्रतिबन्धः बाधसंशयस्याप्रतिबन्धकत्वात्।

अन्यथा अनुमानाद्युच्छेदप्रसङ्गात्। अपूर्व्ववाच्यत्वेऽप्यपूर्व्वे स्वर्गसाधनतासंशयाद्योग्यतायाः संशय एव अपूर्व्वस्य प्रथमं स्वर्गसाधनत्वानिश्चयादुपादानस्यान्विताभिधानोत्तरकालीनत्वात् साधक-बाधकप्रमाणाभावेन द्वारसम्भावनया साधनत्वसम्भावनातः स्वर्गकामान्वय इति तुल्यम्।

अपि च यथा न क्रिया स्थिरेत्ययोग्या तथा कार्य्यमपूर्व्वमपि विशिष्टं न स्थिरं कृतेर्विनष्टत्वात्। न चाधिष्ठाने अपूर्व्वमात्रे साधनत्वं, तस्य पदार्थैकदेशत्वेनान्वयाप्रतियोगित्वात्।

अन्ये त्वन्यविरोधिरूपविरहो योग्यता। अत एव वन्हिना सिञ्चतीत्यत्र तद्भ्रमे भवत्यन्वयभ्रमः। यागे चान्वयविरोधिरूपविरहो योग्यानुपलब्ध्या सुगम एव।

न च यागे आशुविनाशित्वं कालान्तरभाविफलजनकत्वविरोधीति वाच्यम्। अनुभवे क्वाथपाने चाशुविनाशिनि कालान्तरभाविफलजनकत्वाद्यागेऽप्यन्ततस्तत्सत्त्वात्, अन्यथा-पूर्व्ववैफल्यात्।

ननु योग्यता च न स्वीकारगौरवादेकैव सकलबाधकप्रमाविरहरूपा, सा तस्यां स्वरूपसत्याः कारणत्वे शब्दाभासोछेदापत्या प्रमाप्रयोजकत्वादनुगतगुणान्तराभावाच्च। तत्प्रमातया वाच्या। सा च प्रकृते निश्चयरूपा नेति संशयरूपा वच्येत्याह -- **वस्तुत** इति ।

ननु योग्यतासंशयोऽपीत्यपूर्वानुपस्थितावयोग्यतानिश्चय---वस्वर्गव्यवहितपूर्ववृत्तित्वस्य यागे बाधादपूर्वे तूपस्थिते तदव्यवहितपूर्ववृत्तित्वबाधो नास्तीति साङ्गस्याव्यवधायकत्वादित्यरुचेराह -- **अपि चेति**। विशिष्टस्य स्थिरत्वेनायोग्यतानिश्चयादिति भावः।

अन्ये त्विति। स्वरसोद्भावनम्। तन्मूलं त्वन्वयाविरोधिधर्मवत्त्वस्यैव तदपेक्षया लाघवे तदप्यन्वयविरोधित्वानुपस्थितिधर्मवत्त्वम्। तत्र चानुपस्थितिः स्वरूपसती तादृशधर्मवत्त्वमात्रस्य ज्ञानमित्यपरं लाघवम्।

अस्मादन्वयप्रयोजकरूपवत्त्वं लघ्विति चेत्, न। तत्सत्त्वेऽप्यनाप्तोक्ते व्यभिचारादन्वयविरोधित्वेन यत्किञ्चित्प्रतिसन्धानं तत्रास्त्येव अन्ततो बाधकप्रमाविषयत्वस्यैव विरोधिनो ज्ञानादिति।

काम्यसाधनत्वज्ञानमेव प्रवर्त्तकं लाघवात्। सिद्धौदनस्तृप्तिकामो लघूपाये भोजने प्रवर्त्तते न तु पाके गुरूपायत्वात्, जलाद्यर्थी च सन्निहिते। अत एव ज्योतिष्टोमादौ श्रुतस्वर्गफलकत्वेऽपि गुरूपायत्वेनाननुष्ठानलक्षणाप्रमाण्यापत्त्या फलभूमा कल्प्यते। इष्टोत्पत्त्यनान्तरयकश्रमजनकत्वं वा प्रतिबन्धकं।

न च तदपि बाधकमानाभावेनान्यथासिद्धत्वादित्युक्तम्। कामिकाम्याद्यदित्याद्युक्तं दूषयति -- **काम्येति**।

तत्रोक्तमतिप्रसङ्गमुद्धरति -- **सिद्धौदन** इति। बलवद्द्वेषविषयदुःखजनकत्वज्ञानस्य प्रवर्तकस्य तत्राभावादोदनान्तरोत्कटेच्छायां सिद्धौदनोऽपि प्रवर्तत एव पाकान्तरदुःखद्वेषस्य तत्रेच्छातो दुर्बलत्वात् फलविशेषेच्छोद्ये न तदुपाय उत्कटेच्छासामग्र्या दुःखद्वेषनिबन्धनपाकरूप (४३४ क) तदुपायगोचरनिवर्तकद्वेषानुत्पत्तेरिति भावः।

अत एव ज्योतिष्टोमादौ फलभूमा बहुकालव्याप्तिर्वापि लक्षणं वा फलं कल्प्यते, येन तदुत्कटेच्छाया तदुपायानुष्टानदुःखद्वेष दौर्बल्येन तदुपायविषये बलवद्द्वेषाविषयत्वज्ञानात् ज्योतिष्टोमे प्रवृत्या कृतिसाध्यत्वं लिङर्थो न बाध्यते। अन्यथा फलसाम्ये लघूपाये संभवति गुरुपायतया तत्राप्रवृतौ कृतिसाध्यत्वं लिङर्थो बाध्येतेति भावः।

ननु साक्षाद्विषयाविरोधिने ज्ञानस्य जनकज्ञानविधटनद्वारा प्रतिबन्धकत्वम् । अतो बलवदनिष्टसाधनत्वज्ञानस्य प्रतिबन्धकत्वं बलवदनिष्ठाननबन्धित्वज्ञानविधयकतयेति तद्ज्ञानं जनकमित्युक्तम्। इदानीं बाधज्ञानं साध्यज्ञान इव साक्षादेव बलवदनिष्टसाधनत्वज्ञानं प्रतिबन्धकम्। एकत्र रागद्वेषयोर्बलाबलवत्त्वात् साक्षादेव विरोधः। अनेन बलवदनिष्टाजनकत्वज्ञानं हेतुः। अन्यथा अबाधितत्वज्ञानस्यापि हेतुतापत्तेरिति साक्षादेव प्रतिबन्धकत्वमित्याह -- **इष्टेति**।

अपि च काम्याव्यवहितसाधनतया ज्ञातमेव यदि कामी कर्त्तव्यतयाऽवैतीति नियमः तदा पूर्व्वमपि कार्य्यतया नावगम्येत। अन्विताभिधानात् पूर्व्वं काम्यसाधनताबोधकाभावादुपदानस्या-न्विताभिधानोत्तरकालीनत्वात्। अत एव काम्यादन्यदित्यादि प्रकारद्वयं निरस्तं, कार्य्यताबुद्धौ प्रवृत्तौ न काम्यसाधनत्वस्यैव हेतुत्वात्।

न च कार्य्ये घटादौ लिङ्शक्तिग्रहः, यथा लिङ्शक्तिग्रहकाले स्वर्गकामान्वययायोग्यत्वात् क्रियानिरासस्तथा यागान्वयानुपपत्त्या घटादिनिरासोऽपिस्यात्। न हि यागविषयको घटादिः सम्भवति, अन्यथा अन्विताभिधानदशायामपि तन्निरासो न स्यात्।

स्यादेतत्, स्वर्गकामान्वयानुपपत्त्या तदन्वययोग्ये लिङ्शक्तिग्रहः स्थायिकार्य्यञ्च तथा। अतः शक्तिग्रहकाले क्रियानिरासो युज्यते न घटादेः। यजिपदमन्तर्भाव्य स्वर्गकामपद-लिङ्पदाभ्यां अन्विताभिधानदशायां घटादिनिरासो यागान्वययायोग्यत्वादिति, तत् किं शक्तिग्रहकाले यागान्वयानुपपत्तिर्हस्तपिहिता येन घटादिनिरासिकासा न प्रतिसन्धीयेत।

प्रत्युत प्रत्ययस्यान्तरङ्गप्रकृत्यर्थान्वयं बोधयत एवेतरान्वयबोधकत्वमिति तदन्वयानुपपत्तिप्रतिसन्धानमेव प्राथमिकं, पुरुषदोषादप्रतिसन्धाने शक्तिग्रहो भ्रम एव घटादेरशक्यत्वात् पुरुषविशेषं प्रति अपूर्व्ववाच्यतापत्तेश्च। घटादीनामनन्तत्वेन यदि तन्निरासो न शक्यः तदा अन्विताभिधानदशायामपि न स्यात् । पाकादीनां क्रियात्वेनेव पृथिवीत्वादिना निराससम्भवाच्च। एवञ्च प्रचुरद्रव्यगुण- कर्म्मसु निरस्तेषु क्व कार्य्ये धर्म्मिमि शक्तिग्रहः।

पूर्वोक्तं व्युत्पत्तिविरहमाह -- **न चेति**।

प्रत्युतेति। योऽन्वयः प्राथमिकस्तदुपस्थितिः प्राथमिकी। अतस्तदन्वयानुपपत्तिज्ञानं प्राथमिकमिति भावः।

ननु शक्तिग्रहस्य घटादौ भ्रमत्वेऽपि कार्यत्वेनैव घटस्यैव स्मरणम्। अत उक्तन्यायेनानुभवकाले यागविषयकं (४३४ ख) कार्यमित्यपूर्वोपिस्थितिरित्यत आह -- **पुरुषेति**। विशेषदर्शने भ्रमात्मकशक्तिग्रहो विशेषदर्शने तु स न स्यादिति कथं तत्रान्वयीरिति भावः।

न च विशेषे निरस्तेऽपि कार्य्यसामान्यं न निरस्तमिति वाच्यम्। न हि विशेषाविषयं सामान्यज्ञानं सम्भवति। एतेनापूर्व्वसाधारणकार्य्यत्वेन घटादौ शक्तिग्रह इति परास्तम्। अगृहीतासंसर्गेषु स्थायित्वकार्य्यत्व-स्वर्गजनकत्वेषु तज्ज्ञानेषु वा शक्तिग्रह इत्यपि परास्तं, स्थायिनां घटादीनां निरासात् धर्म्ममात्रे च शक्तिग्रहस्य प्रकृतेऽनुपयोगात्।

किञ्च तेषु शक्तिग्रहः समुदितेषु प्रत्येकं वा। नाद्यः प्रथमं समुदायस्यैकज्ञानाविषयत्वात् विषयत्वे वा पूर्व्वमेव विशिष्टस्य सत्त्वेऽपूर्व्वत्वव्याघातः एकज्ञानविषयसाकाङ्क्षधर्म्म- धर्म्मिणोरेव विशिष्टत्वात्।

न द्वितीयः एवं हि लिङ्पदात् स्मरणत्रयं यजिपदाच्च यागस्मरणम्।

न च चतुर्णां तेषां यौगपद्यमस्ति। न च प्रत्येकं शक्तिग्रहेऽपि समुदितविषयकमेकमेव स्मरणं लिङ्पदादिति युक्तं, समुदायस्य पुर्व्वमननुभवात्। स्मरणञ्च यदि साकाङ्क्षधर्म्म-धर्म्मिविषयकमेकं तदा अपूर्व्वत्वक्षतिः एकज्ञानारूढयोः साकाङ्क्षधर्म्म-धर्म्मिणोरेव विशिष्टत्वात् तन्नियतत्वाद्वा। एतेन स्वर्गादिपदेषु अगृहीतासंसर्गधर्म्मधर्म्मिषु शक्तिग्रह इति व्युदस्तम्। प्रत्येक-समुदायविषयकस्मरणविकल्पग्रासात्।

अस्तु वा लिङः कार्य्ये लक्षणा, यथा हि मञ्चाः क्रोशन्तीत्यादौ पुरुषविशेषः प्रगाननुभूतोऽप्यनुभूयते इतरपदाल्लाक्षणिकस्यानुभावकत्वात् तथाऽपूर्व्वमपि। अस्तु च स्वर्गकामकार्य्यविषयो याग इत्यनुभवे स्वर्गकाम-यागयोरन्वयप्रकारतया अपूर्व्वलाभः।

धर्मामत्रे स्थायित्वमात्रे तु प्रयोगात् स्वर्गकामान्वययोग्यत्वात् पूर्वं बाधका अपूर्वव्युत्पत्तिविरह इत्युक्तम्। इदानीं साधकाभावत्तमाह -- **अस्तु वेति**। यागविषयकार्यानुपपत्त्या हि कार्ये शक्तिः कल्प्या। स च लक्षणयैवोपपन्नेति भावः।

ननु तीरादेर्लक्ष्यस्य स्मरणमात्रम्, न त्वनुभवोऽनुभावकाभावानत्। न चेह कार्यस्यापूर्वस्य स्मरणमस्तीत्यत आह -- **यथेति**। अननुभूतपुरुषज्ञानानुपपत्त्या लाक्षणिकानुभावकत्वमितरपदानुभवकत्वं वा कल्प्यम्। तथा च लक्षणया अकार्यस्मरणेन यागविषयककार्यानुभव इत्यर्थः।

ननु लाक्षणिकस्य विशेषणता नियमे यद्यपि व्यभिचारः स्फुट एव, तथापि नियमेऽपि न क्षतिरित्याह -- **अस्तु वेति**।

यद्वा स्वर्गकामकार्य्यविषयो याग इति शाब्दानुभवानन्तरमर्थाद्यागविषयकं कार्य्यमिति ज्ञानं अनुपपत्तिप्रभावम्। अत एव शाब्दबोधानन्तरमौपादानिकबोधात्प्रवृत्तिः।

किञ्चापूर्ववाच्यत्वेपि न कलञ्जं भक्षयेदित्यादितः कलञ्जभक्षणाभावविषयक-मपूर्वमवगम्यापि न प्रवर्त्तेत तदभावे, तथाहि भक्षणे रागादस्य कर्त्तव्यताबुद्धिर्जाता शब्दाच्च भक्षणाभावे, निष्फलात् कार्य्यात् सफलं गरीय इति न्यायेन सुखहेतौ भक्षण एव प्रवर्त्तेत न तदभावे, निषेधापूर्व्वमेव फलमिति चेत्, न, तस्य सुख-दुःखाभावान्यतया पण्डत्वेन तदजनकतया च गौण-मुख्यप्रयोजनत्वाभावात्।

अन्वयप्रकारकतया अन्वयरूपतया चैत्रस्य नप्तेत्यत्र नप्तृपदोपस्थाप्यस्य चैत्रनप्तृ--सम्बन्धस्यान्वयरूपवत्वं चेदिहापि स्वर्गकामयागयोरन्वयरूपमेव कार्यमित्यर्थः।

नन्वपूर्वालाभ इति नोक्तम्, अपि तु कार्यस्यापूर्वस्य विशेषणतयोपस्थितौ तच्च चिकीर्षा न स्यात् । स्वविशेष्यकज्ञानस्यैवेच्छाजनकत्वादित्युक्तदोषस्तदस्थ एवेति चेन्न, तत्र चिकीर्षायामभावे क्षतेरभावात्। तदभावो हि प्रवृत्याभावमापाद (४३५ क) दोषः स्यात्। तत्र चेष्टापत्तिः। यागप्रवृत्त्यैव स्वर्गवत्तत्संभवेनापूर्वे पृथक् प्रवृत्तिः। तस्याः तत्क्रियाविषयत्वनियमादिति भावः।

नन्वेवं कार्य इच्छापि न स्यात्। तथा चेष्टसाधनताज्ञानमपि नित्यनिषेधपूर्वस्थले दुर्लभम्। तत्रेच्छाभात्। तथा चैतल्लिङ्गकार्यताज्ञानाभावात् तत्राप्रवृत्यापत्तिः।

न च शौचजीवनप्रतिसन्धानजन्यकार्यताज्ञानदेव नित्ये प्रवृत्तिः। तदपूर्वस्य स्वतः पुरुषार्थत्वकल्पनाविरोधादित्यभिसंधाय तत्रापि कल्पे न क्षतिरित्याह -- **यद्वेति**।

यदि च तत्फलमेव न तर्हि नित्यनिषेधापूर्वायोरलाभप्रसंग इत्याह -- **किं चेति।** तदुभयविषयकं कार्यं विधिप्रत्ययेन वाच्यम्। तस्य कार्यत्वं कृतिविषयत्वं नित्यक्रियाकलञ्जभक्षणादिति गोचरकृतिजन्यत्वमिति यावत्। तथा च विफले तत्र कृतेरभावात् नित्यादिविषयकं कार्यमित्येवानुभवो अयोग्यतापहारत इति भावः।

न प्रवर्तत इति। तथा च तत्र प्रवृत्त्यभावेन तद्विषयकं कार्यमित्यनुभवाभावात् नापूर्वलाभ इत्यर्थः।

सुखवदपूर्वमपि प्रयोजनमिति चेत्, न। लोके तथानवगमात्। अलौकिकयोः स्वर्गापवर्गयोः लोकावगतप्रयोजसुख-दुःखाभावजातीयतया प्रयोजनत्वं। वेदेऽपि काम्यस्थले काम्यसाधनस्यैवापूर्वस्य गौणप्रयोजनस्य लिङाभिधानं काम्यसाधनताज्ञानं विना कामिकार्य्यत्वस्य बोधयितुमशक्यत्वात्। न तु स्वतः प्रयोजनत्वेन तत्रासामर्थ्यादनुपयोगाच्च प्रवृत्तेर्भोजनादाविव लोकक्लृप्तकाम्यसाधनताज्ञानात् कार्य्यताज्ञानाद्वा गौणप्रयोजनत्वेनैवोपपत्तेः। नापि नित्य-निषेधयोरपूर्व्वं स्वतः प्रयोजनं अपूर्वस्य सिद्धं लिङा बोधनीयम्।

न च तादृशेच्छाविषयोऽपूर्वं क्वचिदपि सिद्धम्।

न च लिङेवापूर्वेच्छां जनयित्वा तां बोधयति तस्यास्तत्रासामर्थ्यादिच्छायाः सामग्र्यन्तरजन्यत्वाच्च। अतोऽपि काम्ये नित्ये चेच्छविषयत्वं प्रयोजनत्वमपूर्वस्य लिङादिना न बोध्यते अपूर्वेच्छायाः शाब्दज्ञानात् पूर्वं असत्त्वात् किन्तु शाब्दकार्य्यताज्ञानात् सेति।

अथ नित्ये कार्य्यत्वेनैवापूर्वस्याभिधानं न तु स्वतः प्रयोजनत्वेन किन्तु लिङा अपूर्वे बोधिते तस्य स्वतः प्रयोजनत्वमिच्छाविषयत्वं सम्भवति सुखज्ञानवदपूर्वज्ञानस्यापि स्वत एवेच्छाजनकत्वात्,

लोक इति। यथा सुखी स्यान्निर्दुःखः स्यामिति वा लोकेच्छा तथा कार्यवानपूर्ववान्नेति इच्छाविरहादिच्छाविषयत्वेनानवगमादिति भावः।

नन्वलौकिकयोः स्वर्गापवर्गयोः कथमिच्छाविषयत्वाभावात् प्रयोजनत्वमित्यत आह -- **अलौकिकयोरिति**।

सुखदुःखाभावेति । (४३५ ख) इच्छाविषयतावच्छेदकसुखदुःखाभाववत्वादित्यर्थः।

वस्तुतस्तु न तत्र सुखत्वादिच्छाविषयत्वावच्छेदकमयत्नसाध्यदुःखादिसंभवेन बाधासाध्ये तदर्थप्रवृत्त्यापत्तेः। किं तु विशिष्टसुखत्वं विशिष्टाभावं च तादृशं सुखं तादृशो दुःखाभावो भवत्वित्येवमिछोत्पत्तेः अपूर्वे तु नैवं तथेच्छानुत्पत्तेः। तथा च लौकिकत्वं लोकेच्छाविषयत्वं प्रयोजत्वविरोधि। न तु शास्त्रमात्रप्रसिद्धित्वमित्यवधेयम्।

ततः काम्यापूर्वसाधनताज्ञानान्निन्ये कार्य्यताबोधात् प्रवृत्तिरिति चेत्, न । अपूर्वज्ञानस्येच्छा-हेतुत्वेनाक्लृप्तत्वात्। काम्यापूर्व्वे हि लोकक्लृप्तेष्टसाधनताज्ञानादेवेच्छा न त्वपूर्व्वत्वज्ञानात्। शास्त्रस्थस्य शास्त्रजकर्त्तव्यताज्ञानं बलवदिति चेत्, सफलविषयं तथा इदञ्च निष्फलविषयम्।

अथ प्रवृत्तिमतो निवृत्तिनियोगेऽधिकार इति यदा भक्षमप्रवृत्तस्तदा तन्निषेधे शाब्दकार्य्यताधीरिति तया विपरीतप्रयत्ने जनिते रागात् क्रियोत्पत्तिः तेनैव प्रतिबन्धात् रागकारितप्रवृत्तिमुपजीव्य हि निवृत्तिकार्य्यता शास्त्रेण बोधिता अतस्तेन बोधने स्वफलं विपरीतकृतिरवश्यं उत्पाद्येति शास्त्रस्य बलवत्त्वमिति चेत्, न। निवृत्तिकार्य्यताबोधेऽपि निवृत्तौ प्रयत्न एव नोत्पद्यते यस्य प्रतिबन्धकता स्यात् स्याच्च निवृत्तिकार्य्यताबोधकमप्रमाणं निष्फलत्वेन तत्र कृतेरभावात्।

अथ कलञ्जभक्षणस्य निन्दार्थवादेन बलवदनिष्टसाधनत्वावगमात् तद्क्षणे न प्रवर्त्तत इति चेत्, एवमपि कलञ्जभक्षणे निवर्त्ततां तदभावे निष्प्रयोजनतया प्रवृत्तौ किमायातमिति।

एतेन नित्यापूर्वसाधने सन्ध्यावन्दनादावपि प्रवृत्तिरपास्ता क्रियायाः कष्टत्वात् तदपूर्वस्य पण्डत्वात् स्वतोऽप्रयोजनत्वाच्च।

तस्मात् लोके पचेतेत्यादौ कार्य्यत्वेनष्टसाधनत्वरूपधर्म्मशक्तत्वेन ज्ञाता लिङ् स्वर्गकामो यजेतेत्यादौ तदन्वयं यागे योग्यतादिवशाद् बोधयतीति न वेदे धर्मिणि शक्तिकल्पना प्रतीता च स्वर्गसाधनता साक्षादसाधानस्य यागस्य व्यापारमन्तरेणानुपपद्यमाना तन्निर्व्वाहकं व्यापारमपर्व्वं कल्पयति।

ननु काम्यापूर्वे कामनासत्त्वादपूर्वमपीच्छाविषयतावच्छेदकम्, तथा च तद्वन्निषेधापूर्वमपि प्रयोजनमित्यत आहु -- **काम्येति**। तत्र काम्यसाधनत्वमेव इच्छाविषयतावच्छेदकम्, न त्वपूर्वमित्यर्थः। तत्र विनिगमकमाह -- **काम्येति** ।

न त्विति। तेन पृथक् शक्तिग्रहे वैदिकलिङ्गेन कार्यशक्तिग्रहान्नित्यादिस्थले कार्यत्वेन सामान्यतः शक्तिग्राहकं संभवत्यपि, न तु नित्यनिषेधस्थलीयलिङ्गेन स्वतः प्रयोजनत्वेन कार्ये शक्तिग्राहकं प्रमायामस्तीति भावः।

एवमुक्तयुक्तिभिः कार्यधर्मिशक्तौ लिङो निषिद्धायां पूर्वलाभ उपसंहरति -- **तस्मादिति** ।

ननु निरुपधिपूर्ववर्त्तिता कारणता सा व्यापारेण निर्व्वाह्यत इत्यत्र कोऽर्थः, किं क्रियते, उत ज्ञाप्यते। नाद्यः उत्तरवर्त्तित्वेन व्यापारस्य तत्रासामर्थ्यात्, नेतरः लङैव तद्बोधनात् चिरध्वस्तं कारणं व्यापारेण व्याप्तमिति चेत्, न। विपक्षे बाधकाभावेनाप्रयोजकत्वादन्यथा ऐन्द्रियकं कारणमतीन्द्रियव्यापारकमिति यागानुभवयर्दर्शनात् तथा कल्प्येत।

प्रायश्चित्तादीनाञ्च फलप्रतिबन्धकत्वमेव, प्रायश्चित्तस्य 'तस्मादेन सः पूतो भवतीति यत् फलं श्रुतमस्ति तस्य निषिद्धक्रियातः फलभाक् न भवतीत्यर्थः, 'धर्म्मः क्षरति कीर्त्तनादिति च कीर्त्तनाद्विहितक्रिया क्षरति फलं न जनयतीत्यर्तः। क्षरतीत्यत्र बाधकं विना न लक्षणेति चेत्, न, उपस्थितत्वेन विहितक्रियायामेव धर्म्मपदशक्तिग्रहस्य बाधकत्वात्।

इतरवर्तित्वेनेत्युपलक्षणम्। कारणत्वस्य नित्यत्वेनाकार्यत्वादित्यपि द्रष्टव्यम्। चिरध्वस्तं कारणं चिरध्वस्तकारणतेत्यर्थः।

अन्यथेति। सहचारदर्शनमात्रस्य तत्र ग्राहकत्व इत्यर्थः।

नन्वेवमुक्तक्रमेण निषिद्धक्रियातो न नरकत्वेन (४३६ क) अधर्मसिद्धिप्रायश्चित्तविधिवैकल्यमित्यत आह -- **प्रायश्चित्तेति**।

न च तस्मादेनसः पूता भवन्तीति फलश्रुतेः तत्प्रतिबन्धकत्वबाधिकेत्यत आह -- **प्रायश्चित्तेति** ।

ननु धर्मः क्षरतीत्यादौ क्षरतीत्यतो धर्मे ध्वसः प्रतीयते। स च विहितक्रियाध्वसः कीर्त्तनजन्य इति धर्मसिद्धिरित्यत आह -- **धर्म** इति।

लक्षणेति । प्रसिद्धशक्तिरक्षार्थपदे लक्षणेति तत्वं यदि तन्मुख्यरक्षार्थम् अर्थान्तरे शक्तिः कल्प्यते। तदा जले घोषपदशक्तिः कल्प्यतामिति गङ्गापदे न लक्षणा स्यादित्यर्थः ।

विहितेति । यदि तज्जन्यो गुणो धर्मः स्यात् तदा तत्संशये धार्मिकत्वसंशयान्नैष व्यवहारः। यदि तु क्रियैव धर्मस्तदा निश्चयादेष व्यवहारः संभवतीत्यर्थः ।

न चैतस्य मुख्यत्वार्थं पदार्थान्तरे शक्तिः, लक्षणोच्छेदापत्तेः विहितक्रियाकर्तृत्वज्ञानेन धर्म्मिकपदप्रयोगाच्च। एतेन देवदत्ताद्यशरीरं देवदत्तविशेषगुणप्रेरितभूतपूर्व्वकं जन्यत्वे सति तद्भोगसाधानत्वात् तन्निर्म्मितस्त्रग्वदित्यनुमानात् तत्सिद्धिरिति परास्तम्।

जन्मान्तरीयज्ञानादिभिरेव तज्जनकत्वाभिमतैः सिद्धसाधनादिति, मैवम्। चिरध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति निरुपाध्यन्वय-व्यतिरेकाभ्यां व्याप्त्यवधारणात् यागस्य चिरध्वस्तकारणत्वेन व्यापारकल्पनात्। कार्य्ये व्यापारस्य पृथग्वय व्यतिरेकग्रहस्तद्व्यापारकत्वे उपाधिरिति चेत्, न। संस्कारे तदभावेऽप्यनुभवस्य तद्व्यापारकत्वात्।

देवदत्तेति। अत्र जरायुजेत्यादि शेषः। अत्र तद्विशेषगुणाजन्यत्वमात्रेण वादृष्टसिद्धेस्तत्प्रेरितभूतजन्यत्वग्रहणदृष्टं तेन देवदत्तविशेषगुणस्य स्वरूपेण जनकत्वम्। अपि तु भूतप्रेरिता---रेत्यादि कर्तुमन्यथानिर्व्यापारस्य तदर्थं यतमानस्य पञ्चादेस्तज्जनकत्वापत्तेरित्यवधेयम्।

जन्यत्व इति। मनसि व्यभिचारवारणाय तन्निर्मितेति। तद्भोगसाधनेत्यपि पूरणीयम्। अन्यथा अन्यभ्रमे दृष्टान्तसाधनवैकल्प्यापत्तेरिति।

चिरध्वस्तस्येति। यथा दण्डसत्त्वेऽपि कारणान्तरं विना कार्यानुत्पत्त्या दण्डस्य कारणत्वं नियतकार्यपूर्वरूपं, दण्डे सति कार्यं दण्डाभावे कार्यभाव (४३६ ख) निरुपाध्यन्वयव्यतिरेकाभ्यं सिद्धम्। एवं चिरं ध्वस्तस्य व्यापारं विना न कारणत्वं न कार्यपूर्वसत्त्वं कार्यानुत्त्पत्यैव तन्नियतपूर्वसत्त्वाभावात् । तथा च चिरध्वस्तस्य व्यापारसत्त्वे कार्यं, तदभावे न कार्यमित्येव पर्यवसितम्। अत एव निरुपाध्यन्वयव्यतिरेकाभ्यां कार्यकारणाभावग्रहो दण्डादिवत् व्यापारत्वेनापूर्वकल्पनादित्यर्थः।

निरुपाधित्वमसिद्धम् इत्याशङ्कते -- **कार्य** इति। अन्वयव्यतिरेकग्रहस्तत्सहकृतप्रत्यक्ष-सिद्धत्वमिति यावत्। यथाश्रुतस्य पक्षेऽपि सत्त्वात्। अत एव संस्कारे तदभावमाह -- **संस्कार** इति।

न चाप्रयोजकत्वमिति अनुव्यापारोऽपि स्यात्। चिरध्वस्तो जनकोऽपि स्यादित्यत्रानिष्टप्रसङ्गाभाव इत्यर्थः।

न चाप्रयोजकत्वं, यागो यदि चिरध्वस्तत्वे सति सव्यापारो न स्यात् स्वर्गसाधनं न स्यात् घटवदिति विपक्षे बाधात्। न चात्र कारणताग्राहकाभाव उपाधिः, तेनापि समं व्याप्त्यवधारणे तस्याप्यापादनात्। न चैन्द्रियकस्यातीन्द्रियव्यापारवत्त्वनियमः, सव्यापारत्वे कार्य्यव्यवहितपूर्वसमये असत्त्वस्योपाधित्वेनाप्रयोगकत्वात्।

नन्वेवं सन्ध्यावन्दनाकरणस्य दुःखसाधनत्वश्रुतेः तत्करणप्रागभावो दुःखहेतुस्तथा च तस्य स्थिरत्वेन दुःखजननसम्भवात् न पापे प्रमाणम्। न च प्रायश्चित्तवैफल्यं, प्रायश्चित्ताभावसहकृतस्यैव तस्य तज्जनकत्वात्।

यत्तु प्रागभावनाश एव तेन क्रियत इति, तन्न। ध्वंस-प्रागभावानवच्छिन्नकालस्य प्रतियोगिकालत्वेन तदा करणापत्तेरिति चेत्, न। सन्ध्याकोलनाकरणस्य दुःखजनकत्वेन विशिष्टस्य सन्ध्याकालापगमेऽनुपगमात्।

स्वर्गसाधनमिति। स्वर्ग---- ते तन्नियतपूर्ववर्ति यागो भवति। स एव तु व्यापारं विना नोत्पन्नः कारणाभावात्। तथा च नियतपूर्ववर्ती यागो न स्यादित्यर्थः। दण्डं विना घटाभावः, दण्डे सति घट इति तद्व्यापारसत्त्वे चिरध्वस्तात् कार्यं तदभावे नेति निरुपाध्यन्वयव्यतिरेकाभ्यां दार्ढ्यादित्यर्थः ।

तेनापीति। तथा च साधनव्यापकत्वात् नायमुपाधिरित्यर्थः।

ननु चिरध्वस्तस्य कार्यग्रव्यवहितपूर्ववर्तिना स्वजन्येन विना नाकार्यजन्म। अत एव तेन विना न तस्य कार्यमिति सहचार। तथा चेद्व्यापारकल्पनं तदा ऐन्द्रियकस्यातीन्द्रिय (४३७क) व्यापारदर्शनात् क्व ऐन्द्रियके ऐन्द्रियको व्यापारो न स्यादित्याशङ्क्य निषेधति -- **न चेति**।

यद्वा नैन्द्रियकस्यातीन्द्रियकव्यापारनियमो यागानुभवयोः तथा दर्शनात्। तथा च पाकादावपि लौकिके अदृष्टकल्पनापत्तिरिति नेत्याह -- **न चेति** ।

अव्यापारत्वे कार्याव्यवहितपूर्वसत्त्वे हेतुत्वम्। तत्र लाघवात् न त्वैन्द्रियकत्वादिविशेष्यगर्भं गौरवादित्याह -- **सव्यापारत्व** इति।

न च सन्ध्याकालोनाकरणे विशेषणं किन्तु प्रतियोगिनि करणे तथा च विशिष्टाभावः स्थिर एवेति वाच्यम्। सन्ध्याया ह्यकरणेऽन्वयस्तस्य पदार्थत्वात्। न तु करणे तस्य पदार्थैकदेशत्वेनाप्रधानत्वात्। तथापि ध्वंस एव व्यापारोऽस्तु तव सहभावानिरूपकस्यापि कारणत्वात् तस्यानन्तत्वेऽपि स्वभावात् सावधिफलजनकत्वम्।

यत्र यद्ध्वंसो हेतुस्तत्र तत्प्रागभावोऽपीति चेत्, न। दुग्धध्वंसजन्यदध्नि मिथ्याधीध्वंससाध्यमुक्तौ च व्यभिचारात् प्रतिबन्धकाभावत्वेन हेतुत्वे तथाभावाच्च।

तदयं निर्गलितार्थः - चिरध्वस्तस्य कारणत्वं व्यापारं विना अनुपपद्यमानम्, व्यापारेण विना कार्यानुत्पत्तेः।

यद्वा कारणत्वमव्यवहितपूर्ववर्तित्वम्, तच्च कार्योत्पत्तौ अननुगुणक्षणानन्तरितक्षणवृत्तित्वम्। अननुगणत्वं च क्षणस्य कार्याभावव्याप्यभावप्रतियोग्याधारपरताया व्यापाराभावे तदनाधरतया पूर्वक्षणस्य तदनन्तरक्षणवर्तित्वम्। चिरध्वस्तस्यानुपपन्नमिति व्यापारकल्पनमिति सन्ध्ययां हीति सन्ध्याकालीनकरणाभाव इति विशेष्ये अभावे अन्वयसन्ध्यायाः सन्ध्याकालीनः कारणाभाव इति विशेषणे करणे अन्वयासन्ध्यायास्तत्र विशेष्यान्वय औस्तर्गिकः तस्योत्थिताकाङ्क्षत्वात् विशेषणान्वयस्वपायादायके अन्यान्वितस्य विशेषणस्योत्थाप्याकाङ्क्षात्वात् । तथा च न्यायानुसारितात्पर्यमौत्सर्गिके। अपवादिके तु पुरुषेच्छातन्त्रतात्पर्यमित्यर्थः। (४३७ख)

ननु कार्यसहभावाभावेन ध्यस्तस्य यागाजन्यतया न व्यापारत्वमित्यत आह -- **तवेति** । तथा सति यागे स्वर्गसाधनत्वमेव नेति क्व व्यापारकल्पनमिति भावः।

सावधिफलेति। अपूर्वेऽपि कल्पिते सवाधिफलजनकत्वे स्वाभावस्यैव संचरणत्वादिति भावः।

ननु साध्याक्षाध्वंसजनकत्वं प्रागभावजनकत्वव्याप्यमिति न व्यभिचार इत्यपरितुष्यन् हेत्वन्तरमाह -- **प्रतिबन्धकेति**। संसर्गाभावत्वे नेति भावः।

ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेत्, न। ध्वंसे सति तद्व्यापारत्वज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया शान्तेरिति। मैवम्। प्रतियोगि-ध्वंसयोरेकत्राजनकत्वात्। न हि नियमतो यद्ध्वंसे सति यद्भवति तत् तत्र कारणम्।

न च संसर्गाभावत्वेन हेतुत्वे तथेति वाच्यम्। व्यभिचाराभावेन तस्यापि प्रयोजकत्वात्।

प्रतियोगीति। नन्विदमेवासिद्धम्, द्वयोर्नियतपूर्ववर्तित्वात्। एकतरस्यान्याथासिद्धौ विनिगमकाभावच्च। अत एव न हीत्याद्यसङ्गतम्, नियमतो ध्वंसे सति यद् भवति तस्यापि तत्रान्यथासिद्धपूर्ववर्तित्वात्।

किञ्च शब्दध्वंससाक्षात्कारे श्रोत्रस्य शब्दभावव्यापार इति सिद्धान्ताच्चेति। मैवम्। भावानवबोधः। तथा हि फलान्वयव्यतिरेकाभ्यां अनुविहितान्वयव्यतिरेकमित्यर्थः। तेन यागान्वये फलं यागाभावे फलाभाव इति प्रतीतम्। यागाभावे फलमिति ज्ञानं विरुणद्धि। तथा च नोभयोरेकत्र जनकत्वं प्रत्येतुं शक्यमित्येकत्रान्यथौवावश्यकल्पायामन्यथासिद्धिरभावे कल्प्यत इति शब्दितध्वंससाक्षात्कारे कृतावेव व्यापारो शब्दव्यापारत्ववादः प्रौढ्या ।

वस्ततस्तत्र (४३८क) विषयत्वेन ध्वंसहेतुता, न शब्दध्वंसत्वेन। तेन रूपेण विरोधस्योक्तत्वादिति।

किञ्च नियतपूर्ववर्तित्वं न कारणत्वम्, किन्तु नियतपूर्ववर्तित्वमित्यत्रैतपदप्रयोगात् प्रवृत्त्याद्येव नियामकं लोकसिद्धम्। तथा चैहापि कारणध्वंसप्रतियोगित्वे प्रतिबन्धकत्वमन्यथा कारणत्वं व्यवहरतीति न तयोरेकत्र हेतुत्वम्। अत एव द्वयोरव्यवहितपूर्ववर्तित्वमसिद्धम्, कार्योत्पत्त्यननुगणध्वंसक्षणान्तरित-क्षणवृत्तित्वात् प्रतियोगः।

किं च व्यापारकल्पनायां चिरध्वस्थं कारणं व्यापारव्याप्तिमित्येवमलम्। तत्रापि दण्डेण विना कर्याभाववद्व्यापारेण विना चिरध्वस्ते कारणे कार्याभाव इत्येव। स यथा व्यापारेण विना तथा ध्वंसान्यव्यापारेण विनेत्येवं रूपव्यतिरेको वाच्यः। अन्यथा व्यवहारानादरे व्यापारोऽपि त्यज्यताम्।

अथ शब्दाद् यागकारणता व्यापारं विना तदनुपपत्तेः तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकं, अन्यत्र तु मानाभावान्न तथेति चेत्, न। यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य प्रमाणान्तरविरोधेनार्थापत्त्याप्यकल्पनात्।

अस्तु तर्हि देवताप्रीतिरेव व्यापार इति चेत्, न। यागस्य देवताप्रीतिहेतुत्वे मानाभावात् गङ्गास्नानादौ देवताविरहेण तदसम्भवात्।

न च तत्रापि तत्प्रीतिः, तस्य तत्प्रीतिहेतुत्वे मानाभावात् लाघवेन कर्तृ-भोक्तृगतव्यापारकल्पनाच्च।

ननु नायं नियमः पुत्रकृतगयाश्राद्धादिना पितरि पितृकृतजातेष्ट्या पुत्रे चादृष्टोत्पत्तेः।

अपि च तदानादरे नान्यथासिद्धत्वभागे गुरुस्त्यज्यताम्। वस्तुनियतपूर्ववर्तित्वमात्रहेतुत्वमिति तु ध्वंसवत् दण्डेरूपादिकमपि हेतुः स्यादित्यपि सूचितम्।

अपि चापूर्वद्:खप्राप्तिश्चेति शब्दत एव पूर्वव्यापरकत्वलाभात् अन्यत्रापि तदेव व्यापारः अन्यथासिद्धः तद्ध्वंसः।

न चापूर्वपदं तद्व्यापरपरम्, अपूर्वपदस्यार्थपर्यालोचनायां विधानानुपपत्या च प्रमाणान्तरसिद्धध्वंसादि व्युदासेनैव प्रवृत्तेरिति भावः।

प्रमाणान्तरेति । पूर्वोक्त (४३८ख) ध्वंसकारणाताबाधकेनेत्यर्थः। गुणान्तरकल्पनागौरवं मनसिकृत्याह -- **अस्त्विति** ।

मानाभावादिति । यज-देवपूजायामिति शब्दिकंस्मृतेः स्वतःप्रमाणत्वादिति भावः।

ननु भगवत्प्रणीतसर्गाद्यव्याकरणमूलकत्वादिदानीन्तनशब्दिकस्मृतिर्मानमित्यरुचेस्तद्व्यापकतामाह -- **गङ्गेति** । तत्राधिष्ठात्रिदेवता अस्त्येवेत्यरुचेराह -- **तत्प्रीतीति** ।

नन्विति। विशिष्टगतत्वमविवक्षितम्, कर्तृगत एव व्यापार इति मत्वा व्यापारे व्यभिचारो कर्तर्येव व्यापारादित्यर्थः।

अथ तत्रापि कर्त्तर्य्येवादृष्टं विहितक्रियायाः यागस्येव कर्त्तृगतदृष्टजनकत्वात्।

न च मुक्ते पुत्रे तददृष्टनाशात् पितरि न स्वर्गः स्यादिति वाच्यम्। अदृष्टस्य फलनाश्यतया पितरि स्वर्गाभावे नादृष्टानाशात् स्ववृत्तिभोगजनकादृष्टस्य मुक्तिविरोधित्वात्। न तु पितृगतमदृष्टं जन्यते मुक्ते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः पित्रदृष्टाजनकत्वात्। तथात्वे च साङ्गमपि श्राद्धादिकं निष्फलं स्यादिति तद्विधेरप्रामाण्यापत्तिः पुत्रगतादृष्टेन च मुक्ते पितरि सुखोत्पत्तौ न विरोधः योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात्।

अथ पितृसखं पितृपण्यजन्यमिति पितरि पुण्यं तेन विना तदसम्भवात् न पुत्रे तत्र फलप्रसङ्गादिति पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जिकेति चेत्, एवं। पितृक्रियापि पितृपुण्यजनिकेति न तां विना पितरि पुण्यं पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु। तत्पुण्यं पितृवृत्ति तत्सुखहेतुपुण्यत्वात्, न पुत्रवृत्ति तत्सुखाहेतुपुण्यत्वादिति चेत्, न। तत्पुण्यं न पितृवृत्ति तत्कृत्यजन्यपुण्यत्वात् पुत्रवृत्ति वा तत्कृतपुण्यत्वात्। तस्मात् पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्र एव तत्पुण्यमिति। मैवम्। स्वर्गोपपादकं ह्यपूर्व्वं स्वर्गाश्रये कल्प्यते प्रथमोपस्थितत्वात् लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च।

स्वर्गोपपादकमिति। उपादकस्योपपाद्यवैय्यधिकरणे विप्रसङ्गादिति भावः।

प्रथमेति। पितृगतस्वर्गकामो गयायां श्रद्धां कुर्वीतेति शब्दतः स्वर्गविशेषणत्वेन फलोपस्थितावेव पितुरुपस्थितेरिति भावः।

लाघवादिति। उपपादकवैय्यधिकरण्येति। प्रसङ्गात् सामानाधिकरण्यावश्यकत्वे परम्परासम्बन्धापेक्षया साक्षात्सम्बन्धे लाघवादिति भावः।

कल्पनाया इति। उपपादककल्पनैव साक्षात्सम्बन्धे बाधकाभावे तमेव विषयीकरोतीत्युत्सर्गत एव तत्सिद्धिरित्यर्थः।

अत्र वदन्ति -- एवं सत्याधेयशक्तिरेव प्रोक्षणादिना जन्यताम्, अवघातरूपफलोपपादकस्य तदाश्रय एव कल्पनौचित्यात्।

न च लाघवादेकस्य व्यापारस्य कल्पना तद्विधि करणस्यात्मनिष्टव्यापारस्य (४३९क) एककल्पना, तर्हि अत्रापि पुरुषश्राद्धे तस्मात् पुरुषनिष्टनानादृष्टकल्पनातः कल्पपादपमहानानाभूतभावि-पुरुषसमवेतामनेकादृष्टकल्पनाभावाच्चैकमेव कर्त्तृनिष्टमदृष्टं कल्प्यताम्। प्रमाणवतो गौरवस्यानिवार्यतया परम्परासम्बन्धेनैव तस्य फलोपपादकत्वं कल्प्यतां प्रोक्षणादिसंस्कारस्यैव ।

न च तत्रादृष्टवदात्मसंयोगः परम्परासम्बन्धसमाधानाय भवित। व्रीहावात्मसंबोद्धिहेतुकर्तृभोक्त्रा न संयोगोऽस्ताति वाच्यम्। संयुक्तसंयोगेनापि समाधानसंभवात् ईश्वरज्ञानादीनामिव अस्मदादिज्ञानादावत एव यो यदुद्देशेन क्रियते स तन्निष्ठ एवातिशयं जनयतीत्यत्र विधिमुद्दिश्य प्रवर्तिते श्येने व्याभिचार उक्तः। अन्यथा श्राद्धेनापि पितृदृष्टजनने श्येनेनापि शतृनिष्टजनने तद्विरुध्येत ।

किं च फलोपपादकतया फलसामानाधिकरण्यवत् सहकारितोपपादकतया सहकारिसामानाधिकरण्यस्यापि लाघवेनौत्सगिर्कत्वम्।

न च मुक्ते पितुः तददृष्टसत्त्वे मुक्तिविरोधो अजिनतपरमापूवोगापूर्ववत् तन्नाशाभ्युपगमात्।

न चैवं मुक्ते पितुर्यदि श्राद्धादिना स्वर्गाभ्युपगमे पुत्रकौटसाक्ष्येण मुक्तस्यापि पितुर्नरकोत्पत्त्या तच्छङ्कायां मुक्त्यर्थं प्रवृत्त्यापत्तिरिति वाच्यम्। अत एव बाधकान्मुक्तेऽपि ।(४३९ख) गरिपुत्रक्रियया तद्भावव्यवस्थितो न सङ्गोऽपि तत्र फलाभावे वेदाग्रप्रामाण्यम्, फलोत्पादे फलप्रागभावस्याप्यङ्गत्वात्।

न च मुक्तेऽपि तत्प्रागभावसम्भवः, प्रागभावसहवृत्तिदुःखध्वंसस्य मुक्तित्वात्। एकविंशतिप्रभवे अभिन्नत्वाच्च दुःखपदार्थस्य ।

न च फलाभावेनैतददृष्टानाशात् पुत्रसमुक्तिविरोधः, अङ्गापूर्वविशेषवत् तन्नाश इत्यभ्युपगमात्। प्रधानापूर्वप्रागभाववत्येवाङ्गापूर्वमिति सिद्धान्ते फलप्रागभावसमानफलानयनाय एव क्रियाया अदृष्टजनकत्वमित्यस्यापि सुवचत्वादिति दिक् ।

न च स्वर्गहेतुकामनाश्रये स्वर्गकामनाजन्यक्रियाकर्त्तरि वा, विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपादकत्वाच्च। यदि च पुत्रकृतपुण्येन मुक्तस्य पितुः शरीराद्युत्पत्तिः सुखञ्च स्यात् तदा साक्षिविधया असत्याभिधानादिपुत्रक्रियाजन्यपापेन 'स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते' इत्यादिबोधितनरकभागितापि मुक्तस्य पितुः स्यात्।

तथा च पुत्रकृत तथाविधशङ्कया न कश्चिन्मोक्षार्थं ब्रह्मचर्य्यादिदुःखेनात्मानमवसादयेत् 'दुःखेनात्यन्तं विमुक्तश्चरति न स पुनरावर्त्तते' इति श्रुतिविरोधश्च तथा च मुक्तस्य सुख-दुःखे शरीरञ्च भवतीत्यपदर्शनं मुक्ते पितरि श्राद्धादिना दोषाभावादेव नादृष्टमुत्पद्यते।

अत्र ब्रूमः -- प्रत्यात्मनियमात् भुक्तेरित्यदिसहकारात् प्रागेव फलसमानाधिकरणादृष्टानिष्ठकने तत्फलं कुत इत्याकाङ्क्षायां तदुपायगवेषणा । तदुक्तम् -- फलं कामयते तदुपायायां तु न वेदेति । अत एव वैचित्र्यादिदृष्टकल्पना, लाघवात्। न तु कृतिसमानाधिकरणस्तत्र फलजनकत्वस्याप्यप्राप्तस्य कल्पने गौरवादिति फलसमानाधिकरणमेवापूर्वम् । अत एव प्रामाणिकत्वेन गौरवस्य न्याय्यतया पित्रादिनिष्ठमनेकं पूर्वं कल्प्यते। आधेयशक्तौ तु नायं न्यायः, फलासम्बन्धादिति नानाशक्तिर्न कल्प्यते। किं त्वेकमदृष्टम् । श्येने व्यभिचारप्रदर्शन (४४०क) फक्किका तु परमतेन ।

यद्वा श्येनस्थले कर्तृगत एवादृष्टम्। गयाश्राद्धादिस्थले तदुद्देश्यनिष्ठे फलसाधकत्वेन निरुद्धतत्समानाधिकरणे अदृष्टे तत्क्रियाजनकत्वामात्रं कल्प्यते, लाघवादित्येव फलसमानाधिकरणदृष्टकल्पने मूलम्। तद्धमर्रूपे तत्र संभवति विहितक्रियायास्तज्जनकत्वात् शत्रोस्तु मरणजनकादृष्टस्याधमर्रूपतया तस्याविहितश्येनजन्यत्वं संभवि । विहितस्य धर्मजनकत्वेन निषिद्धस्याधर्मजनकत्वेन निरूढित्वात्। तथा च शतृमरणजनकश्येनेन कर्तव्ये तज्जनको धर्मो जन्यते। अस्तु शत्रोः स्वमरणजनकादृष्टसहायो भवति।

ननु समानाधिकरणतया शतृनिष्टस्तावत् शतृनिष्ठानेकाङ्गीकारत एककतृर्व्यापारे लाघवात्। गयाश्राद्धजातेष्ट्यादौ तु पूवोर्क्तप्रमाणावष्टम्भेन प्रमाणत्वादिति फलन्यायावतारात्।

न च श्येनस्यापि हिंसात्वेन धमर्जनकत्वान्नैवमिति वाच्यम्। तदधर्मस्य कर्तृगतानिष्ठजनकतया तत्रैव सत्त्वोपगमादिति सर्वं सुस्थम्।

न चैवं साङ्गश्राद्धस्यापि निष्फलत्वं अदृष्टोत्पत्तौ स्वरूपसत्तो दोषस्याङ्गस्य वैगुण्यात्, यथा विघ्नहेतुदुरितशून्येन कृतं मङ्गलं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावादेवञ्च यागस्यापि व्यधिकरणो व्यापारो भविष्यतीति।

उच्यते। विहितक्रियया कर्त्तृगतव्यापारद्वारा कालान्तरभाविफलं ज्यत इत्युत्सर्गः, स च बलवता बाधकेनापोद्यते, प्रकृते च बाधकं नास्ति, यथा शास्त्रदेशितं फलमनुष्ठातरीत्युत्स्वर्गः। पुत्रकृतगयाश्राद्धस्य पितृस्वर्गं प्रति पितृकृतजातेष्टेः पुत्रपूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेण बोधनात्।

नन्वयं नियम एव पितृयज्ञ - जातेष्ट्यादौ परम्परासम्बन्धेन कर्त्तृगतमेव फलम्। न हि यस्य कस्यापि पितरि पुत्रे वा फलम्। किन्तु स्वपितृ-पुत्रयोस्तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं वा परम्परासम्बन्धः फलेन पुत्रस्य, एवं पूतपुत्रकत्वादिकमपि पितृगतमेव।

न च फलस्य कर्त्तृगतत्वं साक्षात् सम्बन्धेनैवेति वाच्यम्। ग्राम-पशु-पुत्र-हिरण्यादीनां परम्परया कर्त्तृगतत्वमिति व्यभिचारात्। न हि ग्रामादयः साक्षात् कर्तृ सम्बद्धाः। एवं फलस्य साक्षात्कर्त्तृगामत्वबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्तृगामिताबोधने।

नत्वेवं गयाश्राद्धादौ चेत् कृतिव्यधिकरणो व्यापारः स्वीक्रियते, तर्हि देवताप्रीतिरेव सर्वत्र योगे कृतिव्यधिकरणो व्यापारोऽस्तु। किमपूर्वेर्णेत्याशङ्कते -- **अथ एवं यागस्यापीति** ।

विहितक्रियेति। तथा च कृतिसामानाधिकरण्यमुत्सगर्तः. तद्वैधिकरण्यानपवादः। फलसमानाधिकरणे तु नियमः देवताप्रीतिस्तु जनकस्यापि विषय इति भावः। यथाशास्त्रादेशितं फलमनुष्ठातरीत्युत्सर्गेन नियम इत्यर्थः।

तत्र व्यभिचारमाह -- **अत्रेति** । अतः कर्तृगामिताया नियमः साक्षात् परम्परासाधारणः। साक्षात् संबन्धे तूत्सर्ग इत्येकदेशिमतं (४४०ख) शङ्कते -- **नन्वयमिति**।

ननु फलं साक्षादेव सम्बद्धम्। तथा च कर्तृगामित्वेऽनियमात् साक्षात्सम्बन्धेऽनियमः पर्यवस्यातीत्याह -- **न चेति**। यद्गतत्वेन फलश्रुतिः तद्गतमेव फलम्। तच्च कर्तर्यकर्त्तरि वा यथाश्रुतश्रुत्यनुरोधात्। न तु व्यधिकरणफलश्रुतावप्यश्रूयमाणपरम्परया सम्बन्धेन कर्तृगामिना नियमकल्पनम्, मानाभावात् ।

यत्तु स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात् पितृगतस्वर्गकाम इत्यादि श्रुतेः। स्वतश्च तथा कामनया प्रवृत्तौ श्रुतकामनाविरहेण प्रयोगेऽङ्गवैगुण्यात् फलाभावप्रसङ्गः। किञ्च स्वर्गभागिपितृकत्वं विशिष्टं तत्र विशेष्यं तत्पितृकत्वं न काम्यं न वा फलं सिद्धत्वात्तदसाध्यत्वाच्च। किन्तु विशेषणं पितृगतस्वर्ग इति स एव फलमिति। तन्न। न हि स्वर्गभागिपितृकत्वं फलम्। अपि तु स्वर्गेण समं पुत्रस्य परम्परासम्बन्धरूपं तदुक्तमिति।

उच्यते। यदि परम्परासम्बन्धेन पुत्रगतत्वं पितृस्वर्गस्य तदा संयुक्तसमायादिना पुत्रेतरस्यापि फलं स्यात्। स सम्बन्धो न शास्त्रेण बोधित इति चेत्, तर्हि स्वर्गभागिपितृकत्वमपि न तथा शास्त्रेणाबोधितत्वात्, ग्राम-पशु-हिरण्यादीनाञ्च सिद्धत्वेन न काम्यत्वं। किन्तु तद्विषयकं स्वत्वं काम्यं फलमपि तदेव तच्च साक्षादेव कर्त्तृगतमिति कर्त्तृगतत्वेन फलस्य साक्षात् सम्बन्धो नियत एव तस्माद्यद्गतत्वेन फलकामना तद्गतमेव शास्त्रदेशितं फलम्।

प्रवृत्तेरेवमेवोपपत्त्या तादृशनियमकल्पनस्य व्यर्थत्वादित्याह -- **परम्परेति**। शास्त्रबोधित-परम्परासम्बन्धे अतिप्रसङ्गात् तद्बोधित एव सम्बन्धः फलस्य। स च कर्त्तव्यकर्त्तरि चेति भावः।

एवं च यदि श्रुत्या सम्बन्धः परम्परयैव प्रतिपाद्यते, तथा फले स एव सम्बन्धाय आगमपश्वश्वादिष्वित्यादिह ग्रामेति । ग्रामपशुहिरण्यादीनां संयोगादिना सम्बन्धे नसिद्धत्वात्। न काम्यतमतः सत्त्वेन सम्बन्धेन काम्यत्वात्। तेनैव कर्तृगामित्वम्। एवं पुत्रपत्न्यादौ येन सम्बन्धेन सिद्धतया काम्यत्वं, तेनैव कार्यकारणभावाप्रतिपत्तिभावादिना कर्तृनिष्टत्वमित्यर्थः। किं तु तद्विषयकं स्वत्वमिति । तद्विषयत्वस्वत्वेन तत्काम्यमित्यर्थः।

फलमपीति। स्वत्वेन सम्बन्धेन ग्रामातीत्यर्थः तच्च ग्रामादिसाक्षात्सम्बन्धेन स्वत्वेन कर्तृगतत्वे फलस्यासाक्षात् सम्बन्धः। तेन गयाश्राद्धादौ न कर्तृगतत्वार्थं परम्परासम्बन्धः श्रुते तात्पर्यविषय इति भावः। (४४१ क) यथाश्रुते तु श्रुतिविरोधः । न हि ग्रामादिस्वहस्तकाम इति श्रुतिरपि ग्रामादिकाम इत्यवधेयम्।

तद्गतमिति। यत्तदोः व्यत्ययेन योजना। तेन यद्गतमेव शास्त्रचोदितं फलं तद्गतत्वेनैव कमनेत्यर्थः। एतेनात एवेत्यपि सङ्गच्छते। अतः परगतफलकामनयाम् अत्र स्तवपाठादिव्यवहरस्य सकलशिष्टैकवाक्यतया सिद्धत्वात् ।

अत एव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः स्वर्ग-पूतत्वादेश्च पितृ-पुत्रगतत्वेन काम्यत्वमिति श्राद्ध-जातेष्ट्यादेः पितृ पुत्रगतमेव फलम्।

एवञ्च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीमहादानादिकं मातापित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाध्यत्वेन तेषां श्रुतत्वात्। न हि स्वगतस्वर्गकामस्य कर्त्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति तथा श्रुतेः। किन्तु स्वर्गकामस्य, स्वर्गस्य स्वगतः परगतो वेति स्वर्गकामत्वमविशिष्टं, यजेतेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वे।

यदि सामान्यश्रुतफलस्य परगतत्वमपि कामनाविषयस्तदा तत्रापि श्रुतितात्पर्यमुन्नेयमिति मनसिकृत्य तथा सिद्धान्नयति -- **मातापित्रादीति**।

नन्वात्मनेपदस्य कर्तृफलवाचिताप्रसिद्धा । स्वःतन्त्रित इत्येतस्य तन्त्रस्य कर्त्तारं चेत् क्रियाफलमभिसम्बध्नातीति प्रामाणिकव्याख्यानादित्यत आह -- **यजेतेति**।

यथा श्रुतस्तन्त्रस्यापि प्रायश्चित्तविषयत्व एव तात्पर्यात्। तत्र व्याख्यातॄणां भ्रान्तत्वात्। न हि मुख्यार्थाबाधे लक्षणासंभवः । न च प्रत्युदाहरणाभावः जयेति याजका इत्यादौ फलाभिप्रायस्याभावस्य व्यवस्थितेः । न हि तेषां फलेकामना। किं तु वेतनान्वितं च विशिष्टाचारावष्ठम्भेन सर्वमुक्तम्।

वस्तुतः स्वाधिकरणान्तराश्रुतौ फलं स्वगतमेव। न तु स्वेच्छया परनिष्ठामपि शास्त्रार्थः। स्वगतफलमुत्सर्गसिद्धः। तस्य गयाश्राद्धा पितृस्वर्गादिश्रुत्या बलवद्बाधकेन वा । वापदात्। अन्यथा (४४१ ख) पित्राद्युपरागवत् सोपरागस्याश्रवणात् स्वगतफलं चापि न सिध्येत्।

न च सामान्यश्रुतौ स्वीयपरकीयविभागः कामनालाघवादेवेति वाच्यम्। स्वांशस्योत्सर्गतो सिद्धौ दद्यादाहणश्राद्धं पितृभ्यः प्रीतिमावहन्नित्यादौ परपितृप्रीतिकामनया परपितृश्राद्धस्यापि कारणापत्तेः।

न च पित्रादिपदस्य सम्बंधिशब्दत्वादस्तु स्वीयत्वनियमः। स्वर्गस्य तु तथात्वस्वपरसर्गयोः यथाकामनमेव यागादिसाध्यतेति वाच्यम्। स्वीयत्वस्यानौत्सर्गिकत्वेऽपि तन्त्रादिसम्बन्धिशब्देऽपि परप्रतियोगिपितृप्रीत्यापत्तेः यजेतेत्यत्मनेपदमपि कर्तृसम्बन्धे फले कर्तृभिप्राय इति सूत्रस्य तथैवार्थप्रतीतेः।

न च स्वर्गकामो ददयादित्यादौ, स्वगतस्वर्गकामनाया अन्तरङ्गत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते सामान्ये बाधकं विना विशेषपरत्वे मानाभावात्।

केचित्तु - सम्यग्गृहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयत इति जातेष्टि - पितृयज्ञयरपि गृहस्थकर्म्मत्वेन तदेव फलमिति फलस्य कर्त्तृगामित्वे नियम एव, प्रातिस्विकफलाभिप्रायेणोत्सर्ग इत्याहुः।

अन्यथा कर्त्रभिप्राये क्रियाफल इति सामानाधिकरण्यानुपपत्तेः। तथा च कर्त्रभिप्राये कर्तृभिप्रेत इत्यर्थकल्पनापत्तेः। यथाश्रुते तु कर्त्तरमभिप्रैतीति कर्त्रभिप्रायं फलमेवाभिप्रैतीत्यभिमतं प्रमाणामाह -- तच्चाभिमतसम्धन्धरूपम्। अत एव प्राचां कर्त्ररि चेत् क्रियाफलमभिसम्बध्नातीति व्याख्यान एकवाक्यता। अत एव जयन्ति याजका इति प्रत्युदाहरणम्।

न हि तेषां फलेनाभिप्रायः। किं च सम्बन्धो वेतनाद्युपरागेणापि फलकामनासत्वात् साङ्गोऽस्मिन् वेतनमित्यभसन्धानेन परम्परया कामनायाः फलस्याश्रान्ति चैवं गां दद्यादित्यादौ परगतफल एव गोदानमित्यर्थः (४४२ क) स्यात्। तवापि पराभप्रेतफल एव गोदानापत्तेः । तत्र परस्मैपदस्य लिङर्थमात्रे तात्पर्यम्, न तु परस्मै परार्थ इति । यदि तदास्मिन्मतेऽपि तुल्यमत एव न क्रियासमवायित्वं कर्तृत्वमृत्विक् सूपकारादिष्विप्रसङ्गात्। अपि तु फलभोक्तृत्वसहितमिति तात्पर्याटीकापीति संक्षेपः।

तदेवेति। तदपीत्यर्थः।

फलस्येति । सर्वकर्मकर्तृगतफलजनकमेवेति। न तु सर्वफलं कर्तृगतमेवेत्यर्थः। इत्याहुरित्यस्वरसोद्भावनम्। स तु शास्त्रचोदितफलमनुष्टातरि फलनियमप्रतिपादकं वाक्यं प्रतीयते। न तु कर्मनियमप्रतिपादकमित्येवंरूपो ध्येयः। तयोः तज्जनकत्वाभावात् ।

ननु यावन्नित्यपरिपालनस्य तत्फलं न तु काम्यश्राद्धादेः, काम्यान्तर्भावे मानाभावात् यावत्काम्यानुष्ठानाशक्तेश्च। यावच्छक्यानुष्ठानस्यापि नात्रान्तर्भावः कामनाविरहादिनाप्यकरणात् यावन्नित्यानुष्ठाने तत्फलाभावप्रसङ्गात् नित्यस्यैवावश्यकत्वेनोपस्थित्यान्वयाच्च।

अपि च तैः कर्म्मभिः प्रत्येकमुत्पत्त्यपूर्व्वं तैश्च परमापूर्व्वं जन्यते इति न, गौरवानुमानाभावाच्च। किन्त्विन्तिमक्रियया परिपालनरूपक्रियान्तरेण वेति। न सर्व्वं कर्म्म ब्रह्मलोकावाप्तिफलकमिति। मैवम्। भगवदुद्देशेन कृतस्य काम्यस्य नित्यस्य वा यस्य कस्यापि कर्म्मणः परिपालनाद्ब्रह्मलोकावाप्तिः फलं श्रूयत इति जातेष्टि-पितृयज्ञयोरपि तथा कृतयोस्तदेव फलम्।

तथा च भगवद्गीता -

'यज्ञयाचरतः कर्म्म कर्म्मग्रन्थिर्व्विलीयते। यज्ञार्थात्कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः।

इति, तच्च कर्म्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थं सम्बलनन्तु मङ्गलवदुपयुज्यते। अन्यथा एकप्रयोगस्य व्यवधानादसम्भवः, परिपालनन्तु कर्त्तव्यमित्येव करणम्।

तदुक्तं 'ददामि देयमित्येव यज्ञे यष्टव्यमित्यहमिति।

यत्तु निषिद्धासम्बन्ध एव सम्यक्त्वं न तु विहितमात्रानुष्ठानमिति। तन्न। यत्किञ्चिन्निषिद्धासम्बन्धस्याभावात् सर्व्वनिषिद्धासम्बन्धस्य सर्व्वत्र सुलभत्वादिति सम्प्रदायः।

अत्र ब्रूमः। भगवदुद्देशेन कृतं किञ्चिदेव कर्म्म, सर्वं काम्यं वा, सर्वं नित्यं वा, सर्वमिति वा, नाद्यः एकेनैव काम्येन नित्येन वा स्नानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये श्राद्धादावप्रवृत्त्यापत्तेः। नापरौ अवश्यकत्वात्। न तुर्य्यः जातेष्ट्यादेर्नित्यत्वाभावात्।

कर्मणि तथा नियमो नेत्यस्वरसवीजान्तरं कण्ठत एवाशङ्कते -- **नन्विति** ।

एकदेश्यैव सिद्धान्तयति -- **मैवमिति** ।

ननु जातेष्टि-पितृयज्ञयोस्तथाकृतयोः ब्रह्मलोकावाप्तिः फलम्। तथा कृतयोर्न तथाफलमिति कर्तृगामि फलजनकत्वे व्यभिचारस्य तथापि तत्त्वादिति दोषं स्फुटतयोपेक्ष्यान्यदाह -- **अत्र ब्रूम** इति।

तस्मात् सम्यग्गृहस्थाश्रमपालनस्य तत्फलं, सम्यक्त्वन्तु सामस्त्यमेव। अतो गयाश्राद्धादेर्न ब्रह्मलोकावाप्तिः फलमिति साधुक्तम् - 'सास्त्रदेशितं फलं अनुष्ठातरीत्युत्सर्ग इति। तच्च फलं क्वचिद्विधिवाक्यश्रुतं क्वचिच्चार्थवादिकमिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे अपूर्व्ववादः

अथ कार्य्यान्वितशक्तिवादः।

नन्वर्थवादादीनां सिद्धार्थतया न प्रामाण्यम्। कार्य्यान्वित एव पदानां शक्त्यवधारणात् वृद्धव्यवहारादेव सर्व्वेषामाद्या व्युत्पत्तिः उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात्। तथा हि प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वय-व्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिमेव प्रयोजनमवधारयति।

न चाकिञ्चित् कुर्व्वतस्तादर्थ्यं सम्भवतीति तज्जन्यं प्रवृत्त्यनुकूलं कार्य्यताज्ञानमेव कल्पयति, स्वप्रवृत्तौ च तेन कार्य्यताज्ञानस्य हेतुत्वावधारणात्, नान्यत् प्रवृत्तेः कार्य्यताज्ञानावरुद्धत्वात्।

न चैवं शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वं, स्वप्रवृत्तौ बालेन शब्दाहितविशेषस्य कार्य्यताज्ञानस्य हेतुत्वेनानवधारणात्। ज्ञाने च प्रत्यक्षादिनानोपायकत्वदर्शनात् शब्दोऽपि कार्य्यताज्ञानहेतु-रित्यवधार्य्य तत्रैव शक्तिं कल्पयति उपस्थितत्वात् पश्चादावापोद्धारेण क्रियाकारकपदानां कार्य्यान्वितततत्तदर्थेषु शक्तिं गृह्णाति प्रथमगृहीतसामान्यशक्त्यनुरोधात्।

स्यादेतत्। यद्यपि वृद्धव्यवहारादादौ कार्य्यान्वितधीरनुमिता तथाप्यन्वितमात्रशक्त्यैव कार्य्यतावाचकपदसमभिव्याहारादाकाङ्क्षादिमहिम्ना कार्य्यान्वितधीसम्भवात् न कार्य्यांशेऽपि शक्तिः परम्परयापि शब्दस्य कार्य्यान्वितज्ञानानुकूलत्वादर्थापत्तौ अन्यथोपपत्तिरपि। अवश्यञ्चाकाङ्क्षादेः कारणत्वं कार्य्यांशे शक्तावपि तद्व्यतिरेकादन्विताबिधानव्यतिरेकनियमात्। सति चाकाङ्क्षादौ कार्य्यव्यतिरेकदर्शनादन्विताबिधानव्यतिरेको न काप्यस्ति।

स्वप्रवृत्ताविति। कार्यताज्ञानमात्रस्य तदर्थत्वादिति भावः।

वस्तुतो ज्ञानं प्रति शब्दस्य हेतुत्वग्रहानन्तरं प्रवृत्तौ हेतुग्रहात् कुलालपितेव शब्दोऽन्यथासिद्ध इति तत्त्वम्। परम्परया कार्यवाचकलिङादिसहकारितया ।

नन्वर्थापत्तावन्यथोपपत्तिः (४४२ ख) आकाङ्क्षादिहेतुत्व एवास्तामित्यत आह -- **अवश्यमिति**।

ननु शक्तिकल्पनागौरवमेव बाधकम्, अन्यथा बाधकाभावात् तीरेऽपि गङ्गापदशक्तिरित्यत आह -- **शक्तीति।** शक्त्यन्तरकल्पनागौरवम्, एकशक्त्यैवोभयोपपत्तौ लक्षणैव गौरवान्न कल्पताम् इति भावः।

अन्यथा गवादिपदानां व्यक्तावेव शक्तिः स्यात् संस्कारादेव व्यक्तिलाभदर्शनान्न ततेति यदि तदा कार्य्यवाचकपदादेव कार्य्यान्वितलाभ इति किं शक्त्या। वृद्धव्यवहारे नियमतः कार्य्यान्वितज्ञानं तत्र दृष्टमिति तत्र शक्तिकल्पने वृद्धव्यवहारे शब्दोपस्थापितेनैवान्वयबोधदर्शनाच्छब्दसन्निधेरेव अन्वयबोधहेतुत्वकल्पने द्वारमत्यदौ शब्द एवाध्याहियेतष क्वचिदसम्पूर्णवाक्ये वृद्धव्यवहारादाद्यव्युत्पत्तेः शब्दसन्निधिर्व्यभिचरतीति चेत्, तर्हि, सिद्धार्थेऽप्यन्वयप्रतीतिदर्शनात् कार्य्यत्वमपि व्यभिचारि।

न च तत्र लक्षणा, बाधकाभावात्। शक्तिकल्पनाभिया ह्यन्यत्र लक्षणानुमता इह तु लघीयस्या उभयसाधारणपदार्थमात्रशक्त्या मुखस्यैवोचितत्वात्।

किञ्च कार्य्यवाचिलिङादीनां आकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थबोधकत्वमवश्यं वाच्यमतो विशेषात् पदान्तराणामपि तथात्वमस्तु लाघवादिति। मैवम्। व्यवहारहेतुतयानुमिते हि कार्य्यान्वितज्ञानेऽन्वय-व्यतिरेकाभ्यां शब्दस्य साक्षात्कारणत्वमवधारयति न परम्परया। साक्षात्त्वस्यौत्सर्गिकत्वेन तत्सम्भवे परम्पराया अन्याय्यत्वादिति तत्रैव शक्तिं कल्पयति नान्वितज्ञाने पदार्थज्ञाने वा। अप्रवर्त्तकतया प्रवृत्त्या स्वकारणत्वेन तयोरनुपस्थापनात्।

कार्यवाचीति। कृतकृत्यविषयतया कार्यत्वान्वितकार्यत्वबोधकत्वाभावादिति भावः।

साक्षादिति। तदवच्छिन्नकार्यताप्रतियोगिककारणताकत्वमित्यर्थः।

न परम्परयेति। नन्वत्र ज्ञानत्वावच्छिन्नकार्यताप्रतियोगिककारणताकल्पनेऽपि कार्यन्वितज्ञानफलोपधानं सहकारिवशादिति नेत्यर्थः।

साक्षात्वस्येति । बाधकं विनोपस्थितरूपेणैव कार्यत्वौचित्यादन्वितज्ञानत्वेन कार्यतां कल्पयित्वा कार्यान्वितबोधायोपाध्यन्तराकल्पनादित्यर्थः। अन्यथा साक्षादित्यस्यसङ्गतत्वापत्तेरित्यर्थः।

ननु बाधकाभावे सत्युपस्थितरूपस्य कार्यतावच्छेदकत्वम्, प्रकृते तु गौरवमेव बाधकमित्यत आह -- **नान्वितेति** । युगपदनुपस्थित्या तदनवतारादिति भावः ।

न चान्वितज्ञानशक्तावपि परम्परया कार्य्यत्वधीः सम्भवतीत्यर्थापत्त्या सैव कल्प्यतां लाघवात् न तु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वात् इति वाच्यम्। अर्थापत्तेः साक्षादुपपदाकमात्रविषयत्वेन न्यूनाधिकाग्राहकत्वात् साक्षादुपपादककार्य्यान्वित-ज्ञाने शक्तिः कल्प्यते लिङादीनां शक्तेरल्पनात् अन्यलभ्यत्वतर्कस्याप्यभावात् वा आद्यव्युत्पत्तेर्विचार्य्यत्वात्।

किञ्च प्रवृत्तिकारणतयोपस्थितं कार्य्यान्वितज्ञानमपहायानुपस्थितान्वितज्ञानमात्रे शक्तिकल्पनमयुक्तं हेत्वभावादुपस्थित्यन्तरे च गौरवात्।

ननु गौरवानवतारात् बाधकनिश्चयो मा भूत्। वस्तुबाधके संभावना तावतापि बाधकाभावनिश्चयान्न कार्यान्वितशक्तिकल्पनादुत्सर्गस्य बाधकाभाव निश्चये प्रवृत्तेरित्याशङ्क्य निषेधति -- **न चेति**।

अर्थापत्तेरिति । बाधकानिश्चय (४४३ क) एवोपस्थितकार्यतावच्छेदककल्पकः तस्यैवोत्सर्गतस्तन्त्रत्वात्। न तु बाधकाभावनिश्चय इत्यर्थः। न त्वन्यतः कुतश्चिल्लभ्यमिति शङ्का न बाधिका, आतिप्रसङ्गादित्यत एवन्यतो लभ्यमिति शङ्का तथा वाच्या । सा च न संभवतीति शङ्काप्रतिबन्धकत्वेऽपि न क्षतिरित्याह -- **लिङादीनामिति** ।

प्रियान्तरेति समाधिसौकर्यादुक्तम्। प्रसिद्धार्थ पदसामानाधिकरण्यस्थले वक्ष्यमाणयुक्तेरव कल्पादिति।

अत्रेदं तत्वम् -- प्रत्यक्षेणाकारणत्वग्रहे परं कार्यकारणतावच्छेदकोपस्थितिनियमः, न तु मानान्तरेण तद्ग्रहे। तत्र हि कार्यत्वकारणत्वयोरुपस्थितधर्मसामानाधिकरण्यमात्रं भासते। यथाश्वमेधस्वर्गयोः। न हि तत्रापि द्वयावच्छेदकत्वमद्वयोऽस्ति । तथा सति गङ्गास्नानात् स्वर्ग इति ज्ञानऽतोश्वमेधेन यजेतेति वाक्यात् कारणताज्ञानानुपपत्तेर्व्यभिचारकज्ञाने व्याप्तिज्ञानात्।

न चैवमुक्तक्रमेणापि कारणत्वाग्रहः, समानप्रकारकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वात्। उक्तं ***त्रिसूत्रीनिबंधे*** -- *व्यभिचारश्चागमेतरप्रमाणगम्यं कारणत्वमपवदतीति* ।

अथ कार्य्यान्वितज्ञानोपस्थितावप्यन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्य्यांशमपहायान्विते शक्तिर्गृह्यतामिति चेत्, न। ज्ञाने हि पदानां शक्तिः शक्यत्वान्नार्थेषु। अन्यच्च कार्य्यान्वितज्ञानं अन्यदेवान्वितज्ञानं विषयबेदेन ज्ञानभेदात्।

तदुक्तमभाववादे अन्यद्भूतलज्ञानमन्यञ्च घटवद्भूतलज्ञानमिति अन्वितज्ञानमुपस्थाप्य तत्र शक्तिग्रह इति गौरवमेव।

लघुनि शक्ये सम्भवत्यन्यलभ्यं गुरु न तथेति चेत्, न। युगपदुपस्थितो तथात्वात्।

न च तस्याप्यनुपस्थितिः, पुरुषविशेषदोषात्, सर्व्वैरेवाद्यव्युत्पत्तौ तथानवगमात्। तथापि न कार्य्यान्विते शक्तिः कार्य्यावाचिलिङादीनां व्यभिचारादिति चेत्, न। सर्व्वपदानां कार्य्यत्वविशिष्टधीजनकत्वात्। तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थकार्य्यप्रतिपादकतया वेति।

एवञ्च कार्य्यान्वितव्युत्पत्तौ सत्यमनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादैरुपाधित्वम्। तथा चोपजीव्यप्रथमभआविकार्य्यान्वितव्युत्पत्त्यनुरोधेन विध्यश्रुतावपि कार्य्याध्याहारः। क्वचिल्लक्षणा क्वचिदसंसर्गाग्रह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां, प्राचीनकार्य्यान्वितज्ञानं बाध्यतामित्यप्यत एव निरस्तम्।

पूर्व्वकल्पनातः कल्पनान्तरप्रसङ्गात् उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेः अनन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च।

अथ सिद्धार्थेऽपि व्युत्पपत्तिः सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव वार्त्ताहारेण समं चैत्रसमीपं गतश्चैव पुत्रस्ते जात इति वार्त्ताहारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं गृह्णन् श्रोतुर्हर्षमनुमिनोति। हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति। उपस्थितत्वादुपपादकत्वादान्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत्, न। हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वाच्च।

अथ पुत्रजन्मज्ञानाव्यभिचारिवृद्धिश्राद्धादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत्, तर्हि पुत्रस्ते जात इति वाक्यं तत् क्रियाकर्त्तव्यपरमेवेति कार्य्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो गृह्यते उत्तरकालं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिः कार्य्यं जहाति।

यत्रापीह सहकारतरौ मधुरं पिको रौतीति प्रसिद्धार्थपदसमानाधिकरण्यादिभिर्व्युत्पत्तिस्तत्रापि व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव युक्ता पिकपदशक्तिः, पूर्व्वं नावधृतेति चेत्, न। तत्र पिकमानयेत्यादौ कस्यचित् कार्य्यान्वित एव व्युत्पत्तेः, उपजीव्यजातीयतया च तस्या बलवत्त्वम्।

किञ्चेदमपि कार्य्यान्वितज्ञानशक्तं पदत्वादिति सामान्यतोऽवगतं स्वार्थविशेषः परं नाधिगतः स इदानीं सुहृदुपदेशादिभिरवगम्यते। अतः सिद्धं प्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञानजनकत्वं, तच्च क्वचित् साक्षात् कार्य्यान्वयात् क्वचित् परम्परया कार्य्यान्वयात् ।

अत एव विधिशेषीभूतार्थवादानां स्वर्गादिपदशक्तिग्राहकाणाञ्च प्रवृत्तिपरत्वेन परम्परया कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकत्वमिति। यत्र पुराण-भारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वमेव तेषामतिपरम्परया कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकत्वं, स्वरूपाख्यानपराणान्तु काव्य-नाटकादीनां पदार्थासंसर्गाग्रहेण संसर्गव्यवहारो न संसर्गग्रह इति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे कार्य्यान्वितशक्तिवादपूर्व्वपक्षः।

तदिहाप्यनुमितप्रयोज्यवद् द्विकार्यान्वितज्ञाने शब्दकारणत्वग्रहोऽनुप्रत्यक्षात्। किं तु परिशेषादिति तस्यावच्छेदकत्वे पर्यवसन्नेन समर्थम्। किन्तु तत्समानाधिकरणशब्दकार्यज्ञानमात्रे (४४४ख) अवच्छेदकग्रहस्तु स्वर्गवदुच्यते। तथा चोत्तरकाले लिङादिशक्तिग्रहोत्तरमन्यलभ्यतयान्वितज्ञानत्वावच्छेदेन करणतां कल्पयित्वा लिङादिसमाभिव्याहारात् कार्यान्वितज्ञानसंभव इति वस्तुगतिः। तत्र यद्युपस्थितत्वमात्रेण कर्यान्वितज्ञानत्वस्यावच्छेदकत्वं तदा घटानयनकार्यन्वितज्ञानत्वमवच्छेदकमस्तु, उपस्थितत्वात्।

अथ तत्र घटाद्यंशत्यागः, तदेहापि कार्यत्वाशक्याङ्ग इति प्रतिबन्दीमुखेनाह -- **घटमानयेत्यादिशक्तिः कल्पयतीति** । अवच्छेदकमित्यर्थः। एवमग्रेऽपि। स्वेत्यनन्तरं नियमत क्रमेणेति शेषः।

अथ कार्य्यान्वितशक्तिवादसिद्धान्तः।

अत्रोच्यते - घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमितं बालेन न तु कार्य्यान्वितज्ञानं। प्रवृत्तिविशेषे तस्यां हेतुत्वाद्घटादिपदशाक्तग्रहे तस्यानुपयोगाच्च। तत्र तज्ज्ञानविशेषे घटमानयेतिवाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य्य घटपद-द्वितीया-धातु-विधिप्रत्ययानां प्रत्येकमवापोद्वापद्वारेण घटकर्म्मत्वानयन - कार्य्यत्वज्ञानेषु प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति। पश्चात् प्रवृत्तिसामान्येनानुमितकार्य्यान्वितज्ञाने वाक्यमात्रस्यान्यलभ्यत्वेन कार्य्यांशमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति। न तु प्रथमं वाक्यमात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम्।

अथ घटानयनक्रियायाः प्रथमं क्रियात्वज्ञानात्प्रवृत्तिमात्रानुमानं तेन च कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदुत्तरं विशेषयोः कार्य्य - कारणभावधीरिति चेत्, न। प्रथमं प्रवृत्तिमात्र - कार्य्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवतीत्यत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात्।

न च तदनुमानसामग्री तदावृत्तेति वाच्यम्। तदा व्याप्त्यादिस्मृतौ मानाभावात्। सामान्ययोः कार्य्य - कारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत्, न। विशेषयोरन्वय-व्यतिरेकाभ्यामेव तद्ग्रहात्। यथा धूम-वन्हिविशेषयोः कार्य्य-कारणभावग्रहे तत्सामान्ययोरपि हेतु-हेतुमद्भावो भासते । अन्यथा न सकृद्दर्शनगम्या व्याप्तिः स्यात् ।

तथात्रापि विशेषयोः कार्य्य-कारणभाववित्तिवेद्य एव सामान्ययोस्तथाभाव इति चेत्, न। प्रत्यक्षेण विशेषग्रहे योग्यत्वात् सामान्यमपि भासते प्रकृते च कार्य्यविशेषेण कारणविशेषानुमितौ न सामान्यमिति न युगपदुपस्थितिः।

अथ विशेषयोः कार्य्य - कारणभावात् सामान्यययोरपि तथात्वमनुमापयतीति चेत्, तर्हि विशेषयोः कार्य्य - कारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं पदविशेषे शक्तिग्रह एव स्यात्। निष्प्रयोजनकत्वेनानन्तरानुमितौ मानाभावात् यच्चोक्तं प्रवृत्तिकारणतयोपस्थितं कार्य्यान्वितज्ञानमपहायान्वितज्ञानं कल्पयित्वा तत्र शक्तिकल्पनमयुक्तं उभयथा गौरवादिति, तन्न। कार्य्यान्वितज्ञानेऽन्वितज्ञानत्वस्य सत्त्वात् तद्विशेषत्वात् तस्य अतस्तत्रैव शक्तिग्रहो न कार्य्यत्वांशेऽपि।

अथ एव घटवद्भूतलज्ञाने भूतलज्ञानत्वमपीति तद्भिन्नं तज्ज्ञानमभावव्यवहारे कारणं त्वयापि स्वीकृतम्। अस्त्येवं किन्तु तदुपस्थितावप्यन्वितज्ञानत्वं न विषय इति तस्यैवोपस्थित्यन्तरं कल्प्यमिति चेत्, न। कार्य्यान्वितज्ञाने अन्वितज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् विशिष्टज्ञानसामग्रीतोविशेष्यभानावश्यम्भावात् ।

अन्यथा अन्यज्जातिज्ञानं अन्यच्च जातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं क्वापि नोपस्थितमिति न तव जातिरेव पदार्थः स्यात् जातेः केवलोपस्थितौ च व्यक्तिसमानसंवित्संवेद्यत्वं न स्यात्।

अथ जातिविशिष्टज्ञानोपस्थितेर्व्यक्तिज्ञानविषयत्वेऽपि गौरवाद्व्यक्तेरन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वं न शक्यतावच्छेदकं किन्तु जातिज्ञानत्वं लाघवादिति मतं तर्हि तुल्यम्।

न च युगपदुपस्थितौ लाघवावतारो न चात्र युगपदुपस्थितिरिति वाच्यम्। विशिष्टज्ञानस्य विशेष्यविषयत्वनियमात्।

किञ्च ममेदं कार्य्यमिति ज्ञानं साक्षादुपपादकं प्रवृत्त्या स्वकारणत्वेनानुमितमतस्तत्र शक्तिं गृह्णीयात् साक्षादुपपादकविषयत्वात् कल्पनायाः। न त्विदं कार्य्यमिति ज्ञाने, तस्य साक्षादुपपादकोपपादकत्वात्।

अथेदं कार्य्यमिति ज्ञाने शक्त्यैव परम्परयानुमानद्वारा ममेदं कार्य्यमिति ज्ञानसम्भवात् अन्यलभ्यत्वेन न शक्तिकल्पना। तर्हि इतरान्वितज्ञानशक्त्यैव कार्य्यवाचकपदसमभिव्याहारेणैव कार्य्यान्वितज्ञानसम्भवात् । अन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति तुल्यम्।

नन्विदं कार्य्यमिति ज्ञानं साक्षादेव प्रवर्त्तकं कर्त्तव्यताप्रयोजकयावदेकविशेषणस्य स्वगतत्वप्रतिसन्धानं सहकारि तेन नातिप्रसङ्गः।

न च सहकारिविलम्बेन कार्य्यानुत्पादे साक्षात्साधनत्वं निवर्त्तत इति चेत्, न, लाघवेन ममेदं कार्य्यमिति ज्ञानादेव प्रवृत्तेः, यथा च भविष्यद्विषया कार्य्यतानुमितिस्तथोक्तमधस्तात्।

अपि च यादृशस्य पुरुषस्याविगीतकृतिसाध्यमिदं तादृशोऽहमिति धीर्न प्रवृत्तिहेतुः कृतक्रियमाणविषयककृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानुत्पादकत्वात् इच्छायाः स्वप्रकारकधीसाध्यत्वेन कृत्यासाधयामीतीच्छायाः स्वकृत्यनन्तरभविष्यत्तारूपकृतिसाध्यता-धीजन्यत्वाच्च।

अपि चास्तु प्रथमं कार्य्यान्वितज्ञाने वाक्यस्य साक्षात्कारणताबोधात्तत्र शक्तिग्रहः तथापि पश्चादावापोद्धारेण पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति लाघवात्। न तु कार्य्यत्वांशेऽपि गौरवात् अन्यलभ्यत्वाच्च।

न चैवं प्रथमप्रवृत्तस्य साक्षात्कारणताबोधस्य तन्मूलककार्य्यान्वितशक्तिग्रहस्य च बाधा स्यादिति वाच्यम्। इष्टत्वात् अन्यथासिद्धिमपश्यतो हि बालस्य स भूत इति तस्याबलवत्त्वात् गौरवान्यलभ्यत्वं - तर्क - सहकृतप्रमाणजन्यत्वेनोत्तरस्य बलवत्त्वात्।

न चोपजीव्यबाधान्न तथा प्रत्येतीति वाच्यम्। उपजीव्यत्वे मानाभावात्। दैवाद्धि प्रथमं तद्वृत्तं न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वं तेन विनापि तत्सम्भवात्।

न च प्राथमिकत्वेन बलवत्त्वं व्यभिचारात्। नापि सर्व्वैः प्रतमं प्रतीयमानत्वेन बलवत्त्वं सर्वेषां शरीराहम्प्रत्यये चन्द्रतारकादिपरिमाणस्य सर्व्वैरल्पत्वग्रहे च व्यभिचारात्।

अत एव पूर्वकल्पनातः कल्पनान्तरप्रसङ्गः स्यादिति निरस्तम्। यत्रानन्यथासिद्धतयोपजीव्यतया वा बलवत्त्वं पूर्वकल्पनायास्तत्र तथात्वात्।

किञ्च प्रथमं कार्य्यान्वितज्ञाने वाक्यस्य साक्षात्परम्परोदासीनं कारणत्वमात्रं गृह्यते न तु विशेषोऽपि उपायस्यान्वय-व्यतिरेकादेरुभयविशेषसाधारणत्वेन तत्संशयकत्वात्, उत्सर्गोऽपि बाधकाभावनिश्चयसहकृतो निश्चायकः।

न चान्यलभ्यत्वस्य बाधकस्याभावमापाततः स्वतो दर्शनमात्रेण बालो निश्चेतुमर्हति। अत एव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बाधकाभावसहकृतनिश्चयादेव निश्चयः, अन्यथा प्रमाऽप्रमा वा साक्षात्परम्परासाधनं वेति संशयः क्वापि न स्यात्।

यच्च हर्षहेतूनां बहूनां सम्भवादित्यादि, तन्न, स्वतोगृहीतहर्षहेतुस्तनपानादेर्बाधावतारादन्यस्य हर्षहेतोरग्रहादुपस्थितत्वादुपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव हर्षहेतुत्वेन कल्पनात्। अन्यप्रियज्ञानं हर्षकारणं भविष्यतीति शङ्कायां कथमेवमिति चेत्, न। एवं हि कार्य्यान्वितज्ञानेऽपि शक्तिर्न गृह्येत, प्रयोज्यज्ञानहेतूनां बहुत्वादनन्यथासिद्धशब्दानुविधानस्य च तुल्यत्वात् अन्यप्रियस्याज्ञानाच्च ज्ञानेऽपि वा तदा तदुपस्थितिनियमे मानाभावात् सन्देहाभावोपपत्तेः लिङ्गाभासजन्य-काकतालीयसम्पन्नसंवादानुमितिवद्धर्षेण लिङ्गेन पुत्रजन्मज्ञानानुमानसम्भवाच्च।

ननु भवतूपस्थितत्वात् कार्यान्वितज्ञानत्वावच्छेदेन हेतुता पश्चाल्लाघवादि प्रतिसन्धानेन त्याग इत्याह - - **अपि वास्तु प्रथम** इति।

न चाभासजत्वेनानुमितेर्भ्रमत्वे तद्धेतुकशक्तिग्रहो भ्रमः, विषयस्य तथाभावेन तयोर्यथार्थत्वात्। यथा कश्चित् सूत्रसञ्चाराधिष्ठितं दारुपुत्रकं घटमानयेति नियुङ्क्ते स च तमानयति तदा चेतनव्यवहारहादिव तद्दर्शी बालो व्युत्पद्यते। इयं क्रिया कृतिजन्या सा ज्ञानजन्या तत् वाक्यजन्यमित्यनुमिति परम्पराया भ्रमत्वेऽपि तद्धेतुशक्तिग्रहः तज्जन्यशाब्दबोधश्च यतार्थ एव विषयस्य तथाभावादिति सिद्धं सिद्धार्थेऽपि शक्तिग्रह इति।

अत एव 'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपपन्नं च तत् सुखं स्वःपदास्पदम्' ।।
इत्यर्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रहः न तु चन्दनादौ सुखोपरागेण स्वर्गपदप्रयोगाद्वेयतादशायाञ्चाप्रयोगात् सुखमेव शक्यं। बहुवित्तव्ययायाससाध्ये तत्तत्कर्म्मणि सुखमात्रार्थो न प्रवर्त्तत इत्यर्थवादोपस्थिते स्वर्गपदतात्पर्य्यम्।

न चार्थवादस्योपजीव्यत्वात् तदुपनीते तत एव शक्तिग्रहः, तस्य स्वर्गपदतात्पर्य्यविषयत्वेनास्पदत्वोपपत्तेर्न वाच्यत्वाभिधायकत्वं गौरवात्, सुखमात्रे चाप्रयोगात् अतिशयितसुखत्वं वाच्यं प्रयोगोपाधिर्व्वातिशयः।

अत एवायं नेति। यद्यपि तस्य विधिसमभिव्याहततया परम्परया कार्यान्वितत्वमिति तत्सिद्धान्तान प्रकृतोपष्टम्भकता, तथापि तत्कल्पनायां गौरवग्रासादसंभवं मनसिकृत्य तदुक्तमिति ध्येयम्। सुखोपरि गौणसुखजनकत्वप्रतिसन्धाहेयतादशायां तज्जनकत्वाप्रतिसन्धानदशायां सुखमेवेति सुखस्य स्वर्गपदवाच्यत्वम्। तज्जनकत्वेन संबन्धेन बन्धने स्वर्गपदाप्रयोगप्रसङ्गादिति भावः। उपजीव्यत्वात्।

यद्वा (४४४क) यागसाध्यप्रवृत्तावपेक्षणीयत्वादास्यदेति आस्यपदे हि न वाच्यत्वम्,अपि त्वाव्यापारत्ववाचकं तद्विषयत्वलक्षणं तत्प्रकृतम्। तच्च सामान्यशक्त्या विशेषशक्त्या चोभयथा संभवतीति लाघवात्तात्पर्यवशात् सामान्यशक्त्यैव निर्वाह्यम्। न विशेषशक्तिं कल्प्यतीति।

नन्वतिशयस्य तत्र जातिरूपस्याननुगमात् कथं शक्यत्वमित्यरुचेराह -- **प्रयोगेति** । तत्र चाननुगमो न दोषाय। तस्य ज्ञातस्य तत्रैव प्रयोगनियामकत्वलक्षणं प्रयोगोपाधित्वमन्यत्र प्रयोगप्रितबन्धकत्वमिति यावत्। तथा च प्रयोगं प्रति तदभावकूटस्य हेतुत्वमित्यननुगमोऽस्त्विति भावः।

न चातिशयस्य सावधित्वेन चन्दनसुखेऽस्मादयं स्वर्ग इति धीः स्यात्, रसादाविवातिशयस्य जातित्वेनावध्यनिरूप्यत्वात्। अतिशयपदप्रयोगस्तु इतरज्ञानापेक्ष इति चेत्, न। विचित्रहेतुसाध्यतया विलक्षणातिशयस्यानेकत्वेनाननुगमात्। सुखत्वावान्तरातिशयत्वेनास्यानुगमेऽप्यनध्यवसायेन शक्त्यग्रहादप्रवृत्त्यापत्तेः। सुखत्वावान्तरजातेश्च सुखमात्रसाधआरणत्वात् प्रयोगोपाधेः निराकर्त्तव्यत्वात् लोके च लक्षणा।

ननु दुःखासम्भिन्नसुखस्य शक्यत्वे चन्दनादौ स्वर्गपदप्रयोगोलक्षणायापि न स्यात् सातिशयसुखस्य शक्यत्वे तत्सम्बन्धितया चन्दनादौ लक्षणा भवति।

अतिशयपदेति । अस्मदादि शयित इत्यत्र प्रकृते च स्वर्गपदातिशयरूपायास्तत्र जातेरेव शक्यत्वम्।

नत्वतिशयत्वेन येनातिशयत्वनिरूपकत्वेन स्वर्गपदेऽप्यवधिज्ञानापेक्षा स्यादिति भावः।

ननु नाननुगमः, किंतु सुखत्वावान्तरातिशयत्वेन तदवान्तरजातित्वेन बाधोऽस्त्वित्यत आह -- **सुखत्वेत्यादि**।

नन्वितर एव दोषात् कल्पान्तरानुसरणमित्यत आह -- **प्रयोगेति**। प्रयोगहेतोरिष्टसाधनताबुद्धेः सत्वप्रयोगावश्यभावेन तत्प्रतिबन्धकत्वे प्रमाणाभावदिति भावः। अत एवौत्कटेच्छाविषयत्वं प्रयोगोपाधिः सुखमात्रं शक्यन्ते। सुखोपेक्ष (४४४ख) कालेन चन्दने स्वर्गपदप्रयोगः, इच्छाकाले तु भवत्येवेत्यपास्तम्। रागस्याश्वमेधजे सुखे स्वर्गपदाप्रयोगे संभवाच्च।

नन्वेवं लौकिकसुखे स्वर्गपदप्रयोगो न स्यादित्यत आह -- **लौकिकेति**। न तु चन्दने कथं स्वर्गपदप्रयोग इत्याशङ्का तस्य तेनापि लाक्षणिकत्वं स्वीकारादिति । लक्षणाया एकलक्षणया । लक्षितलक्षणायास्तु जघन्यत्वादिति भावः ।

तस्मात् दुःखासम्भिन्नत्वादिनोपलक्षिता सुखत्वावान्तरजातिरेव वाच्या लाघवादिति चेत्, न। एकजातीयहेतुसाध्ये एकजातिसत्त्वेऽपि विलक्षणहेतुसाध्यस्वर्गेष्वेकजातौ मानाभावात्। विहितकर्म्मजन्यता च तत्तद्विशेषत्वेनैव, अननुगतस्यापि जन्यतावच्छेदकत्वात् सम्बन्धमात्रञ्च लक्षणावीजमिति वक्ष्यते।

एवं देवतायामपि 'इन्द्रमुपासीतेत्यादौ लोके प्रयोगस्यानियमात् गौणतयैव व्यवहाराच्चार्थानध्यवसायेऽलौकिकसहसाक्षादाविन्द्रादिपदशक्तिग्रहः। प्रमाणञ्च 'इन्द्रः सहस्राक्ष इत्यादिर्व्विधिसमभिव्याहृतोऽर्थवाद एव स्वर्गपदवत्।

अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या 'तत्सुखं स्वःपदास्पदमिति श्रुतेश्चार्थवादादेव शक्तिग्रहः, न चेह तथार्थवादः।

अननुगतस्यापीति। नन्वनुगतस्यैव तत्तज्जातीयस्यामहिष्यादिति व्यावृत्तितत्तद्व्यक्ति विशेषस्य धेनुपदवशक्तिरस्तु। दुःखसंभिन्नत्वादि तत्र गोत्ववच्छक्त्युपाधिरस्त्विति, मैवम्। तथा सति तद्वदेव स्वर्गादिपादाद्विशिष्टोपस्थितिनियमापत्तेः। न हि धेनुपदात् गोत्वविशिष्टानुपस्थितिः। तथा च चन्दने स्वर्गपदलक्षणया प्रयोगस्तन्मते न स्यादिति भावः।

नन्वेवं लक्षितलक्षणाया जघन्यत्वेन तत्स्वीकारापेक्षया चन्दनसुखे स्वर्गपदवाच्यत्वस्वीकारो वरमित्येकलक्षणा वाच्या । तथा च कथमेकलक्षणेत्यत आह -- **सर्वथेति** । स्वर्गपदशक्यवृत्तिजात्याश्रय जनकत्वेन परम्परासम्बन्धेन स्वर्गपदस्य चन्दनादौ प्रयोग इति भावः।

विधिसमभिव्याहृतेति । वस्तुगतिमपेक्ष्यास्माकं तदसमभिव्याहृतानुवादस्यापि प्रामाण्यं न तत्र (४४५क) निबन्धनः।

ननु अबाधितेत्युक्तं, प्रकृते च बाध एव देवताया उपास्यत्वात्। तस्याश्च शब्दात्मिकायाः सहस्राक्षत्वाभावादित्यत अह -- **मन्त्रेति** ।

शिवा---दिति । देवतावाचकत्वेन प्रसिद्धानामिति शेषः।

किन्तु 'इन्द्रः सहस्त्राक्ष इत्यादि स्तावकत्वेन प्रवृत्तिपरमिति चेत्, न। 'इन्द्रः सहस्त्राक्ष इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतौ बाधकं विना सहस्त्राक्षस्यैवेन्द्रादिपदवाच्यत्वावधारणात् प्रसिद्धपदसमन्वयबलेन प्रतीयमानमर्थमबाधितमादायैव तेषां प्रवर्त्तकत्वात्। मन्त्रप्रकाशितशसिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां देवताव्यवहारात्।

अपि च 'शिवाय गां दद्यादित्यादिना देवतासम्प्रदानत्वश्रुतेः शिवादिसहस्त्रनाम्नां पर्य्यायत्वेन श्रुतेर्महाजनपरिग्रहेण प्रमाणत्वादाराधितदेवतायां वरदातृत्वश्रुतेश्च बाधकं विना चेतनैव देवता। अत्र देवताच्चैतन्यपक्षे तत्प्रीतिरेव यागव्यापार इति नापूर्व्वसिद्धिरिति चेत्, न। प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाशित्वात् तज्जन्यसंस्कारस्य स्वाविषये फलाहेतुत्वात् फलहेतुस्थायिकृतिव्यापारापेक्षायां लाघवेन कृतिसमानाश्रयस्यैव व्यापारत्वकल्पनात्। नानायागेष्वेकदाह्वाने चैकदा सन्निधानं तद्बुद्धिविशेष एव प्रतिष्ठाविधिना प्रतिमादावहङ्कारवत्।

अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिश्चेतन एव देवतात्वन्तु तस्य नास्ति मानाभावात्, किन्तु देशनादेशितचतुर्थ्यन्तपदनिर्द्देश्यत्वं देवतात्वमितीन्द्रायेत्यादिपदमेव देवता। अत एवाग्निप्रकाशकमन्त्रेणाग्निप्रकाशनानन्तरं अगन्य इति नियमतो हविस्त्यागो न पर्य्यायान्तरेण।

किंत्विति । ऐद्रं दधि भवतीत्यत्र सास्य देवतेति तद्धितविधानात् इन्द्रोऽस्य देवतेत्यर्थः। तत्र च देवतात्वं यदि स्वामित्वं त्यागोद्देश्यत्वं तदा पर्यायान्तरेणापि यागापत्तिरिति सास्य देवतेत्यस्य सा चतुर्थ्यंतपदनिर्देश्येत्यर्थः। तथा च ध्येयं चोदनैन्द्रमिति। तथैव तद्धितार्थीभूताय इन्द्रायेति पदनिर्देश्यत्वमदेश्यते। तथा च देशनादेशितचतुर्थ्यन्तपदनिर्देश्यत्वमिति निर्देशानिर्दिष्टोऽर्थो देवता । तत्र च विशेषणविशेष्यभावानियमात् शब्दविशिष्टोऽर्थो विशिष्टः शब्दो वा देवतेति सिद्धान्त इत्यर्थः। तत्र च विशिष्टस्य देवतापदार्थस्य विशेषणाचैतन्यादेवतेति विशेषणभागमेव प्रकृतोपयोगितया निष्कृष्य दर्शयति -- **इन्द्रायेतीति**। देवतार्थं शब्दविशेषापर्यंतं पर्यवसितमित्यत आह -- **अत एवेति** । अत एव ब्राह्मणायेति पदं न देवता। तस्य ब्राह्मणसंप्रदानकत्वश्रुत्या संप्रदानचतुर्थीत्वेन कल्प्यत्वात्। न तु देशो नैव देवता देशनादिति। अत्र च चुतर्थ्यर्थकपदनिर्देश्यत्वं पर्यवसितम्। अतो न धृतिहोमे (४४५ख) तद्देवतात्वाभावपात इति स्मर्तव्यम्।

न चेन्द्रोद्देशेन हविस्त्याग इन्द्रनिष्ठकिञ्चिज्जनकः तत्स्वरूपाजनकत्वे सति तदुद्देशेन क्रियमाणत्वात् ब्राह्मणस्य दानवदिति वाच्यम्। अप्रयोजकत्वात्। तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च। इन्द्राय स्वाहेत्यत्र च तादर्थ्ये । किन्तु स्वाहादिपदयोगे उपपदविभक्तिरेव।

अन्यथा 'नमः - स्वस्ति - स्वाहेत्यादिसूत्रवैयर्थ्यात्। मैवम्। चतुर्थ्यन्तपदस्य देवतात्वे मानाभावात् चतुर्थी' विनापि इन्द्रो देवतेति व्यवहारात्। अग्नये कव्यवाहनायेत्यादौ देवताह्वयप्रसङ्गात् 'इन्द्रः सहस्राक्ष इत्यर्थवादस्य 'इन्द्रमुपासीतेत्यादिविधिसमभिव्याहारेण एकवाक्यतया तस्यैवोपास्यत्वात् 'शिवस्वन्नाददीतेत्यत्र महादेवमुद्दिश्य त्यक्तेऽपि शिष्टानां शिवस्वत्वेन व्यवहाराच्च। अग्नय इति पदेन नियमतस्त्यागश्रुतिबोधितत्वेन तथा त्यागस्य फलहेतुत्वात्।

इन्द्रनिष्ठेति। देवतानिष्ठेत्यर्थः। अन्यथा राजसूस्यफलत्वेन श्रुतेरित्यादिग्रन्थालोचनेन सिद्धस्य साधनापत्तेरिति। घृतोद्देशेन क्रियमाणे दध्नि व्यभिचारवारणाय यत्स्वरूपेत्यादि ।

सत्यं तदर्थेति। किन्निष्ट किंचिदर्थेनाक्रियमाणत्वस्येत्यर्थः। प्रकृते स्वनिष्टस्वर्गोद्देशेनैव हविस्त्यादेः कारणमिति भावः। उपाधेः साधनाव्यापकत्वाय चतुर्थ्यनुपपत्तिः स्यादिति शंकां निषेधति ।

न चैवं तिर्यगधिकरणविरोधः तत्र तिर्यक्पक्षुदेवतानामधिकार इति सूत्रे तिर्यक्स्वजान्धबधिरमूकदेवतानामधिकारो बाधितो देवताचैतन्याभावे चाप्रसङ्गस्तत्रेति कथं निषेध इति वाच्यम्। तत्र देवतापदेन इन्द्रादेरेव प्रतिपादनादिति सैसेय दोवतोत्यनेन साम्या। गोद्देश्येत्येतावदेवाभिधीयते। अतिप्रसङ्गस्वगृहे यथाश्रुतं न्यायेन निरस्यम्। इतीन्दायेति पदस्य देशनाया अदेशनं देशानिर्देश्या देवता तत्र निर्देशो न विशेषणम्, किं तु लाघवादुपलक्षणम्। उपलक्षकस्तु इन्द्रादिदेवतेति क्वातिप्रसङ्गः। तथा स एव देवता न तु निर्देश इत्याह -- **चतुर्थ्यतेति** ।

तस्य वेति। तथा च तस्यैव देवतेति भावः। गृहादेवदेवमिति शेषः।

न च बीजाक्षराणां देवतात्वात् तत्रैव शिवादिपदशक्तिग्रह इति वाच्यम्। बीजाक्षराणां चतुर्थ्यन्तत्वानियमात्। तदप्रतीतावपि मन्त्रप्रकाशितशसिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः बीजाक्षराणां हविस्त्यागभागित्वेनानुद्दश्यत्वात् शिवस्य प्रतिमन्त्रं बीजाक्षराणां नानात्वात् अननुगमेन शिवपदशक्तिग्रहस्याशक्यत्वाच्च।

न च मूर्त्तिभेदेन शिवशरीराणामननुगतत्वेन तवापि न शक्तिग्रह इति वाच्यम्। बाल्यादिना भिन्नशरीरेषु चैत्रत्ववच्छिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य वानुगतत्वात् अदृष्टशून्यस्य चेश्वरस्य न देवतात्वं, ईशानस्य तद्भिन्न एव, तस्मान्मन्त्रकरणकहविस्त्यागभागित्वेनोद्देश्यत्वं देवतात्वम्। अन्येषां हविःसम्बन्धे मन्त्रस्याहेतुत्वादिति।

शिवपदेति । देवतापदेत्यर्थः। शिवपदस्य बीजाक्षरवाचकत्वानभिधानादिति ध्येयम्। (४४६क)

मूर्त्तिभेदेन शिवशरीराणमित्युपलक्षणदेवताभेदेन विष्णुशिवादीनामित्यपि द्रष्टव्यम्। शिवत्वजातेर्देवतात्वे जाते अन्यथादृष्ट शून्येत्यादि विरोधदत्रात्मनो देवतात्वेन कृत्रिमदेवतानां पित्रादीनां देवतात्वप्रसङ्गेन च स्वरसादाह -- **दृष्टेति**।

तस्मादिति । अत्रापि त्यागोद्देश्यत्वमुद्देशोपलक्ष्यत्वमुपलक्ष्यतावच्छेदकसजातिर्वा अदृष्टविशेषवत्वं वा । न च हविर्यज्ञिद्रव्यघटो देवताद्रव्यसम्बन्ध इत्यन्योऽन्याश्रयः। द्रव्यपरत्वाहविः पदस्यातिप्रसङ्गस्य मन्त्रकरणकत्वेनायास्तत्वात्। न चामन्त्रकेणोंद्राय स्वाहेत्यनेन त्यागेन तद्देवतात्वं तस्या त्यागान्तरे मन्त्रकरणकत्वेन लक्षणत्वादि स्वाहेत्यन्तस्येव त्यागमन्त्रत्वाद्वा। अत एव पित्रादीनां स्वधया त्यागे देवतात्वम्। प्रेतस्य तु तदा न देवतात्वम्। अतोऽनन्त्ये न त्याग इति संक्षेपः।

वाक्यशेषाद्व्यवहारोपष्टम्भकादित्यर्थः। प्रकृतेऽपि वाक्यशेषस्यैव तथात्वादिति भावः।

अत्र संशयनिराकरणाय वाक्यशेषावतार इति न, तस्य संशयाभावात्। श्रोतुरयं विप्रतिपत्यजः संयोगवाक्यशेषाद्वेदस्थादुक्तक्रमेण शाम्यतीति ध्येयम्।

नन्वनार्यव्यवहारवत्वेनैव वाच्यत्वमस्तु, तुल्यबलतैव नेत्यत आह -- **अपि चेति** ।

क्वचिन्न वाक्यशेषाच्छक्तिग्रहः, यथा यवमयश्चरुर्भवति वाराही चोपानत् वेतसे कटे प्राजापत्यं चरुं चिनोतीत्यत्र यव-वराह-वेतसशब्दाः किं कङ्गु-वायस-जम्बूनां वाचकाः, उत दीर्घशूक-सूकर-वञ्जुल्लानामिति म्लेच्छार्थ्यव्यवहारदर्शनाद्विप्रतिपत्तौ मुख्यार्थानध्यवसायात् तत्पदे प्रामाण्यानिश्चये व्यवहाराद्व्युत्पत्तिः, स चाविशिष्टः पिकादिपदेषु म्लेच्छव्यवहाराद्व्यत्पत्तेः-सूकरस्येव चर्म्मणा काकस्याप्युपानहोः सम्भवादिति पूर्व्वपक्षे

'वसन्ते सर्व्वसस्यानां जायते पत्रशातनम्।
मोदनमानाः प्रदृश्यन्ते यवाः कणिशशालिनः'।।
'वहारं गावोऽनुधावन्ति'।। 'अम्बुजो वेतसः'।।

इति वाक्याशेषरूपवेदविरोधिनी म्लेच्छप्रसिद्धिः स्मृतिरिव वेदविरुद्धा हेयेति निरस्तायां म्लेच्छाप्रसिद्धौ निष्प्रतिपक्षार्य्यव्यवहाराच्छक्तिग्रहः।

न च योग्यतावशात् संशयोपशम इत्याह -- **सूकरस्येति**। सूकर (४४६ख) चर्मणेव काकचर्मणाण्युपनहोऽसंभव इत्यर्थः।

वेदविरोधिनीति । उक्तक्रमेणोभयशक्तिनिषेधे सतीति द्रष्ठव्यम्। अन्यथोभयशक्यत्वे वेदविरोधासंभवादिति ।

स्मृतिरिति वेति। *सर्वा औदुम्बरी वेष्टयितव्येति* स्मृतिरुदुम्बरवृक्षशाखाया वस्त्रवेष्टनव्यापारतां बोधयिति। *औदुम्बरी स्पष्ठैवोद्गायेदिति* श्रुत्या सर्ववेष्टिते स्पर्शसंभवविरोधेन बाध्यते । यदेत्यर्थः। सादृश्यादिनेत्युपलक्षणम्। शक्त्यापि संभवादुभयशक्तबाधकाभावदिति भावः।

अत्रेदं तत्त्वम् - न्यायश्चानेकार्थत्वमित्येकत्रैव शक्तिस्तथा सति क्व चेति विनिगमनायां युक्तस्तर्क इति।

अविवादादिति। पदान्तरस्यापि पदार्थान्तरशक्तस्यान्वितपदार्थशक्तत्वाभ्युपगमात्। तुल्यन्यायेनास्यापि पदस्य तथात्वौचित्यादिति भावः।

ननु वाक्यशेषात् शूकरादिषु तात्पर्य्यनिश्चयो न शक्तिर्णायकः काकादिसदृशतया शूकरादौ प्रयोगस्य गौण्यादिनापि सम्भवादिति चेत्, न, शूकरादौ तात्पर्य्यावच्छक्तेरपि निश्चयात्। तथा हि यद्यप्यनादिप्रयोगयोगिता न शक्तिनियता वैदिकगौण्यादिना व्यभिचारात्। तथापि शक्तिरनादिप्रयोगनियता । अतो वराहशब्दस्यानादिप्रयोगयोगिता शक्तिश्च काके कल्प्येति गौरवं शूकरत्वेऽनादिवेदसम्बन्धात् प्रयोगोऽनादिसिद्ध एव शक्तिमात्रं कल्प्यत इति लाघवमित्यनादितात्पर्य्यात् शूकरे शक्तिरेव।

अथ काकवत् शूकरोऽप्यसदृश एव सुसदृशस्य गवयादेः सत्त्वात् कथञ्चित् सादृश्यं काकस्याप्यस्तीति चेत्, न। काक-शूकरयोर्वराहशब्दाद्बुद्धिस्थत्वेऽनयोः को वाच्य इति जिज्ञासानुरोधात् तयोरन्यान्यापेक्षया गोसादृश्यमुद्भूतं जिज्ञासमानस्य स्मृतिविषय इति तन्निरासादन्यथा तात्पर्य्यग्राहकवाक्यशेषस्यापि निष्प्रयोजनत्वं स्यात् कथञ्चित् सादृश्यस्य सर्व्वत्र सत्त्वेन तात्पर्य्यानध्यवसायादिति। इतरान्विते शक्तिरित्यपि गुडजिन्हिका, वस्तुतोऽन्वयेऽपि न शक्तिः।

ननु व्यवहारेणानुमिते इतरान्वितज्ञाने पदशक्यत्वग्रहात् तत्रैव शक्तिं गृह्णाति उपस्थितत्वात्।

न चाग्रे तत्त्यागे हेत्वभावात्, न तु पदार्थज्ञानमात्रे, व्यवहारात् तस्यानुपस्थितेः, उपायान्तरात्तदुपस्थित्यन्तरकल्पने मानाभावात्। अत इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञानपदं स्वार्थान्वयानुभावकं इत्यन्विताभिधानमिति चेत्, न। इतरान्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिं कल्पयति लाघवात्, न त्वन्वयांशेऽपि गौरवात्।

अस्तु वा प्रथममितरान्वितज्ञाने शक्तिग्रहेऽग्रे तत्त्यागः अन्यलभ्यत्वप्रतिसन्धानात् अनन्यलभ्यस्यैव शब्दार्थत्वात्, प्रथमगृहीतमात्रञ्च न बलमित्युक्तमेव।

तस्मात् सर्वैः प्रथमव्यवहारादुपस्थिते कार्य्यान्वितज्ञानेऽन्वितज्ञाने वा पदकारणत्वग्रहात्तत्र शक्तिग्रहोऽग्रेऽपि गौरवान्यलभ्यत्वप्रतिसन्धानेऽपि न तत्त्यागः पूर्व्वकल्पनाया विपरीतत्वादिति स्वशिष्यव्यामोहनम्।

अथ कार्य्यत्वस्येतरपदलभ्यत्वेन तथा न त्वेवमन्वये तस्येतरपदाशक्यत्वाच्छक्यत्वे वा अविवादादिति चेत्, न। घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वारा आकाङ्क्षादिसहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्यथैवान्वयज्ञानलाभात् किं

शक्त्या। अन्वयमात्रशक्तावप्यन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात्, क्रिया - कारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसङ्गात्।

न चैकमेवान्विताभिधायकमितरत्तु प्रतियोगिस्मारकमिति वाच्यम्। अविशेषादशक्यान्वयानुभवेऽतिप्रसङ्गात्। अन्वयेऽपि शक्तिरिति चेत्, न। अशक्यमपि हि शक्यान्वयं बोधयति नान्यत् शक्यान्वयत्वस्य स्वरूपतोनियामकत्वात्, अन्यथा तवाप्यप्रतीकारात्।

नन्वेवं पदानामन्वितज्ञानजनकत्वात् तत्र शक्तिरस्त्येव अशक्तस्याजनकत्वात् तवापि पदादन्वयबोध इतीश्वरेच्छासत्त्वादिति सत्यं, किन्तु अन्वयबोधे स्वरूपसती सा व्याप्रियते। न तु ज्ञाता घटज्ञानशक्तत्वेन ज्ञानादेव घटान्वयबोधोपपत्तेः, यथा तव जातिशक्तपदस्य आत्मव्यक्तिज्ञाने, दृष्टञ्च ज्ञातकरणे सामान्यसम्बन्धितया ज्ञातस्यापि विशेषबुद्ध्युपायत्वं यथा वन्हिसामान्यव्याप्ततया गृहीतधूमस्य वन्हिविशेषबुद्धिजनकत्वम्।

अन्यथेति । अन्यथासिद्धत्वं तन्त्रम्, न त्वन्यपदलभ्यत्वम्, गौरवादिति भावः।

अशक्यमपि हेति । अन्वये शक्तिश्च स्मरणार्थमनुभवार्थं वा । नाद्यः, संसर्गस्य पूर्वाज्ञातस्यैव भानेन स्मरणाभावात्। नान्त्यः, विशेषणविशेष्यमानसमामग्रीत एव तदनुभवात् ज्ञायमानकरणे ज्ञानोपयोगिसम्बन्धस्य स्वविषयप्रतियोगिसंसर्गबोधकत्वनियमाच्च। न हि वह्निप्रतियोगिकव्याप्तिवद्वह्निवैशिष्ट्यव्याप्तिरपि तद्बोधाङ्गमपीति रवे (४४७क) तद्वदत्र पदार्थशक्तिरेव तब्दोधिकातद्विषयत्वेनैव ज्ञात्वैतब्दोधिकेति यावत्। अतः सामान्यतैव तथासामर्थ्याच्छक्तिरूपसम्न्धे तथेति भावः।

शक्त्यान्वयवस्येति । ज्ञानोपयोगिसम्बन्धस्य प्रतियोगिसंसर्गमात्रे बोधकत्वादिति भावः।

एतदेव वक्ष्यति -- **दृष्टं हीति**।

अथ घटज्ञानत्वं इतरान्वितघटज्ञानेऽप्यस्तीति तेन रूपेणान्वितघटज्ञानेऽपि ज्ञाता शक्तिर्व्याप्रियत इति चेत्, सत्यं। किन्तु घटज्ञानत्वं शक्यतावच्छेदकं न त्वन्वितघटज्ञानत्वं गौरवात् अन्यलभ्यत्वाच्च।

एवञ्च जातिवाचकपदस्य व्यक्ताविव एकैव शक्तिरन्वयांशे स्वरूपसती पदार्थांशे ज्ञाता व्याप्रियते। जाति - व्यक्त्योः समानसंवित्संवेद्यत्वात् तथा घटज्ञानादिकन्तु नान्वयविषयानियतं स्मरणे व्यभिचारादिति चेत्, घटानुभवविशेषं प्रतिघटपदत्वेन कारणता स च शब्दानुभवोऽन्वयविषयतानियत एव केवलस्य शब्देनाननुभवात् । स्मरणञ्च प्रतिपदत्वेन न जनकता व्यभिचारात् किन्तु सम्बन्धितया ज्ञातत्वेन।

स्यादेतत्, अन्वयतात्पर्य्यकतया तत्प्रतिपादकं पदमित्यविवादं, तात्पर्य्यनिर्व्वाहिका च वृत्तिः, सा चेह न गौणौ न वा लक्षणेति शक्तिसिद्धिः। अथान्वये लक्षणऐव स्वार्थसम्बन्धिनि तात्पर्य्यात् पदार्थोपस्थित्यनन्तरं तदन्वयोपपत्तेश्च।

न च वृत्तिद्वयस्य विरोधः, अन्वयविशेषणतया पदार्थोपस्थितेः। न च लाक्षणिकानामननुभावकत्वादन्वयानुभवः कथमिति वाच्यम्। पदार्थस्य स्मरणादन्वये शक्तत्वाच्च। पदानां शक्त्याननुभावकतया सर्व्वत्र लाक्षणिकस्यैवानुभावकत्वादिति। तन्न। वृत्तिर्हि ज्ञातोपयुज्यते न स्वरूपसत्यतिप्रसङ्गात्। न चेह स्वार्थसम्बन्धितयाऽन्वयः प्रागवगतः, वाक्यार्थस्यापूर्व्वत्वात्।

किञ्च शक्यसम्बन्धितया अन्वये लक्षणार्थं पदार्थे शक्तिकल्पनं तद्वरं लाघवादन्वयेऽपि शक्तिरस्तु किं वृत्तिद्वयकल्पनया, एवं स्थिते प्रयोगेऽपि अन्वयः पदशक्यः वृत्त्यन्तरं विना पदप्रतिपाद्यत्वात् पदार्थवदिति।

उच्यते। वृत्तिं विनापि तात्पर्य्यनिर्वाहात् किं वृत्त्या पदानामुक्तक्रमेणान्वयबोध-जनकत्वसम्भवादन्यथा शक्त्या तात्पर्य्यनिर्वाहोदृष्ट इति लक्षणोच्छेदः। अथ शक्तिं विनापि शक्यसम्बन्धात् तन्निर्वाह इति न तत्र शक्तिः, तर्हि वृत्तिं विनापि तन्निर्वाह इति किं वृत्त्या।

ननु घटानुभवविशेषं प्रति न जनकता, ततः स्मराणनुत्पत्त्यापत्तेः। किं तु घटज्ञानविशेषं प्रति तच्च नान्वयाविषकतानियतमित्यत आह -- **स्मरणं चेति** ।

अत एवानुमानमप्रयोजकम्। अन्यथा पदप्रतिपाद्यत्वादेव शक्तिसाधने वृत्त्यन्तरोच्छेदः। अत एव धूमोऽस्तीत्यत्र धूमपदस्य वन्हिबोधपरत्वेऽपि वन्हौ न लक्षणा शक्त्या धूमोपस्थितौ अनुमानद्वारा तत्प्रतीतिसम्भवात्।

तथा 'गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्' इति। वाक्यस्य मा गच्छेत्यत्र तात्पर्य्येऽपि न लक्षणा गमनस्य प्रियामरणहेतुत्वे हि वाक्यार्थः, तेन गमनं मया न कर्त्तव्यं प्रियामरणहेतुत्वादित्यनुमानादेव गमने अकर्त्तव्यताबोधनेन तात्पर्य्यनिर्वाहात्। यत्र हि मुख्यया साक्षात्परम्परया वा न तात्पर्य्यनिर्व्वाहः तत्र लक्षणा।

ननु घटमानयेत्यत्र प्रत्येकमन्वयविशेषे जिज्ञासा भवति। न च सामान्यानवगमे विशेषे सा स्यात्, इत्यन्वयसामान्ये शक्तिरेवेति चेत्, न। कारकेण क्रियया च क्रियाकारकसामान्याक्षेपात्तदुपपत्तेः दृष्टे फलादौ रसविशेषजिज्ञासावत्।

एतेन यदुक्तमन्वितपदार्थे मम त्वेकैव शक्तिस्तव त्वेका पदार्थेऽपरा त्वन्वय इति निरस्तम्। अन्वये शक्त्यभावात्। न चैवमन्ययानुभवे पदविनियोगो न स्यादिति वाच्यम्। अन्वयानुभवार्थमेव पदार्थे पदानां शक्तिकल्पनात्।

तस्मात् पदं करणं पदार्थस्मरणं व्यापारः आकाङ्क्षादिसहकारिवशात् स्मारितार्थान्वयानुभवः फलं पदार्थस्मरणं न व्यवधायकं व्यापारत्वात्।

न च स्मरणद्वारा पदार्थ एव करणम्, तस्यानागतत्वादिना स्वस्मरणे अन्वयानुभवे चाजनकत्वात्। तथापि पदार्थस्मरणमेव करणमस्तु आवश्यकत्वात्।

अत एव चिन्तावशोपनीतपदार्थानामन्वयबोधात् काव्यादिरिति चेत्, न। स्मरणस्य निर्व्यारत्वेतनाकरणत्वात् अनन्यथासिद्धान्वय-व्यतिरेकाभ्याम् आकाङ्क्षादिमत्पदस्यान्वयानुभव-विशेषे कारणत्वात् । पदार्थोपस्थितेः संसर्गधीमात्रहेतुत्वेऽपि शाब्दसंसर्गधीविशेषे पदस्यैव हेतुत्वात्।

अत एवेति। न च तत्र साक्षात्तात्पर्याग्रहान्न लक्षणा, तद्ग्रहे भवत्येव। हेतुसाक्षात्तात्पर्यग्रह इति लक्षणेति वाच्यं साक्षात्तात्पर्यग्रहस्याप्यत्र वृत्त्यभावेऽपि निर्वाहादिति भावः।

वस्तुतस्त्वन्वयस्य शक्यत्वे पदार्थवत्त्वस्य विशेषणत्वे संसर्गस्य भावापत्तेरिति नान्वयः।

शक्य इति। तात्पर्यं न शक्तिनिर्वाह्यं विरोधादिति निगर्वः। पदं करणपदज्ञानं करणमित्यर्थः।

गौः कर्म्मत्वमानयनमित्यत्र पदार्थज्ञानेऽपि अन्वयज्ञानानुदयात् पदविशेषोपस्थित-पदार्थज्ञानस्य हेतुत्वे पदविशेषस्यैवावश्यकत्वेन हेतुत्वाच्च। काव्यस्थले च पदार्थज्ञानव्यापारकं उत्प्रेक्षादिसहकृतं मन एवान्वयानुभवकरणम्। न चैवमुत्प्रेक्षायाः पृथक् प्रमाणत्वम्। व्यभिचारिजातीयतया लिङ्गादाविव प्रमाकरणतावच्छेदकानतिप्रसक्तानुगतरूपाभावा-न्निर्व्यापारत्वाच्च, किन्तु प्रमाणसहकारिणौ सा।

अत एव मानसे लिङ्गपरामर्शे व्याप्तिस्मृत्यादि न पृथक् प्रमाणम्। अथ पदमन्तरेणापि योग्यतादिज्ञानेऽन्वयबोधो भवत्यतः पदार्थस्मरण एव पदानामुपक्षयः।

तदुक्तम् - 'पश्यतः श्वेतमा रूपं हेषाशब्दञ्च शृण्वतः। खुरविक्षेपशब्दञ्च श्वेतोऽस्वोधावतीति धीः' । इति चेत्, सत्यम्। प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यव्यापारदर्शनात् अन्वितज्ञानोपपत्त्यर्थं पदस्यैव शक्तिः कल्प्यते प्रथमतस्तस्यैव कारणत्वावधारणात् पदार्थेषु शक्त्यन्तरकल्पने गौरवात्।

तदाहुः -- 'प्राथम्यादभिधातृत्वात्पर्य्योपगमादपि। पदानामेव सा शक्तिर्व्वरमभ्युपगम्यताम्।। इति, श्वेतोऽश्वो धावतीति धीश्च लिङ्गजा पदस्य क्लृप्तकारणभावस्याभावादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे कार्य्यान्वितशक्तिवादः।

लिङ्गादाविवेति। व्यतिरेकदृष्टान्तलिङ्गादौ व्याप्तिपक्षधर्मत्वादिवोत्प्रेक्षायाः प्रमाकरणता-वच्छेदकधर्माभावात् । उत्प्रेक्षात्वस्य भ्रमाभ्रमसाधारणज्ञानजनकत्वावच्छेदकत्वादित्यर्थः। न तूत्प्रेक्षायाः प्रमाणतावच्छेदकाभावेऽपि ज्ञानकरणीभूततत्सहकारिमनोजन्यं कथं मानसं करणान्तरसहकृत (४४७ख) मनोजन्यत्वस्यैव तत्त्वात्।

किं च निर्दोषोत्प्रेक्षात्वमेव तथास्त्वित्यस्वरसार्थेत्वन्तस्माह -- **निर्व्यापारत्वाच्चेति**।

प्रयोजक इति। इदं त्वापादः। वस्तुतः स्मरणास्यापि निर्व्यापारतया पदार्थस्यानागतादिरूपतया मनसश्च करणत्वे मानसप्रत्यक्षत्वापत्त्या शब्दादमुमर्थं जानामीति शब्दत्वानुभवानुपपत्त्या परिशेषादेव तदप्रमाणमिति।

अथ जातिशक्तिवादः।

एवं पदार्थमात्रे शक्तौ पदार्थो निरूप्यते। तत्र प्राभाकराः।

यद्यप्यानयनादिव्यवहाराद्व्याक्तावेव शक्तिरुचिता तथाप्यानन्त्य-व्यभिचाराभ्यां तत्र न शक्तिग्रहः, समुच्चयेन शक्यत्वे गां दद्यादित्यादौ सर्व्वोपादानासामर्थ्यं एकस्य शक्यत्वेऽनध्यवसायः।

न च गोव्यक्तिमात्रमर्थः, मात्रशब्दस्य सर्व्वार्थत्वे उक्तदोषात्, सामान्यार्थत्वे व्यक्तेरप्रतीतेः। नानार्थत्वे च सर्वासां प्रत्येकं ज्ञातुमशक्यत्वं, शक्तौ शक्ये च गौरवं, अपूर्वगवि व्यवहाराभावश्च।

नापि गोत्वेनोपलक्षिता व्यक्तिः शक्या धेनुपदवदतो न शक्यानन्त्य, न व्यभिचारः, न सर्वासङ्ग्रहः, न नानार्थत्वं, गोत्वेन तासामैक्यादिति वाच्यम्। रूपान्तरेण विज्ञातमन्येन रूपेण हि उपलक्ष्यते यथा काकेन गृहविशेषो गोत्वेन धानकर्म्मव्यक्तिविशेषः स्वतो विलक्षणः, न तु काकाद्याकारेण ए व तत्प्रतीतिः।

न च व्यक्तीनां जातिं विना रूपान्नतरमेकमस्ति ज्ञायते वा, गोपदाद्गौरित्येव प्रतीतेः, गोत्वविशिष्टे च कार्य्यान्वयाद्गोत्वं विशेषणं नोपलक्षणं, तदन्येन कार्य्यान्वये उपलक्षणं, यथायं वासस्वी देवदत्तशब्दवाच्य इत्यत्र वासः।

आनन्त्येति । यदि यत्र शक्तिग्रहस्तत्र शाब्दधीस्तत्र तदानन्तासु शक्तिग्रहाभावात् अगृहीतशक्तिके शाब्दधीर्न स्यात्। अन्यथा अन्यत्र शक्तिग्रहोऽन्यत्र शाब्दज्ञानं तदा शक्तधीः शाब्दज्ञाने व्यभिचारिणी इत्यर्थः। यद्यन्यशक्तिज्ञानादन्यधीस्तदा व्यभिचाराद्यव्यभिचारग्रहप्रसङ्गात् शक्तिग्राहमात्रं विनापि स्यादित्यपि कश्चिदनध्यवसायः। का सा युक्तिः या गोपदवाच्येत्येवंरूपः गोव्यक्तिमात्रं गोत्वमित्यर्थः।

नानार्थत्व इति। तत्तद्व्यक्तित्वस्य तदा प्रवृत्तिनिमित्तित्वादिति भावः।

अपूर्वगवीति समासान्तविधेरनित्यत्वादिति।

नन्वस्यैव (४४८क) सास्नावत्त्वादित्यत आह -- **ज्ञायते चेति**।

तदेवोपपदयति -- **गोपदादिति**।

न च गोत्वैकत्वेन व्यक्तीनामैक्यं क्रियते, अशक्यत्वात्। नापि ज्ञाप्यते, असत्त्वात्। न च तदेकत्वमेव व्यक्तेरेकत्वं, असम्भवात्। नापि व्यक्तिः शक्या गोत्वमवच्छेदकं कारणत्वे दण्डत्ववत्, एवं हि गोपदात् न गोत्वविशिष्टबुद्धिः स्यात् । शक्तिग्रहाहितसंस्कारसचिवाद्गोपदादेव धेनुपदादिव गोत्वविशिष्टज्ञानं तदुद्बोधश्च तद्वदेव, परम्परासम्बन्धादिति चेत्, न। तत्र हि धानकर्म्मव्यक्तिविशेषस्यावश्यशक्यत्वेऽनुगमाय गोत्वमवच्छेदकमात्रं न तु वैपरीत्यं गोत्वस्य वृषभेऽपि सत्त्वात्, इह तु व्यक्तिरतिप्रसक्तेति जातिविशिष्टैव सा शक्या स्यात्।

वस्तुतस्तु जातेः शक्तोपलक्षणत्वे शक्त्यवच्छेदकत्वे वावश्यकत्वात् लाघवाच्च जातिरेव शक्या स्यात् न तु व्यक्तिः, धेनुपदे तु गोत्वं न तथा अतिप्रसङ्गात्।

अस्तु तर्हि जातिविशिष्टं शक्यं स्वव्यवहारेण च स्वहेतुतया जातिविशिष्टज्ञानस्यानुमितत्वादिति चेत्, न। विशेष्यभेदाद्विशिष्टानामनन्तत्वेन व्यक्तिवाच्यत्वे उक्तदोषग्रासात्। विशेषणस्यैक्येन विशिष्टानामैक्यस्योपलक्षणपबक्षवद्दुष्यत्वात्, तस्माद्व्यक्तेरपदार्थत्वे जातिरेव पदार्थः।

वस्तुतस्तु व्यक्तौ जातिरनुगमिका विशेषिका चावश्यं वाच्येति नागृहीतविशेषणान्यायेन सैव वाच्या। अथ जातावपि व्यक्तिरेव विशेषः धर्म्मान्तराभावात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वादेरुपाधेरपि व्यक्तिघटितत्वात् नागृहीतविशेषणान्यायोव्यक्तावपीत्युभयमपि वाच्यमिति, न। जातेः स्वत एव व्यावृत्तत्वात्। अन्यथा जाति-व्यक्तोर्वयावृत्तत्वज्ञानादन्योन्यव्यावृत्त्यत्वबुद्धावन्योन्याश्रयः। स्वतोव्यावृत्तत्वञ्च न स्वयमेव स्वव्यावर्त्तकत्वं स्वस्मिन् स्वावृत्तेः। नापि व्यावर्त्तकं विनैव व्यावृत्तत्वं, असम्भवात्। किन्तु स्वाश्रयवत्स्वात्मनि व्यावृत्तधीजनकस्वभावत्वं परेषामन्त्यविशेषवत्। व्यावर्त्तकधर्म्मेऽपि धर्म्मान्तरादेव व्यावृत्तबुद्धावनवस्था स्यादत एव किञ्चिद्धि वस्तु स्वत एव विलक्षणमित्याहुः।

अस्तु वा व्यक्त्या व्यावृत्ततया बोधिता जातिरेव पदार्थो लाघवात्, न तु वैपरीत्यमुभयं वा

ननु स्वतो व्यावृत्तायां जातोविशेषणं व्यक्तिरवश्यवाच्या। व्यक्तिविशिष्टज्ञानाभावे निर्विकल्पकविषयधीभूतायां शक्त्यग्रहान्निर्विकल्पकस्य व्यवहारनङ्गत्वात् । तथा च नागृहीतविशेषणान्यायस्तुल्य इत्यत आह -- **अस्तु वेति**।

गौरवात्, कुतस्तर्हि व्यक्तिधीः, जातिशक्तादेव कथमन्यशक्तादन्यधीः, स्वभावात्, तत्स्वभावत्वमेव व्यक्तिशक्तिं विना न निर्व्वहतीति चेत्, न। गोपदं हि नियमतो जातिव्यक्ती बोधयति तत्रास्य जातिशक्तिधीरेव सहकारिणी कल्प्यते लाघवादावश्यकत्वाच्च, न तु व्यक्तिशक्तिधीरपि गौरवात्। जातिशक्तिज्ञाने सति तां विना व्यक्तिबोधे विलम्बाभावात् यथा तव पदार्थशक्तादेवान्वयधीः।

यद्वा जातिशक्तमेव पदं व्यक्तिं बोधयति अशक्यत्वेऽपि जात्याश्रयत्वमेव नियमाकं यथा अशक्यमपि स्वार्थान्वयं बोधयति। तत्र प्रयोजकत्वेन क्लृप्ता शक्तिरेवास्तु जात्याश्रयत्वस्य तथात्वकल्पने गौरवादिति चेत्, न। अन्यलभ्यस्यापदार्थत्वादन्यथा अन्वयोऽपि शक्यः स्यात् लक्षणाद्युच्छेदश्च।

अथ वा जातिशक्तिज्ञानाज्जातिधीर्भवन्तो व्यक्तिमपि गोचरयति। व्यक्तिं विना जातेरभावात्, यो येन विना न भासते तद्बीहेतुस्मवबोधयति, यथा ज्ञानधीहेतुस्तद्विषयं, अन्यथा पदं जातिमपि न बोधयेत् केवलाया अप्रतीतेः, तथा च जातिशक्तिकल्पनावैयर्थ्यं तस्मात् जातिज्ञानार्थं क्लृप्ता शक्तिर्व्यक्तिमपि बोधयति एकवित्तिवेद्यत्वनियमात्।

व्यावृत्तया - विशेष्यतया । यद्वा स्वत एव व्यावृत्ततया । व्यक्तिविशेषणतयाप्युपस्थितेत्यर्थः।

लाघवादिति । तथा च न्यायसाम्येपीदमेव विनिगमकमिति भावः।

नियमत इति। जातिशक्तिज्ञानत्वं हेतुतावच्छेदकं, जातिविशिष्टज्ञानत्वं कार्यतावच्छेदकमित्याद्यः कल्पः।

यद्वेति। द्वितीयकल्पे जातिशक्तिपदं जातिं व्यक्तिं च बोधयति। तत्र जातिबोधे जातिशक्तिधीः, व्यक्तिबोधे स्वरूपसच्छक्यजात्याश्रयत्वं सहकारीति।

अथ वेति। तृतीयकल्पे जातिशक्तिज्ञानत्वं जातिबोधे कारणतावच्छेदकं, व्यक्तिबोधस्तु सामग्रीमहिम्ना। जातिबोधकस्य व्यक्तिबोधकत्वनियमादिति ।

अधिकरणेऽति। पक्षधर्मताबललभ्यो विशेष इत्यर्थः।

एतेनैकवित्तिवेद्यतैव व्यक्तिशक्तिं विना न स्यात् ज्ञापकाभावात्। न हि व्यक्तिज्ञानमहेतुकं जातिहेतुकं वा, सदातनत्वप्रसङ्गात्। नापि जातिधीहेतुकं, संविद्भेदापत्तेरिति निरस्तम्। जातिशक्तेरेव व्यक्तिज्ञापकत्वात्।

ननु जातिं विना प्रत्यक्षादिना व्यक्तिज्ञानादन्यैव व्यक्तिधीसामग्री जातिविशिष्टज्ञानच्चोभय-ज्ञापकसामग्रीद्वयसमाजादार्थम्। अत एव व्यक्तिं विना जातेरस्मारणेन जातिस्मरणस्य व्यक्तिविषयत्वनियमात् जातिज्ञापकमात्रमेव व्यक्तिज्ञापकं कल्प्यते सामान्यकल्पनायां बाधकाभावादिति परास्तम्। जातिं विनापि व्यक्तिस्मरणात्तत्रान्यैव सामग्री जातिविशिष्टस्मरणञ्चोभयांशस्मारकसाजादिति।

अत्र ब्रूमः। जाति-व्यक्तिप्रत्यक्षादिबोधे तथैव सामग्रीद्वयस्य पृथगन्वय-व्यतिरेकग्रहाच्छाब्दे तु व्यक्तिबोधे जातिशक्तिज्ञानमेवहेतुर्लाघवात् न सामग्र्यन्तरं, तत्सत्त्वे तेन विना विलम्बाभावात्। एवञ्च जातिशक्तत्वेन ज्ञातं पदं जातिविशिष्टस्य स्मारकमनुभावकञ्च।

ननु ज्ञाने शक्तिः शक्यत्वात् तथा च यस्य ज्ञाने शक्तिस्तच्छक्यं जाति-व्यक्तिज्ञाने च शक्तिरिति जातिवद्व्यक्तिरपि शक्येति चेत्, न, यद्विषयतया हि ज्ञाता ज्ञाने शक्तिरुपयुज्यते तत् शक्तिज्ञाने विषयतया शक्यतावच्छेदकं शक्यं जातिज्ञानञ्च तथेति जातिरेव शक्या न तु व्यक्तिज्ञानत्वमप्यवच्छेदकं गौरवात्।

जातिं विनेति। ज्ञापकसत्त्वे जातिज्ञानापत्तेस्तत्र जातिज्ञापकं विनैव व्यक्तिज्ञानमित्यर्थः।

पृथगिति । संयोग-समवायादेः व्यक्तिग्राहकस्य संयुक्तसमवायदेर्जातिग्राहकस्य प्रत्येकं पृथगन्वयव्यतिरेक (४४८ख) ग्रह इत्यर्थः। नाद्यव्यक्तिग्रहे पृथक्जातिज्ञानस्य व्यक्तिव्यभिचाराभावादिति ।

शब्दे त्विति। नन्वेवं पूर्वकल्पात् विशेषः - शब्दस्य व्यक्तिज्ञाने जातिशक्तिज्ञानहेतुत्वेऽपि पर्यवसनादिति, मैवम् । स्मरेण हेतुसंस्काराद्विजातिज्ञापकं सामग्र्या व्यक्तिज्ञापकत्वकल्पनादिति सामान्यविशेषभावेन काव्यभेदोपपत्तेरिति। जातिज्ञानं जातिज्ञानत्वम्। तथावच्छेदकज्ञातवान्नास्तीति स्वविषयकज्ञातशक्तीत्यर्थः।

न च शक्यज्ञाने नियतविषयत्वमेव शक्यत्वं व्यवहारानुमितशक्यानुभवविषयाणामन्वये तत्सम्बन्धिमिति-मातृणामपि शक्यतापत्तेः, एवञ्च जाति-व्यक्तिज्ञानजनकत्वादुभयत्रापि शब्दशक्तिः। जात्यंशे सा ज्ञाता व्यक्त्यंशे स्वरूपसती हेतुर्लाघवादिति कुञ्जशक्तिवादः।

एवञ्च सैव तदैव तेनैव ज्ञाता अज्ञाता च वाचिका अवाचिकावेत्यत्र जातिव्यक्त्यवच्छेदकभेदेनाविरोधः, त्वयाप्यन्वये कुञ्जशक्तिस्वीकारात्। व्यक्तेः शक्यत्वेऽपि ज्ञातशक्तिशब्दजनितज्ञानविषयत्वलक्षणं वाच्यत्वं नास्ति। न चैवं परिभाषा, शब्दजन्यज्ञानविषयत्वेन वाच्यत्वे लाक्षणिकादेरपि वाच्यत्वापत्तेः, व्यक्तेः शक्यत्वेऽपि व्यक्तिशक्तिज्ञानं न कारणं व्यक्तिशक्तिज्ञात्वं नावच्छेदकमिति लाघवम्।

यत्तु तच्छक्तत्वेन ज्ञातादेव तदर्थबोधः शक्तिभ्रमादपि धीदर्शनात्। तथा योग्यताद्यन्वयानुपपत्ती विना पदादुपस्थितिः शक्तिसाध्येति व्यक्तिरपि शक्येति। तन्न। अन्यलभ्ये शक्तेरकल्पनात्, अन्यथा तवान्वयेऽपि शक्तिर्लक्षणाद्युच्छेदश्च।

ननु न जातिरर्थः व्यवहाराभावेन व्युत्पत्तेरसिद्धेः, कारकोपरक्तक्रिया हि व्यवहारगोचरः, जातिश्च न क्रिया नित्यत्वात्, कारकं न कर्त्रादि क्रियायास्तच्चात्रासमवायात् परसमवेतक्रियाफलभागित्वाभावात् कर्तृव्यापारानाश्रयत्वात् अचेतनत्वात् तया सह विभागाभावात् क्रियानाधारत्वाच्चेति चेत्, न। व्यक्तिव्यहारादेव उक्तन्यायेन जातौ शक्तिग्रहात्, जातिसविकल्पकाद्यव्यावृत्ततया ज्ञातायां व्यक्तौ क्रियान्वयः, सविकल्पकञ्चालोचनद्वारा जातिजन्यमिति परम्परया जातेरपि कारकत्वेनान्वयः।

यद्वा न केवलव्यक्तेः कारकत्वं, न हि गौर्गच्छतीत्यत्र व्यक्तिमात्रं यातीति कस्यचित्प्रतीतिः, किन्तु जातिविशिष्टायाः, तथा चोभयमपि कारकम्।

अन्वये व्यभिचारवारणाय -- **योग्यतादीति** । लक्ष्ये व्यभिचारवारणायानुपपत्तीत्यर्थः।

अन्यथेति । अन्यलक्ष्येति शक्तौ विशेषणद्वयेत्यक्तपादोपस्थितिरित्येवार्थः । सत्यपि न कर्त्रादित्यत्र प्रत्येकं हेतूनाह -- **क्रियाया** इति। वैय्याकरणमतेनान्यथाकृतेरिति ध्येयम्।

श्रीकरस्तु केवलजाति-व्यक्त्योरकारकत्वात् क्रियान्वयोव्यक्तेराश्रयतया जातेरवच्छेदकतया आरुण्यादिवत्, एवञ्च जातिशक्तपदात् जातेरनुभवः शाब्दो व्यक्तेरौपादानिकः अशक्यत्वादिति।

अन्ये तु जातिशक्तमेव पदं जाति-व्यक्त्योः स्मारकमनुभावकञ्चेति व्यक्तेरपि शाब्दत्वम्। न च वृत्तिं विनाऽन्वयानुभवेऽप्रवेशान्न व्यक्तेः शाब्दत्वं, वृत्तिं विनापि एकवित्तिविद्यत्वनियमेन जातिशक्तादेव व्यक्तेरनुभवात्, अन्यथा जात्यन्वयोऽपि न स्यात् व्यक्तिं विना जातेरननुभवात्। अत एव जातिशक्तिरेव व्यक्तिं बोधयतीति गुरवः।

किञ्च शक्त्योपस्थापितस्यान्वयानुभवं प्रति पदानां कारणत्वं अतो जातिवदुपस्थापिताया व्यक्तेरनुभवः पदात्, न तु तत्तच्छक्त्योपस्थापितस्य गौरवात्। न चैवमशक्यपरत्वे लक्षणा, यथा ह्यन्यत एव ज्ञानान्न शक्तिस्तथा लक्षणापि न तत् किमशक्येऽपि मुख्यः प्रयोगः, सत्यं, शक्त्या साक्षादुपस्थित एव तस्य मुख्यत्वात्स्वशक्त्येति त्वधिकम्।

वस्तुतस्तु जातिशक्तादेव व्यक्तिधीसम्भवान्न व्यक्तौ शक्तिः। यदि च ततो न तङ्वीस्तदा तत्र शक्तिरेव स्यात्, अन्यथा तद्दीर्न स्यादेव। ननु पद - जातिभ्यामप्येको जाति - व्यक्त्यनुभवः क्रियते, तत्र जात्यंशे पदस्य व्यक्त्यंशे जातेरनुभावकत्वमयमेव उपादानार्थ इति चेत्, तर्हि जातेः कारणत्वापेक्षया शक्तिज्ञाने उपस्थितव्यक्तेरवच्छेदकत्वमात्रकल्पनैव लघीयसी जातेः प्रमाणान्तरत्वापातश्च।

अत एव व्रीहीनवहन्तीत्यत्र व्यक्तौ न लक्षणा तत्साध्योपस्थितेर्जातिशक्तित एव सिद्धेः। अस्तु वा गवावच्छेदकत्वेनारुम्यादिवद्व्रीहित्वेऽप्यवघातान्वय इति।

अत्रोच्यते -- गोत्वज्ञाने गोज्ञाने वा शक्तं पदमित्याकारः शक्तिग्रहः तथा च शक्यज्ञाने विषयतया जातेरवच्छेदकत्वं व्यक्तिमादायैव प्रतीयते न केवलायाः व्यक्तिं विना जातेरप्रतीतेः।

श्रीकरत्विति । औपदानिक इत्येतावतैव पूर्वकल्पे भेदोऽवच्छेदकतया पूर्वकल्पेऽपि सत्त्वादिति। अन्ये त्वित्यनेन श्रीकरकल्पात् भेदयितुं पूर्वेक्त एवानुदितः। अन्यथा पूर्वनिर्विशेषत्वेन पौनरुक्त्यात्पत्तिरिति ध्येयम्।

गोत्वेति । गोत्वज्ञानत्वमवच्छेदकम्, न तु विशिष्टविषयत्वम्। अतः स्वविषयज्ञात शक्तिशब्दजन्यज्ञानविषयत्वं शक्यत्वम्। न व्यक्ताविति युक्ता।

तथा च जातेरवच्छेदकत्वेनागृहीतविशेषणान्यायेन व्यक्तेरवच्छेदकत्वं वज्जलेपायितमिति शक्तिज्ञाने विषयतया अवच्छेदकत्वात् जातिवत्सापि शक्या। तस्मात् परिहरैकवित्तिवेद्यत्वनियमं स्वीकुरु वा व्यक्तेर्व्याच्यत्वम्।

अपि च यद्धर्म्मवत्तया ज्ञात एव यत्र यस्य ज्ञानं स तत्रावच्छेदकः व्यक्तिज्ञानत्वेन ज्ञात एव तत्र ज्ञाने शक्तिधीरिति व्यक्तिरपि शक्या।

नन्वाद्यवुत्पत्तौ मिति-मातृविषयत्वेन ज्ञात एव ज्ञाने प्रवर्त्तकत्वं ज्ञातम्। न च तयोर्ज्ञानं प्रवर्त्तकमतो व्यभिचारः, अन्यथा प्रवर्त्तकत्वेन मिति-मातृज्ञानमपि प्रयोज्यस्यानुमाय बालस्तत्रापि शक्तिं गृह्णीयात्, एव तवापि कार्य्यान्वितज्ञान एव शक्तिः स्यात् तत्त्वेन ज्ञात एव ज्ञाने शक्तिग्रहादिति चेत्, मिति-मातृज्ञानत्वं कार्य्यान्वतज्ञानत्वञ्च विनापि प्रवर्त्तकज्ञाने घटज्ञानत्वादिकं ज्ञातुं शक्यमिति तयोर्नावच्छेदकत्वं। किन्तु घटज्ञानत्वादिकमेव लाघवात् तयोरपि ततएव प्राप्तेश्च।

किञ्च पदं व्यक्तिज्ञानार्थं शक्यज्ञाने विषयतया व्यक्तेरवच्छेदकत्वमात्रं कल्पयति लाघवात् जातिविषयत्ववद्व्यक्तिविषयत्वस्य ज्ञानवित्तिवेद्यत्वेनावश्यं शीघ्रोपस्थितत्वात्, न तु जातिशक्तिस्तद्बोधे कारणान्तरं वा तदवच्छेदकं गौरवाच्छक्तिग्रहकाले कल्पनीयोपस्थितिकत्वाच्च।

तत्रेदमुच्यते -- गोत्वज्ञानत्वेऽवच्छेदके विशिष्टविषयत्वमेवावच्छेदकं निर्विशेषणस्य (४४९क) भूतस्यानुपस्थितेः। उपस्थितौ न समानसंवित्सवर्धित्वम्। तथा च व्यक्तिभानार्थमेव शक्तिरित्युभयथाप्युक्तरूपशक्यत्वं व्यक्ताविति्यर्थः।

ननु विशिष्टमेव गोत्वं ज्ञानविषयत्वेनोपस्थितम्, तत्र अवच्छेदकविशेषणीभूतां व्यक्तिं विहाय विशेष्यभूतजातावेव लाघवादित्यस्वरासादाह -- **अपि चेति** ।

ननु स्वज्ञानस्य प्रवृत्तिं प्रति कारणत्वग्रहे अनुमितिमात्रविषयतया ज्ञात एव ज्ञाने प्रवृत्तिहेतुताग्रहः स्वज्ञानग्रहस्य तद्विषयाताग्रहनियतत्वादित्यारुचेराह -- **किं चेति** ।

अन्ये तु प्रथमं व्यवहारानुमितव्यक्तिज्ञाने शब्दानुविधानात् पदं शक्तमित्यवधारयति न तु जातिज्ञाने, व्यवहाराजनकत्वेन तदा तस्यानुपस्थितेः, पश्चाद्व्यक्तेर्वयावृत्त्यर्थं अनुगमार्थञ्च जातिरपि तद्विषय इति मानान्तरेण ज्ञात्वा जातिज्ञानेऽपि तत्पदस्य कारणतां प्रत्येति। तथा च व्यक्तिशक्तिज्ञानमपि कारणं न तु जातिशक्तिज्ञानेनान्यथासिद्धिः व्यक्तिज्ञानकारणतां उपजीव्य जातिज्ञाने कारणताग्रह इत्युपजीव्यविरोधात्।

एतेन जातिरेव शक्या लाघवात् शक्तिग्रहजन्यसंस्कारस्य व्यक्तिविषयत्वनियमेन पदात् जातिस्मरणमुत्पाद्यमानमवश्यं व्यक्तिविषयं, संस्कारस्यानियतोद्बोधकत्वेऽपि जात्यंशोद्बोधकादेव व्यक्त्यंशोद्बोधनियमकल्पना, यथा पदेनोद्बुद्धसंस्कारादेव नियता शक्तिस्मृतिः पदं विनापि च सर्व्वा जातिस्मृतिर्व्यक्तिविषया, अन्यथा केवलजातिमात्रस्मरणापत्तेः, संस्कारसहितात् पदादेव जातिविशिष्टानुभवोऽपीन्द्रियादिव प्रत्यभिज्ञा।

अत एव भाष्यम् -- 'संस्कार-शब्दशक्तिभ्यां विशिष्टानुभव इत्युन्नीतमतमपास्तं', उक्तन्यायैर्जातिवद्व्यक्तेरपि शक्यत्वात् विशिष्टानामानन्त्येऽपि एकत्र विशिष्टे तत्त्वं विहाय गोत्वमादाय गोत्वविशिष्टं शक्यमिति शक्तिग्रहः, यथा च क्वचिदेव धूमे धूमो वन्हिव्याप्य इति बुद्धिः, यथा वा तवैव कार्य्याणामानन्त्येऽपि क्वचित् कार्य्ये तत्त्वं तटस्थीकृत्य कृतिमादाय धर्म्मिणि कार्य्यं शक्यमिति लिङादेरपूर्व्वे शक्तिग्रहः। अवच्छेदकैक्याच्छक्तेरेकत्वं तद्वदेव। यथा वा व्यक्तिवाचकपश्वादिपदानाम् । अथ वा गोत्वेन सामान्यलक्षणया ज्ञाते सर्व्वत्र गवि गोत्वमादाय शक्तिग्रहः, प्रमेयत्वेन च सर्व्वज्ञाने सार्व्वज्ञामिष्यत एव।

अन्ये त्विति अस्वरसोङ्गवनम्, तद्बीजं तु व्यक्तिज्ञानकारणत्वग्रह उपजीव्यो न व्यक्तिज्ञानत्वेन कारणत्वग्रहेऽपि । तथा च जातिज्ञानत्वेन कारणत्वग्रहेऽपि नोपजीव्यविरोधः तेन रूपेणापि व्यक्तिज्ञानहेतुत्वरक्षणादिति।

वयं तु -- न जातिरेव पदार्थः, जातिविशिष्टव्यक्तिज्ञानानुपपत्तेः। न च समानवित्तिवेद्यतया व्यक्तिलाभः, वैशिष्ट्येन सह तथात्वाभावात्। अन्यथा निर्विकल्पकोच्छेदापत्तेः। तथा च नियमते जातिविशिष्टव्यक्तिभानात् विशिष्टे शक्तिः। अन्यथा समूहालम्बनरूपनिर्विकल्पकापत्तेरिति ब्रूमः।

पश्चादिति । इदं च तन्मतेन पशुत्वतज्जातिरुच्चैश्रवः, शरीरादिवृत्तित्वाद्योग्यसंस्थानव्यङ्ग्यनियमात् जातेः। अस्माकं तु पशुत्वजातिरेवाश्वत्वादिव्यापका (४४९ख) लोमवल्लाङ्गूलव्यग्येति ध्येयम् ।

नेष्यते तु घटत्वादिसर्व्वप्रकारकज्ञानवत्त्वेन, सर्व्वैकोदासीनगोः शक्यत्वाद् यत्किञ्चिदेकोपादानेऽपि गोरुपादानादन्योपादानाशक्यत्वं एकोपादानेऽनध्यवसायो वा। अन्यथा तवाप्येकवित्तिवेद्यतया सर्व्वैकपरत्वं उक्तदोषे का गतिः, का वा गतिर्व्यक्तिवाचकपश्वादिपदानाम्।

भट्टमते तु जातिरेव शक्या लाघवात् व्यक्तिस्त्वाक्षेपलभ्या।

ननु नाक्षेप एकवित्तिवेद्यत्वात्तयोः, समानानां हि भावः सामान्यं, तच्च व्यक्तिं विना न भासते इति चेत्, न। स्वरूपेण शक्या जातिः।

न च सामान्यत्वं तस्याः स्वरूपम्, तद्धर्म्मत्वात्, अन्यथा आलोचनेऽपि सा न भासेत। कथं सामान्यत्वेनाप्रतीता जातिर्व्यक्तितीभिन्नतया शब्देनाभिधातव्येति चेत्, न। शब्देन व्यक्तितो भिन्नतया जातेरबोधनात्।

ननु व्यावृत्ता जातिर्व्याच्या व्यावृत्तबुद्धिं विना व्यक्तिविशेषानाक्षेपात् व्यावर्त्तिका च तत्र व्यक्तिरेव अनुगतत्वमप्यनुगम्यमानं विना न भासत इति जातिवित्तिवेद्यैव व्यक्तिरिति चेत्,न। स्वतोव्यावृत्तजातिस्वरूपस्य वाच्यत्वात्। व्यक्तेर्धर्म्मान्तरस्य वा व्यावर्त्तकत्वेऽन्योन्याश्रयोऽनवस्था वा। ननु गौरिति पदात् जाति-व्यक्त्योर्युगपत्प्रतीतिः।

न च सूक्ष्मकालभेदाग्रहात् सा भ्रान्ता, बाधकाभावात्, तथा च गोपदाद्गोत्वधीस्ततः क्रमेण व्याप्ति-पक्षधर्म्मताज्ञानं ततो व्यक्त्यनुमितिरिति ज्ञानपरम्पराकल्पनाद्वरं जातिवित्तिवेद्यत्वं व्यक्तेरिति चेत्, न। व्युत्पत्त्यधीनं हि शब्दस्य बोधकत्वं। अतो व्युत्पत्तिपर्य्यालोचनया युगपज्ज्ञानमसिद्धम्। अत एव ज्ञानपरम्पराकल्पनमपि युक्तं, अन्यथा कर्त्तुरप्याक्षेपो न स्यात् शब्दात् सकर्तृकाया एव क्रियाया अवगमात्।

न च जातिज्ञानत्वेन व्यक्तिविषयतानियमः, प्रत्यक्षादौ तस्य व्यक्तिधीहेतुसमाजाधीनत्वात्।

नेष्यत्ते त्विति । सर्वशब्दात् सर्वज्ञानात् त्वयाप्येवं मन्यमानत्वादिति भावः।

जातित्वादिति । न शबलात्वादौ व्यभिचारं बाल्यकौमारादिना मन्मते शरीरभेदाभावेन तज्जातित्वासिद्धेरिति भावः ।

अत एव न जातिधीहेतौ व्यक्तिधीहेतुसहकारितानियमः समाजस्यार्थसिद्धत्वात् गोत्वं गवा विषयप्रतीतिविषयः जातित्वात् गोभिन्नाभावत्वाद्वेति जातिमात्रधीसिद्धेश्च।

अथ यत् यत्परतन्त्रं तत् तेनैकवित्तिवेद्यं यथार्थपरतन्त्रं ज्ञानमर्थेन जातिश्च परन्त्रेति व्यक्तौ भासमानायामेव भासत इति चेत्, न। परतन्त्रत्वं हि न परसमवेतत्वं गन्धादिना व्यभिचारात्, न तद्धी निरूप्यत्वं, असिद्धेः, नापि तस्मिन् भासमान एव भासमानत्वं साध्याविशेषात्, नापि विशेषणत्वेनैव ज्ञानं गौरित्येव प्रतीतेः।

गवि गोत्वमिति कश्चित् प्रत्येतीति चेत्, न। आलोचने विशेषणत्वं विनापि स्वरूपतः प्रतीतेः जातिमात्रशक्तात् पदात् जातेः स्मरणमालोचनमेव जातिविशिष्टगोचरसंस्कारादेव पदेन जात्यंशोद्बोधे सति जातिमात्रस्मरणात्।

नित्यत्वे सति समवेतत्वस्यैव सार्थकत्वे व्यर्थविशेषणत्वमित्यरुचेराह -- **गोभिन्नेति** । भावत्वं गोनिरूपणानधीननिरूपणत्वम्, गवाभावात्। गोसादृश्यादावपि व्यभिचारित्वं च गव्ये व्यभिचारादिति गोभिन्नत्वविशेषणमिति भावः।

विशेषणत्वेनैवेति । यत्प्रतीयमानं यद्विशेषणत्वेनैव भासते विशेष्यसमानवित्तिवेद्यमिति नेत्यर्थः।

गौरिति । तथा च न व्यक्तिवित्तिवेद्या जातिरिति भावः।

गवीति । गवि गोत्वं इत्येव प्रतीतिरिति कश्चित्। परो विशेषणत्वेनैवेति यदि प्रत्येति स्वीकारेति तेन गौरित्येव प्रतीतिरिति परमप्रतिसिद्धम् । तेन गवि गोत्वमित्येव प्रतीयत इति स्वीकारादिति भावः।

आलोचन इति। गवि गोत्वमित्येव प्रत्यय इति तेनापि स्वीकरणीयम्, विशेषणज्ञानं विना विशिष्टज्ञानानुदयादित्यालोचने नियमभङ्गस्य ध्रुवत्वादिति भावः।

ननु विशिष्टज्ञानस्यैव संस्कारजनकत्वात् तेन समानप्रकारकस्मरणजननात् जातिमात्रस्मरणमसिद्धम् (४५०क) एव, शाब्दानुभवोऽपि तथा नेत्यत आह -- **जातीति**। संस्कारसत्त्वे उद्बोधकविलम्बेन व्यक्त्यंशस्मरणाभावादिति भावः।

अत एव ततो जातिं विनापि कदाचित् व्यक्तिस्मृतिः।

अस्तु वा गुरोरिवालोचनमपि संस्कारजनकं शब्दव्युत्पत्तिबलेन जातिमात्रस्मरणसिद्धेः।

न च स्मरणस्य विशिष्टज्ञानत्वमेव, अनुभवस्यापि तथात्वेन निर्व्विकल्पकासिद्धिप्रसङ्गात् एकवित्तिवेद्यत्वेऽपि प्रथमदर्शनवत् शब्दाद् गोत्वस्मरणमालोचनमेव गोत्वे गोव्यक्तिवृत्तित्वादि-वैशिष्ट्यस्याशक्यत्वेन तदविषयत्वात्।

न चालोचनस्येन्द्रियजन्यत्वात् न स्मृतित्वं, ज्ञानत्साक्षाद्व्याप्यधर्म्मत्वेन स्मृतित्वस्या-लोचनवृत्तित्वात्।

नन्वाक्षेपाद्व्यक्तिधीर्न व्यक्तित्वेन न वा रूपान्तरेण गौरित्येव प्रतीतेः नापि गोत्वेन गोत्वस्य गोत्वविशिष्टभेदेनाक्षेपाभावादिति चेत्, न, विशेषण-विशेष्ययोर्भेदेनानुमानाविरोधात्।

अत एव गोत्वं व्यक्त्याश्रितं जातित्वादिति पक्षधर्म्मताबलात् गोत्वाश्रयव्यक्तिसिद्धिः, अर्थापत्तेर्व्वा तत्सिद्धिः।

नन्वेकदेशोद्बोधकादेव वा परांशास्मृतिरन्यथा सदृशदर्शनादिना धर्मिस्मरणेऽपि तद्धर्मास्मरणापत्तेः। अत एवेत्यादिकमसिद्धमेव। न हि जातिविशिष्टानुभवे तदापि व्यक्तिमात्रस्मृतिरित्यरुचेराह -- **अस्तु वेति**।

विशेषणेति । गोत्वं गवाश्रितं गोत्वादित्यत्र गोत्वत्वे गवाश्रितत्वप्रवेशेऽपि विशिष्टाविशिष्टभेदादित्यर्थः। अत एव - विशिष्टभेदादेव ।

जातित्वादिति । अत्रानेकव्यक्तिवृत्तित्वगर्भतया जातित्वसाध्यप्रवेशेऽपि विशिष्टस्य हेतुत्वादित्यर्थः।

ननु द्वयमप्यनुपपन्नम्, प्रथमे पक्षतावच्छेदकस्य हेतुत्वम्। यच्च विशिष्टाविशिष्टभेदेन समाधानं तदविशिष्टेन हेतुना विशिष्टसाध्यसिद्धौ संभवति । विशिष्टस्यासिद्धत्वेन सिद्धसाधनायाभावात् । न त्वविशिष्टहेतौ सिद्धसाधनादित्यरुचेराह -- **अर्थापत्तेरिति** ।

गां विना गोत्वमनुपपन्नमित्यर्थापत्या गोत्वविशिष्टसिद्धः तन्मतेऽनुपपत्तिज्ञानमात्रमपेक्षित-व्याप्त्यादिकमपि व्यधिकरणास्यैव जीवग्रहाभावस्य बहिःसत्वं विनानुपपत्तिज्ञानेन बहिःसत्वसिद्धेरिति भावः।

ननु व्यक्त्या विना किमनुपपन्नं व्यक्तिं विनापि गोत्वस्य तद्बुधेश्च सिद्धेः कथमर्थापत्तिरिति चेत्, न। व्यापकं विना व्याप्यस्यासिद्धेः।

उच्यते। गामानयेत्यतो गोत्वविशिष्टस्य क्रियान्वयबोधाद्गौरित्याकारकगोविशेष्यकबुद्धिः कारणं सा च न शब्दं विना आक्षेपाद्व्यक्त्याश्रितं गोत्वमिति धीर्न तु गौरिति। न चैवं व्यक्तेः क्रियान्वयोऽपि, गोत्वाश्रिततया निराकङ्क्षत्वात् राजपुरुषमानयेत्यत्रेव राज्ञः, अन्वये वा व्यक्तिमानयेति धीः स्यात् न तु गामिति।

किञ्च गोत्वं न व्यक्तिव्याप्यं, न हि यत्र यदा वा गोत्वं तत्र तदा व्यक्तिर्यत् सामान्यं सा व्यक्तिरिति वा नियमः, व्यभिचारात्। नापि गोत्वं गवाश्रितं गोत्वादित्यनुमितिः, व्याप्तिग्रहशरीरत्वात्।

न च जातित्वं व्यक्त्याश्रितत्वे लिङ्गं, जातित्वस्य पदादनुपस्थितेः, तथात्वे वा जातिवित्तिवेद्यैव व्यक्तिः।

अपि च लिङ्गं व्याप्यमनुपपन्नं स्वाश्रये व्यापकमुपपादकञ्च बोधयति। न चेह गोत्वाश्रये व्यक्तिबुद्धिः।

व्यापकमिति । व्याप्तिरवश्यंभावः तथा (४५०ख) च व्याप्तिकां व्यक्तिं विना व्याप्ये गोत्वान्वयोऽनुपपन्न इत्यर्थः । यद्गोत्वं सा गौरिति यत्र गोत्वतादात्म्यं तत्र गोतादात्म्यमिति सम्बन्धसामानाधिकरण्यस्य व्याप्तित्वादिति भावः।

व्याप्तीति । पक्षतावच्छेदकस्यैव हेतुत्वादिति भावः।

ननु सा च न शब्दं विनेत्यनुपपन्नम्, गां विना गोत्वमनुपपन्नमिति ज्ञानात् गोत्वविशिष्टस्यैव सिद्धेऽत एव व्यक्त्याश्रितं गोत्वमित्यनुक्तोपलम्भः। गोत्वं न व्यक्तिव्याप्यमित्यपि न व्याप्तिनैरपक्ष्येणार्थापत्त्यवतारात्। गोत्वं गवाश्रितमित्यपि तथा जातित्वेनाक्षेपस्तु प्रसक्त एव। शब्दात् जातित्वानुपस्थितेरनुपस्थितस्तु, गोत्वत्वेऽपि परं तु विशिष्टोपस्थित एव प्रकारः प्रसज्यते जातित्वेन।

वयन्तु ब्रूमः, व्यक्तेरपदार्थतवे विभक्त्यर्थसङ्ख्या-कर्म्मत्वादेर्व्यक्तावनन्वयः स्यात्। सुविभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् प्रकृतितात्पर्य्यविषये तदन्वयव्युत्पत्तौ लक्षणोच्छेदो गौरवञ्च। आख्यातार्थसङ्ख्यापि नानुमितेनान्वेति, किन्तु भावनान्वयिना शुद्धेन प्रथमान्तादुपस्थितेन पदान्तरादुपस्थितिरेव तत्राक्षेपार्थः। अत एव न व्यक्तेराक्षेपः किन्तु लक्षणया गोपदाद्गौरिति व्यक्तिधीरिति मण्डनः। यदाह -- 'जातावस्तित्व-नास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे' इति।

उच्यते। स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा, तीरत्वेन ज्ञाते गङ्गापदस्येव। न चेह गोत्वादन्येन रूपेण व्यक्तेरुपस्थितिः, किन्तु गोत्वेनैव, व्यक्तित्वेन सास्नादिमत्त्वेन चोपलक्ष्यत्वे गोपदाद्व्यक्तित्वादिरूपेण धीः स्यान्न तु गौरिति। नापि गोत्वसम्बन्धिनि गोत्वविशिष्टे लक्षणा, गोत्वे हि न साक्षादानयनाद्यन्वय इति व्यक्त्यवच्छेदकतया तस्यान्वयेऽमुख्यत्वम्। लक्षणयापि गोत्वावच्छिन्नैव व्यक्तिः क्रियान्वयिनी प्रतीयते न केवला व्यक्तिरिति गोत्वविशिष्टस्य लक्ष्यत्वे युगपद्वृत्तिद्वयविरोधः, गोत्वेऽपि वा लक्षणा।

अपि च जातिमात्रे न शक्तिर्न वा व्यक्तौ लक्षणा जातौ मुख्यप्रयोगाभावात्, तयोस्तन्मूलकतवात्, प्रयोगो हि व्यवहारहेतुज्ञानार्थः। न च जातिमात्रनिर्व्विकल्पकाद्व्यक्तिमनादाय केवलजातौ व्यवहारः, तस्य विशिष्टज्ञानसाध्यत्वात्।

अपि चेत्यादि यदुक्तं तदपि अनुमानस्य त्यागादर्थापत्तौ तथानियमस्य तन्मते अभावादित्यस्वरसादाह -- **ये त्विति** ।

सुब्विभक्तानामिति। लिङर्थसंख्यायाः प्रकृत्यर्थानन्वयाविशेषनियमः। सोऽपि पाचकपश्वादिपदे व्यक्तिवाचके उपस्थित इति भावः।

इदमुपलक्षणम् -- शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यत इत्यपि व्युत्पत्तेश्चेति। हेतुर्द्रष्टव्यात एव तस्य व्यभिचारमाशङ्क्योद्धरति -- **आख्यातसंख्यापीत्यादि**।

ननु विशिष्टलक्षणावादे शक्योपस्थिति लक्षणयैवेति गोत्वेऽपि लक्षणायामिष्टापत्तिरित्यभिव्याह -- **अपि चेति** ।

गां पश्य गौरस्तीत्यादावपि गोत्वविशिष्टस्यैव ज्ञानं व्यवहाराश्च। तस्मादेकवित्तिवेद्यत्वनियमात् जातिविशिष्टं शक्यम्। यदि च तृतीयायाः करणैकत्व इति गो-गोत्वे शक्ये तदा गोत्वं गोव्यक्तिश्चेति धीः स्यात्। न तु गौरिति। वैशिष्ट्यञ्च सम्बन्धो वा ज्ञातो घट इत्यत्रैव विशेषणताविशिषोऽर्थान्तरं वेत्यन्यदेतत्। जातिविशेषवदवयवसंयोगरूपाकृतिरपि पदशक्या गोपदात् जात्याकृतिविशिष्टस्यैवानुभावात्, पिष्टकमय्यो गाव इत्यादौ गवाकृतिसदृशाकृतौ लक्षणा पिष्टकसंयोगविशेषस्याशक्यत्वात्। जात्याकृति-व्यक्तीनां प्रत्येकमात्रपरत्वे लक्षणैव प्रत्येकस्य जात्याकृतिविशिष्टादन्यत्वात्, यथा गुरूणां कार्य्यशक्ताया लिङो लोके कार्य्यत्वपरत्वे।

अत एव व्यक्त्याकृतिजातयस्तु पदार्थ इति पारमर्षसूत्रं, एकयैव शक्त्या एकवित्तिवेद्यत्वसूचनाय पदार्थ इत्येकवचनम्।

मुख्यान्वयानुपपत्या लक्षणा, तथा यत्र न सा तत्रापि व्यक्तिधीरिति सापि शक्येत्याह -- **गां पश्येति** ।

जातिविशेषेति । जातिविशेषवानवयवसंयोग इत्यर्थः।

नन्वन्यतरकर्मजत्वादिव्याप्याया नानाजातेः कथमनुगमकं विना पदोपस्थितिः, मैवम्। अनुभवासिद्धतत्तज्ज्ञातिव्यञ्जकतत्तत्स्थानवैजात्यवाप्यनानान्यतरकर्मजत्वजातिस्वीकारान्न तु वैपरीत्यम्। तत्तज्ज्ञातावनुगतप्रत्ययाभावादन्यतरकर्मजत्वेनोपाधिना तत्रानुगतबुद्धिसंभवात्। अत एव कत्वगत्वेन नाना । किं तु तत्तव्द्याप्यतारत्वमेव।

न चैन्द्रियमनःसंयोगे जातिभेद इत्याशङ्क्य, अन्यतरकर्मजत्वाव्याप्यजाति नानात्वपरिहारानुपपत्तिः तत्र तादृशजातेरत्रैवानुगतबुध्यभावादिति ।

नन्वाकृतेः शक्यत्वेऽपीष्टमर्थो भाव इत्यत्र लक्षणा न स्यादित्यत आह -- **अपीष्टकेति**।

ननु जातिविशेषवत् संयोगयदवयवकत्वमाकृतिर्विशेषणत्वेन शक्या। सा च पीष्ठकमध्यो गाव इत्यत्र लक्षणेत्यर्थः ।

एवं पद्मं पङ्कजपदशक्यं ततो नियमतः पङ्कजनिकर्तृपद्ममिति प्रतीतेः, अवयवानां तत्रासामर्थ्यात् रूढिं विना योगमात्रात् कुमुदे प्रयोगधीप्रसङ्गाच्च।

ननु रूढावपि योगात् कुमुदे तौ कुतो न स्यातां, रूढ्या प्रतिबन्धादिति प्राञ्चः।

वयन्तु नियमतो रूढ्या स्मृतं पद्ममेव व्यक्तिवाचक ड प्रत्ययेन पङ्कजनिकर्तृतयानुभाव्यते, बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात् यथाग्नेयीति ढगन्तपदेन प्रकरणादिना सन्निहिता ढगभिहिता ऋग्व्यक्तिर्बोध्यते। एवञ्च सर्व्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धीर्न वा तदर्थप्रयोगः।

एवमिति। (४५१ख) यतो नियमतो यत्प्रतीयते तत्तत्पदशक्यमित्यस्मिन् सतीत्यर्थः। ततैत्र पद्यांशाप्रयोगप्रसङ्गादित्युपलक्षणम् । पद्माननुभवप्रसङ्गादित्यपि द्रष्टव्यम्।

ननु सामग्र्यां सत्यां फलाभावे प्रतिबन्धकं कल्प्यते । न तु कारणत्वेन कार्याभाव इत्यरुच्या प्रकरणाभावमेव सिद्धान्तयति -- **वयं त्विति** ।

ननु पङ्कजं द्रव्यमित्यादौ यत्र सामान्यवचनत्वं तत्र कुमुदसाधारणाबोधापत्तिः, मैवम्। चैत्रो दण्डी द्रव्यमितिवत् सामान्यवचनतापि विशिष्टे पर्यवस्यति। न हि तत्र इदंमात्रे सामान्यवचनत्वम्, किं तु विशिष्टप्रतिपादकोभयपदे तेन यावद्दण्डिचैत्रनिष्ठं द्रव्यत्वं प्रतीयते । न तु परस्परविनिर्मुक्तोभयविषयकं द्रव्यत्वं प्रतीयते। वाक्यभेदापत्तेः। तथेहापि पङ्कजनिकर्तृत्वविशिष्टपद्मप्रतिपादकपङ्कजपदे सामान्यपरत्वमपि यावद्विशिष्टपरतायामेव पर्यवस्यति। न तु यावत्पङ्कजनिकर्तृमात्रपरतया वाक्यभेदापत्तेः।

यदि च वाक्यभेद एवाभ्युपेतस्तत्पर्यवसानादिना न परस्परमन्वयबोधः। तदा दण्डिपदस्य दण्डमात्रपरता तावदस्तु। पङ्कजपदेऽवयवानां यावत्पङ्कजनिकर्तृमात्रपरत्वेन कुमुदसाधारणता किं नश्छिन्नमिति। वस्तुतः साकाङ्क्षायोग्यासन्नपदसमुदाये परस्परान्वयनियम एव चैत्रो दण्डीतिवदिति (४५२क) तत्वम्।

नन्वेवं रुढिरेवास्तु तत एवोभयलाभात् किं योगरूढ्या, न। अवयवशक्तेः क्लृप्तत्वात् यौगिकार्थानुभवाच्च। यदि च रूढ्यर्थं एव यौगिकार्य एव वानुभूयेत, तदा विवाद एव न स्यात् अनुभवेनैव तद्विच्छेदात्।

अत्र मीमांसकाः। न तावत् स्मृत्यर्थं शक्तिः पङ्कजपदप्रयोगविषये नियतपद्मानुभव-जनितसंस्कारात् स्मृतेरेवोपपत्तेः स्मृतेस्तज्जन्यत्वनियमात्।

नाप्यनुभवार्थं, नियमतः स्मृतं पद्ममादाय व्यक्तिवचनन्यायेनावयवैः पङ्कजनिकर्तृ पद्ममित्यनुभवसम्भवात्, स्मृतिश्च रूढ्या अन्यथा वेति न कश्चिद्विशेषः।

शक्तिं विना नियमतः प्रयोग एव कुत इति चेत्, न। पूर्व्वप्रयोगमपेक्ष्य अवयवानामुक्तन्यायेन पद्मानुभवजनकत्वनियमात्। पूर्व्वप्रयोगोऽपि तत्पूर्व्वप्रयोगमपेक्ष्येत्यनादितैव।

तत एवेति । धेनुपदवदिति भावः।

अवयवेति। धेनुपदे तु प्रत्ययशक्तेरकल्पनादिति वक्ष्यत इति भावः।

रूढ्या अन्यथा वेति । तन्मते शाब्दी ह्याकाङ्क्षेत्यादि नियमासिद्धेरिति।

शक्तिं विनेति । ज्ञापकसम्बन्धमपश्यतो नेदं ज्ञानं जनियितव्यमित्यज्ञातत्वात् ज्ञापनाय प्रयोगोऽनुपपन्न इत्यर्थः।

पूर्वेति। विशेषतस्तदग्रेऽपि सम्बन्धं विना कथं पूर्वप्रयोग इति पूर्वप्रयोगदेव ज्ञापकसम्बन्धनिश्चयः। शक्तेरपि सामान्यतः ज्ञानं न विशिष्येति वक्ष्यते। सम्बन्धस्य शक्तिर्न । किं तु पूर्वप्रयोग एव परिशेषादित्यर्थः।

शक्तिं विनेति । सम्बन्धग्रहे सति सम्बन्धितावच्छेदकधर्मावच्छिन्नज्ञानात् संस्कारोद्बोधे स्मरणम्। सम्बंन्धश्चात्र शक्तिरेव तस्यैव पदे प्रकल्पनात् । प्रयोगादिनां च तथात्वेनाकल्पनादित्यर्थः ।

अथानियतोद्बोधस्य संस्कारस्य शक्तिं विना नियतोद्बोधे हेत्वभावात् नियता स्मृतिरेव न स्यादिति चेत्, न। कदाचिच्छक्तितोऽपि अद्बोधाभावेन शक्यास्मरणात् शक्तिं विनापि नियमतः शक्तिस्मरणाच्च। उद्बोधकञ्च न नियतं सदृश-पदशक्ति-सम्बन्धिज्ञानानं प्रत्येकं व्यभिचारात्। किन्तु यत्र स्मृतिस्तत्तरतत्कालोत्पन्नमनियतमेवोद्बोधकं कल्प्यते फलबलात्, कार्य्योन्नेयधर्म्माणां यथाकार्य्यामुन्नयनात्।

न च पद्मत्ववत्तद्व्यापकादेरपि स्मृतिप्रसङ्गः, स्मृतिबलेनोद्बोधकल्पनमिति तत्र स्मृत्यभावेन तदुद्बोधाभावात्, तस्माच्छक्तिं विना शक्तेरिव पद्मत्वस्य नियता स्मृतिः। न चैवं गवादिपदेऽपि न शक्तिः स्यात् व्यवहारकालीनसंस्कारादेव गवादिस्मृतिसम्भवादिति वाच्यम्। न हि तत्र स्मृत्यर्थं शक्तिः, किन्त्वनुभवार्थं पदादन्यतो गवादेरनुभवासम्भवादव्युत्पन्नस्य ततोऽनुभवासम्भवाच्च, पद्मानुभवश्च योगादेवेति न समुदायो हेतुरन्यथासिद्धत्वात्, अतो नानुभवबलात् समुदाये शक्तिकल्पनम्।

नन्वेवं गवादिपदानां प्रमेयत्वे शक्तिरस्तु गवादिस्मृतिः संस्कारादिति चेत्, न, गोव्यवहारेण स्वोपपादके गोज्ञाने पदस्य शक्तिकल्पनं न त्वनुपपादके प्रमेयत्वेन गोज्ञाने गोपदात् प्रमेयो गौरित्यननुभवाच्च।

अथैव संस्कारादेव तीरादिस्मृतिसम्भवे गौणलाक्षणिकोच्छेदः, तीराद्यनुभवार्थं हि न तत्कल्पनं तदनुभवस्येतरपदादेव सिद्धेः तयोरननुभावकत्वात्, तस्मान्नियता स्मृतिः वृत्तिसाध्येति तयोः कल्पनात्।

ननु शब्दस्थले शक्तेः स्मारकत्वे उभयतो नियमव्यभिचारमाह -- **कदाचिदिति** ।

कार्येति । तथा चात्र पूर्वप्रयोगादिकमन्यथाक्लृप्तमप्यनन्यप्रदीकतया स्मरणाय कल्प्यमिति भावः।

ननु यदा शक्यस्यापि स्मृतो पद्मत्ववत्तद्भाकस्यापि स्मृतौ पद्मत्वस्मृतिप्रसङ्ग इत्याशंक्य निषेधति -- **न चेति** ।

यदादन्यतोऽनुभवाभावादस्तु अनुभावकं तावतापि तत्र तच्छक्तिर्न सिध्देत्यतो हेत्वन्तरमाह -- **अव्युत्पन्नेति** । (४५२ ख) व्युत्पत्तिः शक्तिग्रहः। तथा च शक्त्यभावे व्युत्पत्त्यपेक्षा न स्यादित्यर्थः।

तथा च नियतपद्मस्मृत्यर्थं पङ्कजपदेऽपि वृत्तित्वेन शक्तिकल्पनामावश्यकं लक्षणाद्यभावादिति चेत्, न। गङ्गायामित्यादौ वृत्तिं विना तीरादेरपदार्थत्वे विभक्त्यर्थान्वयस्तत्र न स्यात् विभक्तीनां प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वव्युत्पत्तेः। पद्मस्य तु पङ्कजवाक्यप्रतिपाद्यत्वेन पाचकादेरिव विभक्त्यर्थान्वयोपपत्तिः।

यत्तु शब्दोपस्थित एव शाब्दान्वयबोधः अन्यथा प्रत्यक्षोपस्थिते कलाये पचतीत्यन्वयबोधः स्यादिति। तन्न। पदस्य तत्र तात्पर्य्याग्रहात् तद्ग्रहे भवत्येव किं पचसीत्युक्ते बधूपदर्शितकलायादौ, अन्यथा दैवात् श्रुत-स्मृतकलायपदात् कुतो नान्वयबोधः। द्वारमित्यादावपि न पिधेहि पदाध्याहारः किन्तु तदर्थस्यैव लाघवात्।

न च पद्ममानयेत्यादौ शाब्दानुभवे पद्मोपस्थापकपदजन्यत्वादन्यत्रापि तथेति वाच्यम्। शबादपद्मानुभवे हि तदन्वयबोधतात्पर्य्यकपदत्वेन कारणता न तु पद्मोपस्थापकपदत्वेनापि गौरवात्।

अथैवं जनिकाल एव प्रयोगः स्यात् न तदत्ययेऽपि, न ह्यसति हि दण्डे दण्डीति व्यपदिश्यत इति चेत्, न। पाचकादिपद इव प्रत्ययस्य योग्यताशक्तत्वात् तल्लक्षकत्वाद्वा उपसर्गादो तथा निर्णयात्, अन्यथा योगरूढावपि जनिकाल एव प्रयोगः स्यात्, योगत्यागे केवलरूढिवादे विवादाभावश्च, तथापि कुमुदे लक्षणा न स्यात् । योगार्थस्याबाधादिति चेत्, न, वक्ष्यते हि तत्र तस्यासाधुत्वम्।

नव्यास्तु नियमतः स्मृतपद्मस्यानुपपत्त्यनन्तरमेव कुमुदधीरिति न तत्र लक्षणाव्यवहारः। वस्तुतो मुख्यतैव तवापि पद्मत्वस्यायोग्यतया अनन्वये योगादेव कुमुदधीर्न लक्षणयेति।

यत्रेति। ननु चागृहीतप्रयोगनियमस्य यद्यानुभवनियमः, कुमुदसाधारणबोधात् प्रयोगनियमग्रहे तु स एवानुभवनियामकः। तथा च गवादिपदेति स एवास्त्वनुभवनियामाय, मैवम्। शक्तिर्यद्यनुभवजनकतावच्छेदको धर्मस्तद्विना नानुभावककत्वमिति शक्तस्यावयवस्यास्त्वनुभावकत्वम्। न त्वशक्तस्य गोपदस्य स्मरकता कृतां विना प्रयोगादिनियमादपि सम्बन्धमात्रादेव स्मृत्युपपत्तेरिति।

ननु गोज्ञाने शक्तिं कल्पयित्वा पश्चात्सर्वपदानां प्रमेयत्वे शक्तिं कल्पयति, लाघवादित्यन्तरो हेत्वन्तरमाह -- **प्रमेय** इति।

पदस्य सर्वोपस्थापकत्वादिनियमादिति भावः। विभक्तीनां सुबृहत्तिनां प्रकृतिः।

ननु प्रकृत्यर्थत्वं वृत्या प्रकृत्युपस्थाप्यत्वम्। वृत्तिश्च शाब्दानुभवानुकूलपदार्थस्मृतिजनकः पदपदार्थः सम्बन्ध इति वक्ष्यते। तथा च संस्कारवशादुपस्थितेऽपि प्रकृत्यर्थत्वमस्त्येव।

न हि संस्कारमात्रात् स्मृतिः, किं तु उद्बृहत्। उद्बोधश्च सम्बन्धिज्ञानं प्रकृत्या स्मरणे यः कश्चित्सम्बन्धस्तत्रावश्यं वाच्य इति, मैवम्। प्रकृत्या शक्त्युपस्थाप्यस्य प्रकृत्यर्थत्वात्। शक्तिश्च क्वचित् साक्षात् क्वचित् परम्परयेत्यन्यदेतत्। पाचकादिप्रकृतेः (४५३क) अवयवशक्तिर्वाक्यार्थोपस्थितेस्तत्र शक्त्युपस्थाप्यत्वम्।

न चावयवो न प्रकृतिः, समुदायत न शक्तिरिति कथं कथं पाकजपाचकादिप्रकृतिशक्त्युप्यता वाक्यार्थ इति वाच्यम्। यावदवयवघटिततवात् समुदायस्य तत्प्रकृतित्वेऽवयवस्यापि तत्प्रकृतित्वात्। अत एव कृत्तद्धितसमासाश्चेत्यर्थवदादिसूत्रप्रपञ्चतया सिद्धान्तितम्। अन्यथा समुदायस्यानर्थवत्तया अर्थवदितिसूत्रेणासंग्रहात् कृदित्यादिसूत्रं विधायकमेव स्यात्। अत एव गवादिपदानां कल्पनं तेन विना तदर्थस्याप्रकृत्यर्थत्वात् । अन्यथा तत्र शक्तौ प्रमाणाभावः। स्मरणस्य संस्कारवशादनुभवस्य विभक्तिबलानुपपत्तेः पङ्कजादिपदेऽप्यवश्यकयोगवशादेवानुभवसंभवे समुदायशक्त्यभाववत् सुब्विभक्तिमात्रादेवानुभवसंभवे गवादिपदानामपि शक्तिर्न कल्पते । न हि सुब्विभक्तिं विना कृतः किंचिद्वाक्यमिति दिक् ।

शब्देति । शब्देन शक्त्युपस्थापित एवेत्यर्थः। तथा चास्तु तुरीयस्य पदान्तरादनुभवेन पद्मस्येति भावः।

पदज्ञानमिति । पदत्वं शक्यत्वम्। तथा शक्त्याश्रयतावच्छेदकावच्छिन्नज्ञानमित्यर्थः।

उच्यते। अस्ति व्युत्पन्नस्य पदज्ञानानन्तरं नियमतोऽन्वयप्रतियोगिस्मृतिः अतस्तद्धेतुसंस्कारोद्बोधकं प्रतिबन्धकं विना पदज्ञानमेव दृष्टानुविधानत्वादनुगतत्वाल्लघुत्वाच्च, न तु प्रतिपदार्थस्मृति-तत्कालोत्पन्नमनन्तमदृष्टचरमनिर्व्वचनीयं गौरवात्। अतः पद्मस्मृतावपि गृहीतसम्बन्धं पङ्कजपदमपि तथेति सम्बन्धत्वेन शक्तिसिद्धिः।

एवञ्च रथकारशब्देऽपि जातिविशेषे रूढिर्न स्यात् संस्कारादेव तदुपस्थितिसम्भवात्। तथा च 'वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रूढ्यर्थस्य बलवत्त्वेन शीघ्रमुपस्थितत्वात् जातिविशेषवत एवाधानं विधीयत इति राद्धान्तव्याघातः।

यथा च शाब्दः सन्निधिरन्वयबोधाङ्गं तथोक्तमासत्तिप्रस्तावे।

स्यादेतत्, पद्मे नियतप्रयोगरूपसम्बन्धेन पङ्कजपदादेव पद्मस्मृतिरस्तु। एवञ्च पद्मे विभक्त्यर्थान्वयः शाब्दानुभवप्रवेशश्चोपपद्यते पङ्कजपदप्रतिपाद्यत्वात्।

न च प्रतिपाद्यता वृत्त्यैव तदुपयोगिनी, पाचकमानयेत्यादौ वाक्योपस्थाप्ये तदभावात्। न च पदाद्वृत्त्यैव स्मृतिः। किन्तु सम्बन्धिज्ञानाद्वृत्तेरपि सम्ब्धत्वेन स्मृत्युपयोगात्। अन्यथा पदाच्छक्तेः स्मृतिर्न शकतिरित्युक्तम्।

एतेन पङ्कजपदान्नियमतः पद्मज्ञानं न वृत्तिं विना अतो लक्षणाद्यभावे शक्तिरित्यपास्तम्। ज्ञानं हि स्मृतिरनुभूतिश्च शक्तिं विनाप्युपपन्ना न तां कल्पयति अनन्यलभ्यस्यैव शब्दार्थत्वात्।

ननु रथाकारशब्दनुभवार्थमैव शक्तिः। न हि पङ्कजपदवत्तत्रावयवानाममनुभवत्वमिति न सिद्धान्तव्याहतिः, न वास्तीत्यादि (४५३ख) समाधानम् उक्तपूर्वपक्षानास्कन्दनादित्यस्वरसादाह -- **यथा चेति**। तथा च शक्तिं विना उपस्थितपद्मस्य शब्दानुभवप्रवेश एव न स्यादिति शक्तिसिद्धिरिति भावः।

उक्तं समाधिं बुध्या यथाश्रुक्ते शङ्कते -- **स्यादेतदिति**।

नियतप्रयोगेत्युपलक्षणम्। उक्तक्रमेणेत्यपि द्रष्टव्यम्। पाचकमित्याद्यापाततः।

वस्तुतोऽवयवे शक्त्युपस्थाप्यत्वमेवेति अनुभवार्थमित्युपलक्षणविभक्त्यर्थान्वयार्थ इति द्रष्टव्यम्।

अनन्येति । अनन्यलभ्यार्थकत्वं तदपि सामान्यव्याप्तौ यद्यत्रानन्यलभ्यबोधकं तत्र शक्तमिति विशेषव्याप्तादुपाधिमाह -- **पद्मेति** ।

अन्यथा शक्तिं विना पदान्नोपस्थितिरित्यन्वयेऽपि शक्तिर्लक्षणोच्छेदश्च। पङ्कजं पद्ममुच्यत इति प्रसिद्धार्थपदसामानाधिकरण्यात् पद्मस्य ज्ञापकं तत् सिध्यति न तु तच्छक्तम्।

अत एव पङ्कजपदं पद्मशक्तं नियमतस्तत्स्मारकत्वात् पद्मपदवदिति निरस्तम्। शक्तौ व्यभिचारात् अनन्यलभ्यत्वस्य पद्मानुभावकत्वस्य चोपाधित्वाच्चेति।

उच्यते। नियतपद्मस्मृतेरुक्तसम्बन्धेन पङ्कजपदसाध्यत्वे पद्मवत्तद्व्याप्य-व्यापकयोरपि नियमतः स्मृतिप्रसङ्गः।

अथ पद्मे प्रयोग एव पद्म एव प्रयोग इति नियतसम्बन्धेन पद्मेतरव्यावृत्तेन पद्मस्यैव पदात् स्मृतिः। न चैवं नियतप्रयोगादेव शक्तिसिद्धिः, अनन्यलभ्यस्यैव पदार्थत्वादिति चेत्, न। तर्हि ज्ञानस्यास्य हेतुत्वे सकलप्रयोगादर्शिनो बहुधा पद्म एव गृहीतप्रयोगस्य समव्याप्तिज्ञानाभावान्न नियता पद्मस्मृतिः स्यात् । स्वरूपसतस्तथात्वे वा अगृहीतपद्मप्रयोगस्यापि ततो नियतपद्मस्मृतिप्रसङ्गः।

नियत इति । अत्र पद्मस्मृत्यर्थं न सम्बन्धापेक्षा। पदात् कृतित्वेन स्मरणस्य समुदायाद्वाक्यार्थाभावेनानुभवस्य चासंभवात्। तथा च पद्मत्वस्मृत्यर्थ सम्बन्धाननुसरणम्। तेन नियतपङ्कजपदप्रयोगविषयवृत्तित्वमुक्तसम्बन्धावाच्यः। तथा सति तन्निष्टरूपादिप्रमेयत्वयोरपि प्रसङ्गस्मरण इत्यर्थः।

अथेति । यद्विशिष्टे प्रयोग एव यद्विविशिष्ट एव प्रयोग इत्येवं रूपसम्बन्धेनेत्यर्थः। तेन यद्विशिष्टे पङ्कजपदप्रयोग एवेत्यसिद्धम्। घटादौ तदप्रयोगात् तत्रैव प्रयोग इत्यनेन रूपादिवारन्तत्यागेऽपि पद्मातरेप्रयोगादित्युभयाप्रसङ्गाभावादिति भावः।

पद्मेतरेति। (४५४क) पद्मत्वेतरेत्यर्थः। एकेऽपि सोरभादेः सौरभविशेषवत्वादेः किं श्क्येत्यापाततः वस्तुतः प्रयोगविषयवत्वस्य स्मारकत्वे तदपेक्षया अदृष्टत्वात् सम्बन्धिज्ञानात् सम्बन्धिसहस्रस्य गुरोरपि युगपत् स्मरणादर्शनात् । शक्तौ च तदपेक्षायाः प्रामाणिकत्वात्।

किं च प्रामणिकसम्बन्धः प---प्र स्यतादृशप्रयोगाभावेन सम्बधान्तरतदुपजीव्यस्यावश्यकत्वात्। अत एवाप्रतात्पर्यमात्रदेव नार्थोपस्थितिरिति वक्ष्यत इति दिक्।

अथ यादृशः प्रयोगस्त्वया शक्तिग्राहकत्वेनाभिमतः स एव पद्मस्मारकोऽस्तु। न च पद्मत्वस्येव प्रयोगसमव्याप्तत्वेन गृहीतस्य सौरभादेरुपाधेस्ततः स्मृतिप्रसङ्गः, तवापि शक्तिग्रहप्रसङ्गात्। तयोस्तुल्यत्वेऽपि शक्तिग्राहकप्रमाणे लाघवादितर्कावतारान्नोपाधी शक्तिरिति यदि तदा तर्कसहकृत एव शक्तिग्राहकत्वाभिमतः सम्बन्धः पद्मस्मृतिहेतुरस्तु, तर्काद्यनवतारेऽपि बहुधा गृहीतप्रयोगस्य पद्मस्मृतिदर्शनान्न तथेति चेत्, तर्हि तवापि तर्कं विना शक्तिग्राहकाभावात् कथं पद्मस्मृतिरिति तुल्यम्।

न चैवं तत एव शक्तिग्रहोऽपि स्यात्, अनन्यलभ्यस्यैव शब्दार्थत्वादिति, मैवं, एवं गवादिपदेऽपि शक्तिग्राहकत्वाभिमतादेवं विधप्रयोगादेव ज्ञाताद्गवादेः स्मृत्यनुभवौ स्यातां किं शक्त्या, तस्मात् पदाधीना नियता स्मृतिः शक्तिसाध्या वा नियतसम्बन्धसाध्या वा वृत्तिसाध्या वा, तत्र परिशेषादिह शक्तिसाध्यैव।

न च शक्तिस्मृतौ व्यभचारः, शक्तिस्मारकत्वाभिमताद्धि पदात् पदार्थस्यैवाहत्य स्मरणं न शक्तेर्हेत्वभावात् कल्पनागौरवाच्च सम्बन्धिनं विना सम्बन्धस्यास्मरणेन प्रथमं पदार्थस्मरणस्यावश्यकत्वाच्च। पदार्थस्मृतेश्च शक्तिविषयत्वे मानाभावात् उद्बुद्धसंस्कारविषयत्वाद्यदि शक्तिरपि तद्विषयः, तथापि पदार्थशक्तत्वेनैव ज्ञातस्य पदस्य शक्तिस्मारकता न तु शक्तिसम्बन्धित्वेन अन्यथासिद्धत्वात्।

यद्वा पदान्नियमतः स्मृतिर्नियतसनम्बन्धसाध्या शक्त्यापि समं पदस्य शक्त्याश्रयत्वमेव नियतः सम्बन्धः।

इति तत्त्वनिर्णयता आवश्यकी ।

नियतेति । प्रयोगनियामकः सम्बन्ध इत्यर्थः।

ननु पदार्थस्मृत्यनन्तरं शक्तिस्मृतिरिति न ब्रमः । किं त्वेकैवोभयस्मृतिरित्यत आह -- **पदार्थेति**। सम्बन्धिस्मृतेः सम्बन्धविषयकत्वानियमेन शक्तिविषयकत्वनियमे मानाभावादित्यर्थः।

नन्विति । तथा च शक्तिसाध्यत्वेनैव नियमः, न तु तच्छक्तिसाध्यत्वेनेति भावः।

अपि च कुमुदेऽवयवशक्तिप्रतिबन्धार्थं रूढिः। न च नियतपद्मस्मृतिरेव प्रतिबन्धिका, रूढिं विना नियतस्मृतेरभावात्। अत एव न व्यक्तिवचनन्यायोऽपि। न चैकं पदमेकदैकेनैव रूपेण प्रवर्त्तते अतो न पद्मत्व-पङ्कजत्वयोर्धीरिति वाच्यम्। अवयव-समुदाययोर्भेदात् लम्बकर्णादिपदे व्यभिचाराच्च।

ननु पदात्तच्छक्येति नियमतः शक्तिमात्रेण वा। आद्ये शक्तिस्मृतावेव व्यभिचारः। अन्त्ये चे इष्टापत्तिः। अवयवशक्तेरेव परम्परया पद्मत्वस्मारकत्वादित्यरूचेराह -- **अपि चेति**।

तथा च नियते परान्वयव्यवच्छिन्ना परान्वयप्रितबन्धिकेति यावत्।

न च शक्तिस्मृतिः पद्मस्मृतिवदन्यान्वय (४५४ख) प्रतिबन्धिकेति भावः।

ननु रूढपद्मस्मृतिर्न तत्र तन्त्रम्, अपि तु स्मृतिरेवेति कथं विशिष्टस्मृतिरूढौ लिङ्गमित्यशङ्क्य निषेधति -- **न चेति**।

रूढिं विनेति । पद्मस्मृतिरेव रूढौ कार्यतया लिङ्गम्, सा स्वभावात् कुमुदान्वयप्रतिबन्धिका। अतः शक्तिस्मृतिव्यभिचारवारणाय तादृशस्मृतिलिङ्गमिति भावः। न त्वेकपदमित्यत्र न पदत्वं शक्तत्वम्, अपि तु विभक्त्यन्तत्वम्। तथा चैकं पदं योगरूढ्येरन्यतरेणैव रूपेण प्रवर्तत इत्यत्र व्याप्तौ नायं दोष इत्यरुच्या आह -- **लिङ्गमिति**।

मन्मते बहुव्रीहेरन्यपदार्थरूढिसत्त्वादिति भावः। तर्हि इतरान्वयप्रतिबन्धकरूढियोगयोरन्यतर-प्रवृत्तिनियमो न रूढियोगमात्रयोरिति न व्यभिचार इति भावः।

तत्रावयवेति । प्रकृते न रूढिः प्रतिबन्धिका, अपि तु स्मारिका । स्मृतिः यत्राकाङ्क्षादि समविहिता तमनुभावयति । तत्समवधानं च पद्म एव, न कुमुदेऽपीत्यन्यदेतत्। तत्र च क्रियया तत्समं तत्समवधानात् । तथा सहान्वय इति क्वचिद्रूढेः प्रतिबन्धकत्वमिति विशेषणप्रक्षेपेऽपि प्रकृते व्यभिचार एवेति भावः।

तर्हि तद्वदेव रूढ्या नावयवशक्तिप्रतिबन्ध इति चेत्, न, तत्रावयवार्थक्रियान्वयेना-प्रतिबन्धान्नानार्थे च नानार्थानुभवात् नैकशक्त्यान्यशक्तिप्रतिबन्धः।

यत्तु अवयवशक्तिस्मृतिकाले समुदायशक्तिस्मृतिनियमे हेत्वभावान्न तया प्रतिबन्ध इति। तन्न। समुदायस्य तावदवयवरूपत्वेन सर्व्वावयवादेवोभयशक्तिस्मृतिसम्भवात् मण्डपपदे तथा दर्शनात्।

अथ पङ्कोत्तरजपदं प्रतिबन्धकं गो-वलीवर्हवत् पङ्कजनिपदप्रयोगे उप्रत्ययस्य कर्तृविशेषपद्मपरत्वं वा जनेः पद्मजनिविशेषपरत्वं वा स्वभावादेव कुमुद्बोधाजनकत्वं वा चक्षुष इव रसे कुमुदेऽवयवशक्तिकुण्ठनं वा कल्प्यतां तेन कुमुदे न धीरिति चेत्, तर्ह्यज्ञातपद्मप्रयोगस्य कुमुदसाधारणबोधो न स्यात्। न भवत्येवेति चेत्, किमवयवव्युत्पन्नस्य। ततोऽर्थप्रत्यय एव न भवति, यद्वा पङ्कजत्वेन पद्ममेवानुभूयते, आद्ये मन्दुरजादिपदादिव सामग्रीसत्त्वे कथं नानुभवः, द्वितीये कुमुदमप्यनुभूयेताविशेषात्।

न चैवं पङ्कजशब्दस्य सामान्यशब्दत्वात् तात्पर्य्यवशेन विशेषतः पद्म-कुमुदधीसम्भवात् न रूढिर्न वा लक्षणा स्यादिति वाच्यम्। न हि प्रयोजनक्षतिभयेन सामग्री नानुभावयति।

यदि च पद्म-कुमुदयोस्तुल्यता तदा अगृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्तिपुरःसरैव कुमुदधीर्न स्यात् स्याच्च कदाचिद्वैपरीत्यं अतः पद्मे रूढिरेव, कुमुदे यथा लक्षणा तथा वक्ष्यामः। कुण्ढनञ्च शक्तिवृत्तिधर्म्मान्तरं वा शक्तेरनुद्भवो वा अभिभवो वा तत्र कारणान्तरं वा अदृष्टवरं कल्प्यम्। रूढेः प्रयोगप्रतिबन्धकत्वं मण्डपादौ दृष्टमेव।

ननु सकृदुच्चरितात् सकृदर्थप्रत्ययनियमात् एकरूढेरेवापरान्वयप्रतिबन्धिकेत्यत आह -- **नानेति** । सैन्धवमानेयति (४५५क) युगपदुभयार्थतात्पर्यग्रहेऽन्वयानुभवदर्शनात् सकृदित्याद्यसिद्धमिति भावः।

ननु पङ्कजपदं चेत्पद्मेतरान्वयप्रतिबन्धकं तथा चैत्रवदाधुनिकसङ्केतपङ्कजपदादपि तदनुभवो न स्यादिति कल्पान्तरमाह -- **गोबलीवर्देति** ।

नन्वत्र न्याये पौनरुक्त्यापत्तिर्मूलम्, तेन विशेषवाचिपदसमभिव्याहारार्थ एव सामान्यपदस्य तैरविशेष स्मारकमित्यरुच्या कल्पान्तरमाह -- **स्वभावादिति** ।

अत एव पङ्काद्यवयवैः पद्ममेवानुभाव्यत इति, अवयवनियमस्य कल्पनान्न कुमुदे धी-प्रयोगौ। अन्यथा रूढावपि योगान्न कुतस्तौ कुमुदे, यथा उद्भित्पदस्य योगात् खनित्रे रूढ्या कर्म्मिविशेषे प्रयोग इति निरस्तम्।

अगृहीतनियतपद्मप्रयोगस्य कुमुदसाधारणबोधदर्शनात्, रूढिवादे तु सैव प्रतिबन्धिका मण्डपपदवत्, ज्ञातस्य चावयवनियमस्य प्रयोजकत्वे पद्मे शक्तिरेव पद्मज्ञानजनकत्वज्ञानस्य शक्तिनिर्व्वाह्यत्वात्, उद्भित्पदे त्ववयवार्थः कर्म्मण्ययोग्यत्वादेव नान्वीयते न तु रूढ्या प्रतिबन्धात्। अवयवान्वययोग्ये खनित्रेऽपि न प्रतिबन्धः योगेन खनित्रेऽपि प्रयोगात्। एवञ्च रूढियोगाभ्यामुद्भित्पदस्य नानार्थतुल्यतैव उभाभ्यामेकार्थानवगमात्।

ननु गृहीतपद्मप्रयोगस्यावयवैः सह प्रयोगे पद्ममेवानुभाव्यत इति स्वभावकल्पनमस्तु। नचैवं व्युत्पत्त्यन्तरं, स्वरूपसत एव प्रयोगग्रहस्य शक्तिग्रहस्येवोपसन्धानत्वात् उपसर्गस्येव धातोः प्रकर्षादिबोधकत्वे, उपसन्धानं विना कुमुदबोधो भवत्येव।

यत्तु पदानां स्वार्थान्वयबोधसामर्थ्यं उपजीव्य कुमुदाबोधार्थं नान्विताभिधानेऽवयवनियमः कल्प्यते उपजीव्यविरोधात्, किन्तु समुदायस्य कुमुदे स्वार्थत्वाभाव एवेति। तन्न। एवं स्वार्थत्वाभावेन समुदायात् कुमुदधीर्न स्यात् अवयवेभ्यस्तु स्यादेवेति। मैवम्। न हि पदानां स्वभावाधीनं बोधकत्वं किन्तु शक्तिज्ञानाधीनं अज्ञातशक्तेरबोधकत्वाच्छक्तिभ्रमेण बोधकत्वाच्च। तथा च बोधकशक्त्यभावादेवाबोधकत्वं कार्य्याभावे हेत्वभावस्यैव तन्त्रत्वात्। धातोश्चोपसर्गोपसन्धानात् प्रकर्षादौ शक्तिरेव।

नन्ववयवानां शक्तिसत्त्वे कुमुदबोधजनकस्वभावत्वोचितानां जनकस्वभावतेत्यवयवानामेव शक्तिकुण्ठनमाह -- **अत एवेति** । **एवमिति** । अविशेष इत्यर्थः।

ज्ञातस्येति । तस्मात् पदादयमर्थोऽनुभूयत इत्यस्यैव ज्ञानस्य शक्तिकल्पकत्वात् अनुभवजनकतावच्छेदकत्वं विना भावत्वाभावेनावच्छेदकतया शक्तिकल्पनादिति भावः।

नानार्थेति । एकत्र वर्णे शक्तिद्वयाभावात् तुल्यमिति द्रष्टव्यम्। व्युत्पत्यन्तरं ज्ञापकम्। सम्बन्धान्तरकल्पनं सातोश्चेति। तथा च तत्र तदुत्तरत्वेन शक्तिरेवान्यादृशस्योपसंदानस्य क्वचिदप्यदर्शनात् उपसंदानस्य नियतानुभावकल्पनमित्येवं व्युत्पत्यन्तरकल्पनमिति भावः।

स्यादेतत् । यथा सर्व्वनामत्वमहम्पदेषु बुद्धिस्थत्व-सम्बोध्यत्वोच्चारयितृत्वानि प्रयोगोपाधयस्तेन बुद्धिस्थादिकमेव तद्बोधयति तत्रैव प्रयुज्यते च न तु बुद्धिस्थत्वादिकं शक्यं तेन रूपेण ज्ञानाभावात् तथा पद्मत्वमपि प्रयोगोपाधिरिति चेत्, न। तेन हि नावयवशक्तिर्विच्छिद्यते पद्मे तत्सत्त्वात्। नापि कुमुदे तात्पर्य्यमपोद्यते, बाधकं विना तस्यौत्सर्गिकत्वात्। नाप्यवयवाधीनज्ञानं प्रतिबध्यते, शक्त्याकाङ्क्षादि-तात्पर्य्याणां सत्त्वे अन्वयज्ञानस्यावश्यकत्वात् उपाधेरन्वयबोधप्रतिबन्धाहेतुत्वात्।

ननु शक्यतावच्छेदकातिरिक्तनियामकत्वकल्पनान्यत्र क्वचिदप्यदर्शाद्युत्पत्यन्तरगौरवाय।

न च (४५५ख) तस्यादर्शनमिति शङ्कते -- **स्यादेतदिति**।

त्वमहमिति युष्मदस्मदर्थकं निपातद्वयम्।

नन्वेवं पङ्कजनिकर्तृत्वेन पद्मानुभवो न पद्मत्वेन बुद्धिस्थत्ववत्तत्प्रकारीभूतस्य प्रयोगोपाधित्वादित्यनुभवविरोधदोषः स्फुततयोपेक्ष्य दोषान्तरमाह -- **तेन हीति** ।

उपाधेरिति। आकाङ्क्षादिसत्त्वे मह्यादिवत्पद्मस्य ज्ञानमात्रस्य तदितरान्वयप्रतिबन्धकत्वासम्भवात् क्वचिदप्येवं दर्शनादिति भावः । इष्टेत्यादिकल्पद्वयं मतभेदेन द्रष्टव्यम्।

आत्मेति । अन्यस्यसंबेध्यत्वोच्चारयितृत्वाभावादित भावः ।

शक्तीति । शक्यतावच्छेदकोपलक्षणतया स्वरूपे सदेव शक्यतावच्छेदकत्वेनागृहीतमेव स्वभावात् शब्दान्तरे एव कल्पनेनात्रैवं प्रकारकज्ञानसामर्थ्यकल्पनादिति भावः।

इदमत्राकूतम् -- सर्वनाम्नां सर्वेषां बुद्धिस्थमात्रवाचकता बुद्धिस्थता च न प्रवृत्तिनिमित्तम्। तेन रूपेण न च स्थितेः, सर्वेषां पर्यायतापत्तेश्च। किं तूपलक्षणम्। तेन तदुपलक्षितेषु चैत्रत्वमैत्रत्वादिषु शक्तिग्रहात् प्रत्येकं तत्र तत्र शक्तिग्रहासंभवात् अपूर्वव्यक्तिलाभासंभवात् । तथा च बुद्धिस्थत्वप्रकारावच्छिन्नमेतेषां पदानां वाच्यमित्याकारकशक्तिग्रहेण यदा बुद्धिस्थस्तत्प्रकारिकायास्तैः पदैर्जन्यते।

नापि प्रयोगोवार्य्यते, इष्टकुमुदधीहेतुतया इष्टसाधनताज्ञानस्य तल्लिङ्गककार्य्यताज्ञानस्य वा प्रयोगहेतोः सत्त्वे अप्रयोगस्याहेतुत्वात्। अहमादिपदे त्वात्ममात्रशक्ते शक्तिग्रहसहकारितया स्वरूपसदेव उच्चारयितृत्वादिकं धीनियामकं स्वभावान्नियमतस्तस्यैव बोधनादिति स्वरूपसत एवोपाधित्वम्। पद्मत्वन्तु न तथाष कुमुदसाधारणबोधदर्शनात्।

ननु कुमुदे पूर्व्वेषामप्रयोगादाधुनिकानामप्रयोगः। न च प्रयोगमात्रे को हेतुरिति वाच्यम्। प्रयोगाणां हि न मेलनकार्य्यता किन्तु प्रत्येकं, तत्रोत्तरस्य पूर्व्वो हेतुः यथा पूर्व्वगौरुत्तरस्य।

न च पर्यायता बुद्धिविशेषेणैव विशेषात्तथापि (४५६क) उद्देश्यतावच्छेदकबुद्धिविषया यावत्। तस्मात् प्रकारेषु सर्वपदशक्तं प्र ोपक्रमबुद्धिविषयप्रकारके किंपदमवान्तरवाक्योद्देश्यबुद्धिविषये यत्पदमवान्तरवाक्योद्देश्यविषये तत्पदं प्रत्यक्षबुद्धिविषय इदमेतत्पदयोर्व्यवहितबुद्धिविषये सदा पदशक्तमिति शक्तिग्रहः। तथा च तैस्तैः पदैः तदा तदा तत्प्रकारिका धीवत् त्वमहंपदयोः नात्ममात्रशक्तत्वम्। नात्मत्वं प्रवृत्तिनिमित्तम्, तेन रूपेणानुपस्थितेः। अन्यथा त्वमहं नेति कल्पनानुपपत्तेः। प्रकारविरोधं विना तदसंभवात् । द्वयोः पर्यायतापत्तेश्च ।

न च संबोध्यत्वमुच्चारयितृत्वं च तथा। स्वरूपसदेवेति ग्रन्थविरोधाच्च। स्वरूपसन्नियामकत्वेन मयारसंबोध्येऽनुच्चारयितरि च तदुभयक्रमेण ताभ्यं पदाभ्यामनुपस्थानापत्तेरिति वाच्यम्। तावतापि ग्रन्थविरोधानुद्धारात् । तथा चात्रापि संबोध्यतावच्छेदकबुद्धिविषयप्रकारावच्छिन्नत्वं पदस्य उच्चारयितृत्वं च स्वातन्त्र्येण विवक्षिते नानार्थवादे वाच्यस्त्वया यद्वचनात् स राजेत्यादौ नवेरावाहं पदोपस्थितादिप्रसङ्गः। शक्यतावच्छेदकधीविषयप्रकारावच्छिन्ने अहंपदस्य शक्तिः। तथा चचैत्रत्वाद्येवेतिनकाप्यनुपपत्तिः ।

न च ग्रन्थविरोधः, शक्यतावच्छेदकत्वेनागृहितस्य मात्रसत्त्वातदर्थत्वेनोक्तत्वात्। अत एत विकल्पोऽपि सङ्गच्छते। उच्चारयित्रत्वं (४५६ख) स्वातन्त्रेण विवक्षितं तेनानुवादे वाच्यस्त्वया मद्वचनात् स राजेत्यादौ न कवेरेव मत्पदोपस्याप्यतातिप्रसङ्ग इति सङ्क्षेपः। पद्मत्वन्तु न तथा स्वरूपसच्छक्यतावच्छेदकत्वेनागृहीतमेव नियामकं तथात्वे कुमुदसाधारणबोधानुपपत्तेरिति ध्येयम्।

अन्यथा गोमात्रे को हेतुरित्यत्र किमुत्तरं तवेति चेत्, न। प्रयोगहेतोः सत्त्वात् पूर्व्वप्रयोगस्य चाहेतुत्वात् पूर्व्वप्रयोगमज्ञात्वाप्यवयवव्युत्पन्नेन पाचकादिपदानां नवकाव्यानां गौणलाक्षणिक-देवदत्तादिपदानाञ्च प्रयोगात्।

स्यादेतत्, ग्रामगामादिपदेऽन्वयबोधाभावात् साधुत्वज्ञानमपि हेतुः।

न चैवं तदेव हेतुरस्तु किं शक्त्या गौण-लाक्षणिकविवेकश्च सोपाधित्वानुपाधित्वाभ्यामेवास्तु इति वाच्यम्। प्रथमं व्यवहारेण शब्दस्य ज्ञानकारणतावगमात् तत्रैव शक्तिकल्पनं ततो ग्रामगामादौ व्यभिचारादाकाङ्क्षादेरिव साधुत्वज्ञानस्य हेतुत्वकल्पनात्। साधुत्वञ्च न पूर्व्वप्रयोगप्रवाहाविच्छेदः नवकाव्यादौ तदभावात्, किन्तु भ्रमादिजन्यत्वाभावः। कुमुदे च तत्प्रयोगो बोदकत्वभ्रमात्।

न चैवं भ्रमजन्यत्वादबोधकत्वं अबोधकत्वे च भ्रमजन्यत्वं इत्यन्योन्याश्रयः, पूर्व्वभ्रमजन्यत्वेनोत्तरं प्रति बोधकत्वभ्रमात् उत्तरस्य प्रयोगो भ्रमजन्यः, एवं पूर्व्वस्यापीति तत्र भ्रमपरम्परैव मूलं एवं ग्रामग्रामादेरपि। कथमिदं ज्ञातव्यमिति चेत्, ग्रामगमनकर्त्तरि ग्रामगामपदस्येव प्रामाणिकानां कुमुदे तस्य निरूपाधिप्रयोगाभावात्।

अत एव साधुत्वभ्रमात् कुमुदसाधारणीबोधोऽपि। कुमुदे ह्यसाधुत्वात् समुदायेन तत्र पङ्कजन्मकर्तृत्वं लक्ष्यते। न चासाधुत्वे ग्रामगामपदवत् लक्षणापि न स्यात्, पद्मे तस्य साधुत्वात्। उच्यते। पङ्कजन्मकर्त्तरि तत्प्रयोगस्य भ्रमाद्यजन्यत्वेन साधुत्वम्। कुमुदे न तथेति चेत्, न। पुण्डरीकवन्नवपद्मवच्च तस्य व्यक्तिस्थानीयत्वात्, प्रतिवाक्यार्थञ्च साधुत्वज्ञानस्य हेतुत्वे अभिनवव्यक्तौ भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यतया पाचकादिपदप्रयोगो न स्यात्। पाककर्तृजातीये भ्रमाद्यजन्यत्वस्य सुग्रहत्ववत् पङ्कजन्मकर्तृजातीयेऽपि सुग्रहत्वात् येन रूपेणान्वयबोधस्तस्य कुमुदवृत्तित्वात्।

ननु कुमुदावगमप्रतिबन्धार्थं न पद्मे रूढिः तदनवगमस्यान्यथासिद्धेरित्याशङ्कते -- **स्यादेतदिति।**

समुदायेनेति वाक्यलक्षणापक्षमाश्रित्य, अन्यथा रूढ्यभावे समुदायस्याशक्तत्वे लक्षणानुपपत्तेरित्यवधेयम्।

येन रूपेणेति अन्वयितावच्छेदकधर्मावच्छिन्ने भ्रमाद्यजन्यत्वग्रहस्य तन्त्रत्वादिति भावः।

अथ पङ्कजपदं कुमुदे वृत्त्यन्तरं विना न साधु वृत्त्यन्तरं विना वृद्धैस्तत्राप्रयुज्यमानत्वात्, यः शब्दो यत्र वृत्त्यन्तरं विना वृद्धैर्न प्रयुज्यते स तत्र वृत्त्यन्तरं विना न साधुः यथा गङ्गापदं तीरे।

यथा वा ग्रामगामपदं ग्रामगमनकर्त्तरि, न प्रयुज्यते च वृत्त्यन्तरं विना पङ्गजपदं कुमुदे। तस्माद्वृत्त्यन्तरं विना न तत्र साध्विति चेत्, न। व्यर्थविशेषणत्वात् तत्राप्रयुज्यमानत्वस्यैव व्याप्यत्वात्, आकाङ्क्षादिमद्व्याक्यासाधुत्वे अवयवार्थान्वयाबोधकत्वस्य व्याकरणस्मृत्यनुपगृहीतत्वस्य पक्षधर्म्मावच्छिन्नसाध्यव्यापकस्योपाधित्वाच्च। पक्षे उभयाभावेन साधनाव्यापकत्वात्। पङ्कजशब्दः कुमुदे साधुः साधुत्वे सति कुमुदबोधप्रयोजकाकाङ्क्षादिमद्वाक्यत्वात्, साधुत्वे सति यद्वाक्यं यद्बोधप्रयोजकाकाङ्क्षादिमद्भवति तत्तत्र साधु यथा तरुप्रसूनशब्दः कुसुमे, यथा वा पाचकशब्दः पाककर्त्तरि, तथा पङ्कजपदं कुमुदे तस्मात्तथेति सत्प्रतिपक्षत्वाच्च।

वस्तुतस्तु साधुत्वज्ञानें न हेतुः अवयवादिव्युत्पन्नेन भ्रमाद्यजन्यं पूर्व्वप्रयोगमज्ञात्वापि नवकाव्यादिप्रयोगात्, कुतस्तर्हि ग्रामगामादौ नान्वयबोधः, असाधुत्वनिश्चयादिति ब्रूमः साधोरप्यसाधुत्वनिश्चयेनाबोधकत्वात् अभिनवकाव्यादौ नासाधुत्वनिश्चयः, संशयश्च न प्रतिबन्धकः, अन्यथा योगरूढिसंशये सत्यभिनवव्यक्तौ पाचकादिप्रयोगो न स्यात्।

यथा वेति। सामान्याभावादेव ग्रामगामे विशेषाभावादिति भावः।

आकाङ्क्षादीति। अत्र वाक्यत्वमात्रपक्षधर्मावच्छिन्नव्यापकत्वागाकाङ्क्षादीति समव्याप्तमभिप्रेत्य अन्यथाकाङ्क्षाद्यभावे यत्राबोधकत्वं तत्र साधुत्वसत्त्वाद्व्यभिचारः। आकाङ्क्षादिमद्वाक्यत्वावच्छिन्नवाबोधकत्वेऽसाधुत्वनियमः कारणान्तरसाकल्ये साधुत्वं विना फलाभावाभावात्। अत्र यदवच्छिन्नसाध्यव्यापकत्वं तदवच्छिन्नस्यैव साध्यव्याप्यत्वे समव्याप्तत्वादिति भावः।

वस्तुतस्त्वित्यादि वस्तुगतिमनुरूध्य। असाधुत्वनिश्चयप्रतिबन्धकत्वेऽपि पूर्वप्रयोगतः कुमुदेऽसाधुत्वनिश्चये तत एव कुमुदानन्वयेन तत्प्रतिबन्धकपद्मरूढ्यकल्पनरूपपूर्वपक्षानास्कन्दित-त्वादिति ध्येयम्।

संशयश्चेति। अतएव साधुत्वनिश्चयो न हेतुः यत्संशयः - व्यतिरेकनिश्चयौ यत्प्रतिबन्धकौ तन्निश्चयस्यैव तत्र हेतुत्वादिति भावः।

अन्ये तु ततोऽन्वयबोधो भवत्येव, अपभ्रंशादिव यथा तव साधुत्वभ्रमात्, साधुत्वं तस्य नास्ति तद्वदेव। अपरे त्वत्राकाङ्क्षैव नास्ति घटः कर्म्मत्वमानयनमित्यत्रेव।

यत्तु गमाद्यनुत्तराणत्वेन गमादिपूर्व्वेतराणत्वेन वा शक्तिः काशपूर्व्वेतरकुशत्वेनेवेति। तन्न। कर्म्मोपपदधातूत्तरणत्वेनैव शक्तेर्न तु तत्तद्धात्वनुत्तराणत्वेन गौरवात्, तत्तद्धातूनां विशिष्याज्ञाने शक्तिग्रहानुपपत्तेः कर्म्मण्यणिति सूत्रार्थमजानतः कुम्भकारादिपदप्रयोगानुपपत्तेश्च शक्तिसन्देहात्।

असाधुत्वञ्च न भ्रमादिजन्यत्वं अनाप्तोक्ते असाधुत्वापत्तेः शुकाद्युदीरिते ग्रामगामादौ भ्रमाद्यजन्यत्वाच्च। किन्तु महाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धत्वं तद्परिगृहीतत्वं वेति वक्ष्यते। पदस्य साधुत्वं वृत्तिरेव वृत्तिश्च शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपद-पदार्थयोः सम्बन्धः, वाक्यसाधुत्वञ्चाकाङ्क्षादिमत्स्वार्थान्वयबोधकत्वे सति व्याकरणस्मृत्यनिषिद्धत्वं। तस्मात् कुमुदे पङ्कजशब्दस्य साधुत्वे सति प्रयोगप्रतिबन्धकत्वेन समुदायशक्तिसिद्धिरिति। न चैवं लाघवात् जशब्द एव शक्तिरस्तु न समुदाये, मन्दुरजादौ पद्मधीप्रसङ्गात्। पङ्कोत्तरजपदत्वेन शक्तिरिति चेत्तर्हि सर्ववत्र तत्तद्वर्णोत्तराव्यवर्ण एव शक्तिरिति समुदायशक्त्युच्छेदः, न चैवं, विनिगमकाभावादिति सम्प्रदायः।

अत्र ब्रूमः । ज्ञाता हि या शक्यमनुभावयति सा शक्तिः। न च समुदायः पद्मानुभवहेतुः, अवयवादेव तदुपपत्तेः। एवञ्च प्रतिबन्धकमात्रे शक्तिपदं पारिभाषिकं, शक्तित्वादनुभावकत्व-साधवेऽन्योन्याश्रयः प्रतिबन्धकत्वेनावगते शक्तित्वासिद्धिश्च। मण्डपादौ त्वनुभावकत्वेनैव शक्तिसिद्धिः।

अन्ये त्विति अस्वरसोद्भावनं तद्बीजं इदमेव। यदसाधुत्वनिश्चयेनापभ्रंशादप्यन्वयधीस्तन्निश्चये तु भवन्त्यन्वयधीस्तदसाधुत्वनिश्चय प्रतिबन्धकतायां पर्यवस्यति न साधुत्वनिश्चयहेतुतायामिति।

अपरेत्वित्यत्र योग्यतादिसकलकारणोच्छेदोऽस्वरसबीजं व्यक्तम्।

आकाङ्क्षादीति। अत्र सत्यन्तं वाक्यलक्षणामविशिष्टं साधुत्वस्येति स्मर्तव्यम्। ननु प्रतिबन्धकत्वं रूढेस्तद्बुद्धेर्वा तज्जन्यपद्मत्वस्मृतेर्वा, आद्ये कदापि कुमुदसाधारणबोधो न स्यात्। अन्त्ययोर्मानाभावः।

किञ्च रूढियोगयोर्व्विरोध एव परं रूढ्या योगप्रतिबन्धः मण्डपादौ तथा निर्णयात्। अन्यथा लम्बकर्णादावपि योगप्रतिबन्धः स्यात्। न चेह विरोधः, पद्मे समावेशात् योगादर्थधीश्चोभयत्र तुल्या।

यत्तु पङ्कजमानयेत्यादौ रूढ्या शीघ्रोपस्थितं पद्ममेव क्रिययान्वीयते, न पङ्कजन्मकर्तृ, तस्य वाक्यार्थत्वेन विलम्बितप्रतीतिकत्वात्। एवञ्चाविरोधेऽपि रूढेर्योगापहारितेति। तन्न। क्रियापद-तदर्थयोग्यतादिशानाधीनत्वेन क्रियान्वयबोधस्य विलम्बितत्वात् रूढ्यवयवार्थयो-रन्वयबोधस्य सामग्रीसत्त्वेन प्राथमिकत्वात्। तस्मान्न प्रतिबन्धकत्वेन रूढिसिद्धिर्न वा तया योगप्रतिबन्ध इति।

अत्रोच्यते। नियमतः पद्मस्मृत्यर्थपङ्कजनिकर्तृत्वेनानुभाव्यते, बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात्। अतः सर्व्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धी-प्रयोगौ। न चैवमनुभवाजनकत्वेन न सा शक्तिः या ज्ञाता नियमतः शक्यं ज्ञापयति सैव हि शक्तिः, ज्ञप्तिश्च स्मृतिरनुभूतिश्चेति नियतस्मारिकापि शक्तिः।

वस्तुतः स्वार्थस्मृतिद्वारा अवयवानामिव समुदायस्य स्वार्थानुभावकत्वमविशेषादिति पश्चादनुभाविकापि रूढिः पङ्कजमानयेत्यादावानयनादिना स्वार्थान्वयानुभवे समुदायावयवो-र्हेतुत्वाच्च तस्मान्वियतम्मृतिगेचुत्वेनैव रूढिसिद्धिः न तु प्रतिबन्धकत्वेन।

ज्ञानस्य हि प्रतिबन्धकताविषयविरोधेन बाधवत्कारणविरोधेन वाच्यव्यभिचारादिज्ञानवदनयोस्तु नैकमपीति दूषणं स्फुटतयोपेक्ष्यदोषान्तरमाह -- **ज्ञातेति**। यत् सम्बन्धावच्छिन्नतया ज्ञानस्य शब्दस्यानुभावकत्वमिति भावः। अनुभवजनकतावच्छेदकोऽन्यसम्बन्ध इति यावदिति भावः।

नन्वेवं गोपदाहीनपदादेरपि पङ्कजपदवदस्तु योगरूढता तथा च केवलरूढोच्छेदः। अहीनपदे च यौगिके द्वादशोपसन्दोऽहीनस्येत्यत्र न हीनोऽहीन इति योगदर्शनात् वह्नियागमात्रस्य न द्वादशोपसदोऽपि रूढाहीनपदोपस्थाप्ययागविशेषस्यैवेति सिद्धान्तो भज्येत। अन्हि भवो हि न इत्यत्रापि योगसत्त्वेन विनिगमनाविरहादित्यत आह -- **गोपदस्येति**।

अलंवद्देति । अलं वदतीत्यलंवत् क्वपितमतीत्यलंवद इत्यर्थः।

यदि च नियता स्मृतिः प्रकारान्तरेण भवति तदा योग एव न रूढिः। रूढिन्यायेनैव कुमुदे धी-प्रयोगयोरभावादिति। गोपदस्य गवि वेदेऽहीनपदस्य कर्म्मविशेषे रूढिरेव लाघवात्। न तु गमेर्डोरन्हः खः क्रतावित्यनुशासनाद्योगोऽपि, डोः - खप्रत्ययोर्लोके कर्त्तरि कर्म्मविशेषे च शक्तिर्न क्लृप्ता अतः प्रत्यये शक्तिः नियामकञ्च गमिपदोत्तरत्वं अहःपदोत्तरत्वञ्च कल्प्यं, तथा च गौरवम्। एवं धेनुपदेऽप्येकैकस्यातिप्रसक्तत्वात् गोत्वविशिष्टधानकर्म्मणि रूढिरेव नियमतो गोत्वविशिष्टोपस्थितेः। न तु योगोऽपि दानु-भानु-कृशान्वादौ भिन्नार्थत्वेन नुप्रत्ययशक्तेरकल्पनात् गमेर्डोरन्हः खः क्रतौ दा-भाभ्यां नुर्धेट इच्चेत्यादिस्मृतिश्चालवड्डादिवत् कथञ्चिद्व्युत्पादनपरा।

अत एव भगवान् पाणिनिरर्थानुगमात् समुदायशक्त्यपेक्षया गौरवादुणादिप्रत्ययेषु न शक्तिरिति पञ्चपादिकाविहितानुणादिप्रत्ययान् उणादयो बहुलमित्येकेनैव सूत्रेण विहितवान्, यत्र तु प्रत्यये शक्तिस्तत्र प्रत्येकमेवासूत्रयत्।

उपलक्षणस्येति । गोत्वस्य शक्यत्वेन व्यक्तिः शक्या, गोत्ववदनन्यलभ्यत्वात् नागृहीतविशेषणान्यायाच्चेति। गोत्वमात्रं वृषभेऽतिप्रसक्तम्, आधानकर्मत्वस्य शक्यत्वे तस्योपाधितया नान्यतो व्यक्तिमति पश्वादिपदवत्। अतो धानकर्मत्वविशिष्टव्यक्तिविशेषणवानतिप्रसक्तः शक्यः। अतोऽनुगमार्थं गोत्वमुपाधिरित्यर्थः । **शब्देति** । धानकर्मांशे शब्दशक्त्युद्बोधितसंस्कारात् गोत्वांशे च केवलसंस्कारात् कथमेकदेशोद्बुद्धसंस्कारात् विशिष्टस्मृतिरिति चेत्, मैवम्। विशिष्टविषयकसंस्कारस्यैक-देशोद्बोधादेव उद्बुद्धसंस्कारात् विशिष्टस्मृतिरित्यर्थात् ।

अत एवेति । अनुभवेन गोत्वांशे समुदायधानकर्मांशे चावयवशक्त्या वाच्यः। अन्यथा समुदायेनैव धानकर्मोपस्थापने गोत्वस्य शक्यतावच्छेदकभावेनाशक्यानुभवस्यानुक्तिसंभवत्वात् । तथा सतीदमुक्तमित्यर्थः।

शक्तिरिति । पदान्नियमतः स्मृतेः श्रुतिसाध्यत्वाभावमुपलक्षणेति गोत्वविशिष्टं धानकर्मशक्य (४५८क) मित्याकारकेऽपि शक्तिग्रहे लाघवात् गोत्वांशेऽपि न शक्तिरित्यत आह -- **अन्यथेति** । शक्तिग्रहगोचरस्याप्यशक्यत्व इत्यर्थः ।

यत्तु धेनुपदे गोत्वं न शक्यं, किन्तु शक्योपलक्षणतया शक्त्युपाधिः, यत्र गोत्वं तद्धानकर्म्म शक्यं शक्यास्तूपलक्ष्या महिष्यादिव्यावृत्ता धानकर्म्मव्यक्तिविशेषा एव, अनुगमस्तूपलक्षमैक्यात्। न चैवं लाघवाद्गोत्वं शक्यं धानकर्म्मत्वमुपाधिः, उपलक्ष्यस्य गोत्वस्यातिप्रसक्तत्वात्। गोत्वविशिष्टधानस्मृतिस्त्वेकैव शब्द-संस्काराभ्यां जन्यते, न तूभयस्मृत्यनन्तरं परस्परमन्वयबोधः अवयवशक्तेरभावादिति। तन्न। शक्तिं विना नियतगोत्वोपस्थित्यभावादुपलक्षणैक्येन उपलक्ष्यैक्याभावाच्च। अन्यथा महिष्यादिव्यावृत्तधानकर्म्मत्वेऽपि न शक्तिः धान-गोत्वे शक्त्युपाधी, अग्रे च संस्कारादुपस्थितयो न शक्यम्। यदि चानुगतं विशेषणं शक्त्युपाधिर्व्विशेष्ये च शक्तिरननुगमातिप्रसङ्गाभावश्चोपाधिनैव, तदौपाधिककारणादिपदानां विशिष्टे शक्तिर्न स्यात्।

नन्चवयवात् पङ्कजनिकर्तृत्वानुभवः समुदायाच्च पद्मस्मरणं स्यान्न तु पङ्कजनिकर्तृपद्ममित्यनुभव इति चेत्, न। अवयव-समुदायस्मारितपङ्कजनिर्तृपद्मानां पङ्कजनिकर्तृ पद्ममित्यनुभवोऽवयव-समुदायाभ्यां सम्भूय जन्यते समुदायोपस्थितपद्मेन समं स्वार्थान्वयोऽवयवैर्व्वा अवयवजनितानुभवोपस्थितपङ्कजनिकर्तृत्वेन समं स्वार्थान्वयः समुदायेन वा अनुभाव्यते। आकाङ्क्षाद्युपेतशब्दानां तात्पर्य्यविषयोपस्थापितस्वार्थान्वयबोधकत्वनियमात्।

न च वाक्यान्तरे तथात्वादर्शनेन नैवं व्युत्पत्तिरिति वाच्यम्। वाक्यान्तरे हि समुदायशक्त्यभावेन तथा । अत्र तु समुदायशक्तिबलात् पदविधया वाक्यविधया वा एकस्मादेवोपस्थितयोः पङ्कजनिकर्तृ-पद्मयोरन्वयो बोध्यते समुदायेन पदैकवाक्यतावत् पङ्कजं कुमुदमित्यत्र समुदायेनैव पङ्कजनिकर्तृत्वमशक्यं स्वार्तपद्मसम्बन्धि लक्ष्यते। कुमुदे साधुत्वात् कथं तत्र लक्षणेति चेत्, न, समुदायस्य तत्रासाधुत्वात्।

अन्वयो भासत इति। तदुभयवैशिष्ट्यं स्मारयति तदुभयविशिष्टोर्थः स्मर्यत इति यावत् । न त्वन्यानुभवो जन्यत इति भ्रमः। किं तव्येऽनुभाव्यपदाभ्यामेवासंभवादिति । अवयवैर्वा समुदायेन वेत्यनवस्थायां वाशब्दोऽतस्तद्योरन्यतरेणैवानुभाव्यतापि समीहितसिद्धिः ।

वस्तुतस्तु उभाभ्यामेवानुभवो विनिगमकाभावादिति ध्येयम्।

समुदायेनैवेति । अवयवानां तत्र लक्षणाया वृत्तिद्वयविरोधात् पद्मत्वोपस्थितौ कुमुदानामनन्वयापत्तेश्चेति द्रष्टव्यम्।

यत्तु तत्र पद्मत्वमयोग्यताय नान्वेति योगादेव मुख्यया वृत्त्या कुमुदे पङ्कजनिकर्तृत्वं अनुभूयते इति तन्न, कुमुदेऽवयवशक्तेः समुदायशक्त्या ज्ञातया प्रतिबन्धात् तथैव तदवगमात्।

ननु यदा व्यक्तिवचनन्यायात् न कुमुदे धीर्न त्ववयवशक्तिरप्रतिबन्धात् तदा पङ्कजशब्दादुपस्थिते पङ्कजं पद्ममिति वाक्यार्थेऽयोग्यतया पद्ममपहाय पदवाक्यैकवाक्यतया पङ्कजनिकर्तृ कुमुदमित्यनुभव इति चेत्, तर्हि पद्मान्वितत्वेनोपस्थितस्य पङ्कजनिकर्तृत्वस्या-श्रयाकाङ्क्षा नास्तीति स्वतन्त्रोपस्थित्यर्थमवश्यं लक्षणा, यथा पुरोडाशकपालपदेऽधिष्ठानलक्षणा।

ननु प्रथममेवावयव-कुमुदपदैरन्वययोग्यतया स्मृतं पद्मं त्यक्त्वा स्वार्थान्वयानुभव इति चेत्। कुमुदपद-तदर्थयोग्यतादिज्ञानात् पूर्व्वमेव पङ्कजशब्दात् पङ्कजं पद्ममित्यनुभवात् विलम्बे हेत्वभावात्, स्थलपङ्कजन्तु विजातीयमेव, साजातयेऽपि तत्र लक्षणा।

यत्तु अयोग्यतया योगार्थो नान्वेति किन्तु योग्यतया रूढ्युपस्थितं पद्मत्वमेन्वीयते इति। तन्न। पद्मत्वस्य योगार्थगतत्वेन उपस्थित्या निराकाङ्क्षत्वात्। स्वतन्त्रोपस्थितये लक्षणाया अवश्यं वाच्यत्वादिति।

नन्वेवं पङ्कजपदस्येवापभ्रंशानामपि शक्तिस्ततो नियमेनार्थप्रतीतेः व्यवहाराधीनव्युत्पत्ते-रविशेषात्। अन्यथा असति वृत्त्यन्तरे तेभ्योऽर्थधीर्न स्यात्। न च लक्षणा, मुख्यार्थाबाधात् न चापभ्रंशेन स्मारितसाधुशब्दादन्वयबोधः, साधुशब्दमजानतामपि पामराणां ततोऽर्थप्रतीतेः तदर्थकसंस्कृतेनार्थाप्रतीतेश्च। शक्त्यारोपात्ततोऽर्थप्रत्यय इति चेत्, न। मानाभावात् व्यवहारादिनावृत्तशक्तिगर्हे बाधकाभावाच्च। न च शक्तिसाध्यं शक्त्यारोपाद्भवितुमर्हति, आरोपितादपि दहनादाहापत्तेः।

विळम्ब इति । यदि च तात्पर्यादिविलम्बादन्वयधीविलम्बस्तदा लक्षणां विनापि पङ्कजनिकर्तृत्वं कुमुदेऽन्वेति। उत्सर्गतस्तप लक्षणेति प्रकृतग्रन्थार्थः।

विजातीयमेवेति। अतोऽशक्यत्वात् तल्लक्षणेति भावः।

स्वतन्त्रेति। स्वतन्त्रपङ्कजपदेन पद्मत्वं लक्ष्यते । न तु समुदायेन उक्तयुक्त्या। यदि च कारणाभावात् पङ्कजनिकर्तृत्वानन्वयस्तदा पूर्वान्वयाधीरित्यवधेयः।

अथ ज्ञायमानकरणे प्रयोजकरूपवत्तया ज्ञायमानादेव फलं वाष्पे धूमारोपाद्व्यन्ह्यनुमिति-वदिति चेत्, न, तर्हि तद्वदेव फलस्यायथार्थत्वापत्तिः। अन्यथा अपभ्रंश एव शक्तिः साधुशब्द एव तथेति किं न स्यात्।

न च सादित्वात् देवदत्तादिशब्दवदाधुनिका एव तत्र शङ्केताः गवादिपदे त्वनादित्वात् शक्तिरित वाच्यम्। सजातीयप्रयोगजन्यप्रयोगत्स्य भ्रमाद्यजन्यत्वस्य वा अनादित्वस्यापभ्रंशेऽपि सत्त्वात्। तत्तद्देशोयापभ्रंशेऽपि शङ्केतयितॄणामस्मरणाच्च। न चापभ्रंशानां देशभेदेन एकत्रार्थे बहुत्वात् संस्कृतस्यैकत्वाल्लाघवेन तत्रैव शक्तिः, प्रमाणवती गौरवस्यापीष्टत्वात्। अन्यथा नानार्थोच्छेदः प्रतीत्यन्यथानुपपत्तिस्तुल्यैव।

ननूभयोः शक्तत्वे साध्वसाधुविभागाभावात् तद्व्यवहारविरोधः साधुभिर्भाषितव्यं नापभ्रंशितवै न म्लेचछितवै इत्यादिकवैदिकविधि-निषेधानुपपत्तिश्चेति चेत्, तर्हि शक्तत्वाविशेषेऽपि तदभियुक्तेन्द्रपाणिन्यादिप्रणीतव्याकरणोपगृहीतानामेव संस्कृतानां साधुत्वमस्तु, न ह्यपभ्रंशे तैः साधुत्वं स्मर्य्यते, तद्विषया एव साधुभिर्भाषितव्यमत्यादिविधयः तेषामेव धर्म्मोपयोगित्वं स्वभावात् बीजस्येवाङ्कुरे। तस्मादपभ्रंशोऽप्यर्थप्रत्यायकत्वाच्छक्त इति।

उच्यते। एकत्र शक्त्याप्यन्यत्र तदागोपात्तदर्थप्रतीत्युपपत्तावेकत्रैव शक्तिर्लाघवात् अनन्यलभ्यस्यैव शब्दार्थत्वात्। अन्यथा वृत्त्यन्तरोच्छेदः। तदाह भगवान् जैमिनिः 'अन्वयश्चानेकशब्दत्वमिति। सा च शक्तिः संस्कृत एव सर्व्वदेशे तस्यैकत्वात् नापभ्रंशेषु तेषां प्रतिदेशमेकत्रार्थे भिन्नाभिन्नरूपाणां तावच्छक्तिकल्पने गौरवात् पर्य्यायबहुतरत्वञ्चोभयत्रायि। न च देशभेदेऽपि प्राकृतस्यैकरूपत्वात् तत्रैव शक्तिः, संस्कृतप्रभवतत्समदेशिभेदेन तस्याप्यनेकत्वात्। एवमेकत्र शक्त्यारोपादर्थप्रत्ययोपपत्तौ नापभ्रंशे शक्तिः।

ननु म्लेच्छादीनां संस्कृतमजानतां कथं तच्छक्त्यारोपः। उच्यते। केनचिद्गौरिति शब्दे प्रयोक्तव्ये प्रमादाद्गावो शब्दे प्रयुक्ते व्युत्पन्नस्तेन गोशब्दमुन्नीय ततो गां प्रतीत्य व्यवहृतवान्, यथाहुः --

'अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः।।'

इति पार्श्वस्थश्च व्युत्पित्सुर्गावीशब्दादेव अयं गां प्रतीतवान् इत्यवगम्य गावीशब्दमेव गोशक्तत्वेन प्रतीत्य अन्येषां व्युत्पादको बभूवेति ततः प्रभृत्यपभ्रंशे शक्तत्वभ्रमः।

एवञ्च प्रथमव्युत्पन्नस्यापभ्रंशादेव स्मारितसाधुशब्दादर्थप्रत्ययस्तन्मूलकश्चाननुसिंहतासाधु-शब्दानामपि शक्तिभ्रमात् शक्तिमत्तया ज्ञायमानस्यैव शाब्दज्ञानहेतुत्वात्।

यत्तु जनकज्ञानस्य भ्रमत्वे शाब्दज्ञानायथार्थत्वं लिङ्गभ्रमजन्यानुमितिवदिति, तन्न, न हि शक्तिज्ञानयथार्थत्वं शाब्दप्रमायां प्रयोजकं, अनाप्तोक्ते व्यभिचारात्।

नापि जनकज्ञानभ्रमत्वेन अयथार्थत्वं भ्रमानुव्यवसाये व्यभिचारात्। प्रमाजनकत्वञ्च अपभ्रंशस्यावश्यकशाब्दप्रमाप्रयोजकयोग्यतादेर्यथार्थतद्बोधाद्वा न तु शक्तिज्ञानयथार्थत्वं तन्त्रं गौरवात्। अबाधितसंस्त्रगज्ञानजनकपदार्थोपस्थापकत्वादित्यन्ये। संसर्गबाधकप्रमाविरहादित्यपरे। ननु साधुत्वं न प्रतिपादकत्वं अपभ्रंशेतिव्याप्तेः।

एवं च प्रथममिति। प्रकृताभिप्रायं व्युत्पन्नस्य साधुशब्दस्मरणादन्यस्याशक्यारोपदिति विभागः।

अत्र वदन्ति। ननु (४५८ख) गावीशब्दार्थानुभवश्चेत्तदा शक्तिरेव अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छायाः सत्त्वात् सर्ववस्तुविषयत्वनियमात् ।

किं च गाविपदे लक्षणा स्यात् अपभ्रंशस्याबोधकतया स्वज्ञाप्यसम्बन्धसत्त्वात्। गम्भीरायामित्याद्यनुरोधेन शक्यसम्बन्धस्य लक्षणत्वाभावात् । तथा च गाविपदं लक्षे साध्यपि स्यात्। वृत्तेरेव साधुत्वरूपत्वात् ।

अत्र ब्रूमः -- अस्मात् पदादयमर्थो बोद्धव्य इतीच्छाईश्वरेण स्वातन्त्र्येणोच्चारितत्वं न शक्तिः। न च चैत्रपदव्याप्तिः द्वादशेऽह्नीत्यादितो नामत्वेनैव तेषामीश्वरेणोच्चारितत्वात् । न च नापभ्रंशेत्यादिस्तु तदपभ्रंशस्यापि तदुच्चरितत्वम्, न तु तदिच्छयोच्चारणाभावात् । इह नामपदार्थालोचनेनैव तथा तात्पर्यकोच्चारणसत्वात् तल्लक्षणा शक्यसम्बन्धाननुज्ञाप्यसम्बन्धः सर्वज्ञप्तिप्रयोजकसम्बन्धाश्रय-सम्बन्धपर्यवसन्नश्चेत् साक्षात्परंपरासाधारणशक्तिविषय- सन्बन्धपर्यवसन्न एवेति नातिप्रसङ्गः।

न च गौरवम्, व्यवहाररूपप्रमाणत्वादिति । नन्वनादिमप्रयोगो वेदस्य तदंशे चार्थवादरूपत्वात् । अतो हेत्वन्तरमाह -- **संज्ञेति**।

नापि यस्य यत्रानादिप्रयोग स तत्र साधुः, हेऽरयो हेऽलय इति वदन्तोऽसुराः पराबभूवुरिति वेदे श्रवणात् अलिशब्देऽपभ्रंशे गतत्वात्, संज्ञाशब्दाव्यापनात् लौकिकगौण-लाक्षणिकयोरसाधुत्वापत्तेश्च। तथाभ्युपगमे वेदेऽपि तयोः साधुत्वं न स्यात्। अनादित्वं सजातीयप्रयोगपूर्व्वकत्वं अपभ्रंशेऽपि नियमतस्तथात्वञ्च सर्गादौ स्वतन्त्रपुरुषप्रयोगेऽव्यापकं भ्रमाद्यजन्यत्वमपभ्रंशेऽपि।

ननु साधुत्वं जातिर्गत्वादिव्यापिका। न चानुपलब्धिबाधः, व्याकरणसंस्कृतश्रोत्रग्राह्यत्वात्। न च संज्ञाशब्दानामसाधुत्वापत्तिः, तत्रापि प्रकृति-प्रत्ययोहसम्भवात्। गाव्यादिशब्देऽपि तत्सम्भवात् साधुत्वञ्च स्यादिति चेत्, न। यत्रार्थे तथा सम्भवः तत्र तथैव गवादौ न तथेति तत्रासाधुत्वमिति चेत्, न, जातिरूपत्वे सप्रतियोगिकत्वानुपपत्तौ सर्व्वस्य सर्व्वत्र साधुत्वापत्तेः।

ननु गो शब्दः अश्वे प्रयुक्तः साधुरेव ज्ञापकस्तु न भवति तच्छक्तत्वेनाज्ञानादिति चेत्, एवं गावीशब्दोऽपि कयाचिद्व्युत्पत्त्या क्वचित् साधुरिति साधुत्वजातियोगात् गव्यपि साधुः स्यात्, प्रतिशब्दञ्च भिन्नतद्विषयजातिस्वीकारेऽननुगमः। तारत्वादेस्तु जातित्वेऽप्युत्कर्षरूपतया अबधिनिरूप्यत्वम्।

ननु नामत्वे न शक्याप्यनादिः प्रयोग इत्यत आह -- **लोकिकेति** ।

ननु गौणाद्यसाध्वेवेत्यत आह -- **तथेति** ।

नन्वनादि (४५९क) गौणं साध्वेव न तु सादीत्यत आह -- **अनादित्वमिति** ।

ननु गत्वादिव्यापकत्वे प्रत्येकवर्णे साधुत्वप्रत्ययापत्तिर्वाक्ये यथाप्रत्ययानुपपत्तिश्च । देवदत्तीयत्वाद्यनुमापकजातिसङ्करापत्तिश्चेति दूषणत्रयं स्फुततयोपेक्ष्य दूषणान्तरमाह -- **जातीति** ।

एवं गावीति । गंगणपतिमवितुं प्रीणयितुं शीलमस्येति गाविशब्दे साधुता । क्वचित् साधुत्वादेव च गव्यपि साधुताप्रतिपादकता चास्तीति गोपदवत् गविशब्दः साधुर्गव्यपि स्यादित्यर्थः ।

ननु जातिर्यदि न प्रतियोगिनिरूणनिरूप्यः स्यात्तदा तारत्वादिजातिरपीतरनिरूपणनिरूप्या स्यादित्यत आह -- **तारत्वादिरिति**। तत्रापि जातिर्नेतरनिरूपणनिरूप्या किं तूत्कर्षत्वं तथेत्यर्थः ।

नापि यज्ञप्रयोगार्हत्वं साधुत्वं एकमवच्छेदकं विना प्रतिशब्दमर्हत्वस्य दुर्निरूप्यत्वात्। साधुत्वेनैव यज्ञे विधानात्। चाण्डालाद्युच्चार्य्यमाणस्यापि साधुत्वात्। यज्ञाग्रहणेऽपि साधुत्वव्यवहाराच्च।

नापि धर्म्मजनकशब्दत्वं अपभ्रंशेऽपि गतत्वात् पतितोच्चार्य्यमाणस्यापि साधुत्वाच्च।

नापि वेदस्थशब्दत्वं अपभ्रंशेऽलिशब्देऽपि गतत्वात्, संज्ञाशब्दे तदभावात्। भाषायां सदवसश्रुव इत्यादेः साधुत्वानुशासनविरोधात् सर्व्वेषां साधुत्वेन सप्रतियोगिकत्वानुपपत्तेश्च। न हि क्वचिद्विषये तद्वेदस्थं क्वचिन्नेति युज्यते, विरोधात्।

नापि व्याकरणव्युत्पाद्यशब्दत्वं संज्ञाशब्दे तदभावात् साधुत्वेन सिद्धे व्याकरणप्रवृत्तेः साधुत्वान्वाख्यापकस्य व्याकरणशब्दवाच्यत्वात्।

साधुत्वेनैवेति । साधुभिर्भाषितव्यमित्यादि शक्तित एवेत्यर्थः।

चण्डालेति । एतच्च फलोपधानपक्षे स्वरूपयोग्यताया अर्हत्वस्येत्यनेनैव निरस्तत्वादिति।

अपभ्रंशेऽपीति । परोपकारार्थस्य व्यापारमात्रस्य तथात्वादिति भावः ।

पतितेति । घटमानयेत्यादेरिति शेषः। इदमद्वयं फलोपाधानपक्षे स्वरूपयोग्यतापक्षे तदवच्छेदकरूपज्ञानादसंभवः । संभवे वा तदेव लक्षणमुपजीव्यत्वादिति द्रष्टव्यम्।

नन्वर्थवादतया (४५९ख) देवत्वं विवक्षितमतो दोषान्तरमाह -- **अत्रेति** । ननु मानत्वे तदपि वेदस्थमतो दोषान्तरमाह -- **भाषायामिति** ।

ननु संज्ञाशब्दे निर्विभक्तिके तु व्याकरणव्युत्पाद्यत्वमेवेति क्वातिव्याप्तिरत उत्पात्तावन्योऽन्याश्रयदोषान्तरमाह -- **साधुत्वेनेति** ।

आप्तोपदेशादित्यंनेन च त्रिःप्रामाणिककथनादवशिष्टं त्रयमेतत्प्रपञ्चः। तत्रापि यवविरहादौ वाक्यशेषस्य व्यवहारयोः सत्प्रतिपक्षितयोरन्यतरस्मिन्ननुकूलतर्कोत्थापकतया व्यवहारादेव शक्तिग्रहः । स चानुमानात्मकोऽऽत्मा कोश व्याकरणे तु शब्दविधया प्रसिद्धोऽर्थपदसामानाधिकरण्यविधया वाप्तोपदेशानुमानं वा। प्रत्यक्षं तु न तत्र संभवत्येवेति ध्येयम्।

उच्यते। यः शब्दो यत्रेश्वरेण सङ्केतितः स तत्र शक्तः साधुरित्युच्यते, परेषां शब्दार्थयोः स्वाभाविकसम्बन्धवत् अस्माकमीश्वरसङ्केतस्य नियामकत्वात् यथा या काचिदोषधीनकुलदंष्ट्रा स्पृष्टा सा विषं हन्ति तथा प्रतिपादकत्वाविशेषेऽपि ईश्वरसङ्केतिता एव शब्दा धर्म्मोपयोगिनः स्वभावात् तद्विषया एव 'साधुभिर्भाषितव्यमित्यादिविधयः। ईश्वरसङ्केतज्ञानञ्च व्यवहारात् उपमानात् प्रसिद्धार्थपदसामानाधिकरण्यात् आप्तोपदेशात् यववराहेन्द्रादिशब्देषु वाक्यशेषात् कोषात् तदभियुक्तेन्द्रपाणिनयादिप्रणीतशब्दानुशासनाच्च तेषां साध्वसाधुविभाग एवाधिकारात्। तदुक्तं -- 'तत्र तत्त्वमभियोगात् स्यादिति।

'अभियुक्ताश्च ये यत्र यन्निबद्धप्रयोजनाः। ते तत्र गुणदोषाणां ज्ञाने चाधिकृता मताः'।। इति।

न च साधुत्वे सिद्धे शब्दानुशासनं तस्मिंश्च सति तद्धीरित्यन्योन्याश्रयः, पूर्व्वपूर्व्वशब्दान्वाख्यानेन साधुत्वमवगम्य उत्तरोत्तरानुशासनप्रवृत्तेः। सर्गादौ भगवत एव तत्प्रणीतव्यारणाद्वा साधुत्वनिश्चयेन उत्तरव्याकरणप्रवृत्तिः। विश्राम-विश्रमशब्दयोश्च साधुत्वे पाणिनि-चन्द्रगोमिव्याकरणविरोधे 'वौश्रमेर्व्विकल्प इष्यत इति महाभाष्यकारवचनादुभयमपि साधु।

ननु मैत्रादिशब्दानामीश्वरसङ्केताभावादसाधउत्वे यज्ञादौ न प्रयोगः स्यादिति चेत्, न। 'द्वादशेऽहनि पिता नाम कुर्य्यादित्यनेन सामान्यतस्तेषामपीश्वरसङ्केतविषयत्वात्।

ननु वासुदेवशब्दस्य वसुदेवापत्ये व्याकरणेन व्युत्पादनात् तत्रैव साधुत्वं न त्वाधुनिकसङ्केतविषये। अथ तत्र प्रकृति-प्रत्ययविभागपरिकल्पना कर्त्तव्या, तर्हि गाव्यादिशब्देऽपि तथात्वं सम्भवतीति तस्यापि साधुत्वं स्यादिति चेत्, न। 'द्वादशेऽहनि पिता नाम कुर्य्यादिति सामान्यतः तस्येश्वरसङ्केतितत्वेन तस्य साधुत्वनिश्चयात् व्याकरणस्य तद्विसेषविषयत्वमस्तु न तु गावीशब्दे तथा।

प्रकृतिप्रत्ययेति । वासुदेवादिपदं प्रकृतिः प्रत्ययो विभक्त्यादिर्यत्राश्रूयमाणस्तत्र लुप्तः कल्यत इत्यर्थः।

तर्हीति । गावीपदमपि प्रकृतिः ततो विभक्तिरिति तत्रापि संभवतीत्यर्थः।

द्वादश इति। तथा चार्थवत्वेन चैत्रादिशब्दः स्यादिति प्रकृतित्वमतो विभक्तिकल्पनायुक्तम्। न तु गविशब्दे तस्यानर्थक्तवेन प्रातिपदिकत्वाभावादित्यर्थः ।

अथ शास्त्रकारसङ्केतितशब्दादश्वादिषु सङ्केतितगवादिशब्दाद्वा कथमर्थप्रत्ययः शक्ति-तदारोप-वृत्त्यन्तराणामभावादिति चेत्, न। येन शब्देन उपस्थितेऽर्थे गवादिशब्दसङ्केतग्रहः तस्मादेव गवादिपदेन स्मारितादर्थप्रत्ययात् चेष्टास्मारितपदादिवेति सम्प्रदायः।

अत्र वदन्ति, नैश्वरसङ्केतितत्वं साधुत्वं तस्य निष्प्रतियोगिकत्वेन सर्व्वत्र सर्व्वस्य साधुत्वापत्तेः। नापि यः शब्दः यत्रेश्वरेण सङ्केतितः स तत्र साधुः गौण-लाक्षणिकयो-रसाधुत्वापत्तेः। केवलयोः प्रकृति-प्रत्ययोः बाधति ग्रामगाम इत्यादेश्च साधुत्वापत्तेः। बाधतीत्यादौ समुदायस्यासङ्केतितत्वादसाधुत्वे बाधत इत्यस्यापि साधुता न स्यात् प्रकृति-प्रत्ययोः प्रत्येकं सङ्केतितत्वात् अन्वयस्य प्रत्येकशक्तिलभ्यत्वात् प्रत्युत प्रकृति-प्रत्ययसमुदायो न साधुः स्यात्। समुदायस्यासङ्केतितत्वात् ईश्वरसङ्केतमज्ञात्वाऽपि व्याकरणव्युत्पाद्यत्वमवधार्य्य साधुत्वव्वयवहाराच्च। शक्तत्वं साधुत्वमित्यपि न, ईश्वरसङ्केतोक्तदोषग्रासात्।

शक्तीति । शक्तीश्च ईश्वराभिप्रायः। पराभिप्रायनिश्चयादेव न तदारोपः। शक्त्याभावादेव न वृत्यन्तरमित्यर्थः ।

येनेति । यत्र (४६०क) पदाभिप्रायनिश्चयस्तन्मूलकाग्रिमशब्दप्रयोगे तु तदारोपः। एवं क्वचित् वृत्यन्तरमपीति भावः।

नन्वीश्वरसङ्केतबलादर्थोपस्थापकत्वम्, तच्चेत् साक्षात्परम्परया वेति क्व गौणाद्यव्याप्तिरित्यस्वरसात् दोषान्तरमाह -- **केवलेति** ।

ननु फलसाधुत्वं सङ्केतित्वं बाधतीत्यादि तु वाक्यं तत्साधुत्वमन्यदेवेत्यपरितोषादाह -- **ईश्वरेति**। शक्तत्वं संकेतित्वमित्यर्थः ।

व्याकरणेति । अस्यायमाशयः -- ईश्वरसङ्केतित्वं वृत्तिमत्वं वा तदसाधुत्वमिति न युक्तम्, केवलस्य साधुतापत्तेः।

न चेष्टापत्तिः । केवलस्यापि यज्ञे प्रयोगापत्तेः। तदर्थमेव च साधुत्वविचारात् अन्यथा प्रतिपादकत्वाविशेषे तद्विचारस्य काकदन्तविचारत्वापत्तेः। प्रयोगश्च वाक्यस्यैवेति तत्साधुत्वमेवेहापि विचार्यते । नेश्वरसङ्केतित्वम्, असंभवात्। अतो व्याकरणव्युत्पाद्यत्वमेव साधुत्वम्।

अत्रोच्यते। व्याकरणव्युत्पाद्यत्वं साधुत्वं यः शब्दो यस्मिन्नर्थे व्याकरणाव्युत्पादितः स तत्र साधुः। अत एव गावो शब्दो व्याकरणोक्तव्युत्पत्त्या यमर्थं प्रतिपादयति स तत्र साधुरसाधुरन्यत्र नाम्नामप्युणादयो बहुलमित्यादिना व्युत्पादनात्। केवलप्रकृतिप्रत्ययोर्व्वाधति-ग्रामगाम इत्यादेश्च न व्युत्पाद्यत्वं तत्प्रयोगस्यानभिधानात् निषेधाच्च। गौण-लाक्षणिकयोश्च यथा प्रतिपादकत्वं तद्व्युत्पादनमपि तत्र तथेति तयोरपि साधुत्वं तस्माच्छक्तत्वमीश्वरसङ्केतितत्वं वा अज्ञात्वापि साधुत्वव्यवहारात् ज्ञात्वाप्यव्यवहाराच्च न तत्साधुत्वं किन्तु व्याकरणपरिगृहीतत्व-तदभावाभ्यामेव प्रामाणिकानां साध्वसाधुव्यवहारात् तावेव ते।

न च साधुशब्दव्युत्पादकत्वमेव व्याकरणत्वं इत्यात्माश्रयः, शब्दगुण-दोषविद्भिरभियुक्तैः प्रकृति-प्रत्ययादिकल्पनया शब्दान्वाख्यायकस्य व्याकरणत्वात्। न च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वं तद्व्युत्पाद्यत्वे साधुत्वं इत्यन्योन्याश्रयः, पूर्व्वपूर्व्वव्याकरणतः साधुत्वमवगम्य उत्तरोत्तरव्याकरणेन व्युत्पादनमित्युक्तत्वात्।

ननु तद्बीजनकतावच्छेदिकायाः शक्तेः तद्बीजनकताविषयकेश्वरसङ्केतस्य वा ज्ञानादर्थप्रत्यय इत्यावश्यकत्वात् । लाघवाच्च तद्बीजनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु किं शक्तेरीश्ररसङ्केतस्य वा ज्ञानेन। अन्यथा मीमांसकस्य शक्तिज्ञानादर्थप्रत्ययो नैयायिकस्येश्वर-सङ्केतज्ञानादिति व्यभिचारेणैकस्यापि कारणता न स्यादिति।

किं च वाक्यासाधुत्वार्थं तस्यावश्यं त्वया निर्वाच्यम्। अतो न पदसाधुत्वाय लक्षणान्तरम्।

यत्तु पदं साधु, ईश्वरसङ्केतित्वं ज्ञानत्येत्यादि दूषणम्, तच्च पदज्ञाने व्याकरणव्युत्पादनस्याज्ञानात् प्रातिपदिकत्वाज्ञाने प्रत्ययाज्ञानादिति ।

नाम्नामपीत्यादि । समाधिसौकर्यादुक्तम्। केवलस्यासाधुत्वात् विभक्त्यन्तस्य व्याकरणव्युत्पाद्यत्वादर्थत्वेन प्रातिपदिकात् (४६०ख) विभक्तिविधानात्। अतो नापभ्रंशस्य व्याकरणव्युत्पाद्यत्वेऽपि क्षतेरभावादिति ध्येयम्।

ज्ञप्तावन्योऽन्याश्रयमाशङ्क्य निषेधति -- **न चेति।** तद्बीजनकत्वं तद्बीजननरूपयोग्यत्वमेव। अन्यथा अतिप्रसङ्गादिति।

अत एव लौकिकानां शक्तीश्वरसङ्केताज्ञानेऽपि वृद्धव्यवहारादर्थज्ञाने शब्दस्य जनकत्व-मवधार्य्य अग्रे शब्दादर्थप्रत्ययः। न चैवं लक्षणोच्छेदे गङ्गापदात् विलम्बितार्थधीर्न स्यादिति वाच्यम्। लाक्षणिकस्याननुभावकत्वात्, तथात्वेऽपि तीरज्ञानजनकत्वेन ज्ञातस्य न तीरज्ञापकत्वं किन्तु प्रवाहज्ञानजनकत्वेन लाघवात्।

अथ ज्ञानजनकता ज्ञाप्यसम्बन्धाधीना प्रत्यक्षादौ तथा दर्शनादिति सम्बन्धत्वेन शक्ति-सङ्केतयोरन्यतरसिद्धिरिति चेत्, न। तद्धीजनकत्वेन ज्ञातत्वस्यैव सम्बन्धत्वात्। न च द्धीजनकत्वमेव न गृह्यते सम्बन्धज्ञानं विनेति वाच्यम्। तवापि ज्ञानजनकत्वज्ञानेनैव प्रत्यक्षादिवदत्रापि सम्बन्धत्वेन शक्तिकल्पनात्। अन्यथा अन्योन्याश्रयः सम्बन्धज्ञाने सति ज्ञानजनकत्वज्ञानं तस्मिन् सति सम्बन्धज्ञानात्। यथार्थतद्धीजनकत्वज्ञानं यत्र भवति तत्र तत्पूर्व्वं सम्बन्धोऽस्त्येवेति चेत्, अस्त्येव पूर्व्वपूर्व्वेषां तद्धीजनकत्वेन ज्ञातत्वस्य पूर्व्वमपि सत्त्वात्। एतावतापि शक्तिः सङ्केतो वा सम्बन्धोऽस्तु तथात्वेऽपि तद्बोधस्य नार्थप्रत्यायकत्वं गौरवात्। किन्तु तद्विषयदीजनकत्वज्ञानस्यैव, एवञ्च तद्वीजनकत्वेन ज्ञातं यत्पदं यदनुभवं जनयति तस्यैव तत्र शक्तत्वं न तु शक्तिरीश्वरसङ्केतोवेति।

उच्यते। देवदत्तादिपदादर्थबुद्धौ सङ्केतज्ञानस्य कारणतावधारणात् अन्यत्रापि तत्कल्पनात्। न ह्यस्माच्छब्दादयमर्थो बोद्धव्य इति यस्तत्र सङ्केतः तद्बोधं विना ततस्तदर्थप्रत्ययः, सङ्केतज्ञानात् पूर्व्वं तद्धीजनकत्वस्य तद्ग्रहस्य वा असम्भवात्। सादिपदे तथा अनादिपदे त्वर्थप्रत्ययस्य अन्यथापि भावात् न तत्कल्पनेति चेत्, न। पदत्वस्यैव प्रयोजकत्वे सम्भवति तत्र विशेषणे गौरवात् सङ्केत एव मुख्या वृत्तिः तात्पर्य्यनिर्व्वाहकत्वात् अन्वयप्रतियोग्युपस्थापकत्वाच्च।

यदि स्वरूपयोग्यतावच्छेदको धर्मः, स च प्रातिस्विकरूपेणोपस्थितो हेतुरित्यर्थः। तेन रूपेण ग्रहे व्यभिचारान्तरमाह -- **अत एवेति** । **नन्विति** । हेतुमित्यन्ते शेषः।

देवदत्तेति। तद्विजनकत्वं जननयोग्यता, सा च तदवच्छेदकधर्मः। तदवच्छिन्ना वा सेत्युभयथा तद्धर्मज्ञानमपेक्षते । तद्ज्ञानमपि न विशेषाकारेण।

लक्षणा च वृत्त्यन्तरं यत्र वाच्यार्थान्वयानुपपत्त्या वाच्यसम्बन्धोपस्थापिते वाक्यार्थान्वयः, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे। तदुच्यते --

'वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः। तत्सम्बन्धवशप्राप्तस्यान्वयात् लक्षणोच्यते।।' इति।

प्रत्येकज्ञानव्यभिचारस्योक्तत्वादिति। घटपदं घटानुभवजनकतावच्छेदकधर्मवदित्याकारः शक्तिग्रहः। अत एव चावच्छेदकधर्मशब्दार्थयोः सम्बन्धरूपः। तथा च तथा शक्तिग्रहे तत्सम्बन्धितावछेदकोत्तरघटत्वज्ञाने सम्बन्धिनोऽर्थस्य स्मरणम्, सम्बन्धितावच्छेदके हस्तित्वावच्छिन्नग्रहे हस्तिपकस्मृतिवदवच्छेदकत्वेन गृहीतः सम्बन्धः । शक्तिरूपपदार्थान्तरं वा भगवदिच्छा वा पर्यवस्यतीति सन्देहे इच्छायास्तथात्वकल्पनात् स वै कल्प्यते । लिप्तायां च तस्यां तत्तदिछाया अनुनुगमेन लाघवात्, अनुगत्वाच्च। भगवदिच्छैव कल्प्यत इत्यर्थः।

ननु मुख्येति विशेषणस्य (४६१क) व्यावर्त्यमप्रसिद्धमित्यत आह -- **लक्षणा चेति** ।

सर्वमतसाधारणं लक्षणस्वरूपमाह -- **यत्रेति** ।

वाच्यस्येति । वाक्यार्थोऽभिधेयार्थे सम्बन्धानुपपत्तिः। एतेन विधौ न परः शब्दा इति सचितम्।

न च गौण्याद्यतिव्याप्तिः, तस्या अपि लक्षणाप्रभेदत्वात् सादृश्यात्मकशक्यसम्बन्धस्वरूपत्वात् गोबलीवर्दन्यायात् गौणलाक्षणिकव्यवहारो बलीवर्दव्यावृत्तस्त्रीगवीवच्च गौणी व्यावृत्तविशेषणस्य अग्रे निर्वचनम् । नतु लक्षणे। लक्षणस्य तस्य तस्य तूक्तस्यैवानुसर्तव्यत्वात् । यद्वा गौण्यपचारादीनां भेदेऽपि विभाजकोपाधिरन्वयं साधारणो निरुक्त इति द्वे एव वृत्ती विवक्षिते । अग्रेत्वव्यावर्तकं लक्षणणुक्तम्। लक्षितलक्षणा तु स्फुटैव। लक्षणा लक्ष्यपदं सम्बन्धान्तर्भाव्य द्विरेफपदेनार्थोपस्थापनात् ।

न च लक्ष्यपदादेवार्थोपस्थितिः द्विरेफपदमभिव्याहृतविभक्ते तदुपस्थापितभ्रमरपदार्थगतत्त्वार्थ-बोधकत्वे व्युत्पत्तिविरोधादिति भावः ।

अथ तीरे शक्तिरेव शक्तिग्राहकव्यवहारस्य मुख्य-लक्ष्यसाधारणत्वात् पदानां सम्भूय वाच्यार्थान्वयबोधकत्वव्युत्पत्तेः पदजन्योपस्थितेः शक्तिसाध्यत्वात्। अन्यथा न तत्र शाब्दत्वं तात्पर्य्यं वा तयोः शक्तिनियतत्वात्।

किञ्च तीरे यदि तात्पर्य्यमवधृतं तदा तन्निर्व्वाहकत्वेन शक्तिरेव कल्प्या क्लृप्तत्वादक्षादिपदवन्नानार्थतैव युक्ता न त्वक्लृप्तवृत्त्यन्तरं कल्प्यत इति।

उच्यते। गङ्गापदस्य लक्षणीयतीरादिसहस्रेषु प्रत्येकं शक्तिकल्पनं तद्ग्रहार्थं लक्षणीयेषु प्रत्येकं वृद्धव्यवहारान्तरापेक्षा स्यात्। तथा च गौरवमननुभवश्च। लक्षणा तु शक्यसम्बन्धस्वरूपैका लक्षणीयविषयकवृद्धव्यवहारान्तरानपेक्षा चेति लाघवात् सैव युक्ता।

न च गौरवमपि नाय्यं प्रामाणिकत्वात् लक्ष्यत्वाभिमतान्वयबोधस्य शक्तिं तद्ग्रहं वा विनानुपपत्तेः लक्षणायाः क्वापि कारणत्वाग्रहादिति वाच्यम्। शक्तिं विनापि तीरान्वयबोधोपपत्तेः। तथा हि - व्युत्पन्नो निरूपिताप्तभावस्य गङ्गायां घोषः प्रतिवसतीति वाक्यं श्रुत्वा विमृशति इदं प्रमाणं आप्तोक्तत्वात् सम्भवति चेदं तथा, यथा वस्त्रेण पिधेहीत्यत्र कर्म्मत्वापन्ने द्वारे अध्याहृते योग्ये इतरपदैः स्वार्थान्वयो बोध्यते। तथा शक्त्या गङ्गापदस्मारितमुख्यार्थस्मारिते तीरे योग्याकाङ्क्षिते इतरपदैः स्वार्थान्वयबोधोऽत्रापि सम्भवति इति ततोमुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वयबुद्धिरस्य उत्पद्यते।

एवञ्च तीरान्वितवाक्यार्थबुद्धिः तीरप्रतिबद्धवृद्धव्यवहारादिदर्शनं विनैव जायते पदानां स्मृतयोग्यान्वितस्वार्थप्रतिपादनस्य प्रागेव व्युत्पन्नत्वात्।

संभूयेति । लाक्षणिकत्वे त्वननुभावकतया तद्भङ्ग इति भावः।

हेत्वन्तरमाह -- **पदेति** । शाब्दबोधानुकूलपदजन्योपस्थितेरित्यर्थः। तत्र वकारः पूरणीयः। लक्षणीयति रादिति । न च लक्ष्यसहस्रस्य प्रथमलक्षणाकल्पने तदनुपस्थितिः (४६१ख) तदनीं शक्तिकल्पनेऽपि यदोक्तगोरवप्रसन्धिस्तदा तत्कल्पनमित्यग्रे स्फुटमेवेति भावः।

तस्यैवेति। वस्तुतः शक्यसम्बन्धस्तस्य स्मारकत्वम्। न च कल्प्यं क्लृप्तत्वात् तज्जन्यस्मृतेः शक्त्यनुकूलत्वं धर्ममात्रं कल्प्यते । न तु शक्तिर्धर्मिणीति लाघवम्।

एवञ्च तीरस्मृत्यनुभवयोः शक्यसम्बन्धज्ञानादेवोपपत्तेः न शक्तिः स्वार्थसम्बन्ध एव च लक्षणा। पश्चात्तु परम्परया गङ्गासम्बन्धितीरप्रतिपत्तये अनेनाप्तेन गङ्गापदं प्रयुक्तमिति तात्पर्य्यधीर्जायते। गङ्गास्मारिततीरान्वयबोधश्च न तात्पर्य्यज्ञानमपेक्षते न्यायत एव तीरस्य प्रथमं वाक्यार्थान्वयबोधोत्पत्तेः।

अथवा निश्चिते स्वार्थसम्बन्धिनोऽन्वये तद्विशेषज्ञानार्थं तदपेक्षास्तु, न च तदर्थमपि, योग्यतादेरेव तद्विशेषलाभात्। अन्यथानुपस्थिते विशेषे तात्पर्य्यस्यावगन्तुमशक्यत्वात्। शक्तिस्मारितशक्यसम्बन्धो वा तज्जन्या शक्यसम्बन्धस्मृतिर्व्वा लक्षणा उभयथापि लक्षकपदस्य लक्ष्ये तात्पर्य्यज्ञानं लक्षणायामनुपयुक्तमेव। उक्तन्यायेन शब्दात् परम्परया अशक्यस्मृतेस्तात्पर्य्यग्रहात् पूर्व्वमेव क्लृप्तकारणादुपपत्तेः। शक्त्योपस्थापितार्थे शब्दतात्पर्य्यात् लक्षणेति तात्पर्य्याद्धि वृत्तिरिति च लक्षणास्थले लक्ष्ये वस्तुतस्तात्पर्य्यमस्तीत्येवम्परम्।

किं च गङ्गापदजन्यतीरस्मृते शाब्दबोधानुकूलत्वमुभयपक्षसाधारण्यात् क्लृप्तमेव । तस्यास्तु स्वरुपतः कारणतश्च क्लृप्तशक्यसम्बन्धजन्यत्वं कल्प्यते । क्लृप्तशक्तिजन्यत्वं गौरवात् । अग्रिममतेऽप्येष एव निगर्वः।

शब्दश्राविणोऽर्थानुभवादर्थापत्यादिकारणता कल्पनीया। क्लृप्तायां च तस्यामवच्छेदकतया पदार्थान्तरमीश्वराभिसन्धिर्वा शक्तिपदार्थः कल्पनीयः। सैव च तद्भावभावित्वमात्रेण शक्यकल्पना। तावन्मात्रेण पौर्वापर्यनियममात्रसिद्धेः । स च कारणतत्कारणसाधरण इत्यन्यथासिद्धिशङ्कानवकाशे अनन्यथासिद्धतया प्रथमकल्प्यो व्यवतिष्टते। प्रकृते त्वध्याहृतवत् स्मृतस्य पदान्तरैरेवानुभवसंभावनया अन्यथासिद्धतया स्मारकतामात्रेण हेतुतया शक्तिकल्पना। तन्नियमेनान्यथासिद्धिग्रहध्रौव्यादित्यखण्ड-वाक्यार्थः। अग्रेऽप्येवमेवेति भावः।

पश्चात्त्विति । तात्पर्यं विना लक्षणा (४६२क) कल्पनुमन्वायानुभवश्च न भवतीति न न्यायतो योग्यतावशतश्च क्वचिद्भावे क्वचित्तात्पर्यतो विनिगमनापि तन्नियमं कल्पयतीत्यत्रापि वा तद्ग्राहकप्रकरणादिनैव तत्संभवादिति भावः । यत्र तु न तथेति तुल्यवत् प्रयोगेनैकमवच्छेदकमित्यर्थः ।

शक्येति । शक्यान्वयानुपपत्तिज्ञानस्य लक्ष्यान्वयानुभवकारणत्वादिति भावः।

नन्वेवं तात्पर्य्यानपेक्षणे यत्र तीरं नीरञ्चान्वययोग्यं तत्र कदाचित्तीरान्वयोऽपि बोध्येतेति चेत्, न। शक्त्युपस्थापितेन योग्याकाङ्क्षितेनैवान्विताबिधानमिति व्युत्पत्तेः। शाब्दत्वं तु तीरस्याध्याहृतस्येव इतरपदैस्तीरान्वितस्वार्थान्वयाभिधानात्। तदेवं वृद्धव्यवहारादिदर्शनं विनैव तीरादौ लक्षणेति स्थितम्।

अथ वा गङ्गायां घोषः प्रतिवसति तमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य तीरोषितघोषानयने प्रवृत्तिमुपलभ्य किं तीरेऽपि गङ्गापदस्य शक्तिरुत स्वार्थेन सम्बन्धात् स्मारिततीरे तात्पर्य्यमात्रं, तीरान्विताभिधानन्तु पदान्तरैः, एवमप्ययोग्यार्थपरत्वाभावेन प्रामाण्यादाप्तोक्तत्वोपपत्तेरिति विचिकित्सन् बालः तीरादौ न शक्तिः। तथा सत्येकार्थसम्बन्धिषु बहुष्वेकपदस्य बह्वी शक्तिरेवं पदान्तरेष्वपि तेषु तेषु च शक्तिग्रहार्थं वृद्धव्यवहारापेक्षा च। तथा च गौरवमतः स्मार्थसम्बन्धिनि तीरादौ तात्पर्य्यमात्रं लाघवादिति तत्र तत्र लक्षणामेव कल्पयति। यस्य चैवं विमर्शः प्रथमं लाक्षणिकपदश्रवणेन जायते तस्य तत्र शक्तिबुद्धावपि यदा लक्षणाख्यव्यावृत्त्यन्तरज्ञानं पूर्व्वोक्तन्यायेन जायते तदा प्रथमावगतशक्तिज्ञानं मम भ्रम इति कल्पयति लाघवात्। अन्यत्र तु यत् प्रथमावगतस्य सत्यत्वकल्पनं तदुपपादककल्पनञ्च तल्लाघवादेव। अत्र तु न तथा। अन्यथा सम्बन्धिसहस्त्रेष्वपि शक्तिकल्पनाप्रसङ्गात्।

ननु स्वार्थानुभवे पदानां हेतुत्वात् लाक्षणिकस्याशक्तत्वेन तदननुभावकत्वात् तीरानुभावकशब्दाभावात् कथं शाब्दत्वमित्यत आह -- **शाब्दत्वमिति**।

इतरान्वितस्वार्थानुभावकत्वस्य पदे क्लृप्तत्वात्। तीरान्वितानुभवस्य इतरपदादेव भावादिति भावः।

अध्याहृतस्यैवेति। यदि अर्थाध्याहारस्तदा स्फुटमेव। यदि च पदाध्याहारः तदा तदुपस्थापकशब्दत्वेन आक्षेपात् । तत्त्वं च शक्तलाक्षणिकसाधारणमिति शक्तत्वेनाज्ञानात् तस्याननुभावकत्वात् उभयथापि पदान्तरादेव अनुभव इति भावः।

यस्य चैवमित्याद्युपलक्षणम्। यदा प्रथमं लक्ष्य एव शक्तिः शक्य एव लक्षणां कल्पयति तदा प्रथमकल्पनं भ्रम इति कल्पयतीत्यपि द्रष्टव्यम्। उभयशक्तवेलादिपदेऽपि यद्येते लक्षणां कल्पयन्ति (४६२ख) तदा तत्रापि विशेषदर्शने प्रथमकल्पनां त्यजतीत्यपि द्रष्टव्यम्।

अन्यत्र अन्यथाख्यादौ, **तदुपपादकेति** दोषकारणत्वमित्यर्थः।

एवञ्च लक्षणास्थले यस्य प्रयोज्यव्यवहारादाद्यावुत्पत्तिः तीरादौ स यदा तीर-नीरयोरन्वयबोधयोग्यप्रयोगे तीरे व्यवहारं पश्यति तदा तत्रैव शक्तिः। तीरधीस्तु प्रयोज्यस्य लक्षणवशात् मम तदनाकलनात्तत्र शक्तिज्ञानं भ्रम इति कल्पयति। यदा तूभयानुगतमेकमेवावच्छेदकमस्ति उभयत्र प्रयोगश्च तत्रोभयत्र शक्तिरेव न लक्षणा तुल्यवद्व्युत्पत्तेरेकत्र मुख्यत्वोपमर्हे हेत्वभावात्। यत्र तु न तथा तत्रानेकार्थत्वमेव। अक्षादिपदे तावदन्यतरत्वं तत्राप्यनुगतमस्तीति चेत्, न। तावदन्योन्याभाववदन्यत्वं हि तत्।

न च तावदन्योन्याभाववदन्यत्वेन रूपेण तावतामक्षपदादवगतिः, किन्तु पाशकत्वादिनैव।

किञ्च यदि तीरेऽपि शक्तिस्तदा न तीरमात्रे। किन्तु गङ्गातीरे तथा च विशिष्टशक्तौ विशेषणे शक्तिरावश्यकौ नागृहीतविशेषणान्यायात्। अथ लक्षणापक्षे यथा प्रवाहेणोपलक्षणेन व्यावृत्ततीरविशेषस्यान्वयो न तु तीरान्तरस्य तथा प्रवाहोपलक्षिते तीरे शक्तिरस्तु। न तु तीरे प्रवाहेऽपीति चेत्, न। गङ्गापदशक्तौ प्रवाहस्य शक्यत्वेन विशेषणत्वे सम्भवति नोपलक्षणत्वं विशेषणत्वासम्भवे सत्येव उपलक्षणत्वादतः प्रवाह एव शक्तिः।

तत्रोभयत्रेति। यद्यप्येतावतैव सम्यक् तथापि यत्रोभयत्र तुल्यः प्रयोग इत्येव व्यापकं, तद्विभागस्तु यद्येकमवच्छेदकं तदा न नानार्थता, यदि तु तन्नाना तदा नानार्थतेति भावः।

न च तावदिति। वस्तुतस्तावदन्यान्यत्वं न सर्वनानात्वव्यापकं अर्थशब्दस्य धन-प्रमेयवाचकस्य तावदन्याप्रसिद्ध्या तदभावेन नानार्थत्वस्यैर्यादिति द्रष्टव्यम्। एकत्र शक्तिनिश्चये सत्यपरत्र प्रयोगाप्राचुर्यं लक्षणावीजमुक्तलाघवस्यापि तदपेक्षणादन्यथा वेलापदादावुभयत्र शक्तावन्यत्र लक्षणायां विनिगमकं न स्यादित्यवधेयम्।

एतदवष्टम्भेनैव **किञ्चेत्यादिग्रन्थः**। अन्यथा मत्सरशब्दादौ धर्मिणा शक्तिर्न स्यात् यदि प्रयोगप्राचुर्यं न सहकारि भवेदिति।

आवश्यकीति। तथाच तच्छैक्यैवोक्तक्रमेण तीरोपस्थितिर्लागवादिति भावः। ननु शब्दाश्रयत्वस्यापि विशेषणत्वं सम्भवत्येव अर्थगौरवात्तदसम्भवस्य प्रकृतेऽपि तुल्यात्वादित्युपलक्षणत्वं विकल्पयति।

किञ्च तीरशक्तौ उपलक्षणत्वं प्रवाहस्य न शक्यतावच्छेदकत्वं, नापि धेनुपदे गोत्वस्येव शक्त्युपाधित्वं गौरवात्।

अन्ये तु तीरे नीरे च व्यवहार एव विलक्षणः नोरेत्वनुपपत्तिं विनैव व्यवहारो निरुपाधिकत्वाच्छक्त्युपपाद्यः, तीरे त्वनुपपत्त्या ह्यौपाधिक एव व्यवहारः, स च शक्त्यभावोपपाद्य इति, तन्न, लक्षणायामव्युत्पन्नो बालः प्रयोज्यस्य तीरान्वितानयनादिरूपं व्यवहारं पश्यन्नन्यत्र दृष्टां शक्तिं कथं न कल्पयेत्।

अथ लक्षणया तीरत्वेनोपस्थितौ तीरान्तरान्वयोऽपि स्यात् गङ्गातीरत्वेनैवोपस्थितौ युगपद्वृत्तिद्वयविरोधः गङ्गोपस्थितेः शक्तिसाध्यत्वादिति चेत्, लक्षणाधीनतीरस्मृतेर्न गङ्गासम्बन्धित्वेन तीरं विषयः। किन्तु यद्वस्तुगत्या गङ्गासम्बन्धि तदेव तीरत्वेन परिचीयते सम्बन्धिदर्शनजस्मृतेस्तत्सम्बन्ध्यविषयत्वात् यथा पद-हस्तिदर्शनात् पदार्थ-हस्तिपकस्मृतेर्न पद-हस्ति विषयत्वम्। अत एव तीरान्वितवाक्यार्थबोधेऽपि न गङ्गासम्बन्धित्वेन तीरं विषयः।

किञ्चेति। व्यक्तयः शक्याः व्यवहारात्तासामानन्त्येन व्यभिचारेण च पदशक्तिग्रहासम्भवादुपलक्षणस्य परिचायकत्वमस्य व्यावर्त्तनार्थमनुगमार्थञ्च अपेक्ष्यते यथा गोपदे गोत्वस्येति वा। अथ वा शक्तावुपलक्षणत्वमविषयं धेनुपदे परमते यथा गोत्वस्याद्यशक्यत्वमेवान्यथा शब्दात्तदनुपस्थित्यापत्तेः अन्त्यस्य गौरवेणास्वीकारः। अन्यथा धानमपि न शक्यं स्याद्धानोपस्थित्यर्थं निमित्तान्तरकल्पनागौरवञ्च गोत्वेऽपि तुल्यमित्युक्तमिति भावः। कथं न कल्पयेत् यद्युक्तरूपं बाधकं न प्रतिसन्दध्यादिति शेषः।

तीरान्तरेति। न च गङ्गातीरान्वयापत्तिरिति तुल्योऽनुयोगः। तत्रापि योग्यतासत्त्वे गङ्गातीरानुभववत्तीरान्तरानुभवाभावेन तस्याप्यापाद्यत्वादिति भावः।

न तीरमिति। नियमत इति शेषः। **किन्त्विति**। सम्बन्धिदर्शनं संस्कारोद्बोधकं येन रूपेण सम्बन्धी प्राक् ज्ञातस्तत्प्रकारकसंस्कारमुद्बोध्य तत्प्रकारिकां तद्गोचरमेव स्मृतिं जनयति न त्वन्यप्रकारिकां अन्यविषयां वा तथा च तीरत्वेन सम्बन्धिज्ञाने तत्प्रकारिकैव तन्मात्रगोचरैव स्मृतिः। यदा तु गङ्गासम्बन्धितीरत्वावच्छेदेन तीरत्वानुभवस्तदा तथैव स्मृतिर्न प्रकारान्तरेण।

अपि च गङ्गायामित्यादिपदानां आप्तोक्तत्वेन प्रामाण्यात् संभूय पदप्रतिपाद्यान्वय-बोधकत्वमेकवाक्यत्वमवगतं मुख्यार्थश्चायोग्य इति योग्य आकाङ्क्षितश्चामुख्यार्थोऽपि पदप्रतिपाद्यः कल्प्यते। अन्यथैकवाक्यत्वभङ्गप्रसङ्गात्।

न चापदार्थेनैव योग्यतादिमतान्वयबोधकत्वमस्त्विति वाच्यम्। गङ्गापदवैयर्थ्यप्रसङ्गात्। प्रतिपाद्यता च लक्षणीयस्य क्लृप्तेनैव स्मार्थसम्बन्धेन न तु शक्त्यता गौरवात्तदन्वय-बोधश्चेतरपदेनैव। शक्त्योपस्थितस्य पदेनान्वयो बोध्यतेऽन्यत्र तथा दर्शनात् इति चेत्, न, लाघवेन पदोपस्थापितत्वस्यैव तन्त्रत्वात्।

न च गङ्गासम्बन्धित्वावच्छेदेन कथं तत्सम्बन्धित्वानुभव इति वाच्यम्। घटेन घटवद्भूतलमितिवद्गङ्गासम्बन्धि तीरं गङ्गासम्बन्धीति बुद्धिसम्भवात्। न च वृत्तिद्वयविरोधः। गङ्गायां अप्युक्तक्रमेण लक्षणायैव उपस्थितेः शक्यसम्बन्धो हि तीरवर्त्तमानस्तत्स्मारकस्तीरत्वदुक्तक्रमेण गङ्गासम्बन्धित्वमुपस्थापयतीति किमनुपपन्नं, न हि तीरत्वोपस्थितावप्युक्तप्रकारादन्यप्कारोऽस्ति शक्यतावच्छेदके शक्तिवल्लक्ष्यतावच्छेदकेऽपि लक्षणाया अभावादिति सर्वं सूस्थमिति **तत्सम्बन्ध्यविषयत्वात्** सम्बन्धविषयत्वानियतत्वादित्यर्थः।

न पद-हस्तिविषयत्वं नियतमिति शेषः। **तीरं विषयः**। नियमेनेति शेषः। नन्वध्याहृततीरपदाभ्यामेव शक्त्यैव प्रामाण्ये किं वृत्त्यन्तरेणेत्युक्तलाघवे व्युत्पत्त्यनुपपत्तिमपि सहायमाह -- **अपि चेति।**

वस्तुतस्तदेकवाक्यत्वग्रहेऽपि शब्दार्थोभयकल्पनापेक्षाया अर्थकल्पनापक्षे लाघवमित्येव बीजमध्याहारकल्पने तु शब्दकल्पना गौरवमिति वृत्त्यन्तरमेव कल्प्यमिति तत्त्वम्। **गङ्गापदेत्यापाततः**। शब्दानुपस्याप्यस्य शाब्दधीवद्दिर्भाव एवाकाङ्क्षाविरहादिति परमार्थ।

लाघवेनेति। पदत्वावच्छिन्नोपस्थापितत्वापेक्षया शक्तिपुरस्कारेण पदत्वावच्छिन्नोपस्थापितत्वस्य गुरुत्वादिति भावः। वस्तुतः शक्त्या पदोपस्थापितत्वं तन्त्रं लाघवात् :।न तु स्वशक्त्या पदोपस्थापितत्वं गौरवादस्ति च प्रवाहशक्त्या तीरोपस्थापकत्वं गङ्गापदस्य :।

यद्यपि लाक्षणिकस्य पदान्तरेण सम्भूय न प्रतिपादकत्वं अननुभावकत्वात् । लक्ष्यस्मृतौ च न सम्भूयकारित्वं। अत एव नैकवाक्यत्वमपि। तथापि घोषादिपदानां समभिव्याहृत-पदप्रतिपाद्यान्वयबोधकत्वमवगतं। तच्च न लक्षणां विनेति तां कल्पयति।

यत्तु सामान्यतो गङ्गादिपदार्थान्वयो ज्ञात इति तद्रक्षार्थं परम्परया गङ्गादिपदार्थस्मारिते तीरादौ लक्षणा कल्प्यत इति, तन्न। प्रथमं गङ्गापदार्थान्वयबोधकाभावादन्वयबोधेऽपि लक्षणया गङ्गापरिचिततीरस्य घोषान्वयबोधेऽपि गङ्गाया अन्वयबोधाविषयत्वेन तदन्वयस्यारक्षणात्।

यत्तु गङ्गायां घोष इत्यादेरेकवाक्यत्वं पदस्मारितार्थान्वयबोधकत्वरूपमवगतं। तच्च यद्यपि गङ्गापदार्थस्य साक्षाद्घोषाधारत्वायोग्यत्वात् न सम्भवति, तथापि गङ्गासम्बन्धितीरे योग्ये घोषान्वयात् तीरावच्छेदकतया गङ्गापदार्थस्य घोषान्वयादेकवाक्यत्वं सम्भवति। अत्र एवैकवा क्यत्वस्य सामान्यतोऽवगतपदार्थान्वयस्य च रक्षार्थं गङ्गापदस्मारितस्वार्थस्मारिते तीरे वृत्त्यन्तरं लक्षणा कल्प्यते। तयोरन्यथा भङ्गप्रसङ्गादिति, तन्न। तीरार्थस्य घोषान्वयबोधेऽपि गङ्गापदार्थस्य तदन्वयबोधाविषयत्वात्।

अत एवाकाशपदोपस्थाप्य-शब्दाश्रयत्वस्यान्वयधीविषयत्वमिति। **लक्ष्येति प्रकृताभिप्रायं**। सामान्यत एव स्मृतिं प्रति पदानां सम्भूयजनकत्वादिति। **गङ्गादिपदार्थेति** प्रवाहेत्यर्थः। एवमग्रेऽपि।

ननु गङ्गातीरत्वेनान्वयबोधनियम एव तदुभयरक्षा। न च सम्बन्धितावच्छेदकतया गङ्गातीरत्वभाने तद्धीनियमः। तीरत्वमात्रेणापि तत्सम्बन्धिग्रहादतः शक्त्या प्रवाहो लक्षणा तीरत्वमित्युभयवृत्तियौगपद्यनियमात्तथा धीनियमो वाच्यः।

न चैवं सम्भवतीत्याह -- **गङ्गेति**।

वृत्तिद्वयेति वस्तुगतिमनिरुध्य, वस्तुतो वृत्तिद्वयप्रवृत्तावपि स्वतन्त्रपदार्थद्वयोपस्थित्या घटः कर्मत्वमित्यत्र घटकर्मत्ववद्गङ्गासम्बन्धितीराप्रवृत्तेरिति दूषणं द्रष्टव्यम्। ननु शब्दस्य स्वभावाधीनं न बोधकत्वमपि तु बोधकसम्बन्धबोधाधीनं तथा च गङ्गासम्बन्धित्वं तीरत्ववत्सम्बन्धबोधप्रकारत्वेन भासत इति यद्यभिमतं तदा नियमो न स्यादित्युक्तम्।

अथ गङ्गातीरत्वेनोपस्थिते घोषान्वयबोधात् भवति गङ्गायास्तीरावच्छेदकतया अन्वयबोधविषयत्वमिति चेत्, न। गङ्गापदाद्गङ्गातीरयोर्युगपदुपस्थितौ वृत्तिद्वयविरोधात्। न ह्युभयोः शक्त्या लक्षणया वोपस्थितिः सम्भवति।

अथ लक्षणास्वाभाव्यात् लक्षकपदेन स्वार्थसम्बन्धित्वेनैव लक्षणीयतीरादेरुपस्थितिः अन्यथा तीरमात्रान्वयप्रसङ्गात्। तथा च लक्षणयैव गङ्गोपस्थितिरिति चेत्, न। गङ्गासम्बन्धात् तीरस्य स्मृतिः सम्भवति । न तु गङ्गासम्बन्धस्य तत्सम्बन्धे ततत्सम्बन्धाभावात्।

अत एव एकसम्बन्धिज्ञानात् अपरसम्बन्धिस्मृतेरपरसम्बन्धिसम्बन्धाविषयत्वनियमः यथा पदहस्तिज्ञानात् पदार्थ-हस्तिपकयोः स्मृतौ न पद-हस्तिनोर्विषयत्वं पदे पदस्य हस्तिनि हस्तिनः सम्बन्धाभावात्। सामान्यतो गङ्गापदार्थान्वयो नावगम्यते बोधकाभावात्, लक्षणा च शब्दात् परम्परया अशक्यासदृशस्यान्वयपरोपस्थितिरूपा शक्यसम्बन्धादशक्यासदृशान्वयपरोपस्थितिरूपा वा अशक्यसदृशान्वयप्रतियोग्युपस्थिति हेतुः स्वशक्यसम्बन्धो लक्षणेति परमार्थः, उपस्थितिहेतुर्हि वृत्तिः शक्तिवत्।

तथा च लक्षणायैव तीरवदुपतिष्ठत इति तथा सत्याह -- **न तु गङ्गासम्बन्धस्येति**।

सम्बन्धिसम्बन्धाविषयत्वनियमः। सम्बन्धिसम्बन्धविषयत्वनियमः। नञ्व्यात्यासात्।

न पद-हस्तिनोर्विषयत्वं। नियमेनेति शेषः।

नन्वेवं लक्षणा कल्प्येताध्ाहारतोऽपि प्रामाण्यसम्भवादित्यत आह -- **सामान्यत इति**।

उक्तरूपैकवाक्यत्वग्रहो न कल्पनामूलं किन्तु घोषादिपदानां समभिव्याहृतपदस्मारितार्थविशिष्टस्वार्थानुभावकत्वलक्षणैकवाक्यत्वग्रहएवेति भावः।

परम्परयेति । शक्यसम्बन्धेनेत्यर्थः। अत्र गौणोपस्थितिवारणाय अदृशस्येति। अत्र सादृश्यस्यैव सम्बन्धत्वात्। न चासदृशाप्रसिद्धिः। असदृशस्येत्यर्थविशेषणेन सादृश्यान्यशक्यसम्बन्धलाभात्। न चाशक्यपदवैयर्थ्यं, शक्तेरपि शक्यसम्बन्धत्वात् तदर्थोपि शक्तान्यत्वं पर्यवसितं, तथा च शक्ति-सादृश्यान्यशक्यसम्बन्धेन शब्दजन्यान्वयपरोपस्थितिरिति विवक्षितविवेकेन लक्षणं एवमग्रेऽपि। नचाभेदः। तत्रान्वयप्रतियोगित्वेनैवानतिप्रसङ्गे शब्दपदपरित्यागेन विशेषादिति।

अत एव क्लृप्तेन स्वार्थसम्बन्धेन लक्ष्योपस्थितिसम्भवात् न तदर्थं शक्तिः। न चैवं राजपुरुषादौ षष्ठ्यर्थलक्षणाद्यव्याप्तिः राजसम्बन्धे राजसम्बन्धाभावादिति वाच्यम्। शक्येन राज्ञा स्वसम्बन्धं विना सम्बन्धस्य लक्षयितुमशक्यत्वात्, अन्यथातिप्रसङ्गात्। न चात्माश्रयः, राजनिरूपितपुरुषसम्बन्धस्य स्वसम्बन्धसम्बन्धस्य च भिन्नत्वात्।

अथैवं मुख्यपरत्वेऽपि लक्षणा स्याच्छक्यसम्बन्धस्य तीरादौ सत्त्वादिति चेत्,न। लक्षणायां तात्पर्य्याभावेन शक्तेरिव मुख्यपरत्वेऽपि लक्षणाया मूकत्वात् वृत्तेस्तात्पर्य्यानुरोधित्वात्। तदुक्तं 'तात्पर्य्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्य्यं' इति, गोपदादेश्च स्वपरत्वे लक्षणैव न शक्तिः स्वार्थसम्बन्धेनैव स्वोपस्थितिसम्भवात्।

अशक्येति शक्तिसादृश्यान्यान्वयपरोपस्थितिहेतुः स्वशक्यसम्बन्ध इत्यर्थः। तादृगुपस्थितिहेतुरिति हेतुगर्भविशेषणमतस्तद्विवृणोति -- **उपस्थितीति**।

अत एवेति। यत्कल्प्यं तत् स्थानीयेन तस्यान्यथासिद्धिरतो यद्युपस्थितिर्लक्षणा कथं तया शक्त्यन्यथासिद्धिरतत्कार्यकारित्वात् तथा च लक्षणया तदन्यथासिद्धिस्तदा स्यात् यदि सा तत्कार्यकारिणी तच्च तदा यदि सम्बन्धरूपा स्यादिति भावः।

एवं सम्बन्धस्य लक्षणत्वे मन्मते तूपस्थितिस्तत्राविरुद्धेति भावः। न चायं विनापि सम्बनधं सम्बन्धज्ञानादुपस्थितिस्तत्राविरुद्धा न तु वस्तुभूतः सम्बन्ध इति तात्पर्यात्। **शक्येनेति**। विना सम्बन्धं तज्ज्ञानं न सम्भवति। न च भ्रमरूपं तत्, क्वचिद्भ्रमस्य विशेषदर्शनबलेनासम्बवादिति भावः। शक्ये सति उपस्थितिहेतुतया त्वयापि सम्बन्धाभ्युपगमादिति भावः।

अथैवमिति। उपस्थितिरत्र नास्ति तद्धेतुश्च सम्बन्धोऽस्तीति भावः।

उपस्थितिहेतुः शक्यसम्बन्धोलक्षणेति स्वरूपयोग्यतागर्भं यदि लक्षणार्थमापाद्यते तदेष्टापत्तिः फलोपधानगर्भे नास्त्येवेत्याह -- **लक्षणायामिति**। 'तात्पर्याद्धि वृत्तिरित्युपहितान्वयपरसम्बन्धाभिप्रायेण।

ननु पदगोचरश्रोत्रजनितप्रत्यक्षोपस्थितस्वपरत्वमेव पदानां, तदन्वितस्वार्थाभिधानन्तु पदान्तरेण। न च वृत्त्युपस्थितेनैव स्वार्थान्वयः पदेनाभिधीयत इति व्युत्पत्तिः। किन्तूपस्थितिमात्रेण लाघवादध्याहारे तथैव स्वीकारात् । लक्षणादीनाञ्चोपस्थितिरूपतया तद्द्वारा चान्विताभिधानोपयुक्तत्वात् लक्षणात्वाद्यसाधारणरूपेण तदुपयोगे परस्परव्यभिचारादिति चेत्, न। वर्णानां अयौगपद्येन पदगोचरप्रत्यक्षस्याभावात्, भावे वा योग्यतादिविमर्शापेक्षया प्रत्यक्षस्यातीतत्वात्।

किञ्चैवं गामुच्चारयेत्यादौ विकृतं गां पदमेव उच्चारणकर्म्म स्यात् । तस्यैव श्रोत्रप्रत्यक्षत्वात् न त्वविकृतं गोपदं, एकमुच्चारयेत्युक्तौ च न प्रकृतं पदान्तरमुच्चारणकर्म्म स्यात्। किन्त्वेकमुच्चारयेति पदमेव, सत्यन्वययोग्यसमभिव्याहृते प्रकरणादेरनुपयुक्तत्वात्।

ननु यदि शक्ति-सादृश्यान्यः सम्बन्धो लक्षणा तदा स्वपरत्वे शक्तिरेवार्थेन समं पदे शक्तेरेव सम्बन्धस्य सत्त्वादिति तत्र लक्षणेति कथमित्यत आह -- **गोपदेति**। स्वार्थसम्बन्धरूपा हि शक्तिस्तत्र न तु शक्तित्वेन विषय एव शक्तेस्तत्त्वेन सम्बन्धत्वात्। न च पदं तद्विषयः। किन्तु तदाश्रयः। तदुक्तं **स्वार्थेति**। स्वशक्तिविषयेति यावदिति भावः।

वृत्त्यन्तरेति। अत्रान्तरशब्दः सम्पातायातः। वस्तुतः तात्पर्यान्यथासिद्धौ शक्तेरप्युच्छेदसम्भवादिति ध्येयम्। **अध्याहार** इति स्वमते। ननूपस्थितिमात्रस्य तन्त्रत्वे किं लक्षणावृत्त्ेत्यत आह।

लक्षणादीनामिति। तत्रोपस्थितेरेव तां विना असम्भवादिति भावः। **उपस्थितिरूपतया**। उपस्थापकसम्बन्धरूपतयावेति शेषः। उपस्थितित्वेनैव जनकत्वे बीजमाह। **लक्षणात्वेति**। वृत्तित्वं यदि शाब्दान्वयबोधानुकूलोपस्थितिगर्भं तदान्योन्याश्रय इति लक्षणात्वादिपरं वाच्यम् तथाचाननुगमादुपस्थितित्वेनैव जनकत्वमिति भावः।

ननु तदुपनीता च श्रोत्रविषय इत्युक्तमत एव पदं शृणोमीत्यबाधितानुव्यवसाय इत्यत आह-- **भावे वेति।** ननु प्रत्यक्षमूलिका स्मृतिः स्यादित्यपारतुय्यन्नाह -- **किञ्चेति।**

ननु विकृतस्य प्रत्यक्षोपस्थितस्यापि कर्मत्वेनानुपस्थितेर्नोच्चारणान्वयः किन्त्वविकृतस्य तस्य तत एवद्वितीयाश्रुतेरित्यस्वरमादाह -- **उच्चारयेत्युक्ताविति**।

अन्ये तु पदानामौत्सर्गिकमर्थपरत्वं तदभावे स्वपरत्वं गामुच्चारयेत्यादौ वाच्याविवक्षया पदेन स्वान्विताभिधानादिति, तन्न, वृत्तिं विना स्वपरत्वस्यानिर्वाहात्। अन्यथा वृत्त्यन्तरोच्छेदः तत्पदादेव तदन्विताभिधानसम्भवात्।

अपि चाध्याहारे वृत्त्युपस्थापितेनान्विताभिधानमस्तु । तस्यापदार्थत्वेऽपीतरपदैरन्वयबोधात् अत्र तु स्वरूपस्य पदार्थत्वमवश्यं वाच्यं तच्च वृत्त्यन्तर्भावादेव। अन्यथा गामुच्चारयेत्यादौ द्वितीया अच्छावाकीयं सामेत्यादौ च छप्रत्ययो न स्यात्, अर्थशून्यत्वेनाप्रातिपदिकत्वात्। तस्माञ्च छप्रत्ययानुशासनात्।

किञ्च गौरस्तीत्यादौ उभयपरत्वसम्भवे स्वपरत्वमेव स्यात्, स्वस्य प्रत्यक्षेण शीघ्रमुपस्थितत्वात्। प्रत्यक्षमूलकस्मृतपदार्थस्यान्वयो भवतीति चेत्, न। उक्तदोषात् पदार्थस्मरणस्य अन्वयपरत्वानिश्चयाञ्च तत्परसन्निधानस्य अन्विताभिधानोपयोगात्।

किञ्च विभक्त्युपनीतान्वयप्रकारकर्म्मत्वादिनानुपस्थितस्याकाङ्क्षाविरहेण क्रियाद्यन्वयो न स्यात्। स्मृतपदे द्वितीयार्थकर्म्मत्वान्वय इति चेत्, न। विभक्तेः प्रकृत्यर्थान्वितस्वार्थान्वयबोधकत्वस्य व्युत्पत्तिसिद्धत्वात्।

इदमपि न प्रकरणस्य तात्पर्यग्राहकत्वेन बलवत्त्वादित्यस्वरसादाह -- **अपि चेति**।

वृत्तीत्यस्मन्मते। नन्वर्थत्वं प्रतिपाद्यत्वं तच्च शाब्दबोधानुकूलोपस्थितिविषयत्वं तच्च प्रत्यक्षोपस्थिते तदनुकूलत्वे नास्तीत्यरुचेराह -- **किञ्चेति**।

प्रत्यक्षमूला स्मृतिरङ्गं न तु प्रत्यक्षं सा च न शीघ्रेत्याशङ्कते -- **प्रत्यक्षेति**। **उक्तदोषादिति** तादृशस्मृतेरप्यर्थोपस्थित्यपेक्षया शीघ्रत्वादित्यर्थः।

ननु तात्पर्यग्रहाद्विलम्बितापि सा बलवतीत्यत आह -- **पदार्थेति**। उभयत्र तात्पर्यानिश्चयेऽप्यर्थानुभवस्यैव सर्वत्रानुभविकत्वादित्यर्थः। ननु व्युत्पत्तिबलादेवार्थान्वयबोधकत्वमतएवौत्सर्गिकं तदित्यत आह -- **'किञ्चेति।** 'प्रकृतिशक्त्युपस्थापितेत्यर्थः। तच्चोभयवृत्तिसाधारणं तत्तात्पर्यविषयत्वादिकञ्च तत्साधारणं गुर्विति भावः। **लक्षणोच्छेद** इति पदनिष्ठलक्षणारूपवृत्युच्छेद इत्यर्थः।

अत एव गङ्गायामित्यत्र सप्तम्यर्थान्वयार्थं तीरे लक्षणा। अन्यथा स्मृत्युपनीततीरस्यान्वय बोधसम्भवे लक्षणोच्छेदः।

नन्वेवं जवगडदशमाहेत्यादौ निरर्थकेषु लक्षणा न स्यात्, स्वार्थसम्बन्धाभावात्। प्रत्यक्षोपस्थिते स्मृते वा स्वरूपे क्रियान्वय इति दूषितमेवेति चेत्, न। न हि जवगडदशमाहेत्यत्र समुदाये क्रियान्वयः, समुदायस्योच्चारणासम्भवात्।

किन्तु द्वन्द्वानन्तरश्रुतक्रियापदेन प्रत्येकवर्णे स्वार्थान्वयबोधनं, प्रत्येकवर्णस्य च शक्तत्वेन स्वार्थसम्बन्धादेव स्वस्मिन् लक्षणा स्तोभेऽप्येवं, स्वार्थसम्बन्धाग्रहे च स्वरूपोपस्थितिः शक्तिभ्रमात्, निरर्थकस्य स्वरूपे शक्तिरेव वृत्त्यन्तरं विनैवोपस्थितेः शक्तिसाध्यत्वात् इत्यप्याहुः।

अन्ये तु पदस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात् अन्येन ह्यन्यबोधनेऽतिप्रसङ्गात् शक्तिकल्पनं स्वबोधकत्वे च न तथा, यथा घटस्य स्वबोधकत्वं स्वसम्बन्धं विनैव। एवञ्च स्वबोधिते स्वस्मिन् विभक्त्यर्थान्वयोऽपि।

न च पदस्य स्वभावात् स्वबोधकत्वे सर्व्वत्र स्वबोधप्रसङ्ग इति वाच्यम्। इत्यादिपदस्य स्वार्थान्वयानुपपत्त्यादेः सहकारित्वात् यथा घटस्य स्वबोधकत्वे इन्द्रियसम्बन्धाद्यपेक्षेति।

उच्चारणासम्भवादिति सम्भवप्राचुर्यादुक्तम्। वस्तुतो जवग्ग्राडदशाः प्रमेया इत्यत्रापि प्रत्येकमेवान्वयः तावतैव स्वार्थसम्बन्थेनान्वयेमिलिते स्वस्मिन् शक्तेरकल्पनादिति तत्त्वम्। अतएवास्वरसादेकदेशिमतेऽस्वरसोऽपि नादृतः।

अन्ये त्विति। स्वबोधकत्वेऽपि स्वस्य प्रकृत्यर्थत्वाभावेन विभक्त्यर्थानन्वय इति तथा च व्युत्पत्त्यन्तरकल्पनमित्यस्वरसो द्रष्टव्यः।

'अधिकस्य तत्प्रतीतीच्छयोच्चरितत्वस्य, **अन्योन्येति**। उपस्थितौ तत्र तात्पर्यधीस्तस्याच्च सेत्यभ्युपगमादिति भावः।

नन्वेवं लक्षणास्थले तात्पर्यार्थविधानं कोपयुक्तमत आह -- **तात्पर्येति**।

यत्तु स्वार्थसम्बन्धिनि तात्पर्य्यमेव लक्षणा तत्तात्पर्य्यञ्च तत्प्रतीतिमुद्दिश्योच्चरितत्वमिति, तन्न, लक्ष्यस्मृतये लक्षणा सा च स्वार्थसम्बन्धज्ञानादेवेत्यधिकस्य व्यर्थत्वात्। सम्बन्धधीः स्मृतिहेतुः क्लृप्ता। न तु तात्पर्य्यधीरपि। तस्या लक्ष्यस्मृतिजन्यत्वेनान्योन्याश्रयप्रसङ्गात्। तात्पर्य्यज्ञानञ्च लक्षणावीजानुपपत्तिज्ञानेऽन्वयानुभवे चोपयुक्तमतोऽशक्योपस्थितिस्तद्धेतुः शक्यसम्बन्धो वा लक्षणेति तत्स्वरूपे तात्पर्य्यमनुपयुक्तमेव। लक्ष्ये तात्पर्य्यात् लक्षणा 'तात्पर्य्याद्धि वृत्तिरिति च लक्षणास्थले, वस्तुतो लक्ष्ये तात्पर्य्यमस्तीत्येवम्परम्।

किञ्चैवं मुख्येऽपि तत्तात्पर्य्यकत्वमेव वृत्तिरस्तु किं शक्त्या, तात्पर्य्यमेव वृत्तिं विना न निर्वहतीत्युच्यत इति चेत्, तर्हि लक्षणापि तन्निर्वाहिकैव न तु तदेव।

अपि च तात्पर्य्यानुपपत्तिर्लक्षणाबीजं न तु तदनुपपत्तिरेव तद्बीजं विरोधात्। अत एवाशक्ये न लक्षणा वृत्तेस्तात्पर्य्यनिर्वाहकत्वात्। निर्वाहकसम्बन्धमपश्यत आप्तस्य तात्पर्य्याभावात्। शक्त्या शक्यसम्बन्धेन वा पदादमुमर्थं जानात्वित्यभिप्रायेण पदप्रयोगो न तु तात्पर्य्यादेवाययमुमर्थं ज्ञास्यतीति बुद्ध्या तात्पर्य्यमात्रस्य वृत्तित्वे सर्वस्य सर्वत्र प्रयोगो नानार्थोच्छेदश्च।

स्वार्थसम्बन्धेनेदं पदमर्थं बोधयिष्यतीति वक्तुरभिप्रायो लक्षणा तदभिप्रायज्ञानं विना श्रोतुर्लक्ष्यानुपस्थितेरित्यन्ये। तन्न। अयं ह्यभिप्रायः प्रयोगनिमित्तं यथा शक्त्यायमर्थं बोधयिष्यतीत्यभिप्रायः, न तु स एव लक्षणा गौरवात्।

अत इति। मतभेदेन कल्पद्वयेऽप्युभयया तात्पर्यं न लक्षणेति भावः। 'अनुपयुक्तमिति न स्वरूपं न वा कल्पनाबीजमित्यर्थः। कल्पनाबीजत्वे तद्ग्रहावश्यकतया तत्स्वरूपत्वशङ्काप्यवतरेत् तदपि नेति भावः।

ननु यदि न तद्बीजं तदा ग्रन्थविरोध इत्यत आह -- **तात्पर्यादिति**। सोऽपि स्वरूपनियममाह न तु धीनियमं यतो विरुध्येतेति भावः।

एवं तात्पर्यस्य वृत्तित्वे। **अपि चेति**। यद्यपि तात्पर्यानुपपत्तिर्लक्ष्यतात्पर्यज्ञानमेव पर्यवसितं न तु लक्षणाबीजमित्यस्यापि न लक्ष्यानुभवे कारणमित्येवार्थ इति न कल्पनान्तरं, तथापि सामान्यतोऽन्वयानुभावमात्रे तात्पर्यधीर्हेतुर्लक्ष्यानुभवरूपे विशेषे वेति मतभेदेन कल्पभेदोपादानं द्रष्टव्यम्। **विरोधात्** एकस्योपपादकोपपाद्यत्वविरोधादित्यर्थः।

किन्तु स्वार्थसम्बन्ध एव लक्षणा, तत एव लक्ष्योपस्थितिसम्भवात् वृत्तैस्तत्रैवोपयोगात् तस्य चाबोधकत्वे स्वार्थसम्बन्धेनायं बोधयिष्यतीत्यभिप्रायवान् वक्ता नाप्तः स्यात्। तात्पर्य्यधीस्त्वन्वयबोधे हेतुरित्युक्तम्। शक्यसम्बन्धश्चाविनाभाव एव यष्टीः प्रवेशय मञ्चाः क्रोशन्तीत्यत्रापि प्रवेशन-क्रोशनसमये यष्टिधर-मञ्चस्थपुरुषयोर्यष्टि-मञ्चाविनाभाव एव।

एवञ्च छत्रिगोयान्ति काकेभ्यो दधि रक्ष्यतामित्यत्राजहत्स्वार्थलक्षणायामपि छत्रिणास्तत्समूहानन्तर्गतेनाच्छत्रिणाप्यविनाभाव एव। काक-कुक्कुरादीनां दध्युपघातकत्वेन युगपदुपस्थितिसमये काकस्य कुक्कुराद्यविनाभावः। यत्र तूपघातकत्वेन काकमात्रमुपस्थितं न कुक्कुरादि तत्र काकपदेऽप्युपघातकत्वेन लक्षणापि नास्ति दध्युपघातकत्वेनातर्किता-द्रक्षणोपदेशानर्हत्वादिति सम्प्रदायः।

वस्तुतः शक्यसम्बन्ध एव लक्षणा अतिप्रसङ्गश्च। सम्बन्धस्याविनाभावस्वरूपत्वेऽपि, तात्पर्य्यादन्वयनियमः शक्यसम्बन्धमात्रलक्षणापक्षेऽपि, लक्षणाबीजं तात्पर्य्यानुपपत्तिः पदस्य वृत्तिं विना लक्ष्ये तात्पर्य्यानिर्वाहात्। न तु शक्यान्वयायोग्यत्वं बीजं यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायाञ्च शक्यस्यान्वययोग्यत्वेऽपि लक्षणासत्त्वात्तात्पर्य्यानुपपत्तिस्तत्रापि लक्ष्ये तात्पर्य्यं विना लक्षणानुदयादिति सम्प्रदायः।

वस्तुतोऽन्वयपरप्रमाणशब्दस्य मुख्येऽन्वयायोग्यत्वमेव लक्षणाबीजम् । गङ्गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्य्यग्रहात्पूर्वमेव मुख्यस्यान्वयाऽयोग्यत्वज्ञानेन लक्षणोपपादनात्।

अस्तु वा तत्रापि लक्ष्ये तात्पर्य्यग्रहः तथापि मुख्येऽन्वयानुपपत्तिरेव लक्षणाबीजं प्रथमोपस्थितत्वात् तात्पर्य्यानुपपत्तिं विनैव लक्षणावीजत्वसम्भवाच्च।

शक्यसम्बन्ध एवेति। सम्बन्धिज्ञानमात्रस्यैवापरसम्बन्धिस्मारकत्वान्नाविनाभूतज्ञानमात्रस्यैवेत्यर्थः।

अविनाभाव एवेति। गङ्गागदस्य तीरवन्मत्स्यादावप्यविनाभावादिति भावः। वस्तुतोऽविनाभावस्य लक्षणात्वे स्वपरत्वे लक्षणा न स्यादर्थेन समं पदस्य देशतः कालतोवाऽविनाभावाभावात् स्वार्थसम्बन्धस्तु शक्तिलक्षणास्तत्रापि। न चैवं मुख्य एव प्रयोगः शक्तेरेव तन्त्रत्वादिति वाच्यम्। शक्तिविषये प्रयोगस्य मुख्यत्वात् पदस्य तु तदाश्रयत्वादिति सम्बन्धमात्रं लक्षणा।

यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायाञ्च मुख्यस्यान्वयानुपपत्तिरेव तथा हि प्रकरणादिना प्रवेशयेत्यस्य भोक्तृप्रवेशनपरत्वं यान्तीत्यस्य छत्रि-तदितर-घटितसमूहगमनकर्त्तृपरत्वञ्च ज्ञातम्। तादृशप्रवेशनगमनयोरन्वयायोग्यावेव यष्टि-च्छत्रिणौ।

अथ प्रकारणदिनैवेतरपदवत् यष्टि-च्छत्रिपदयोरपि लक्ष्ये तात्पर्य्यमवगतमतस्तदनुपपत्तिरेव तद्बीजमिति चेत्, न, लक्षणातः पूर्वमवश्यं लक्ष्योपस्थितौ तत्र तात्पर्य्यग्रहे मानाभावात् लक्षणाया अन्यथाऽपि सम्भवात्। भावे वास्तु तत्रोभयानुपपत्तिस्तथाप्यन्वयानुपपत्तिरेव लक्षणाबीजं, गङ्गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्य्यग्रहात्पूर्वमेव मुख्यार्थाऽनुपपत्तेः क्लृप्तत्वात्।

ननु पदार्थविशेषस्मृतौ तदन्वयबोधे वा प्रकरणादेः सहकारिता न तु तात्पर्य्यग्रह इति चेत्। न। शब्दसहकारित्वेऽननुगमात् तात्पर्य्यग्रहे तु तद्व्याप्यत्वेनानुगमः तात्पर्य्यव्याप्यत्वग्रहे तात्पर्य्यग्रहः सम्भवत्येव। बहुव्रीहौ चित्रगोपदार्थस्यान्वयायोग्यत्वादन्यपदार्थे तात्पर्य्यानुपपत्तिरेव लक्षणावीजमिति चेत्, न। तत्रापि चित्रगोस्वाम्यानयनपरानयनपदार्थान्वयानुपपत्तेः।

यद्यपि लक्षणायामन्वयायोग्यत्ववन्निराकाङ्क्षत्वमप्यस्ति तथा हि गङ्गायां घोष इत्यत्र घोषस्य निविडाधाराकाङ्क्षितत्वेन न प्रवाहाकाङ्क्षा एवं समूहगमनस्य छत्रिषु नाकाङ्क्षा तेष्वपरिसमाप्तेः, तथापि नोभयं निमित्तम्, अन्यतरज्ञानेऽपि लक्षणासम्भवात्। नैकैकमेव निमित्तम् अननुगमात्। अन्वयानुपपत्तिव्याप्यत्वेन वानुगमेऽन्वयानुपपत्तिरेव लक्षणाबीजं तस्या उभयत्र सत्त्वात्।

प्रकरणादिनेति। तात्पर्यं लक्षकपदे ब्रुवता अपरपदेऽपि तद्ग्रहोवाच्योऽन्यथा घोषादिपदस्य जलादिपरत्वे गङ्गापदादौ सा न स्यात् तथा च प्रकरणात् ग्रवेशनादिविशेषे तात्पर्यग्रहात् तत्र चायोग्यावेव यष्टि-च्छत्रिणावित्यर्थः। ननु यत एव प्रकरणात् तयोर्विशेषे तात्पर्यग्रहस्तत एव लक्षकपदस्य लक्ष्य इति तात्पर्यानुपपत्तिरेव बीजमित्याशङ्कते,

अथेति। ननु प्रकरणाद्विशेशे तात्पर्यग्रहो न सम्भवतीति शङ्कते - **नन्विति।**

ननु यदि तात्पर्यानुपपत्त्युपजीव्यतया अन्वयानुपपत्तिर्बीजं तदा तदनुपपत्त्युपजीव्यतया तदयोग्यत्वं बीजमस्तु न तु सेत्यत आह - **यद्यपीति।**

लक्षणास्थले च स्मृतशक्यान्वयानुपपत्तिज्ञानानन्तरं गङ्गापदात्पुनः शक्यस्मृतिः स्मृतशक्यात्स्वसम्बन्धेन तीरस्मृतिः शक्तेः शक्यस्मृतौ प्रवाहस्य स्वसम्बन्धेन तीरस्मृतौ सामर्थ्यावधारणात्। अतः शक्यस्मारिततीरस्येतरपदादेवान्वयबोधः।

अत एव लाक्षणिकं पदं नानुभावकम् अन्वयप्रतियोगिनस्तीरस्य ततोऽनुपस्थितेः अन्वयप्रतियोग्युपस्थापकत्वेन पदानामन्वयानुभावकत्वात्।

वस्तुतस्तु लक्षणाबीजं यदि लक्ष्यान्वयबोधहेतुरित्यर्थस्तदा अन्वयानुपपत्तिरपि न बीजं, न हि शक्यान्वयानुपपत्तिर्लक्ष्यान्वयधीहेतुः मानाभावादपि तु तदन्वयानुपपत्त्या तदन्वयो न भवति तदन्वयाभावे क्लृप्तसामग्र्यैव लक्ष्यान्वयबोधः।

न च तदनुपपत्तेस्तत्रातन्त्रत्वे यत्रोभयोर्योग्यत्वं तत्र कदाचिल्लक्ष्यान्वयोऽपि स्यादिति वाच्यम्। तत्तात्पर्यग्रहविलम्बेन तदुपजीव्यप्रकरणादिविलम्बने वा विलम्बात्। अत एवोभयत्र तात्पर्यग्रहे युगपच्छक्यलक्ष्योभयान्वयबोधाविरोध इत्याकरसिद्धान्तः। तात्पर्यग्रह एव तत्र नान्वयानुपपत्तिं विनेत्यन्यदेतत्। न चोपजीव्यतयास्यैव हेतुरस्त्विति वाच्यम्। शब्दादिना तात्पर्यग्रहेऽपि लक्ष्यान्वयबोधसम्भवेन व्यभिचारात्। यदि च लक्षणाबीजं लक्षणाया वृत्तित्वकल्पकं तदोभयोरपि बीजत्वं न त्वसाधारणमुभयज्ञानतः प्रत्येकमेव तत्कल्पनात् आप्तवाक्येन प्रतीतप्रामाण्यनिर्वाहायान्वयानुपपत्त्या प्रकारान्तरप्रतीताप्तलक्ष्यतात्पर्यनिर्वाहाय च तत्कल्पनस्यावश्यकत्वात् कल्पकाननुगमस्यादोषत्वादिति सारम्।

अत एवेति अन्वयानुभावकत्वं पदानामौत्सुक्यं बाधकेन लक्षणास्थले त्यज्यते तत्रान्वयप्रतियोगिपदार्थस्मारकः पदार्थ एवेति पदस्य तत्स्मारकत्वाभावान्नानुभावकतेत्यर्थ। 'गौरवादिति प्रकृत्यर्थत्वस्य प्रकृत्युपस्थाप्यत्वात्मकतया तदर्थप्रतिपादनेच्छोच्चवचरितप्रकृतिकत्वस्य गुरुत्वादित्यर्थः। वस्तुतस्तु प्रकृतितात्पर्यविषये विभक्त्यर्थान्वये धूमोऽस्तीत्यत्र वह्निनतात्पर्यकधूमपदोत्तरविभक्त्यर्थान्वयस्य वह्नौ भानापत्तेः, तथाच प्रकृत्यर्थ एव तदन्वय इति तत्त्वम्।

न च गङ्गापदात्स्वशक्यसम्बन्धेन प्रथमं तीरस्मृतिरेव पुनः शक्यस्मरणे गौरवादिति वाच्यम्। गङ्गापदस्य स्वशक्यसम्बन्धेनान्वयप्रतियोगिस्मारकत्वाकल्पनात्।

न चेहैव तत्कल्पनं, क्लृप्तकारणाताकस्मृतिद्वयादेव तीरोपस्थितिसम्बवादिति प्राञ्चः। तन्न। गङ्गापदात्तीरस्यानुपस्थितौ तत्र सप्तम्यर्थान्वयानुपपत्तेः विभक्तेः प्रकृत्युपनीतस्वार्थान्वय-बोधकत्वव्युत्पत्तेः प्रकृत्यर्थोपस्थाप्यस्य विभक्त्यर्थान्वयेऽतिप्रसङ्गोऽननुगमश्च।

न च प्रकृतितात्पर्य्यविषयस्वार्थान्वयबोधकत्वं विभक्तीनां, गौरवात्। एवञ्च प्रकृत्यर्थे विभक्त्यर्थान्वयनियमाच्छक्यसम्बन्ध एव क्लृप्तस्तीरस्मारकत्वेन कल्प्यते। न चैवं गङ्गापदात् साक्षात्तीरोपस्थितौ शक्तिः, तां विनापि तदुपस्थितिसम्भवात्।

नन्वेवमन्वयप्रतियोग्युपस्थापकतया इतरपदवल्लाक्षणिकमप्यनुभावकं स्यादिति चेत्, न। इतरपदार्थैः सह स्वशक्यान्वयानुभावकत्वेन क्लृप्तादितरपदादेव तीरानुभवसम्भवेन लाक्षणिकस्याननुभावकत्वात् स्वशक्यान्वयानुभवे पदानां कारणत्वावधारणाच्च।

तीरस्मारकत्वेन विशेष्यस्मारकत्वेनवेत्यर्थः। परम्परासम्बन्धस्यापि स्मारकत्वकल्पनात् शाब्दबोधानुकूलतत्स्मारकत्वं प्रकृते कल्प्यत इति भावः।

तां विनेति। तथाच षब्दात् साक्षादुपस्थितिः शक्तिसाध्यैव अन्यथा शब्दात् साक्षादुपस्थितौ शक्तिकल्पने परम्परासम्बन्धेन उपस्थितौ लक्षणेति धूमोऽस्तीत्यत्रापि लक्षणा स्यादित्यपि द्रष्टव्यम्।

'इतरपदार्थैरिति। न च स्वशक्यानुभवत्वापेक्षया स्वोपस्याप्यानुभवत्वमेव सामान्यतो लघु। अत एव स्वशक्यानुभव इत्याद्यपि हेत्वन्तरं हेयमिति वाच्यम्। तथासत्यतिप्रसङ्गात्। न च वृत्त्युपस्थाप्यत्वं तत्, सा हि शाब्दबोधानुकूलपदार्थोपस्थितिगर्भा, तदनुकूलत्वञ्च यदि वृत्तिनिबन्धनं तदान्योन्याश्रय इति शक्तिगर्भं वाच्यं तथाचोपजीव्यत्वात् प्रथमोपस्थितत्वात् लाघवाच्च स्वशक्यानुभावकत्वमेव पदानां क्लृप्तम्। किञ्च शक्तेरीश्राभिप्रायस्य पदार्थान्तरस्य वा ज्ञानं नानुभावकं व्यभिचारादिति वक्ष्यते किन्त्वनुभवजनकतावच्छेदकत्वेन ज्ञानं तथा च शक्तिं विनानुभावकत्वं अवच्छेदकं विना जनकत्वमिति पर्यवसितं, तथा च व्याघातः तस्मात् शक्तस्यैव जनकतावच्छेदकावच्छिन्नस्यैवानुभावकत्वं न तु लाक्षणिकस्य, इदमेवारुचिबीजमग्रे नवीना इत्यनेन सूच्यत इति ध्येयम्।

अथ यदि गङ्गापदं नान्वयबोधकं तदा गङ्गापदान्तर्भावेन सम्भूयान्वयबोधकत्वलक्षणं नैकवाक्यत्वं स्यान्न वा प्रमाणत्वम्। तथा च तदुभयरक्षार्थं न लक्षणाकल्पनम्।

न च परम्परया साक्षाद्वान्वयप्रतियोगिस्मृतिहेतुत्वेन प्रमाणत्वं, स्मृतेरप्रमाणत्वात्।

न चैकवाक्यत्वं, वाक्यभेदेऽपि पदार्थस्मृतिसत्त्वादिति चेत्, न। अप्तोक्तत्वात् गङ्गापदान्तर्भावेनान्वयप्रमाप्रयोजकत्वं सम्भूयान्वयबोधप्रयोजकत्वञ्च गृहीतं तदुभयमपि तीरोपस्थितिद्वारा निर्वहति।

नव्यास्तु - लाक्षणिकमप्यनुभावकम्। न चैवं ज्ञाने शक्तिः शक्यत्वादिति लक्ष्यमपि शक्यं स्यात्, प्रवाहशक्तत्वेन ज्ञातादेव गङ्गापदाच्छक्तिं विनापि तीरानुभवसम्भवात्। यथा परेषां जातिशक्तत्वेन ज्ञातादेव व्यक्त्यनुभवसम्भवात् यथा वास्माकं पदार्थशक्तत्वेन ज्ञातादेवान्वयानुभवसम्भवान्न व्यक्त्यन्वययोः शक्तिरिति। क्वचिद्योगार्थान्वयसम्भवेऽपि रूढिपूर्विका लक्षणा । यथा मण्डपं भोजयोत्यत्र रूढ्यर्थगृहविशेषस्यान्वयायोग्यत्वात् रूढ्यर्थगृहसम्बन्धिजनज्ञानं लक्षणया मण्डपपदेन क्रियते न तु योगान्मण्डपानकर्त्तुरिति मीमांसकाः।

ननु रूढिपूर्विका लक्षणा न युक्ता श्रौतार्थपरत्वे सम्भवति लक्षणाया अन्याय्यत्वात् रूढ्या योगापहारान्न मुख्यतेति चेत्, न। अपहारो हि न यौगिकार्थस्मृतिः, स्मारकसम्भन्धस्य शक्तेः रूढ्यर्थ इव यौगिकेऽपि सत्त्वात्।

तदुभयमपीति समाधिसौकर्यादुक्तम्। वस्तुतस्तु घोषादिपदे गङ्गापदार्थान्वितस्वार्थान्वयानुभावकत्वमेवैकवाक्यत्वं प्रमाणत्वञ्च गृहीतं तदुभयरक्षार्थमेव लक्षणाकल्पनमिति सारम्।

क्वचिदिति। अत्रानुभवोमा निर्णायकः अनुभव एव विमतेः मीमांसकस्य मते सम्बन्धितावच्छेदकमण्डपानकर्तृत्वचैत्रत्वादिना उपस्थितिः यौगिकार्थान्वये योगोपस्थितमण्डपानकर्तृत्वेनैव। न च मण्डपानकर्तृत्वेनोपस्थितौ द्वयोरविशेषः। तन्मते मण्डपानकर्तृत्वस्य पदार्थत्वादन्यत्र वाक्यार्थकत्वादिति भावः। **स्मारकेति**। ननु शक्त्यभावादस्मृतिर्नोक्ता अपि तु रूढ्यर्थस्मृत्या वा तत्सामग्र्या वा प्रतिबन्धात् जात्यापहारस्य प्रतिबन्धपर्यायत्वात् तथा च किं शक्तिमत्त्वकथनेनापीति, मैवम्। भावानवगमात्। प्रतिबन्धो हि ज्ञानात् तत्सामग्र्या वा फलविरोधे सति स्यात्। न च स प्रकृते, समूहालम्बनसम्भवात्, जात्यपहारः फलाभावो वा स्तः स च सामग्रीसत्वे सम्भवतीति एवमग्रेऽपि।

नापि योगार्थस्य प्रथममस्मृतिः, यदैव हि समुदायेन स्वार्थस्मरणं तदा अवयवैरपि स्मारकसमुदायज्ञाने अवयवानामपि विषयत्वात्। प्रत्युतावयवैरेव शीघ्रं स्वार्थस्मरणम् अवयवज्ञानपूर्वकत्वात् समुदायज्ञानस्य। विलम्बेऽपि यदा रूढ्यर्थेन लक्षणया स्वार्थसम्बन्धिस्मरणं तदा यौगिकार्थस्मरणं वाच्यम्। तथा चौत्सर्गिकान्वयाभिधायकत्वानुरोधादुयौगिकार्थान्वयाव-बोधोऽस्तु। नापि स्मृतस्याप्यवयवार्थस्यान्वयबोधवहिर्भूतत्वमपहारः, योग्यतादिबलादवयवार्थस्या-न्वयबोधः स्यादेव, न तु रूढ्यर्थस्यायोग्यत्वात्। नापि लक्षणया स्मारितस्यार्थस्य, लाक्षणिकस्यानभिधायकत्वात्।

अथ मण्डपशब्दस्य गृहविशेषे प्रयोगदर्शनादवयवशक्त्या च तदनिर्वाहात्तत्र समुदाये शक्तिकल्पना। तथा च मण्डपानकर्त्तरि सत्यपि योगे प्रयोगादर्शनात्तत्रावयवशक्तिकुण्ढनमपि कल्प्यं कार्यानुरोधित्वात् कल्पनायाः।

तथा चेति। अनवयानुभावकत्वं पदानामौत्सर्गिकं तद्बाधकेन ल७णास्थले त्यज्यते तत्रान्वयप्रतियोग्युपस्थापकः पदार्थ एवेति तत्स्मारकत्वाभावान्नानुभावकत्वं इत्यर्तः।

योग्यतेति। अत्रापहारः फलाभावो यदि कारणाभावात् तत्रेदमुत्तरं, अथ प्रतिबन्धात् तत्राह -- **न त्विति**। रूढ्यर्थान्वयसामग्र्याः प्रतिबन्धिकाया अभावादिति भावः।

न तु रूढ्यर्थस्येति। अत्रान्वय इति शेषः एवमग्रेऽपि तथाच तदनुभवसामग्र्यपि न प्रतिबन्धिकेति भावः। ननु प्रतिबन्धः फलाभावकल्प्यो न तु फलविरोधमात्रकल्प्यः फलाभावः प्रयोगान्निश्चीयत इति स्मारकशक्तेः सत्त्ममेव यदुक्तं तन्नेत्याशङ्कते।

अथेति। तप्ते पयसि दध्यानयतीत्यादेर्द्रव्यदेवतासम्बन्धात्मकयागप्रथमप्रापकत्वेन उत्पत्तिवाक्यत्वं प्रथमयागप्रापकवाक्यस्यैव उत्पत्तिवाक्यत्वात् तथा च तेनोत्पत्तिवाक्येन तप्ते पयसीत्यादिनैकदेशेनामिक्षाया उत्पत्तिशिष्टत्वं विहितं, तप्ते पयसि दध्यानयतीत्यादिना वाक्येनामिक्षोत्पत्तिः कथ्यते तथाचोत्पत्तिरुत्पत्तिवाक्यम्। तेनैव विश्वेदेवदेवताकत्वमनुशिष्यते इति तदनुशिष्टत्वेनामिक्षाया विश्वेदेवदेवताकत्वं इति धीरुत्पत्तिशिष्टत्वेनेत्यादिफक्किकार्थः। एकत्रामिक्षाया अपरत्र विश्वेदेवदेवताकत्वं विशेषणमिति विशेषः।

अन्यथा अनेकार्थरूढाक्षादिपदादिव क्वचित् मण्डपानकर्त्तुरप्यवगमः स्याद् बहुव्रीहौ समुदायशक्तावपि नावयवशक्तीनां कुण्ठनम् अवयवार्थे लम्बकर्णादौ प्रयोगप्राचुर्य्यात्, कुण्ठनस्य प्रयोगाभावकल्प्यत्वात्,

एवञ्च मण्डपादिपदेऽवयवशक्तेः कुण्ठितत्वात् रूढ्यर्थस्योपस्थितस्य परम्परयापि वाक्यार्थप्रतीत्यन्वयाय तत्पूर्विका लक्षणेति चेत्, न। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्रामिक्षाया उत्पत्तिशिष्टत्वेन विश्वेदेवदेवताकत्वं, वाजमन्नमामिक्षारूपं तद्येषामस्ति ते विश्वेदेवा देवता इति चतुर्थ्यन्तवाजिपदाद्योगेनामिक्षारूपान्नयोगिनां विश्वेदेवानामुपस्थितेर्वाजिनस्यापि विश्वेदेवदेवताकत्वमेव।

ननु वाजिपदात् रूढ्योपस्थितानामश्वानां वाजिने देवतात्वमिति सिद्धान्तः स न स्यात्। रूढ्या योगापहारादश्चानामेव तत्र देवतात्वापत्तेः। न ह्यत्र लम्बकर्णादिवद्वाजिपदस्य विश्वेदेवेषु प्रयोगप्राच्युर्य्यमस्ति।

अथान्वयप्रकारो विभक्त्योपनीयते, सा च यतः समभिव्याहृता तस्यान्वयं बोधयति विभक्तिश्च समुदायात्। अतः समुदायोपनीतस्य रूढ्यर्थस्यैवान्वयबोधोनावयवोपनीतस्येति चेत्, न। पङ्कजनिकर्तुरिव मण्डपानकर्तुरप्यन्वयबोधसम्भवात्।

नन्ववयवार्थानां परस्परमन्वयो योग्यतादिसापेक्षतया विलम्बितः रूढ्यर्थधीस्तु न तथेति चेत्, अस्तु तावदवयवार्थस्यान्वयधीर्विलम्बिता । न तु स्मृतिरूपापि सा तथा, सा चान्वयबोधोपयोगिनी।

वाजिनस्यापीति अन्योद्देशप्रवृत्तकृतिसाध्यत्वेन क्व नाश्यतां क्व दूष्यतामित्याकाङ्क्षायां देवतान्तरकल्पने गौरवादुपस्थितानां विश्वेदेवानामेव कथञ्चिद्वाजिपदादुपस्थितानां तद्देवतात्वं कल्प्यत इति सिद्धान्तोऽत एव वाजिनापचारे पुनस्तदुपादाने न प्रयत्नः तदुपादस्याशास्त्रार्थत्वात् आमिक्षोत्पादनस्य विनियुक्तत्वात्। यदि च तत्र देवतान्तरं कल्प्येत तदा वाजिनापचारे तद्धोमाभावात् पुनर्वाजिनापचारावश्यकतापत्तौ शिष्टाचारविरोधः। न च विश्वेदेवदेवताकत्वेऽपि स दोषः। तदामिक्षयैव तत्प्रीतिसम्भवेनान्यथासिद्धोत्पत्तिकस्य वाजिकस्यापचारेऽपि न पुनस्तदाचरणं, स चायमनन्यथासिद्धोलाघवाद्युपष्टब्धः सिद्धान्तोभवदुक्तयुक्त्या नश्येदिति भावः।

एवञ्च यथा पङ्कजमानयेत्यत्र प्रथमं डार्थ-वाक्यार्थान्वयधीः ततस्तदन्वितजन्मधीः तदनु च परम्परया तथाभूतजन्मनि पङ्कपदार्थान्वयधीः कार्यान्वितव्युत्पत्त्यनुसारात् । न तु सिद्धपङ्कजन्मकर्तृत्वानां प्रथममन्वयधीः तथा मण्डपादिपदेऽप्यस्ति। यदि च सिद्धार्थेऽप्यन्वयधीर्योग्यतादिवशात्तदा रूढ्यर्थावयवार्थानां स्मृताववयवार्थान्वयबोधसम्भवात्। रूढ्यर्थान्वितबोधस्येतरपदात्तदर्थस्मरणाकाङ्क्षा-योग्यतादिज्ञानसापेक्षतया विलम्बितत्वात्।

अथ यावत्सु वर्णेष्वेका शक्तिस्तावतां वर्णानां स्मृतिरप्येकैव कार्यबलात् कल्प्यते, अत एकदा स्मृतसमुदायनिष्ठशक्तिस्मृतिः शीघ्रा अवयवशक्तीनान्तु स्मृतिर्विच्छिद्य कतिचिद्वर्णस्मृताविति विलम्ब इति चेत्, न। यथा हि मण्डपसमुदायगोचरैका स्मृतिस्तथा मण्डपादिपदविषयापीति न कश्चिद्विशेषः। अतः कथं योगाद्रूढेर्बलवत्त्वमिति।

उच्यते। यदा मण्डपपदाद्गृहविशेषस्मृतिस्तदैव प्रथमं मण्डार्थोपस्थितिः तदुत्तरम्पिवत्यर्थस्य तदनन्तरं प्रत्ययार्थस्य ततो मण्डपानकर्तृत्वेन ज्ञातस्य स्मृतिः तदेवं रूढि-यौगिकयोर्बलाबलं शीघ्रविलम्बितधीकृतमेव। तथा च रूढ्यर्थस्य शीघ्रोपस्थितत्वाद्बलवत्त्वमौत्सर्गिकम्। यत्र तु प्रकरणादिना यौगिकार्थस्य शीघ्रन्धीविषयता तत्र रूढेर्योग एव बलवान्। यथा 'अग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वेदेवैरित्यत्र विश्वेदेवपदाद्योगेन सकलदेवप्रतिपादकात् प्रकरणवशेन सन्निहितवसु-रुद्र-मरुदादित्यरूपसकलदेवतानां शीघ्रं बुद्धिस्तथा प्रकरणादवयवार्थे संस्कारोद्बोधात्, न तु पुरूरवोमाद्रवः प्रभृतिषु गणेषु रूढादपि विश्वेदेवपदात्तेषां धीः।

पङ्कजनीति। यद्यपि मन्दुरजेत्याद्युदाहरणं भवितुमर्हति पङ्केत्यादेः समुदायार्थपद्मविशेषणत्वे नीलं घटमित्यत्रेव साक्षात्तत्र विभक्त्यर्थानन्वयात्, तथापि पङ्केत्यादिविशेषणात्वं पद्मस्यापि सम्भवति ।

कामचारादित्यभिप्रेत्योक्तं **उच्यत इति**। मीमांसकैरर्थात् तत्सिद्धान्तमुपक्रम्यैव पूर्वपक्षावतारात्। 'प्रथमं मण्डार्थोपस्थितिरिति यद्यदाकाङ्क्षितमित्यादिक्रमेणान्वयधीरिति मते, यदा तु समूहालम्बनस्मृत्या युगपदेवान्वयधीस्तदापि वाक्यर्थोपस्थित्यपेक्षया पदार्थोपस्थितिस्त्वरितेति द्रष्टव्यम्।

अतएवाग्रे कल्पद्वयं स्वयमेव वक्ष्यति -- **विश्वेदेवपदादिति।**

एवं सा वैश्वेदेव्यामिक्षा वाजिभ्योवाजिनमित्यामिक्षारूपार्थस्योत्पत्तिशिष्टविश्वेदेवदेवताकत्वं ज्ञातं, वाजिभ्य इति चतुर्थ्यन्तपदादश्वे रूढादपि वाजमन्नं तद्यस्यास्तीति व्युत्पत्त्या वाजनामकामिक्षारूपान्नयोगिनां विश्वेदेवान्यञ्च प्रकरणात् शीघ्रमुपस्थितिः।

न च रूढ्याश्वानां, तेन वाजिनस्यापि विश्वेदेवदेवताकत्वं प्रतीयते।

ननु रूढेर्बलवत्त्वादत्रापि रूढ्यर्थधीरेव स्यादिति चेत्, न। द्वयोरुपस्थितयोरनुपस्थितयोर्वा रूढिर्बलीयसी। अत्र तु प्रकरणरूपहेत्वन्तरादुद्बुद्धसंस्कारेण योगार्थ एव ज्ञाने सम्भृतसामग्रीकः।

ननु शाब्दानुभवे शब्दकारिता स्मृतिरुपयोगिनो न तु प्रकरणादिकारितापि उच्छृङ्खलज्ञानकारितायास्तस्या अन्विताभिधानानुपयोगादिति चेत्, न। प्रकरणादुद्बुद्धसंस्कारस्यैव शब्दादप्युद्बोध इति प्रकरणसहकृतशब्दादवयवार्थसंस्कारोद्बोधादवयवार्थस्मृतिः शब्दकारिता शीघ्रा वा न तु रूढ्यर्थस्मृति, तत्र च संस्कारोद्बोधकाभावात्।

न चैवं लोकेऽपि मण्डपादौ योगस्य बलवत्त्वान्न लक्षणेति वाच्यम्। प्रकरणाद्यभावे हि शीघ्रं रूढ्यर्थोपस्थितौ रूढिपूर्विका लक्षणा प्रकरणादिसत्त्वे तु मण्डपादिपदेऽपि योगार्थ एव बलीयानिति न लक्षणा।

यद्यपि 'आदित्याविश्ववसव इत्यादिकोषदर्शनाद्विश्वपदस्यैव पुरूरवोमाद्रव:प्रभृतिगणवाचित्वान्न रूढियोगसम्भव: उभयथापि विश्वदेव इति यग एव परन्तु पूर्वस्य विश्वपदस्य सकलवाचित्वं गणावाचित्वञ्चेत्यक्षपदस्येव नानार्थतयैकार्थोपस्थापकप्रकरणापेक्षा, अतएव विश्वेभ्योदेवेभ्य इत्यादित्यागोऽन्यथा विश्वदेवेभ्य इति स्यात्। न चैवं देवेभ्य इति व्यर्थे, अग्नये कव्यवाहानायेति वच्चतुर्थीद्वयस्यैव देवतात्वादिति। तथापि विश्वदेवपदस्यापि तद्रूढत्वमस्तीति तदुदाहृतम्। अतएव वा अस्वरसादाह - **एवमिति**। **उपस्थितयोरिति** उपस्थापकप्रकरणादिमतोरइतीर्वेत्यर्थः।

अत्र त्विति योग एव प्रकरणसाक्षिव्यादुभयत्र न तत्सत्त्वं न वोभयत्र तदभाव इत्यर्थः।

तत्रेति। संस्कारोद्बोधकप्रकरणाद्यभावादित्यर्थः। यद्यपि पदज्ञानमेवोद्बोधकं तथाप्यन्यतरस्मृति-मात्रहेतुसंस्कारोद्बोधकं प्रकरणाद्येव तच्चात्र प्रकृतमतस्तदभाव उक्तोऽन्यतरप्रकरणजन्यस्मृतेरपर-स्मृतिप्रतिबन्धकत्वादिति भावः।

अत एव रूढिच्युतकप्रकरणादिसत्त्वेन रूढ्यर्थास्मरणान्न लक्षणा किन्तु योग एव। तस्मात्प्रकरणाद्यभावे रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद्रूढिपूर्व्विका रूढ्यर्थसम्बन्धिनि लक्षणा प्रकरणादिसद्भावे तु रूढ्यर्थस्य न स्मृतिरिति योग एवेति तत्त्वम्।

न चैवं प्रोङ्गातॄणामित्यत्रोङ्गीयाख्यसामभागयोगिनां त्रयाणां प्रकृतत्वाद्योगस्यैव बलवत्त्वं स्यात् न तु रूढिपूर्विकानुवाके लक्षणेति वाच्यम्। तत्र हि रूढौ योगे च प्रकरणस्य तुल्यत्वाद्रूढ्यर्थस्य शीघ्रोपस्थितत्वेन बलवत्त्वाद्रूढिपूर्व्विका लक्षणैव।

अत्र वदन्ति। भवतु रूढ्यर्थस्य शीघ्रमुपस्थितिस्तथापि तस्यायोग्यत्वादनन्वयेन शक्तोयप-स्थापितावयवार्थस्यैव योग्यतादिमत्त्वादन्वयबोधो भवेत् प्रतिबन्धकस्य रूढ्यर्थान्वयबोधस्याभावात् लाक्षणिकार्थस्य विलम्बितोपस्थितिकत्वात्।

नन्वेवं मण्डपं भोजयेत्यत्रावयवार्थपरत्वेऽवयवार्थानां प्रथममेकमन्विताभिधानं तदनन्तरं तस्य वाक्यार्थेऽपरमन्विताभिधानमिति तात्पर्य्ये गौरवं रूढिपूर्वकलक्षणायान्तु एकत्रान्विताभिधाने तात्पर्य्यमिति लाघवमिति चेत्, न। सामग्रीसत्त्वेनावयवार्थान्वयबोधस्यागौरवेणापहस्तयितु-मशक्यत्वात्। लक्षणीये तात्पर्यग्राहकस्याभावात् भावे वा न्यायाभिधानस्य व्यर्थत्वात्।

ननु रूढ्यर्थस्तु प्रथमं स्मृतत्वात्तस्य च लक्षणया परम्परयापि प्रयोजकत्वसम्भवे तत्त्यागायोगाद्वरं लक्षितस्यान्वयबोध इति चेत्, तर्हि, प्रथमं रूढ्यर्थस्मरणसमकालं वा स्मृतस्य मण्डाद्यवयवार्थस्य बाधकं विनान्वयरक्षार्थं तत्त्यागोऽपि नोचितः तत्त्यागहेतोः रूढ्यर्थान्वयबोधस्याभावात्।

अत एवेति। न च तत्रापि लक्षणैव, तथा सति रूढिच्युतकस्य गुणात्वापत्तेः न हि महीमहेन्द्र इत्यत्र सहस्राक्षे रूढिच्युतौ दोषः। किन्तु तुल्यलक्षणया गुणात्वम्। यदि परमेश्वरार्थकोयोगोभवेत्तदा योगार्थस्य विलम्बितोपस्थित्या स दोषो भवतीति भावः।

नन्वयोग्यताज्ञानं रूढ्यार्थान्वयबोधप्रतिबन्धकं योगार्थधियोनाशकञ्च तथा च कथं योगार्थान्वयधीस्तथाच रूढिपूर्विका लक्षणैव युक्तेत्यत आह -- **लाक्षणिकेति**। तया रूढ्यर्थोपस्थितेरपि नाशात् पुनरुपस्थित्यन्तरकल्पने योगार्थधीरेव शीघ्रा अन्वयानुपपत्तिपुरःसरलक्ष्योपस्थितेर्विलम्बितत्वादिति भावः।

अथ रूढ्यर्थस्योपस्थितिरेव योगार्थान्वयबोधप्रतिबन्धका न तु रूढ्यर्थान्वयबोधे गौरवात् यत्र च प्रकारणादिना योगार्थान्वयबोधस्तत्र रूढ्यर्थस्य स्मृतिरेव नास्ति संस्कारोद्बोधाभावात् किन्तु प्रकरण-शब्दाभ्यामवयवार्थस्य संस्कारोद्बोधनादवयवार्थस्यैव स्मृतिरिति चेत्, न। अवयवार्थस्य स्मृतावन्वयबोधे वा रूढ्यर्थस्य स्मृतेः प्रतिबन्धकत्वे मानाभावात् । मण्डपपदस्य गृहपरत्वे रूढ्यर्थस्यान्वयबोधो योग्यत्वात् स्मृतस्याप्यवयवार्थस्य नान्वयबोधः क्लृप्तकारणयोग्यताविरहान्न तु रूढ्यर्थस्मृत्या प्रतिबन्धात्। इह तु रूढ्यर्थस्यायोग्यत्वान्नान्वयबोधः अवयवार्थस्य योग्यतादिसामग्रीसत्त्वादन्वयबोधो भवत्येव।

यदि च रूढ्यर्थस्मृत्या प्रतिबन्धान्नावयवार्थस्मृतिरन्वयबोधो वा तदा त्वन्मते लम्बकर्णमानयेत्यत्र तद्गुमसंविज्ञाने बहुव्रीहावयवारथान्वयबोधो न भवेत्। किन्तु रूढ्यर्थान्यपदार्थस्यैव। तस्माद्रूढेर्योगापहारिता रूढि-योगयोर्विरोधे मण्डपादौ न तु लम्बकर्णादौ। अपहरोऽप्ययमेव यद्योग्यतया रूढ्यर्थस्यान्वयबोधो भवति नावयवार्थस्यायोग्यत्वात्, न तु योग्यतादिमतोऽप्यवयवार्थस्यान्वयबोधो भवति अनन्वितरूढ्यर्थस्मृत्या प्रतिबन्धात्।

प्रतिबन्धकत्वे मानाभावादिति साक्षादविरोधिनोज्ञानस्य जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकं तथाच रूढ्यर्थान्वयबोधोयोगार्थे आकाङ्क्षाविघटनद्वारा प्रतिबन्धको भवति जनितान्वयबोधस्य निराकाङ्क्षत्वात् न तु तदुपस्थितिमात्रमित्यर्थः।

ननु परपदेन सहास्त्वनाकाङ्क्षिता रूढ्यर्थेनैव कुतो न योगार्थान्वयो यदि न रूढ्यर्थोपस्थितिमात्रं प्रतिबन्धकमत आह -- **मण्डपेति**।

किन्तु यत्रेति। 'प्रोद्गातॄणामित्यत्रापि रूढ्यर्थसम्बन्धिनि तात्पर्यग्रहात् लक्षणा अन्यथा तत्रापि योगार्थ एव बलवान् स्यादिति भावः। **जातिविशेषेति** । 'वैश्या-शूद्रोस्तु राजन्यान्माहिय्यौ तौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्र्यां इत्यादि जातिविशेषवाक्यतः **माहिय्येन करण्यान्तु रथकारः प्रजायते** इति जातिविशेषवाक्यतश्च शक्तिनिश्चयात्तत्तत्पदं रूढमित्यर्थः।

न त्विति। तथासति 'क्लृप्तेनाप्यन्त्यजन्मन इत्यादिश्रुतावप्यन्त्यजन्मपदं विद्याप्रयुक्तिकल्पनाभयेन लक्षणादिनाप्यन्यपरं भवेदिति भावः। 'फलमुखेति विद्याप्रयुक्तिकल्पनाया हि रथकारस्य जातिविसेषवत् एवाधानप्राप्तिः फलं तथाच तत्फलमाश्रित्य यद्गौरवज्ञानं तत्तामेव न व्याहन्त्युपजीव्यविरोधादित्यर्थः।

तस्मान्न न्यायलभ्या रूढिपूर्विका लक्षणा किन्त यत्र रूढ्यर्थसम्बन्धिनि तात्पर्य्यं मानान्तरादवधार्य्यते तत्र रूढिपूर्व्विका लक्षणा रूढ्यर्थसम्बन्धिविशेषज्ञापनार्थं विशेषे तात्पर्यग्रहस्यावश्यकत्वात्। यत्र तु प्रकरणाद्यभावान्न योगबलवत्त्वं तत्र रूढ्यर्थस्य शीघ्रोपस्थितत्वात्तेनैवेत्रपदार्थान्वय इति रूढेर्योगापहारः। उपपदधातुप्रत्ययार्थानं स्मृतिस्ततस्तेषां योग्यतादिज्ञांन ततोऽवयवार्थान्वयबोध इति यौगिकार्थस्य विलम्बितोपस्थितिकत्वात् यथा 'वर्षासु रथकार आदधीतेत्यत्र रथकारशब्दाद्रूढअया जातिविशेषवत्प्रतीतेः शीघ्रत्वात्तस्यैवाधानं प्रतीयते तदर्थं तदनुकूलविद्याप्रयुक्तिरपि तस्याक्षिप्यते। न तु रथकारशब्दस्य योगोपस्थितरथकरण-योग्यान्यतोलब्धविद्यत्रैवर्णिकपरत्वं। विद्याप्रयुक्तिकल्पनातो रथकारशब्दे योगसङ्कोचमात्रस्य लघुत्वादिति युक्तं। शब्दार्थानुरोधेन हि क्लपना, न तु कल्पनाभयेन शब्दार्थत्यागः प्रमाणशब्दमूलकत्वेन फलमुघौरवस्यादोषत्वात्।

अत एव च क्रतुविशेषे 'हिरण्मयौ प्राकाशावध्वर्यवेदक्षिणां ददातीति श्रूयते, तत्राध्वर्युशब्दाद्रूढ्या ऋत्विग्विशेषस्य शीघ्रमुपस्थितेः तस्यैव प्राकाशस्य स्वत्वलक्षणसम्बन्धो विधीयते ददातीत्यनुवादः। तेन क्रतुदक्षिणायामध्वर्युभागमात्रबाधः अन्येषामृत्विजां प्राकाशस्वत्वाभावात् क्रतुदक्षिणायामन्वयः।

हिरण्मयाविति। ज्योतिष्टोमे प्रकृतौ तं शतेनदीक्षयतीति शतं गावोदक्षिणात्वेन श्रुताः। तत्र शोडषर्त्विजः किं समुदायेन सम्प्रदानमेकदेशस्य वैकदेशेन वा इति संशये 'परिषदि दत्तमदत्तमिति सूत्रेण निर्वहति। न हि चैत्रमुद्दिश्य त्यक्ते मैत्रस्वीकारेण दाननिर्वाहः। स्वीकारश्च ज्ञानविशेषः। न च समुदायमुद्दिश्य त्यक्तोऽपि समुदायस्य स्वीकारः सम्भवति। ज्ञानस्य प्रत्येकनिष्ठत्वेन समुदायवृत्त्यभावात् तथा च एकदेशस्य सम्प्रदानता वाच्या सा च 'समं स्यादश्रुतत्वादिति न्यायेन समांशकल्पनया गोचतुष्टयस्योद्वत्तत्वात्, तथा च -

'सर्वेषामर्द्धिनोमुख्या द्वितीयास्तु तदर्द्धिनः। तृतीयिनस्ततीयास्तु श्चतुर्थास्त्वेकपादिनः'।।

इह षोडशर्त्तिजां चत्वारोमुख्यास्तोषामर्द्धभागप्राप्तौ भागानुरोधादेकदेशवाचकार्द्धपदेनाष्टचत्वारिंशद्-गोरूपस्थापनादपरचतुर्णां चतुर्विंशतिरपरचतुर्णां षोडश अपरचतुर्णां द्वादशेति कृत्वा भागकल्पना एवं सत्यध्वर्योयर्जुर्वेदिकुण्डमुख्यस्य प्राकाशस्वत्वविधिना तदीयभागद्वादशगोषु न गोशतं दक्षिणा, तथाहि कात्यायनसूत्रं **द्वादश द्वादशान्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः**।

यदि चाध्वरं युनक्तीतियोगोपस्थित ऋत्विङ्मात्रे प्राकाशसम्बन्धविधिः स्यात्तदा सर्वेषामेव ऋत्विजां क्रतुदक्षिणाबाधो नाध्वर्युभागमात्रस्य।

नन्वेवं स्वर्गकामो यजेतेत्यत्र स्वर्गकामशब्दात् स्वर्गकामत्वेन स्त्री-शूद्रयोरप्युपस्थितेरधिकारो बोध्येत शब्दार्थानुरोधाद्विद्याप्रयुक्तिरपि तयोराक्षिप्येतेति चेत्। न। स्त्री-शूद्रयोर्विद्यानिषेधात् स्वर्गकामपदस्य स्त्री-शूद्रेतरपर्तवं तेन स्वर्गकामपदार्थे सङ्कोचमात्रं न बाधः सङ्कोचे च न शब्दार्थज्ञानं स्वर्गकामत्रैवर्णिकस्याधिकारबोधनात् रथकारशब्दे च पदार्थमात्रस्यैव बाधः स्यात्।

यद्यपि सङ्कोचोऽप्येकदेशबाध एवेति सोऽपि न युक्तः तदंशे शब्दार्थहानप्रसङ्गात्, तथापि सामान्यबाधादेकदेशबाध एव लघुरिति। लक्षणा च पदवृत्तिर्वृत्तित्वात् शक्तिवत्।

इत्यादिक्रमेण षोडशानां भागाः क्लृप्तास्तद्विकृतावभिषेचनीये प्रकृतिधर्मग्राहकतया तद्वदेव दक्षिणाप्राप्तौ हिरण्मयौ प्राकाशावध्वर्यवे दक्षिणा ददातीत्यध्वर्यौ प्राकाशस्वत्वविधौ ब्रह्मणेभ्योदधि दीयतां तक्रं कौण्डिन्यायेतिवत् सामान्यविशेषन्यायेन सामान्यदक्षिणायां तस्य भागबाधः इत्यर्थः।

ननु स्वत्वलक्षणः सम्बन्धोविधीयत इत्यसङ्गतं ददातीतिश्रुतेर्दानस्यैव विधेयत्वादित्यत्र आह -- **ददातीति**। सामान्यतोयज्ञाङ्गवस्तूनामृत्विग्भ्योदानस्य विधानादित्यर्थः।

यदि चेति। यस्मै कस्मैचित् ऋत्विजे प्रकाशदाने तस्य तद्भागबाधापत्तेः तथाचाचारविरोधोऽन्यथा इष्टापत्तिरिति भावः।

स्त्री-शूद्रयोरिति। न च विद्यापदमेव यज्ञाङ्गभूतविद्यातिरिक्तविद्यापरं कल्प्यतां। यद्वा स्त्री-शूद्रपदं स्वर्गकामेतरस्त्री-शूद्रपरं रथकारादिविद्याप्रयुक्तिकल्पनानुरोधेन स्त्री - शूद्रपदसङ्कोचस्यावश्यकत्वादिति वाच्यम्। प्रसक्तं हि प्रतिषिध्यते। न च स्त्री-शूद्रयोः स्वर्गकामत्वेन सामान्यतोविधिं विना अन्यत् प्रपञ्जकमस्ति, विद्यायास्तध्यापस्योपनाभावेन निषेधात्तदध्ययनाप्रसक्तेस्तथाच स्वर्गकामत्वेन सामान्यतः प्रसङ्गेन स्त्री-शूद्रयोस्तन्निषेधो न वैपरीत्यं कल्पयत्युपजीव्यविरोधादिति भावः।

पदवृत्तिः शक्त्यवच्छेदकावच्छिन्नवर्णवृत्तिः।

ननु गभीरायां नद्यां घोष इत्यत्र नैकपदे लक्षणा तीरस्यानदीत्वादगभीरत्वाच्च मुख्य-लक्ष्ययोरनन्वयापत्तेः। नापि पदद्वये प्रत्येकशक्त्या सम्बन्धिनो गभीरनदीतीरस्याप्राप्तिप्रसङ्गात्। तस्माद्गम्भीर-नद्योरन्वयबोधानन्तरं वाक्येन स्वज्ञाप्यगभीरनद्यास्तीरं लक्ष्यते। वाक्यार्थगभीरनदी-सम्बन्धिनस्तीरत्वेन प्रतीतेः।

न च वाक्ये शक्त्यभावात्तत्सम्बन्धं विना न लक्षणेति वाच्यम्। स्वज्ञाप्यसम्बन्ध एव हि लक्ष्यस्मृतौ तन्त्रम्। न तु समन्बधविशेषः शक्तिगौरवात् ज्ञाप्यश्च स्वशक्यवद्वाक्यार्थोऽपि।

घोष-नद्योरन्वयबोधाद्गभीरनद्योरन्वयबोध एव नेति चेत्, न। प्रथमोपस्थितत्वेन गभीर-नद्योरन्वयबोधस्य शीघ्रत्वात्। घोषे तदनुपपत्तिज्ञानाधीनतया तीरस्मृतिविलम्बेन नदी-घोषयोरन्वयबोधे विलम्बात्।

गम्भीरपदलक्षणायां तेन तीरस्य लक्ष्यत्वे नदीपदं प्रकृतमेव। तथा च तयोरन्वये दोषमाह -- **तीरस्येति** । एवमग्रेऽपि।

वाक्यार्थेति वाक्यार्थेगम्भीरनदी-तत्सम्बन्धिन इत्यर्थः। 'स्वज्ञापकतावच्छेदकसम्बन्धविषयसम्बन्ध इत्यर्थः। अन्यथा यथाश्रुते अपभ्रंशगङ्गापदेन समभिव्याहृतघोषपदादौ स्वज्ञाप्यसम्बन्धेन तीरज्ञापकापभ्रंशस्य लाक्षणिकत्वे साधुत्वस्यापि वज्रलेपतया यज्ञप्रयोगापत्तेः। विवक्षिते तु ज्ञापकतावच्छेदकसम्बन्धः शक्तिस्तत्र नास्ति किन्तु तदारोपस्थापकत्वनिति नातिप्रसङ्गः। प्रकृते च गम्भीरपदसमभिव्याहृतनदीशक्तत्वमेव विशिष्टबोधकतावच्छेदकं नदीपदस्य तद्विषयश्च गम्भीरपदोपस्थापितार्थासत्तिमती नदीति न काप्यनुपपत्तिः। अतएव 'न तु सम्बन्धविशेषः शक्तिरित्यग्रिमग्रन्थोऽपि सङ्गच्छते। अन्यथा प्राक् सम्बन्धस्याप्रवेशे कस्य विशेषः शक्तिर्येन गौरवं निर्वहेदिति भावः।

प्रथमोपस्थितत्वेनेत्यापाततः। वस्तुतस्तु नदी-घोषयोरन्वयबोधे विशिष्टनदीसम्बन्धितीराप्राप्ति-प्रसङ्गादित्युक्तमेव दूषणं अन्यथा घोषोनद्यां गभीरायामित्यत्र का गतिरित्यवधेयम्।

न चैवं वाक्यभेदः, कर्त्तव्यान्विताभिधानान्तरानुकूलत्वेन वाक्यैकवाक्यतावच्छेदेक-वाक्यत्वादिति।

अत्र नव्याः। वाक्यस्य ज्ञाप्याभावेन ज्ञाप्यसम्बन्धभावान्न लक्षणा। अथान्वयबोधकं वाक्यं पदानि हि सम्भूयार्थान्वयं बोधयन्ति न प्रत्येकमात्रमिति चेत्, न। पदं हि स्वार्थान्वयं बोधयति न तु समूहः समूहे स्वार्थाभावात्।

न च पदेषु व्यासज्यवृत्तिर्बोधिकता, न वेतरपदावच्छिन्न इतरपदे गौरवात्।

किञ्च गभीरायां नद्यामित्यत्र विभक्तिं विना अन्वयबोधाभावाद्विभक्त्यन्तर्भावेन वाक्यत्वं, तथा च लक्ष्ये विभक्त्यर्थान्वयो न स्यात् लक्षकार्थस्य लक्ष्येऽनन्वयनियमात्।

नापि गभीरायां नदीति विभक्तिशून्ये लक्षणा अन्वयस्य तदज्ञाप्यत्वाद्विभक्तिश्च प्रकृतिनदीगतं स्वार्थमभिदध्यान्न गभीरनदीगतं तस्या अप्रकृतित्वात्।

वाक्यैकवाक्यतावदिति । वाक्यैकवाक्यतायामवान्तरवाक्यार्थो महावाक्यार्थे विशेषणतया भासते इह तु न तथेत्यभिप्रायः। साम्यन्तु महावाक्यार्थबोधानुकूलत्वमात्रेणेत्यर्थः। समुदितानि पदानि वाक्यमतस्तत्र लक्षणा तस्य ज्ञाप्यसत्त्वात् समुदायोवाक्यमेव न तस्याशब्दात्मकत्वादित्यस्वरसम्।

नव्या इत्यनेन सूचयन्नेव सिद्धान्तयति।

अत्रेति। ननु समुदायोऽस्त्वनर्थकः समुदितानामर्थोऽस्त्येवेत्यत आह -- **न च पदेष्विति**।

गोरवादिति। पदत्वेनैवानुभावकत्वादिति भावः।

ननु बोधकता यदि स्वरूपयोग्यता तदेदं यदा तु फलोपधानं तदा इतरपदावच्छिन्ने एवमुक्तमित्युक्तिसम्भवमात्रास्वरसादाह -- **किञ्चेति** । फलोपधानस्य विभक्तिसाध्यत्वादिति भावः।

लक्षकार्थस्य लक्षकपदशक्यस्य, 'लक्ष्य इति प्रकृताभिप्रायम्।

वस्तुतो लक्ष्योपस्थितौ वृत्तिद्वयविरोधेन शक्यानुपस्थित्या शक्यानन्वयनियमादित्येव विवक्षितम्।

ननु अभेदान्वये विभक्तिरपि न बोधिकेत्यरुचेर्दोषान्तरमाह -- **विभक्तिश्चेति।**

वस्तुतः पदलक्षणयैवोपपत्तौ न वाक्यलक्षणा, तथा हि गभीर-नद्योरन्वयबोधोत्तरं नदीपदं गभीरपदं वा स्वज्ञाप्यगभीरनद्यास्तीरं लक्षयति न वाक्यम्। न च विनिगमकाभावात् पदयोर्लक्षणाद्वयं वाक्ये चैकेव लक्षणेति युक्तं, पदे क्लृप्तत्वाद्वाक्यापेक्षया लघुत्वाच्च पद एव लक्षणा । अन्यथा विनिगमकाभावाल्लक्षणाद्वयं पदे एका वाक्ये चापरा लक्षणेति गौरवं स्यात्। अन्वयबोधपूर्विका प्रत्येकं पदद्वये लक्षणैव वाक्ये लक्षणेति च परिभाषा पद-वाक्ययोर्भिन्नत्वात्।

वस्तुतस्तु गभीरपदात् स्वार्थपरम्परासम्बन्धेन लक्ष्योपस्थितौ विलम्बान्नदीपदात् स्वार्थसाक्षात्सम्बन्धेन श्रीघ्रं तीरोपस्थितिसम्भवात्तत्रैव लक्षणा।

नन्वेवं नीलं घटमानयेत्यत्रापि विशिष्टकर्मता न प्रतीयेतेत्यरुचेर्मूलसिद्धान्तमाह -- **वस्तुत** इति।

ननु ज्ञापकत्वं लक्षणामूलं तच्चेद्वाक्य-पदसाधारणं तर्ह्युभयत्रापि साम्यादित्याशङ्क्या निषेधति -- **न चेति**।

पदे क्लृप्तत्वादिति। वृत्तेरिति शेषः।

गौरवं स्यादिति। तवापीति शेषः।

ननु भवतु पद-वाक्यभेदः भवतु चाक्लृप्तत्वाद्वाक्यलक्षणायां गौरवं तथाप्येकलक्षणातो नानालक्षणाकल्पने गौरवमित्यरुचेराह -- **वस्तुत** इति।

ननु स्वज्ञाप्यसम्बन्धो लक्षणा विशिष्टार्थज्ञापकता चोभयत्र तुल्या तथा च किं विनिगमकम्। न च नीलायां यमुनायां घोष इत्यादौ नीलपदस्य गुणिपरत्वेन लक्षणायां तत्र विशिष्टतीरलक्षणायां लक्षितलक्षणेति गौरवाद्विशेष्ये लक्षणाकल्पनादन्यत्रापि तथैवेति वाच्यम्। तत्र हि लाक्षणिकस्याननुभावकतया स्वज्ञाप्यतैव न विशिष्ट इति विशेष्ये लक्षणा इह तूभयोर्ज्ञापकत्वादुभयत्रापि लक्षणा।

अथ 'पदं पांशुना यूपमनक्ति सप्तमं पदं गृह्णातीत्यत्र पदस्य ग्रहणकर्मानर्हत्वेन ग्रहणकर्मार्हेष्वञ्जनसाधनत्वेन निरूढेषु सोमक्रयार्थानीयमानैकहायन्युपलक्षितसप्तमपदपांशुषु सप्तमार्थान्वितपद-पदार्थान्वयबोधके सप्तमं पदमिति वाक्ये लक्षणेति चेत्, न। अत्रापि हि सप्तमपदयोरन्वयबोधानन्तरं सप्तमपदार्थान्वितस्वार्थबोधके पदे लक्षणा न तु वाक्ये। अत एव 'पुरोडाशकपालेन तुषानुपवपतीत्यत्रावघातजनितव्रीहितुषाणां पुरोडाशकपालेनोपवापो विधीयते पुरोडाशश्रपणप्रयोजनत्वेनोपस्थिते च कपाले नोपवापप्रयोजनकाङ्क्षा।

न च गभीरपदोत्तरसप्तमीविशेषणविभक्तिः शब्दसाधुत्वार्थमतो नदीपदोत्तरसप्तम्या नदीपदार्थानुगतस्वार्थमात्रबोधकत्वात्तत्रैव लक्षणेति वाच्यम्। एकयैवोपपत्तौ हि नोभयार्थः साधुस्तथाचान्यत्र विशेषणविभक्तेरिवात्र विशेष्यविभक्तेरेव तथात्वमस्तु प्राथम्यात् गभीरपद एव लक्षणया तदुत्तरविभक्तेरेवार्थसाधुत्वौचित्यादिति। मैवं। अनवबोधात् गभीरनद्योरभेदेन तीरसम्बन्धस्य सामयेऽपि गभीरत्वविशिष्टनदीसम्बन्धस्य प्रतीतौ गभीरार्थस्य तीरे परम्परासम्बन्धभानात् तथा च तद्रक्षानुरोधात् सर्वत्र परम्पराप्रतीतेः सर्वत्र विशेष्यपदे लक्षणेति दिक्।

मुख्यार्थान्वयानुपपत्तिमाह -- **ग्रहणेति** ।

उपलक्षणाञ्चैतत्, सप्तमत्वासम्भवेनेत्यपि द्रष्टव्यम्।

अञ्जनसाधनत्वेनेति। पूर्वत्रानुपपत्तिर्द्रष्टव्या, पुरोडाशपाकार्थमेवावहतवीहितुषणां कथमुपवाप इत्याकाङ्क्षायामपि पुरोडाशाय कपालमिति तादर्थ्यर्थलक्षणा तत्प्रयोजनतयोपस्थितं कपालं किमप्यस्य प्रयोजनमिति नाकाङ्क्षेति उभयाकाङ्क्षायाञ्चान्वयधीर्न त्वन्यतराकाङ्क्षायां अतः षष्ठीतत्पुरुषेण भविष्यत्पुरोडाशाश्रयकपालेनेत्यर्थोऽवगम्यते। अत एव च न कपालपदे लक्षणा, तथा सति पुरोडाशपदस्य तदर्थकत्वपर्यवसाने अनुपपत्त्यपरीहारात्।

न ह्येकप्रयोजनस्य किं प्रयोजनमित्याकाङ्क्षा भवति। अन्यत्र विनियुक्तत्वेन शब्दादन्यत्राकाङ्क्षाविरहेण विनियोगाप्रतीतेरेव हि विनियुक्तविनियोगविरोधः। अत आकाङ्क्षोत्थापनार्थंपुराहाशकपालवाक्यस्य पुरोडाशार्थाधिष्टाने आश्रयस्वरूपे लक्षणेति निरस्तम्। अत्रापि हि पुरोडाशपदेन पुरोडाशश्रपणप्रयोजनकाधिष्टानमाश्रयस्वरूपं लक्ष्यते। कपालपदञ्च तत्र कपालत्वविशिष्टबोधकमिति पुरोडाशपदे लक्षणा न पुरोडाशकपालवाक्ये।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे शक्तिवादः।

एतेन घटजनकेन दण्डेन गामभ्याजेति लौकिकवाक्यदर्शनात् तदर्थकतयोपस्थितेनाप्यपरान्वय इति निरस्तम्। तत्र न्यायानपेक्षणात् इह तु न्यायार्थसाधिततात्पर्यकतयैव तादृशाकाङ्क्षा-निर्वाहादित्यखण्डनकार्यः।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्याख्यालोके

शब्दाख्यतुरीयखण्डालोके शक्तिवादालोकः ।।

अथ समासवादः।

ननु बहुव्रीहौ चित्रगुमानयेत्यत्र वाक्यार्थचित्रगोस्वामिनः सम्बन्धितया अन्यपदार्थस्य प्रतीतेर्वाक्यएवान्यपदार्थे लक्षणा।

अथ चित्रा गौर्यस्येति विग्रहवाक्यस्थं लुप्तं यत्पदं स्मृतमन्यपदार्थं बोधयति यथा दधि पश्येत्यादौ लुप्ता द्वितीया स्मृता कर्मत्वं अन्यथा तत्र कर्मत्वे लक्षणापत्तेः। अज्ञातविग्रहस्य बहुव्रीहौ शक्तिभ्रमादन्यपदार्थधीरिति चेत्, न। स्मृतयत्पदात् सम्बन्धितयोपस्थिते अन्यपदार्थे कर्मत्वेनोपस्थितिं विना आनयनान्वयानुपपत्तेः। राज्ञः पुरुषमानयेत्यत्र राज्ञ इव विशेषणत्वेनोपस्थिते क्रियान्वयाभावाच्च। विभक्तिशून्ययत्पदादुपस्थिते च चित्रगुपदेन क्रियया चान्वयो न स्यात्, अन्वयप्रकारबोधक-विभक्त्यभावात्।

न च चित्राया गोर्य इति विग्रहे स्मृतप्रथमान्त य इति पदादुपस्थितिः प्रथमान्नेनानयनानन्वयात्। प्रथमान्तविग्रहे तदभियुक्तैर्बहुव्रीहेः साधुत्वनिषेधाच्च।

न च चित्रा गौर्यस्य तमानयेति तत्पदार्थस्य क्रियान्वय इति वाच्यम्। तथाननुभावात् चित्रगोसम्बन्धिनमानयेति हि वाक्यार्थधीः विग्रहे तत्पदस्याप्रयोगेण स्मृत्यभावाच्च। यत्तदोर्नित्यसम्बन्धात्तत्पदस्मरणमपीति चेत्, न। अध्याहारापत्तेः।

अथ समासवादालोकः

राज्ञ इति। पूर्वमन्वयबोधानुकूलोपस्थित्यभावादनाकाङ्क्षत्वमचेतरान्वितत्वेनेति विशेषः।

तथाननुभावात् वाक्यार्थद्वयान्वयाननुभवात्।

अध्याहारपत्तेः। तथा च तदपेक्षया लक्षणाया एव कल्पनौचित्यात्पदकल्पनापेक्षया पदार्थमात्रकल्पनस्य लघुत्वादन्यथा लक्षणोच्छेदापत्तेरिति भावः।

तथापि चित्रगुमानयेत्यत्र विभर्तिस्तत्पदार्थगतं न स्वार्थमुपनयेत्:। किन्तु गोगतमेव विभक्तेः प्रकृत्यर्थगतस्वार्थबोधजनकत्वव्युत्पत्तेः।

अथ एवान्यपदार्थोपस्थापकेन समासेनोक्तार्थत्वात् यत्पदाप्रयोगः। अन्यथा यत्पदप्रयोगोऽपि स्यात्:। न च यत्पदप्रयोगः साधुत्वार्थामेव स्त्रीप्रत्ययस्येवेति वाच्यम्। 'गोस्त्रियोरुपसर्जनस्येत्यनु-शासनबलात्तत्तथैवसाधु यत्पदे तूक्तार्थत्वं विना असाधुत्वादन्वये न निमित्तान्तरमस्ति, बहुव्रीहेर्नित्यमसासत्वेन विग्रहाभावाच्च। चित्रा गौर्यस्येति वाक्यं बहुव्रीहेरन्यपदार्थकथनाय। अन्यथा चित्रगुमानयेत्यत्र प्रक्रान्त-प्रकंस्यमानयोरभावे यत्पदर्थव्यवहारो न स्यात्। न च चित्रापदं चित्रगोस्वामिलक्षकं, तत्र गोपदार्थानन्वयात्।

नापि गोपदं लक्षकं, गोस्वामिनि चित्रापदार्थानन्वयापत्तेः। तस्माद्वाक्यार्थचित्रगोसम्बन्धितया पुरुषस्य प्रतीतेर्बहुव्रीहौ वाक्य एव लक्षणेति।

ननु यत्र पदं कल्प्यं तत्रेयं व्यवस्था इह तु तत्पदाध्याहारस्याप्यावश्यकत्वान्नैवमित्यरुचेराह। **तथापीति।** ननु यदि विग्रहोनास्ति तदा चित्रा गौर्यस्येत्यादिकिमित्यत आह -- **चित्रेति**। समस्यमानपदेनैवार्थकल्पनस्य विग्रहवाक्यत्वादिति त्वममस्यमानेनापि यत्पदेनार्थकथनादिति भावः।

अत्र च नित्यसमासत्वमस्तीत्युपन्यस्तं, वस्तुतोनित्योऽस्त्वनित्यो वा समास उभयथापि विग्रहानुभवनियमोनास्ति येन तत्स्मरणं कल्प्यत इति ध्येयम्।

ननु मा भूदयं विग्रहः तत्प्रतिरूपकस्याप्यनुभवनियमेन स्मृतयत्पदादन्यपदार्थोपस्थितिस्तदा स्यात् यदि बुद्धिस्थः कोप्यन्यः स्यात् तदा यत्पदस्य तत्रैव शक्तिर्यदि तु लक्षणायान्यपदार्थधीस्तदा पूर्वमबुद्धिस्थस्यापि चित्रगोस्वामित्वेनोपस्थितस्य लक्ष्यस्यान्वयधीरित्याह -- **अन्यथेति।**

वार्तमेतत्, वाक्ये निरर्थकतया स्वार्थसम्बन्धाभावेन लक्षणानिषेधात्, अत्रापि पदलक्षणयैवोपपत्तेश्च। तथा हि चित्र-गोपदयोन्वयबोधानन्तरं गोपदं चित्रगोस्वामिलक्षकं स्वज्ञाप्यचित्रगोसम्बन्धेन तत्स्वामिस्मारकत्वात्। चित्रापदं गवान्वितस्वार्थबोधकतया मुख्यार्थमेव। कर्त्तव्यान्वयबोधानुकूलत्वेन न वाक्यभेदोऽपि।

न चैवमेकस्यैव गोपदस्यान्यपदार्थे वृत्तौ समाहोस न स्यात्। अनेकस्यान्यपदार्थे वर्त्तमानस्य समासानुशासनादिति वाच्यम्। चित्रापदस्यापि परम्परया अन्यदार्थबोधकत्वात्।

अस्तु वा चित्रापदेऽपि लक्षणा चित्रापदार्थस्य परम्परया चित्रगोस्वामिसम्बन्धात्। न चैवमेकपदे लक्षणायामितरपदवैयर्थ्यम्, इतरपदमहिम्नैव विशेषस्य लक्षणीयत्वात्। न चैवं वाक्यार्थबोधकपदलक्षणाद्वयमेव वाक्यलक्षणा, पद-वाक्ययोर्भिन्नत्वात्।

यत्तु चित्रापदेन गोपदसन्निधानात् स्वार्थसम्बन्धिनी गोर्लक्ष्यते चित्रगवा च स्वामी लक्षित इति लक्षितलक्षणया अन्यपदार्थधीरिति, तन्न। एकपदलक्षणातोलक्षितलक्षणायाजघन्यत्वात्। भूवादयो धातवः चैत्रादीन् भोजय लम्बकर्णमानयेत्यादितद्गुणसंविज्ञानबहुव्रीहौ चित्रादेर्विशेषणस्यापि कार्य्यान्वयात्। क्रियावाचित्वनियन्त्रितत्वादिरूपेणाजहत्स्वार्थलक्षणेति सम्प्रदायः।

'चित्रगवेति। लक्ष्यचित्रगोद्वारा तत्सम्बन्धीत्यर्थः। लक्ष्यमेकमन्तरा कृत्वा पदेन परम्परासम्बन्धेन लक्षणाया एव लक्षितलक्षणत्वादिति भावः।

आदीति। लम्बकर्णावयविनो यः सम्बन्धस्तदवच्छिन्नत्वादिनेत्यर्थः। **सम्प्रदाय** इत्यस्वरसोद्भावानं। तद्बीजन्तु लम्बकर्णमित्यादौ यद्यजहतस्वार्थलक्षणाया एव लक्षितलक्षणात्वादिति तदुपस्थितिस्तदा विशेष्यत्वेनैवोभयान्वयापत्तिः। किञ्चैवं लोहितोष्णीषा इत्यत्र गुणविधिर्न स्यात् लौहित्याप्रत्ययाद्युगपद्वृत्तिद्वयविरोधेन जहत्स्वार्थाभ्युपगमात्।

अत्राहुः -- अनस्तमितपदपदार्थविभागस्य चित्रगुसमुदायस्यान्योन्यान्वितावयवार्थ-सम्बन्धिन्यन्यपदार्थे शक्तिः कल्प्येत अतोनानेकार्थत्वम्। न वा अवयवार्थत्यागो न वा तद्गुणसंविज्ञाने लक्षणा योगरूढिस्वीकारात् अवयवार्थाज्ञाने तत्सम्बन्धिनोऽज्ञानात्। मण्डपादौ तु अवयवार्थनिरपेक्षैव गृहविशेषधीरित्यवयवार्थत्याग एव समुदाये रूढिः।

तथा ह्यस्ति चित्रग्वादिपदस्यान्यपदार्थे तात्पर्यमेव तत्रैव च तात्पर्यं नियमतोऽन्यपदार्थस्य प्रतीतेः तदन्याप्रतीतेश्च, नियततात्पर्यं विना अन्यपदार्थे बहुव्रीहौ नियमतो लक्षणापि न स्यात्। तस्मान्नियततात्पर्य्यनिर्वाहिका बहुव्रीहेरन्यपदार्थे शक्तिरेव, लक्षकपदस्य लक्ष्ये तात्पर्यानियमात् तात्पर्य्यनियमे च क्वचिद्बहुव्रीहेरन्यपदार्थपरत्वमपि न स्यात्।

अथ क्वचिद्बहुव्रीहेरन्यपदार्थे तात्पर्यमेव न भवति । यथा 'यजमानपञ्चमा ऋत्विजो लोहितोष्णीषा ऋत्विज इत्यत्र यजमानपञ्चमत्व-लौहित्ययोर्विधेयत्वेन प्राधान्यात्तत्परतया अन्यपदार्थे तात्प्रयाभावादेवं क्वचिल्लोकेऽपीति चेत्, तर्हि तत्रान्यपदार्थे तात्पर्याभावात् तदनुपपत्तिं विना लक्षणाविरहादन्यपदार्थे शक्तिरेव। अन्यथा तत्रान्यपदार्थबुद्ध्यनुदयापत्तिः।

अपि च लक्षणाया अन्यपदार्थस्य चित्रग्वादिनोपस्थितौ शक्त्या लम्बकर्णप्रतीतौ प्रतीतिकलहादेव विवादविच्छेदे विनिगमकन्यायाभिधानानौचित्यात् तस्मान्न तद्गुणसंविज्ञाने अजहत्स्वार्था न वा अतद्गुणसंविज्ञाने जहत्स्वार्थेति विभागः। किन्तूभयत्र जहत्स्वार्था उभयत्र च लम्बकर्णसम्बन्धित्वेन चित्रगोस्वसम्बन्धित्वेन चोपस्थितिर्विशेषणत्वोपलक्षणत्वभेदादुभयभेदः। उपलक्षणत्वन्तु विधेयापेक्षया ज्ञाने तूभयोर्विशेषणत्वमेव। न च वृत्तिद्वयविरोधः। सम्बन्धलक्षणायैव सम्बन्धिनोभानात्। यद्धि येन विना न भासते तद्धीहेतोस्तद्बोधकत्वनियमेन सम्बन्धलक्षणैव सम्बन्धिनोभानात्तीरलक्षणया तीरत्वस्येव तेन विना तीररासम्रणात् निर्विकल्पकरूपायाः स्मृतेरभावादित्यपि द्रष्टव्यम्। तत्र तात्पर्यमेव तत्रैव तात्पर्यमिति नियमौ प्रत्येकमेव शक्तिनियतौ न तु व्यापकौ प्रकृतानुपयोगात् नानार्थे व्यभिचाराच्च। प्रकृतनियमस्त्वेकार्थ एव सुग्रहः। न च प्रथमनियमोऽसिद्धः। लक्ष्यतात्पर्येऽपि वाक्यतात्पर्यसम्भवात् शक्यसम्बन्धिनि वाक्याविशेषणत्वादिति भावः।

न च तत्रानय्पदार्थबुद्धिराभिधानिक्येव न भवतीति युक्तम्। ऋत्विग्भिः सामानाधिकरण्यानुदयात् । तस्माद्बहुव्रीहेर्नियमतोऽन्यपदार्थबुद्ध्युदयात्तत्र शक्तिरेव।

यद्यपि शक्तस्य शक्ये न तात्पर्यनियमः लक्ष्येऽपि क्वचित् तात्पर्यात्। तथापि शक्ते तात्पर्यमौत्सर्गिकं क्वचिदन्यत्र प्रयोगादपोद्यते। बहुव्रीहौ चान्यपदार्थान्यत्राप्रयोगाच्छक्यार्थेऽपि तात्पर्यनियमो भवति।

यत्तु केवललाक्षणिकस्याभावाद् बहुव्रीहौ शक्यनियमे परिशेषादन्यपदार्थ एव शक्य इति। तन्न। शक्तिं विनापि तात्पर्यनिर्वाहात्।

अत्र ब्रूमः -- बहुव्रीहौ न वाक्ये लक्षणा। किन्तु पदे । तस्य च नान्यपदार्थे तात्पर्यनियमः। क्वचिच्छक्येऽपि तात्पर्यात्। अथास्ति बहुव्रीहिस्थपदद्वयस्यान्यपदार्थे तात्पर्यनियमः ततोऽन्यत्राप्रयोगनियमात्। अतस्तन्निर्वाहिका पदद्वये शक्तिः। सैव च वाक्ये वाक्यस्य पदद्वयात्मकत्वादिति चेत्, अस्तु तर्हि बहुव्रीहिस्थपदद्वये निरूढा लक्षणा तयैवान्यपदार्थे तात्पर्यनियमोपपत्तौ समुदायशक्तौ मानाभावात्।

लक्ष्यतात्पर्यविशेषत्वेनापि लक्ष्यतात्पर्यनियमादित्यत्र नियम उभयरूपोवाच्यः। अग्रे चान्यपादार्थपरत्वमपि न स्यादित्युपलक्षणमन्यपरत्वमपि स्यादित्यपि द्रष्टव्यम्।

अभिधानिकीति शाब्दीत्यर्थः। ननु वस्तुगत्या शक्यसम्बन्धिनि तात्पर्याद्विशेषणात्वेनापि शक्ये तात्पर्यनियम इत्यभिसन्धाय नियमपदमुत्सर्गपरतया नियमेऽन्तर्भावयति -- **यद्यपीति**। तादृशोत्सर्गस्य शक्तिनियमादिति भावः। शक्तिमित्यापाततः परार्थतस्तु लाक्षणिकत्वपक्षे बह्नब्रीहिस्थपदे लक्षणा वाच्या तच्च केवललाक्षणिकमेव नगरादिपदानां शक्तत्वादित्यपि द्रष्टव्यम्।

निरूढेति। पदान्तरसमभिव्याहारनियमे लक्ष्यमात्रतात्पर्य एव निरूढलक्षणा। यथा यत्नार्थकपदसमभिव्याहारे कर्मविभक्त्यन्तस्यावयवे घटं करोतीत्यादौ लक्षणेति भावः।

नवीनास्तु -- बहुव्रीहावन्यपदार्थस्य लक्ष्यत्वे नियमतो लक्षणीयपदलिङ्गता न स्यात् लक्षकपदस्य लक्षणीयपदलिङ्गाग्राहकत्वनियमात् स्वलिङ्गापरित्यागाच्च। अतोऽन्यपदार्थे शक्तिरेवेति।

अत्र ब्रूमः -- बहुव्रीहेर्लाक्षणिकत्वेन विशेषणपदत्वनियमान्नियमतो लक्षणीयविशेष्यपद-लिङ्गकत्वम्। समानाधिकरणस्य समानविभक्तिकस्य विशेषणपदस्य विशेषपदलिङ्गत्वनियमात्। भिन्नविभक्तिकयोरिव भिन्नलिङ्गकयोरपि सामानाधिकरण्येन विशेषण-विशेष्यपदभावाभावात्। अजहल्लिङ्गे तु लिङ्गविशेषनियमानुशासनान्न तथा। अन्यदन्यस्य लिङ्गं गृह्णातीत्यत्र विशेषण-विशेष्यपदस्य भावत्वमेव नियामकम्।

अथ नियमतो विशेषलिङ्गतैव विशेषणपदस्य बहुव्रीहेः शक्तिं विना न निर्वहतीति चेत्, न। विशेषणपदत्वमेव हि विशेष्यलिङ्गकत्वे तन्त्रं, न तु शक्तत्वे सति गौरवात्। दण्ड्यादिवाक्यस्याशक्तस्यापि पुरुषादिविशेष्यलिङ्गकत्वात्, गुणवाचिशुक्लादिपदानां शुक्लः पट इत्यादौ लक्षणया विशेषणानां विशेष्यलिङ्गत्वाच्च।

समानाधिकरणस्येति । तत्राद्यं पदं चैत्रस्य पत्न्याः स्वमित्यत्र व्यभिचारवारणाय, द्वितीयन्तु चैत्रोगच्छतीत्यत्रेत्यर्थः। विपक्षबाधकमाह - **भिन्नेति**।

अजहदिति। तथाच विशेषानुशासनावतार इति पूर्वनियमे विशेषणं देयमिति भावः। यत्तु अजहल्लिङ्गत्वं प्रकृतेऽपि चित्रगुपदेऽपि गोपदादेरजहल्लिङ्गमिति। तन्न। तत्र विभक्त्यन्तस्य पदतया गोपदमात्रस्यापदत्वात् समुदायस्य विभक्त्यन्तत्वादत एव परवल्लिङ्गमित्यादौ वतिः परवत्समुदाये लिङ्गमित्यर्थादिति। **अन्यदिति**। विशेषानुशासनाभावे विसेषणपदं विशेष्यपदलिङ्गग्राहकमित्यर्थः।

ननु शक्तत्वमलाक्षणिकत्वं दण्ड्याद्यपि तथा। न च गौरवं। गम्भीरनद्यां देशे घोष इत्यादौ वाक्ये परलिङ्गग्रहणादित्यतो व्यभिचारान्तरमाह -- **गुणेति**।

ननु शुक्लादेर्गुणिपरत्वे लाक्षणिकत्वेन स्वलिङ्गप्राप्तौ 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीत्यनुशासनाल्लाक्षणिकस्यापि विशेष्यलिङ्गकत्वम्। न च बहुव्रीहौ तथानुशासनमस्तीति चेत्, न। तस्य न्यायप्राप्तानुवादकत्वात्।

अत एव शुक्लं रूपमिति शुक्लगुणवाचकत्वेऽपि लिङ्गानुशासनं परिभूय विशेषणपदत्वात् शुक्लपदं विशेष्यरूपपदस्यैव लिङ्गं गृह्णातीति। अन्यथा शुक्लो रूपमिति स्यात्।

किञ्च बहुव्रीहेर्लिङ्गानुशासनाभावेन स्वलिङ्गाभावाद्विशेषलोपस्थापकवाक्यत्वाच्च विशेष्यपदलिङ्गतैव युक्ता यथा दण्डी पुरुष इत्यादौ।

गम्भीरनद्यादावसमासेऽजहल्लिङ्गतया समासे कर्मधारयस्यापि तत्पुरुषप्रभेदत्वेन परवल्लिङ्गमित्याद्यनुशासनेनैव व्यभिचाराभावेन विशेषणान्तरदानाभावाच्चेति भावः।

तस्येति। व्याकरणसिद्धमनूद्यते कोषेण, न हि कोषस्य तदनुशासनसामर्थ्यमिति भावः।

शुक्लोरूपमिति नान्वयः। गुणे शुक्लादय इत्यस्य गुणविशेष्य इत्यर्थ इत्यरुचेराह -- **किञ्चेति।**

ननु तत्पुरुषस्थले समासत्वेनैव शक्तिकल्पनाद्बहुव्रीहावपि शक्तिरित्यत आह -- **तत्पुरुषेति**। 'षष्ठ्यर्थसम्बन्धे' सम्बन्धिनीत्यर्थः। द्वयोः प्रातिपदिकार्थयोः स्वभावादभेदान्वयबोध एव सामर्थ्यं अतएव विभक्त्यादिपदेषु सम्बन्धादिधर्मपरोक्तप्रातिपदिकार्थान्वयबोधकत्वं अर्थविशेषबोधे पदविशेषस्य तन्त्रत्वादत एव व्यासेन तदर्थबोधनमन्यथा स एवार्थोऽभावसदृशादिपदेनान्यथा बोध्यते क्वचित् संसर्गविधया क्वचित् प्रकारतया सम्बन्धभानात् अतः पटोनेत्यादौ न षष्ठी पटस्यभाव इत्यादौ षष्ठी। न च राजपदादेः सम्बन्धिपरत्वे कर्मधारयापत्तिः। समासपूर्वं तत्परत्वाभावात् सति तत्पुरुषेऽनुपपत्या सम्बन्धलक्षणापर्यवसानादिति भावः।

वस्तुतो बहुव्रीहेरन्यपदार्थे शक्तावपि कथं नानालिङ्गकत्वं तथा लिङ्गानुशासनाभावात्।

अथ विशेषणपदत्वाद्विशेष्यपदलिङ्गता विशेष्यपदञ्च नानालिङ्गमतो नानालिङ्गतेति चेत्, तर्हि लाघवाल्लक्षणैवास्तु उक्तन्यायेनैव लक्षणीयविशेष्यपदलिङ्गत्वोपपत्तेरिति।

तत्पुरुषेऽपि राजपुरुष इत्यादौ पूर्वपदस्य षष्ठ्यर्थसम्बन्धे निरूढलक्षणायैव राजसम्बन्धिपुरुषबुद्ध्युपपत्तेर्न समासे शक्तिरनन्यलभ्यस्य शब्दार्थत्वात्।

यत्तु समस्यमानपदातिरिक्तं न समासपदं समस्यमानपदानां प्रत्यभिज्ञानादतो न समासे शक्तिरिति। तन्न। पदतत्समुदाययोर्भिन्नत्वात्।

नन्वनुपपत्तिं विना कथं षष्ठ्यर्थे लक्षणेति चेत्, यदि षष्ठ्यर्थो न लक्ष्यते तदा राजपुरुषादौ लाघवादिना प्राक्सामानाधिकरण्यावगमाद्राजत्वविशिष्टपुरुषस्यैव वैभक्तिकोऽन्वयः स्यात्। राजवाहनमानयेत्यादौ वाहनपदे वाहनवल्लक्षणा स्यात्।

अथ राजत्वविशिष्टेऽस्मदाद्यानयनान्वयोऽयोग्य इति चेत्, तर्ह्यनयैवानुपपत्त्या तात्पर्यानुपपत्त्या वाषष्ठ्यर्थे लक्षणा, विभक्त्यर्थापेक्षो हि सर्वत्र नामार्थान्वयः। अतः श्रुतविभक्त्यर्थासम्भवे विभक्त्यर्थलक्षणैवोचिता।

अथ राजपुरुषादावन्वयप्रकारतया षष्ट्यर्थसम्बन्धबुद्धिरतो न पूर्वपदे लक्षणा न वा समासे शक्तिरिति। तन्न। नामार्थयोरन्वयाभिधानेऽन्वयप्रकारतया नियमतः षष्ठ्यर्थोपस्थितौ हेत्वभावात् शब्दादनुपस्थितस्यान्वयप्रकारतया भाने मानाभावाच्च।

नामेति। इदन्तु समाधिसौकर्यादुक्तम्। वस्तुतः षष्ठ्यर्थोपस्थितावपि नामार्थयोर्नान्वयप्रकारतया तद्भानं अभेदेनैव तयोरन्वयबोधकत्वव्युत्पत्तेः, अन्यथा नीलोघट इत्यत्राभेदोपचारो न कल्प्यते समवायस्यैव गुण-गुणि - संसर्गत्वसम्भवादिति तत्त्वम्।

चैत्रस्य नप्तेत्यादौ पुत्रस्य नप्तृपदाच्छक्यतावच्छेदकतयोपस्थितस्यान्वयप्रकारत्वेन ज्ञानम्।

राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्येव सम्बन्धस्मारिका । अतो न लक्षणा न वा शक्तिरित्येके। तन्न। राजपुरुषमानयेत्युक्ते पूर्वं नियमेन विग्रहाश्रवणात्। शाब्दिकानान्तु विग्रहाभिधानं समासार्थकथनपरं विभाषाधिकारे च सासानुशासनं समास-विग्रहयोः पर्यायत्वं साधुत्वं वा बोधयितुम्।

विशेषस्तु विग्रहे सोऽर्थोनाम-विभक्त्यादिभिः शक्त्याभिधीयते समासे तु राजादिपदेन लक्षणया। बहुव्रीहौ तु नित्यसमासत्वाभिधानं विग्रहस्यासाधुत्वस्थापनार्थम् चित्रा गौर्यस्येति विग्रहाभिधानं बहुव्रीह्यर्थकथनपरम्।

स्यादेतत् -- 'विभाषेति सूत्रेण वाक्य-समासयोस्तुल्यार्थता दर्सिता वाक्ये च मुख्या वृत्तिरतः समासेऽपि सैव वृत्तिः । अन्यथा अतुल्यार्थतापत्तेः वाचकस्यैवानुशासनाच्च यथा लिङादेः।

न च लाक्षणिकं वाचकम्, अन्यथा गाव्यादेरप्यनुशासनापत्तेः।

अथ वाचकव्युत्पादनवल्लाक्षणिकव्युत्पादनमपि उभयोरपि ज्ञानयोः पदार्थोपस्थापकत्वादिति चेत्, न। वाचकत्वज्ञानं विना वाच्याज्ञानाद्युक्तं वाचकत्वानुशासनं, लाक्षणिकञ्च शक्यव्युत्पत्त्यैव परम्परया लक्ष्यस्मारकमतो न तस्य व्युत्पत्त्यन्तरापेक्षा।

न च प्रयोगानुशासनं व्याकरणं स च लक्षणायामप्यस्ति अतस्तस्याप्यनुशासनं घोषसमभिव्याहारे गङ्गापदस्येवेति वाच्यम्। गङ्गायामिति मात्रं ह्यनुशिष्ठं तच्च स्नातिसमभिव्याहारेऽप्युपपन्नं न तु तत्तद्वाक्यस्थत्वेन।

नप्तृपदादिति। षष्ठ्यर्थपरम्परासम्बन्धे पुत्रस्य सम्बन्धघटकतया भानादिति भावः।

कथनपरमिति न तु समानार्थकेऽन्यतरोपस्थितावपरोपस्थितिनियम इत्यर्थः। नन्वन्यत्रानियमेऽपि अत्र विभाषाश्रवणान्नियमइत्यत आह -- **विभाषेति**।

किञ्च गङ्गायामिति पदं नानुशिष्टं किन्तु विभक्तिः सा चोभयत्र वाचिकैवेति न प्रातिपदिकवृत्तेर्मुख्याया वा लक्षणाया वा अपेक्षाः। अत एव विभक्तौ न लक्षणा अवाचकस्याननुशासनादिति।

उच्यते। साधुपदस्यानुशासनं व्याकरणं तस्य साधुत्वज्ञापकत्वेनैव प्रामाणिकप्रसिदधिसिद्धत्वात्। अत एव न गाव्यादेरनुशआसनं तस्यासाधुत्वात्। अस्ति च समासः साधुरतयुक्तं तस्य साधत्वानुशासनम्। साधुता च लाक्षणिकेनापि सम्भवति पदवाचकता चानन्यलभ्यत्वादवगम्यते, न तु व्याकरणं वाचकत्वानुशासनम्, प्रयोगमात्रे साधूनां टाप्ङीवादीनां शप्श्यनादिविकरणानां इ ई-नुमाद्यागमानां वर्णविकारषकार-णकारादीनां निरर्थकानामपि साधुत्वार्थमनुशासनात्।

अत एव 'ह्येकयोरित्याद्यनुशासनस्यैकत्व एवैववचनप्रयोगः साधुरिति साधुत्वज्ञापनार्थत्वेन सार्थकता, अन्यथैकत्वे एकवचनस्य स्वादिसूत्रेण विहितत्वाद्वैयर्थ्यं स्यात्।

बोधयितुं। न तूभयोपस्थितिनियमं कर्त्तुमिति भावः।

नन्वेवं समासोप्ययं नित्य एव विग्रहपूर्वकत्वानियमादिति बहुव्रीहौ विशेषविधिर्विरुद्ध इत्यत आह - **बहुव्रीहाविति**।

ख्यापनार्थमिति। तथाच विग्रहसाधुत्वासाधुत्वप्रयुक्तएवानित्यत्व-नित्यत्वविभाग इति भावः।

अर्थकथनेति। समस्यमान पदेनैलार्थकथनस्य विग्रहत्वाद्बहुव्रीहौ त्वसमस्यमानयस्येत्यादिपदेनापि तदर्थकथनादविग्रहत्वमिति भावः।

टाप्ङीवादीनामिति गङ्गा-नद्यादिपर। शूद्रा-ब्राह्मण्यादौ तु स्त्रीत्ववाचकत्वमेव तयोरित्यवधेयम्। **स्वादिसूत्रेण** 'तान्येकवचनेत्यादिसूत्रेणेत्यर्थः। वस्तुतोऽन्वर्थसंज्ञयैव वाचकत्वसिद्धिरिति तत्त्वम्।

द्वित्वादावशक्तत्वादेवैकवचनाप्रयोग इति चेत्, न। लक्षणया द्वित्वादौ प्रसक्तः प्रयोगोऽ-साधुरिति ज्ञापकत्वे सार्थकत्वम्।

एवञ्च विभक्तौ न लक्षणा लिङादेस्त्वपूर्व्वे क्वाप्यनुशासनं नास्तीति लोके क्रियाकार्यत्वे न लक्षणा' । एवञ्च तृतीयाया अपि लक्षणया न कर्मत्वादौ प्रयोगः सामान्यतः साधुः 'कर्तृ - करणयोस्तृतीयेत्यनुशसनबलात। व्यत्ययेऽपि च साधुत्वमनुशासनान्तरवलात्। तस्माद्यदि समासो नानुशिष्येत तदा तस्य लोके साधुत्वं न ज्ञायेत प्रत्यत गाव्यादिशब्दवदपशब्दतैव स्यात्।

यदि च विभाषेति सूत्रं न प्रणीयेत तदा तथाभूतेऽर्थे समासस्यैव साधुत्वं ज्ञायेत वाक्यस्य तदभिधानशक्तस्यापि शैवाल इव पङ्कजादेः। विभाषाशब्दः समास-विग्रहयोः साधुत्वज्ञापनार्थो न तु विकल्पेन समासस्य साधुत्वबोधकः। वाचकः शब्दः समासोऽतोऽसाधुर्गाव्यादिपदवत्, वाक्यमेव वाचकत्वात्साध्विति शङ्कां 'तुल्यार्थौ वाक्य-समासाविति बोधयद्विभाषापदमेव निराकरोति।

द्वित्वादाविति। तथासत्यसाधुतापातादिति भावः।

विभक्ताविति। अनुप्रशासनं विना नियमाभावदिति भावः।

एवञ्चेति । विभक्तेरर्थविशेषशक्तत्वप्रतिपादकत्वासमम्भवादर्थविशेषसाधुत्वनियमबोधकत्वेना-र्थान्तरेऽसाधुत्वनियमान्न क्वापि लक्षणेत्यर्थः।

लिङ्गादेरिति। नन्वेवं रथोगच्छतीत्यादौ व्यापारलक्षणायामसाधुत्वापत्तिः 'कर्तृ-कर्मणोरित्यनुशासनबलादिति चेत्, न, यत्रानुशासनान्नियमस्तत्र तथा यथा योगबलादेकत्वाद्यर्थत्वे **द्वयेकयोरित्यादि**। इह तु प्राप्तकर्तृत्वादिवाचकत्वमित्यादि सूत्रार्थ इति लक्षणा न बाधिता एवञ्च लिङ्गादावप्युक्तसमाधौ लिङ्गादीति समाधिसौकर्यादित्यवधेयम्।

नन्वेवं 'कर्तृ-करणयोस्तृतीयेत्यनुशासनस्यापि तदर्थविधायकत्वादेवञ्चेत्यादिकमयुक्तं व्यत्ययानुशासनबलेन तस्यापि नियमात्मकत्वादत एवाह -- **सामान्यत** इति।

न च साधुत्वादेव शक्तत्वम्, अन्यलभ्यत्वेन शक्तिनिरासात् तिङन्तसुबन्तयो-र्व्यभिचाराच्च। तत्र हि समुदाये साधुत्वं प्रत्येकं शक्तिरसाधुत्वञ्च।

ननु नामार्थयोः राजसम्बन्धि-पुरुषयोर्विभक्तं विना अन्वयाभावाद्राजसम्बन्धिपुरुषाप्रतीतेः विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेश्च राजसम्बन्धिपुरुषे समासस्य शक्तिरेव।

एवं बहुव्रीहि-कर्मधारयादावपि सार्थकत्वेऽपि प्रातिपदिकत्वविधानमर्थवदादिसूत्रस्य प्रपञ्च इति चेत्, उच्यते। नीलं घटमानवयेत्यादौ नामार्थयोर्विशेषणविशेष्ययोरन्वयबोधे आकाङ्क्षादिकमेव हेतुर्न तु विशेषणविभक्तिरपि नीलस्य घटकर्मत्वाभावात् शब्दात्तथाऽननुभवाच्चः। नीलविशिष्टस्य कर्मत्वं विभक्त्यर्थवहिर्भावेनैव नील - घटयोरन्वयबोधे स्यान्न त्वन्यथा।

अन्येति अनुशासनबलात् साधुत्वमात्रं न तु शक्तत्वं सिद्ध्यति सिद्धे च तत्रानन्यलभ्यत्वप्रतिसन्धानाच्छक्रत्वमिति पर्यवसितार्थः।

ननु राजसम्बन्धिपुरुषे विभक्त्यर्थान्वयः विसिष्टञ्च विशेषणविभक्तिं विना नोपस्थितमतोविशिष्टे कथमन्वय इति यदि समासे शक्तिरास्थीयते तदा विशिष्टं पदार्थतयैवोपस्थितं भवतीत्याह -- **नन्विति।**

नन्वेवं कर्मधारयेऽपि विभक्तिं विना विशिष्टानुपस्थितेः समासमात्र एव शक्तिरभ्युपेया तथाचार्थवदधातुरप्रत्यय इति सूत्रतएव प्रातिपदिकसंज्ञायां सिद्धायां 'कृत्तद्धितेत्यादि सूत्रमनर्थकं स्यादित्यत आह -- **एवमिति**।

नीलं घटमित्यादि। यत्रापि विशेषणविभक्तिस्तत्रापि साधुत्वाय नार्थं ब्रुते अभेदस्तु विशेषण-विशेष्य-पदाभ्यामेवानुभाव्यते प्रकृते च साधुत्वविभक्तिं विनापि समासानुशासनबलात् अभेदस्तु व्यासवदुभाभ्यामेव। यदि च विभक्तेरभेदार्थः तदा तदभावात् समासे अभेदः प्रकारो न स्यात् संसर्गविधया तु भासत एव विभक्तिं विनापि इष्ट-स्वर्गयोरभेदानुभवादित्यखण्डनकार्थः। 'न तु विशेषणविभक्तिरपीति। इष्ट स्वर्गयोरभेदानुभवे व्यभिचारादिति भावः।

न चव विभक्तिं विना समस्यमानपदानां साधुत्वन्नेति वाच्यम्। विभक्तिं विनापि समासस्य साधत्वानुशासनात्। तस्मान्नामार्थयोरन्वयबोधे विशेषणविभक्तिः साधुत्वार्था, न तु कर्मत्वोपनायिका। एवञ्च राजसम्बन्धिपुरुषस्य विभक्तिं विनापि पुरुषपदादुपस्थितिः।

अत एव तादृशपुरुषपदारथे विभक्त्यर्थान्वयः।

यदि च विभक्तिबलात् क्रियान्वयो नीलमित्यस्यारुणयान्यायादार्थः समाजस्तथापि रासम्बन्धिपुरुषयोः क्रियान्वयादार्थः समाजोऽस्तु।

न च राजसम्बन्धिनः कर्मत्वेनानुपस्थितेर्न क्रियान्वय इति वाच्यम्। समस्यमानपदार्थान्वयार्थं समासाद्विभक्त्यनुशासनमतो विशेषणेऽपि विभक्त्यर्थान्वयादन्यलभ्ये शक्त्यभावनियमात्। समासान्निरर्थकाद्विभक्तिश्च समस्यमानपदार्थमात्रगतमेव स्वार्थमाह तथैव व्युत्पत्त्यन्तरकल्पनात् समासेष्वनन्तशक्तिकल्पनातो लघुत्वात्।

नीलस्येत्यादि तु वस्तुगतिमनुरुध्य। तत्कर्मत्वेऽपि तद्बोधार्थं तदपेक्षा न त्वभेदानुभवार्थमिति प्रकृते तु तदुपन्यासवैयर्थ्यात् एवमग्रेऽपि तस्मादभेदानुभवार्थं न विशेषणविभक्तिरपेक्ष्यते किन्तु साधुत्वायैव इति हृदि निधायाह -- **नीलेति**।

तर्हि तदर्थमेव प्रकृतेऽप्यपेक्ष्यतामित्यत आह - **विभक्तिमिति**। पुरुषपदादुपस्थितिरनुभवरूपा लाक्षणिकस्याननुभावकत्वेन शक्तस्य पुरुषपदस्यैव विसिष्टानुभावकत्वादिति भावः।

'यदि चेत्यभ्युपगमवादः। अरुणान्यायोऽपि यत्र विशेषणविभक्तिस्तत्र विशेषणविभक्तेरर्थ-साधुत्वानुरोधादिह विशिष्टानुभवस्यापि सर्वसम्मतत्वादिति ध्येयम्।

यद्वा विभक्तेः सन्निहितपदार्थगतस्वार्थबोधकत्वमतो बहुव्रीह्यादावन्वयबोधपूर्वकोत्तर-पदलक्षणायां षष्ठीतत्पुरुषे च विभक्तिसन्निहितोत्तरपदार्थगतस्वार्थबोधकत्वं, विभक्तिसन्निहित-पदस्यार्थश्च मुख्यया लक्षणया वा।

एवं नीलोत्पलमानयेत्यादौ कर्मधारये विभक्तिं विनैव नामार्थयोरन्वयबोधानन्तरं विशिष्टस्य कर्मत्वेन क्रियान्वयः। कर्मधारये तु न शक्तिर्न वा लक्षणा ताभ्यां विनापि विवक्षितार्थान्वयबोधोपपत्तेः।

ननु नील-घटयोः सामानाधिकरण्यप्रतीतेस्तत्र लक्षणैव अन्वयप्रकारत्वादिना च तस्य भाने राजपुरुषादौ षष्ठ्यर्थोपस्थितिरपि तथास्तु।

नन्वनन्तशक्तिकल्पनवदनन्तव्युत्पत्तिकल्पनमपि सामान्यतोयद्येकं तर्हि समासत्वेन समस्यमानपदार्थे विशिष्टे शक्तिरिति शक्त्यक्यमपीत्यस्वरसादाह -- **यद्वेति**।

न चार्द्धपिप्पल्यादौ पूर्वपदार्थप्रधानसमासे तदसम्भवः। तथापि सन्निधानादानुशासनिक-सन्निधेर्विवक्षितत्वात् तथा च यत्पदान्तरमनुशिष्टा या विभक्तिः सा तद्गतं स्वार्थं बोधयतीत्यर्थः पर्यवसितः। समासे च समस्यमानपदोत्तरमेवानुशासनमतस्तदनुगतं स्वार्थं बोधयति अत्र च पूर्वोत्तरकपदयोर्योग्यतादिकमेव विनिगमकमिति भावः।

ननु बहुव्रीहौ नान्यपदार्थः समस्यमानपदार्थः तथासत्यन्यपदार्थतैव न स्यात् तत्पदार्थेऽन्यपदार्थत्वाभावादित्यत आह -- **लक्षणया वेति।**

एवमिति । सन्निहितपदार्थगतेत्यादिव्युत्पत्तेरित्यर्थः। **विभक्तिं** विशेषणविभक्तिं। इदमपि वस्तुगतिमनुरुध्य, वस्तुतोव्यासेऽपि विशेषणविभक्तेः सत्त्वेऽपि साधुत्वमात्रप्रयोजकत्वाद्विशिष्टस्य विशेष्यपदार्थस्य कर्मत्वं तदुत्तरद्वितीययैव बोध्यत इति ध्येयम्।

अत्र ब्रूमः। कर्मधारये सामानाधिकरण्यं नामार्थयोरभेदो वा गुण-गुणिनोः समवायो वा अनुभूयते स चान्वय एव न त्वन्वयप्रतियोगी अतोऽन्वयप्रतियोगिनीरुपस्थितिर्नामपदात् शक्त्यैवेति न तदर्थं लक्षणा। राजपुरुष इत्यत्र तु राजसम्बन्धि-पुरुषयोरन्वयोऽनुभूयते राजसम्बन्धिनश्चान्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थलक्षणां विना राज्ञः पुरुषं राजसम्बन्धिनं पुरुषं राजपुरुषमानयेत्यादौ पर्य्यायत्वात्। राजसम्बन्धिनः पुरुषेऽन्वयोऽनुभूयते राजसम्बन्धी अन्वयप्रतियोगित्वेन।

ननु विशेषणाविभक्तिरभेदार्था न प्रयोगसाधुत्वार्था तथाच कर्मधारये पूर्वपदार्थे तत्पुरुषे षष्ट्यर्थ इव विभक्त्यर्थेऽभिन्ने लक्षणा वाच्या तथाच नीलाभिन्नाभिन्नत्वेन घटधीः स्यान्न तु नीलाभिन्नत्वेन पदार्थसंसर्गस्यानुभवविषयत्वात् ततोऽनुभवानुरोधाद्विशिष्टे कर्मधारये शक्तिरेव वाच्या सा च समासत्वेनैव लाघवात् कल्प्यतां न विशेषतः कर्मधारयत्वेनेत्यत आह -- **कर्मेति**। न शक्तिर्गौरवात् न वा लक्षणा विशेषणविभक्तेरभेदवाचकत्वपक्षेऽपि समासे पूर्वपदार्थसंसर्गस्यैवानुभवसिद्धत्वेनाभेदपदार्थाननुभवादेव लक्षणणाकल्पकाभावादित्यसमास-समासयोः सर्वत्र प्रतीतिभेदात्। न हि राज्ञ इत्यत्रापि सम्बन्धी भासते। अपि तु सम्बन्धः। प्रातिपदिकार्थयोरेवाभेदान्वयबोधव्युत्पत्तेरिति भावः।

गुण-गणिनोरिति मतभेदेन, प्रातिपदिकयोः स्वार्थाभेद एव व्युत्पत्तेः। **राजेति**। अत्रोक्तयुक्त्या अभेदानुभव एव व्युत्पत्तेरिति भावः।

पर्यायत्वादिति। इदञ्च राजसम्बन्धपुरुषविषयतामात्रेण न त्वन्यूनानतिरिक्तविषयतया प्रथमे षष्ठ्यर्थस्य सम्बन्धस्य पुरुषे आश्रयत्वं संसर्गो द्वितीये मतुपः सम्बन्धिवचनतया राजसम्बन्धिनोऽभेदः संसर्गः समासे राजसम्बन्धिनोऽभेद इत्यस्य नून्याधिकभावादिति भावः।

एवञ्च बहुव्रीहौ सर्वपदानां षष्ठीतत्पुरुषे पूर्वपदस्यान्यपरतया लाक्षणिकत्वात्ताभ्यां कर्मधारयो बलवान् तत्र सर्वेषां पदानां स्वार्थपरतया मुख्यत्वात्।

अत एव 'एतया ऋचा निपादस्थपितं याजयेदित्यत्र कर्मधारय एव मुख्यत्वे शब्दस्वरसात् षष्ठीतत्पुरुषे च षष्ठ्यर्थलक्षणापत्तेः।

एवञ्चेश्वरनिषादप्रतीतेस्तस्यैवाधिकारात्तदपूर्वेण स्वनिर्वाहकतयैवेश्वरनिषादस्यैव यागानुकूल-विद्याप्रयुक्तिराक्षिप्यतेः। अन्यथा मुख्यार्थहानिप्रसङ्गात्।

नन्वत्र षष्ठ्यर्थलक्षणाया लब्धविद्यस्त्रैवर्णिक एव निषादानामीश्वरोऽधिकारी बोध्यते न त्वीश्वरनिषादोऽक्लृप्तविद्याप्रयुक्तिकल्पनातः षष्ठ्यर्थलक्षणायालघुत्वादिति चेत्,

उच्यते। मुख्यार्थान्वयाधीनकल्पनागौरवेण मुख्यार्थो न हीयते। किन्तु बाधकं विना मुख्यार्थान्वयबोधस्य प्राथमिकत्वात्तदनुरोधेन तदुपपादकं कल्प्यते। फलमुखञ्च गौरवं न दोषाय प्रमाणवतो गौरवस्य न्याय्यत्वात्।

एवञ्च समासे शक्त्यभावव्यवस्थितौ। **सर्वपदानामिति**। **अनेकमन्यपदार्थ** इति सूत्रानुरोधात् द्रष्टव्यम्। वस्तुतस्तत्रान्त्यपद एव लक्षणेत्युक्तत्वात्।

अत एवेति। '*वास्तुमयं चरं निर्वपेदित्यनेन* बोधितायामिष्टौ *'एतयैव निषादस्थपतिं याजयेदि*त्यनेनयैवेष्ट्या निषादस्थपतिमित्यर्थकेन निषादस्थपतेरधिकारोबोध्यते। अत्र सन्देहः। किन्निषादानामीश्वरस्त्रैवर्णिकः। उत निषाद ईश्वरो वा यस्य तादृक् चैवर्णिकः। उत निषादरूप ईश्वरः। तत्रोक्तयुक्त्या चरमः कल्प आद्रियत इति भावः। षष्टीत्युपलक्षणं, बहुव्रीहावपि तदापत्तेरिति ध्येयम्। एवमग्रेऽप्युपलक्षणं द्रष्टव्यम्।

न चाक्लृप्तकल्पनाप्रसङ्ग एव मुख्यार्थान्वये बाधकः, अक्लृप्तस् प्रागनवगमात् मुख्यार्थान्वयबलादेव तदवगमे उपजीव्यविरोधात्। अन्यथा प्रतीतानुपपत्तिबलात् क्लपना क्वापि न स्यात्, अक्लृप्तकल्पनागौरवे कल्पकस्य बाधितत्वात्।

अथ शूद्रस्य वेदपाठनिषेधादीश्वरनिषादोऽधिकारी बोधयितुं न शक्यत इति मुख्ये बाधकान्न कर्म्मधारयः। न चेश्वरनिषादे विधिबलाद्वेदपाठनिषेध एव बाध्यत इति युक्तम्। षष्ठ्यर्थलक्षणया अबाधे सम्भवति निषेधकवेदबाधकल्पनाया अन्याय्यात्वादिति चेत्, न। सामान्यनिषेधस्य तद्विशेषविधाने तदितरपरत्वात्। यथा 'न हिंस्यात्सर्वाभूतानि' श्वेतं छागमालभेतेत्यत्र।

एवं निषादपदस्य मुख्यत्वे शूद्रपदे सङ्कोचमात्रम्। शूद्रपदस्य निषादपरत्वे निषादपदस्य मुख्यत्वबाध एव।

शूद्रपद इति। ननु शूद्रपदे निषादेतरपरतायां निषादस्य सर्ववेदाधिकारापत्तिः। न च शद्रपदस्येत्यस्य शूद्रपदसमभिव्याहृतवेदपदस्येत्यर्थः तेन शूद्रवेदपाठनिषेधकवाक्ये वेदपदं प्रकृतोपयोगिवेदेरवेदपरमिति वाच्यम्। तथासति तद्वेदस्य सर्वशूद्रसंग्राहतापत्तेरिति। अत्राह। वेदपदस्य विशेषतः प्राप्तेतरवेदपरत्वं तेन निषादस्थपतिरथकारादीनां विशेषतो यावत्प्राप्तिस्तावदन्यवेदपाठनिषेधः शूद्रान्तरस्य तु यावत एव वेदराशेस्तथात्वात् सर्ववेदनिषेधः। ननु विशेषत इत्यधिकं प्राप्तेतरेत्यस्यैव सम्यक्त्वात्। तथा च स्वर्गकामो यजेतेत्यत्र स्वर्गकामत्वेन स्त्रीशूद्रयोरपि वेदप्राप्तेर्यागोपयोगिवेदान्यवेदपाठनिषेधः स्यादिति तयोरपि यागाधिकारोऽस्तु न तु वेदपाठनिषेदात्तयोर्यागानधिकारः पाठनिषेधकवाक्ये वेदपदस्य सङ्कोचावश्यकत्वे स्वर्गकामादिपदे सङ्कोचस्यान्याय्यत्वात्।[१] मैवं। सामान्यतः प्राप्तस्यैव निषेधकवाक्येन निषेधात्। न हि उपनीताधिकारित्वेन प्राप्तस्य वेदाध्ययनस्य तयोः प्रसङ्गो येन निषिध्येत्। किन्तु स्वर्गकामो यजेतेत्यादिना सामान्यतः सर्वस्य च यागप्रप्त्या प्रसक्तो वेदपाठः प्रतिषिध्यते। अतः स्वर्गकामपदे युक्तः सङ्कोचः।

[1] अप्रमाणिकत्वात्।

यद्यपि सङ्कोचेऽप्येकदेशबाध एव तथापि सङ्कोचेऽद्वयोरपि मुख्यत्वरक्षणादबाधाञ्च सङ्कोच एव ज्यायान्।

अन्ये तु। नात्र षष्ठ्यर्थो लक्ष्यते अनुपपत्त्यभावात्। अतः समासस्य षष्टर्थमन्तर्भाव्य शक्तिरे। अन्यथा कर्म्मधारयेऽपि पदार्थसमानाधिकरण्यप्रतीतेः तत्रापि लक्षणेति तुल्यम्। अथान्वयप्रकारतया सामानाधकरण्यप्रतीतेर्न तत्र लक्षणा,तर्हि षष्ठ्यर्थेऽपि तथैव न लक्षणा।

न चान्वयप्रकारतया नियमतो विशेषोपस्थितौ प्रमाणं तस्मादुभयत्र समासस्यैव बोधकत्वम्, कर्मधारये तु बलवत्त्वमुत्सर्गतः सामानाधिकरम्यस्योचितत्वात्। निषादस्थपतौ तु स्थपतिपदार्थस्येश्वरस्य प्रतियोग्यपेक्षत्वात्तत्पूरणसमर्थः षष्ठीतत्पुरुष एव निष्प्रतियोगिके कर्म्मधारयः नीलोत्पलमित्यादावुत्पलस्य निष्प्रतियोगिकत्वात्।

तथा च निषादेश्वरस्याधिकारः, ऐश्वर्यस्य सजातीयापेक्षत्वात्। नरपतिपदान्नरपतेर्नस्यैव निषादस्थपतिपदान्निषदस्येश्वरस्य प्रतीतेरिति। तन्न। राजवाहनादौ पूर्वपदे षष्ठ्यर्थलक्षणयैव राजसम्बनधिप्रतीतेः समासे शक्यभावात् अनुपपत्तिरुक्तैव।

अन्यथा अपरसक्तत्वेन प्रतिषेधानुपपत्तिः। न च जीविकात्वेन पाठप्रसङ्गः। तस्याध्यापनादिबाधेन प्रवृत्तयभावानिष्टप्रसङ्गसम्भवेन तच्छङ्कानुदयात्।

ननु विद्याप्रयुक्तिबाधेन यागबाधः श्राद्धवत् तद्रहितक्रियाया अबाधनात् अन्यथा स्त्रीशूद्रयोः श्राद्धेऽप्यनधिकारापत्तेरिति कथं स्वर्गकामपदसङ्कोच इति चेत्। न, तत्र तूष्णीमेव 'शूद्रोऽप्यमन्त्रवदित्यादिना वैदिकमन्त्रशून्यश्राद्धादिप्राप्तेः। न च यागेऽपि तथा शब्दोऽस्तीति। करणाबाधेन क्रियाया एव बाधादिति। न च पत्ये भार्येत्यङ्गवाक्यात् स्त्रियाः श्राद्धाधिकारप्राप्तौ रथकारादिवत् विदयाप्रयुक्तिरपि कल्प्यतां **शूद्रोऽप्यमन्त्रवदित्यादिवदत्र** पर्युदासाभावदिति वाच्यम्। 'शूद्रपदस्य वर्णसङ्करादिसङ्ग्रहानुरोधेनाविद्यमात्रपरत्वात्।

उपकुम्भामित्याद्यव्ययीभीवोऽर्द्धपिप्पलीत्यादिश्च तत्पुरुषः पूर्वपदार्थप्रधान एव कुम्भस्य समीपे पिप्पल्याद्यर्थे तात्पर्यादतस्तत्रोत्तरपदे षष्ठ्यर्थलक्षणा न तु समामे । नञ् समासे अब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नञि उत्तरपदार्थादृशे क्षत्रिये लक्षणा।

ननूपकुम्भादौ समासे तदर्थे शक्तिकल्पनादन्यत्रापि समासे शक्तिरित्यत आह -- **उपकुम्भमिति।** अत्र वदन्ति तत्पुरुषे भवति षष्ठ्यर्थे लक्षणा न त्वव्ययीभावे अव्ययस्य विभक्त्यन्तरान्तपदेनानन्वयात्।

न हि भवति घटश्च पटश्च इतिवत् घटस्य पटस्य चेति प्रयोगः। तस्मिन् एवार्थे पदान्तरप्रयोगे घटस्य समुच्चयः पटस्य समुच्चय इति। तदुक्तं -- *प्रयोगे स्वार्थादभिद्यमानरूपा निपाता* इति। तथा च कुम्भस्य समीपे इति भवतु षष्ठी न तूपशब्दे निपाते षष्ठ्यन्तसाकाङ्क्षता यतस्तदर्थं लक्षणा कल्प्येतेति। मैवं। यत्र यथा प्रयोगः तत्र तथा व्युत्पत्तिः। न च घटश्च पटश्चेत्यादिवत् उपकुम्भइति व्यासप्रयोगोऽस्ति येन तथा व्युत्पत्तिरवसीयेत। किन्तु उपकुम्भमित्येव प्रयोगोनित्यसमासत्वात् अत उत्तरपदे षष्ठ्यर्थलक्षणां विना नार्थसङ्गतिरित्यत्रापि लक्षणेति। न च पदेन सह तत्पुरुषानुशासनेन तत्राप्यव्ययीभावनिषेधात् तत्र च पर्युदासनियमाल्लक्षणा-शक्तिभ्यां पर्युदास-प्रसज्यप्रतिषेधयोः प्रतीतिः 'अव्ययं विभक्तीत्यादिसूत्रेणामीष्वर्थेषु वर्त्तमानमव्ययं प्रसज्यत इति बोधितेऽस्य नञ्चतत्पुरुषानुसासनबलेन सङ्कोचात्। न चैवं निष्कोशमित्यादि विधायकसूत्रसङ्कोचात् निर्मक्षिकमित्यचादि न स्यादिति वाच्यम्। तत्रार्थभेदात् निर्मक्षिकमिति मक्षिकाया अभावः निर्विघ्नमिति विघ्नान्निक्रान्त इत्यर्थेन विघ्नाभावानित्यर्थो नतु विघ्नाभाव इत्यर्थः। अत एव निर्विघ्नं समाप्यतामिति सामानाधिकरणमिति सारम्।

ननु विग्रहार्थः समासेन बोध्यमानस्तद्धेतुविभक्त्यभावे तदर्थे लाक्षणिकोऽस्ति अब्राह्मणपदेन त्वविग्रहार्थस्य सादृशस्य प्रतिपादनातच् तत्र शक्तिरेवेत्यत आह -- **अब्राह्मणमिति**। विग्रहाधिकार्थ एव भासते इत्युभयसिद्धं। तथाच प्रकृत्यर्थानुरोधाद्वृत्तौ कल्प्यमानायां लक्षणैव कल्प्यते लाघवानन् शक्तिरिति तत्र मानाभावादिति भावः।

अघटः पट इत्यादौ च प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभाववल्लक्षणा व्यासेऽपि न घटः पट इत्यादौ यथा शुक्लः पट इत्यत्र शुक्लवल्लक्षणा।

न पचतीत्यादौ क्रियासम्बन्धे भूतले न घट इत्यादौ प्रसज्यप्रतिषेधे नञो मुख्यार्थता सुबन्तसम्बन्धेऽपि न समासः विभाषाधिकाराद्विकल्पेन समासानुशासनात्। 'यजतिषु च ये यजामहे करोति नानुयाजेष्वित्यत्र पर्युदासे नञ् तेनायमर्थः 'यजतिषु' यागेषु, 'नानुयाजेषु' अनुयाजव्यतिरिक्तेषु, ये यजामह इति मन्त्रं करोति।

अघट इति। संसर्गाभावत्वेन नञस्तद्वाचकत्वेन सामानाधिकरण्यबलादभाववल्लक्षणा अत्र सामानाधिकरण्यार्थमभाववल्लक्षणा यत्र तु न तथातत्र समासे नाभाववल्लक्षणा अभाववत्त्वलक्षणेत्यर्थः। तत्र सामानाधिकरण्यादित्यभिधानात् यत्र न तथा तत्र समासेऽपि नाभाववल्लक्षणा किन्त्वभाव एव वाच्य एवं वादिनामविवाद एवेत्यादाविति भावः।

ननु संसर्गाभावशक्तस्य नञोऽभावांशेऽपि शक्तिरित्यभाववति लक्ष्येऽभावांशस्य शक्यत्वेन युगपद्वृत्तिद्वयविरोध इत्यतोऽनुरूपं दृष्टान्तरमाह -- **यथा शुक्लवदिति**।

सम्बन्धलक्षणैव येन विनेति न्यायात् सम्बन्धिनोऽपि लक्षणयैवोपस्थितिरिति न युगपद्वृत्तिद्वयविरोध इति भावः।

ननु व्यास-समामयोरुभयत्रापि लक्षणायां मुख्यप्रयोगो न क्वापीति कथं सापीत्यत आह -- **न पचतीति।** ननु न घटः पट इति व्यासो नास्त्येव सुप् सुपेति समासानुशासनात् तथाच समास एव लक्षणा व्यास एव शक्तिरित्येव विभागोऽस्त्वित्यत आह -- **सुवन्तेति**। तथाच समासानियमात् सामानाधिकरण्यबलाद्व्यासेऽपि लक्षणेति नोक्तविभागो युक्त इति भावः।

ननु समास एव लक्षणेति न युक्तं नानुयाजेष्वित्यत्र समासेऽननुयाजेष्वित्यापत्त्या स एव वक्तव्यः तथाचात्रापि लक्षणा न स्यादित्यभिप्रेत्याह -- **यजतिष्विति**।

अथ नानुयाजेष्वित्यत्र न पर्युदासे नञ् तदा हि पदद्वयस्यान्यपरत्वं स्यात्समासापत्तिश्च। तस्मादनुषङ्गात् करोतिना नञोऽन्वयात् प्रसज्यप्रतिषेधः तेनानुयाजेषु ये यजामह इति मन्त्रं न करोतीत्यर्थः। एवञ्च नानुयाजेष्विति पदद्वयस्य नान्यपरता न वा नञो मुख्यार्थत्यागः समासाभावेन साधुता च इति चेत्, न। समासस्यानित्यत्वात् नानुयाजेष्विति वाक्ये पर्युदासे नञ्।

न चैवं वाक्यवृत्तिपदत्वान्नञोऽन्यपरत्वाभावः, गौर्वाहीक इत्यादौ वाक्येऽपि गवादिपदस्यान्य-परत्वात्। यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्रविधायक-तन्निषेधयोर्विरुद्धार्थत्वेन वाक्यभेदापत्तिः तस्मात् प्रथमप्रतीतैकवाक्यताबलादेकवाक्यत्वे सम्भवति वाक्यभेदस्यान्याय्यत्वात् नञ् पदे लक्षणा कल्प्यते न तु नञ्पदे मुख्यत्वानुरोधादेकवाक्यतात्यागः।

अन्यपरत्वमिति। गम्भीरायां नद्यामितिवत् न त्वन्यत्र वृत्तिरित्येतत्परं। अब्राह्मणोऽघट इत्यादौ प्रतियोगित्वषष्ठ्यर्थादीनां भानेऽपि न प्रकारतया भानं किन्तु वैशिष्ठ्यतया अब्राह्मण इव घटो नेत्यादै तथा व्युत्पत्तेः व्यासातिरिक्तपदेन तदर्थाभिधान एव तत्प्रकारोपस्थपकपदापेक्षेति व्युत्पत्तिरतो ब्राह्मणस्य सदृशो घटस्याभाव इत्यत्र विभक्त्यपेक्षा तदभावे तेनायमर्थः समासे तदर्थलश्रणेति भावः।

वाक्यवृत्तीति विग्रहवाक्यवर्त्तीत्यर्थः। समासे सति भवति लक्षणा राजपुरुष-चित्रग्वादौ न तु विग्रहवाक्येऽपि तथाच समासे सति भवति नञि प्रयुदासे लक्षणा न विग्रहवाक्य इति भावः।

गौरिति। गौर्वाहीक इति कर्मधारयविग्रहवाक्यस्ये गौर्वाहीक इत्यत्र गोपदस्यापि लाक्षणिकत्वादित्यर्थः।

नञ्पद इति। ननु व्यासलक्षणायां अनुयाजेष्विति सप्तम्यप्रकृत्यर्थे नञर्थस्वरूपे भिन्ने स्वार्थं न बोधयेदिति तदनुपपत्त्या वाक्यभेद एवास्त्विति। मैवं साधुत्वमात्रप्रयोजिकाया विशेषणविभक्तेरर्थाबोधकत्वात्। यदा ब्राह्मणमिव पश्य ब्राह्मणेनेव कल्प्यत इत्यादिदर्शनात् निपातसमभिव्याहृतविभक्त्यर्थो निपातार्थ एव भासते। न च सुविभक्तीनां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तिभङ्गः। प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्यैव व्युत्पत्तिसिद्धत्वादिति भावः।

न हि पदार्थानुरोधेन वाक्यार्थकल्पनं, किन्तु वाक्यार्थानुरोधेन पदार्थकल्पना। न पदञ्च केवलं नास्त्येव नञ् पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः। अन्यथा प्रसज्यप्रतिषेधे नञ् न स्यादेव नपदेनैव गतार्थत्वात्। अमानोना इत्यत्रापदमेव निषेधवाचकं समास-वाक्यभेदेन नञो द्वैविध्याद्वा तथाभिधानम्। इतरेतरद्वन्द्वे च धव-खदिरौ च्छिन्धीत्यादौ विभक्त्युपनीतद्वित्वस्य धवखदिरयोः प्रत्येकं न योग्यत्वं न वा साकाङ्क्षत्वं द्वित्वमपि प्रत्येकं न योग्यं, न वा साकाङ्क्षम् एकत्र द्वित्वाभावात्।

न च व्यासज्यवृत्तित्वेन द्वित्वमेकाश्रितमपीति वाच्यम्। स हि द्वित्वमाकाङ्क्षति द्वित्वञ्च तं यत्र द्वित्वं परिसमाप्यते, एकस्य तथात्वे द्वौ वहव इत्येकत्रापि स्यात् । अतो द्वन्द्वे पदशक्यस्य नान्वयबोधः, बोधो वा धवद्वयधीः खदिरद्वयधीश्च स्यात्।

ननु नानुयाजेष्वित्यत्र नञ् न भवति किन्तु नपदमन्यदेवेत्यत आह -- **नपदमिति**।

अपदमेवेत्यत विनिगमकाभावेनास्वरसादाह -- **समासेति।**

ननु न योग्यमित्यसङ्गतं द्वित्वसंसर्गस्यैव धवनिष्ठात्यन्ताभावाप्रतियगित्वादित्यत आह -- **न वेति**।

द्वित्वमपीति वस्तुगतिमनुरुध्योक्तं। तत्साकाङ्क्षत्वेऽपि अन्याकाङ्क्षाविरहेणैवानन्वयादित्यवधेयम्। **'यत्र द्वित्वमिति** ।परिसमाप्यतावच्छेदकधर्मेणोपतिष्ठत इत्यर्थः। **'एकस्य'** समाप्यतावच्छेदकानवच्छिन्नस्य, **'एकत्र'** समाप्यतावच्छेदकानवच्छिन्ने, एकत्वेनोपस्थित इति यावत्।

ननु धव-खदिरवृत्तिद्वित्वपरिसमाप्यतावच्छेदकं धव-खदिरत्वमेवेत्यत आह - **धवेति**।

धव - खदिरत्वं नैकं किन्तु धवत्वं खदिरत्वञ्च तयोर्द्वयोर्द्वित्वसमाप्यतावच्छेदकत्वे धवद्वयधीः स्यात् खदिरद्वयधीः स्यात् इत्यर्थः।

तस्मात्पदशक्ते द्वित्वान्वयानुपपत्त्या सहितावस्थमुभय द्वित्वान्वयावगमयोग्यं तत्साकाङ्क्षञ्चेति खदिरसहितधवोपस्थितये धवपदे साहित्यलक्षणा।

ननु खदिरसहितधवस्यैकत्वात् खदिरसहितो धव इति वद् द्विवचनानुपपत्तिः धवसहितखदिरसाहित्यावस्थालक्षकत्वे च तस्या एकत्वादेकवचनापत्तिः, अस्थाश्रययोरुपसर्जनत्वेन द्विवचनान्वयानुपपत्तिश्चेति चेत् --

अत्र कश्चित्, अस्यालक्ष्यत्वेऽपि तदाश्रयगतस्वार्थबोधकत्वमेव द्विवचन-बहुवचनयोः पदवृत्तिवैचित्र्यात् तथैव व्युत्पत्तेः। यथा गुणवाचि नीलादिपदं क्वचिद्गुणामात्रवाचकं क्वचित्तदुपलक्षितद्रव्यपरम्, अन्यथा नीलः पट इति सामानाधिकरण्यं न स्यात् एकत्र वृत्त्यभावात्।

यत्तु लक्षिता साहित्यावस्था स्वाश्रयमुभयं लक्षयतीति, तन्न, लक्षितलक्षणाया जघन्यत्वात्।

वस्तुतस्तु साहित्याश्रयः प्रधानं साहित्यन्त्ववच्छेदकतया गुणभूतं पदेन लक्ष्यते तेन साहित्याश्रयस्यानेकत्वाद्द्विवचन-बहुवचने भवतः।

साहित्येति। ननु भवतु अन्वयार्थं साहित्योपस्थिति नियमः तथापि योग्यतावच्छेदकत्वेन छिद्रेतरत्ववत् साहित्यमुपतिष्ठतां किं लक्षणयेति। मैवं। आकाङ्क्षायां पदविशेषोपस्थापनस्य प्रयोजकत्वादतः पदोपस्थितिं विना नाकाङ्क्षा योग्यतायान्तु नैवं नियम इति भावः।

यथा गुणेति। वैचित्रमात्रमुदाहरणं, प्रकृतिभेदेन प्रत्ययस्य स्वार्थान्वयवैचित्रोदाहरणन्तु क्वचित् प्रत्यस्य प्रकृत्यर्थगतस्वार्थबोधकत्वं क्वचिच्च तद्विशेषणगतस्वार्थबोधकत्वं तरतमादौ द्रष्टव्यम्।

सर्वत्राजहत्स्वार्थलक्षणायां दध्युपघातकत्वादेर्विशेषणीभूतस्यैव लक्ष्यत्वमिति तदाश्रये विभक्त्यर्थान्वय इति व्युत्पत्तिवैचित्र्यमसिद्धमित्यस्वरसमत्र कश्चिदित्यनेन दर्शयित्वा तथैव सिद्धान्तमाह -- **वस्तुतस्त्विति।**

अत एवेतरेतरद्वन्द्वः सर्वपदार्थप्रधानः धवश्च खदिरश्चेति विग्रहेण तथैवार्थविवरणात्। समाहारे तु साहित्यावस्था प्रधानं पदार्थो गुणभूतः तेन तस्या एकत्वाद्भेरी-पटहमित्यादावेकवचनम्। धर्मे धर्मिणि च तात्पर्याद्द्वन्द्वयोर्भेदः। अत एव युगपदाधिकरणवचन इतरेतरद्वन्द्व इति शाब्दिकाः।

अधिक्रियत इत्यधिकरणं पदार्थस्तेषां युगपद्वचनमेकेनैकदोषस्थापनं तच्च न शक्त्या एकपदस्येतरपदार्थे शक्त्यभावात्। अन्यथेतरपदवैयर्थ्यप्रसङ्गः। अनेकार्थत्वेऽप्येकस्यैकत्रानेकार्थ-परत्वाभावात्। नापि पदद्वयं मिलितमुभयोरुपस्थापकं, मिलितस्य मिलिते शक्त्यभावात्। नापि द्वन्द्वे शक्तिरेव, पदलक्षत्रणयैवानेकार्थोपस्थितिसम्भवात्।

अत एवाङ्ग-वाङ्ग-कालिङ्गशब्दाद् द्वन्द्वे बुहषु वर्त्तमानात् परस्य तद्राजस्याजादेः 'तद्राजस्य बहुषु तेनैवास्त्रियां' इत्यनेन लोपे अङ्ग-वङ्ग-कलिङ्गा इति भवति। अन्यथा साहित्यलक्षणां विना तेषां प्रत्येकपदस्य बहुषु वृत्त्यभावादञ् लोपो न स्यात्। घटौ घटा इत्यत्रापि घटसहितघटत्वेन द्विवचनबहुवचनान्वयोयग्यतेति तदुपस्थितये घटपदे साहित्यलक्षणा। तदर्थप्रदर्शनार्थं द्वन्द्वापवादकं सरूपाणामेकशेषानुशासनमपि। तदुक्तम् --

'सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः। क्रमेणार्थप्रतीतौ हि न स्यादि्द्ववचनादिकम्'।। इति।

ननु स्वरूपद्वयमेव साहित्यमतिरिक्तस्याभावात् स्वरूपयोश्च धवपदादुपस्थितौ युगपद्वृत्तिद्वयविरोधः। न चाजहत्स्वार्थआ, साधारणरूपाभावात्। एकक्रियान्वयित्व-मेकान्वयप्रकारत्वम् अपेक्षाबुद्धिविशेषविषयत्वादिकं द्वित्वान्वयात् पूर्वमविद्यमानमप्रतीतञ्च धव - खदिराविति हि प्रतीतिः न तु रूपान्तरेण।

तदर्थप्रदर्शनार्थमिति । द्वन्द्वे साहित्ये लक्षणायां स्थितायां यदि द्वन्द्वसमानार्थकं तद्भवेत् तदा द्वन्द्वप्रसक्तौ तदपवागकं सूत्रं प्रसज्येत अन्यथा अर्थभेदादेव द्वन्द्वाप्रसक्तौ तदपवादकं न क्रियेतेत्यर्थः। **एकक्रियेति** । छिदादिलक्षणेकक्रियान्वयित्वं।

न च धवपदस्य खदिरे स्वार्थसम्बन्धो लक्षणावीजमस्तीति चेत्, न। साहित्यं हि तुल्यद्वारता सा च धातूपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्यैकरूपस्तुल्यः सम्बन्धः। द्वन्द्वेऽन्योन्यसम्बन्धोऽप्ययमेव। धव-खदिरौ छिन्दीत्यत्र छिदानुकूलो यावान् व्यापारः सतयोस्तुल्य एव भासते च।

अत एव स्वर्गकामादौ पन्नगः सहत्वेनानुप्रवेशेऽपि न द्विवचनापत्तिरेकत्वविरोधो वा अतुल्यद्वारकत्वात् दम्पत्योरेकरूपसजातीय-विजातीयव्यापारप्रचयसम्बन्धरूपसाहित्याभावात्।

एवं छिदानुकूलतुल्यव्यापारत्वेन साहित्यरूपेण शक्य-लक्ष्यसाधारणेनाजहत्स्वार्थलक्षणया धवपदादुपस्थिते धव-खदिररूपे विभक्त्यर्थद्वित्वान्वयः धवपदार्थस्य खदिरेण सम्बन्धोऽपि तुल्यहारत्वमेव।

न चास्य लक्ष्यत्वान्न सम्बन्धरूपतेति वाच्यम्। अजत्स्वार्थायां हि येन रूपेण लक्ष्यता स एव सम्बन्धः यथा छत्रि-काकपदयोः छत्रिघटितसमृद्धवर्त्तित्वं दध्युपघातकत्वञ्च लक्ष्यमेव सम्बन्धः।

न चैवं खदिरपदवैयर्थ्यं लक्षणायां लक्षणीयपदानुपयोगादिति वाच्यम्। खदिरपदं विना न नियता खदिरोपस्थितिरिति साहित्याश्रयद्वितीयविशेषज्ञापनाय पदसार्थकत्वम् अन्यथा लक्षणाविरहेण धवद्वयधीप्रसङ्गात्।

अत एवाग्नीषोमीये अग्नीषोमौ देवते इति द्वित्वान्वयबलादेव साहित्यावस्थयोः सापेक्षयोर्देवतात्वं द्वन्द्वे आद्यं पदं लक्षकं प्राथम्यात् द्वितीयं पदं साहित्यनिरूपकाकाङ्क्षितसमर्थकं मुख्यमेव उभयोरमुख्यार्थत्वे हेत्वभावात्।

अन्ये तु द्वितीयपदेऽपि लक्षणा समभिव्याहृतविभक्त्यर्थान्वयानुरोधात्। अन्यथा समभिव्याहारभङ्गापत्तेः पदार्थगतस्वार्थबोधिका हि विभक्तिः।

न च समासे पदमन्यदस्ति, समस्यमानपदात् समासे शक्त्यभावात्, तेन धवपदार्थगतं खदिरपदार्थगतञ्च द्वित्वं तन्त्रेण विभक्तिराहः। अतो धवपदवत् खदिरपदेऽपीतर-सम्बन्धावस्थस्वार्थपरता प्रातिपदिकार्थे इतरपदार्थान्वयस्य विभक्त्यर्थगर्भत्वादुभयपदार्थगत एव द्वित्व-कर्मत्वे विभक्तिराह।

न च द्वयोः सहितावस्थस्वार्थपरत्वे धवद्वयं खदिरद्वयञ्च वाक्यार्थेऽन्वीयेत न त्वेको धव खदिरश्चेति चतुष्टयापत्तिरिति वाच्यम्। पदद्वयेन हि सहितयोरेकमेव साहित्यं लक्ष्यते तच्च न चतुष्टयवृत्ति।

अपरे तु द्वितीयपदं फलतोऽनुवादकं यथान्विताभिधाने एकं पदम्। अत एव समुच्चये अन्वाचये च तयोः साहित्यानवगमान्न द्विवचन-बहुवचने न वा द्वन्द्वः। यद्यपि चार्थमात्रे द्वन्द्वानुशासनं तथापि यत्रान्योन्यसाहित्यान्वयपूर्वक इतरेतरपदार्थान्वयस्तत्र समासः साधुस्तेनेतरेतरयोग-समाहारयोस्तत्राभावात् समासः। समुच्चये अन्वाचये च न तथा, असम्बद्ध एव एकैकशः क्रियान्वयात्।

एवं धवं खदिरञ्च छिब्धीत्यादौ समुच्चये तुल्यवदसम्बद्धयोः क्रियान्वयधीः पश्चात्तु तयोरेकरूपसंजातीय-विजातीयव्यापारप्रचययोगित्वं साहित्यञ्चकारादवगम्यते। क्रियाभेदेऽन्वाचयः यथेन्धनमाहर्तुं वनं व्रज शाकमप्यानेष्यसीति। गौश्चाश्वश्चेति द्वन्दवसमानार्थकं वाक्यमेव साहित्यं परमनेन न स्फोरितं द्विवचन-बहुवचनयोरेव तद्व्यञ्जकत्वात्।

एकान्वयेति कर्मत्वकोऽन्वयस्तत्प्रकारत्वं द्वयोरित्यर्थः। आद्यद्वयमविद्यमानं शेषमप्रतीतञ्च तदेव विवृणोति--**धव-खविरावितिः**। अन्येत्वित्यस्वरसोद्भावनं तद्बीजमिदमेव यत्समस्यमानयावत्पदार्थगत-स्वार्थबोधकत्वं विभक्तीनामिति व्युत्पत्तिरसिद्धा किन्तु समस्यमानपदार्थगतमेव स चैकपदलक्षणायैव निर्वहतीति। **अपरे त्वित्यपि**। तथा अनुवादस्य प्रकारभेदेनासम्भवादिति। तस्माद्द्वितीयं पदं तात्पर्यग्राहकमित्याद्य पक्ष एवेति। **अपेक्षेति** । तस्याः समूहालम्बनरूपाया एकत्रासमाप्येरित्यर्थः।

यत्तु द्वित्वान्वयार्थं तदन्वययोग्यार्थोपनयनं अपेक्षाबुद्धइविषयत्वावस्थया च द्वित्वान्वय इत्यपेक्षाबुद्धिविषयत्वावस्थस्वार्थपरतास्तु इदमेव च साहित्यं न त्वेकक्रियान्वयः तस्य च विभक्त्यैव बोधितत्वात्। एकक्रियान्वयाभावेऽपि च द्वित्वान्वयदर्शनादिति। तन्न। अपेक्षाबुद्धिविशेष-विषयत्वार्थमप्येक उपाधिरवश्यं वाच्य इति तथैव लक्षणाया युक्तत्वात् लाघवात्।

न च विना लक्षणामप्यन्यसम्बन्धस्य सतः सापेक्षस्च क्रियान्वयोऽपि विभक्त्या बोध्यत इति।

अत्रोच्यते। एकस्मृत्यारूढपदद्वयात् स्वस्य शक्त्या स्व-स्वार्थयोरेकदा स्मृतिसम्भवादनेकस्मृत्यर्थं न साहित्ये लक्षणा एकैकमात्रगोचरसंस्कारद्वयाद्धि पदयोस्तदर्थयोश्चैका स्मृतिरित्यनुभवसिद्धम् प्रत्येकेन्द्रियसंयोगात् समूहालम्बनमिव। अन्यथा द्वन्द्वे न लक्षणा न वा तया अनेकस्मृतिः पदयोस्तदर्थयोश्चैकस्मृत्यभावात्।

न च विनेति। **अन्यसम्बन्धस्य** अन्योन्यसम्बन्धस्य। अतएव सापेक्षस्य यः क्रियान्वयः स विभक्त्यापि लक्षणां विना न बोध्यत इत्यर्थः। लक्षणां विनान्योन्यसम्बन्धाभावेन सापेक्षत्वाभावादिति भावः।

एकदान्वयप्रतियोगिनोरुपास्थितिर्मृतग्यते न त्वेकेन पदेन गौरवात् सा च पदद्वयादेव सम्भवतीति न लक्षणेत्याह -- **एकेत्यादि** योग्यतावच्छेदकेत्युपलक्षणं, अकाङ्क्षावच्छेदकेत्यपि द्रष्टव्यम्। अत एश्चिछद्रेतरत्वस्याकाङ्क्षावच्छेदकत्वमाश्रित्य लक्षणेत्युक्तमन्यथा संस्कारादेव तदुपस्थितेः तत्र लक्षणाभ्युगमस्यानुपपत्तेरिति ध्येयम्। एवमग्रेऽपि योग्ये साकाङ्क्षे इति पूरणीयम्।

पदतात्पर्येति मतान्तरेण, यदा पदेन पदार्थस्तेन च सम्बन्धी उपस्थाप्यत इति मतं तदा तत्र पदवृत्त्युपस्थापनाभावदिति। **एकस्मृतीति** । एकपदस्मृतीत्यर्थः। यथाश्रुतस्यानभ्युपगमादिति भावः।

एवञ्च पदद्वयादुपस्थिते धव-खदिरादिस्वरूपे विभक्त्या द्वित्वान्वयो बोध्यते। यथेन्द्रियसन्निकृष्टे ज्ञाते वा धवखदिरादिस्वरूपे प्रत्यक्षेण द्वित्वं बोध्यते। न च तत्र तयोः स्वरूपातिरिक्तं तुल्यद्वारत्वादिकं साहित्यमस्ति ज्ञायते वा तथा विभक्त्यापि विलक्षणस्वरूपे द्वित्वं बोध्यते। उभयोर्द्वित्वान्वयबोधकत्वे विशेषाभावात्।

ननु योग्यतावच्छेदकरूपेणोपस्थिते इतरपदादन्वयबोधः साहित्याश्रयत्वेन च धव-खदिरौ तथा न प्रत्येकं छिद्रेतरत्वविशिष्टे घटपदस्य लक्षणैवैति चेत्, न। उपस्थिते योग्येऽन्वयबोधोऽधिकस्य गुरुत्वात्। घटपदादपि योग्यस्यान्वयो बोधय्ते न तु छिद्रेतरत्वेनेत्युक्तम्।

स्यादेतत्। पदद्वयात् स्व-स्वशक्त्या एदा स्मृतेनैकत्र इतरपदार्थस्य विभक्त्यर्थस्य चान्वयबोधो न स्यात् । इतरपदार्थे इतरपदानां नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वमिति व्युत्पत्तेः व्याप्तेश्च। अनेकञ्च न पदार्थो नापि नामार्थः मिलितपदद्वये पदत्व-नामत्वयोरभावात्। अतो द्वित्वान्वययोग्यस्य पदार्थत्व-नामार्थत्वनिर्वाहाय द्वन्द्वपदे साहित्यलक्षणेति। तन्न। पदार्थत्वं हि वृत्तया पदोपस्थाप्यत्वं पदतात्पर्यविषयत्वं वा। अस्ति च द्वन्द्वे पदस्यानेकमुपस्थाप्यं तत्र तात्पर्य्यञ्च तन्निर्वाहश्चानेकैकस्मृतिद्वारा लक्षणया पदेन वा स्वस्वशक्त्या पदाभ्यां वेति न कश्चिद्विशेषः। एकपदोपस्थाप्यत्वञ्च न पदार्थत्वं गौरवात्। एवं नामार्थत्वमपि तत्तात्पर्यविषयत्वमेव।

अथ पदार्थतावाच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्वमतो मिलिते तदवच्छिन्नत्वं, न मिलितवृत्तिपदार्थतावच्छेदके लक्षणां विनेति चेत्, न। धव-खदिरस्वरूपद्वयस्य प्रत्येकं तदवच्छिन्नत्वमेव मेलकञ्च न स्वरूपद्वयातिरिक्तं प्रत्येकस्यायोग्यत्वात् न द्वित्वान्वयः।

तथापि यादृशे द्वित्वान्वयस्तादृशो न तदवच्छिन्नस्तदवच्छिन्ने च न द्वित्वान्वय इति चेत्, न। स्वरूपद्वयातिरिक्तस्य यादृशपदार्थस्याभावात्।

धवखदिरेति। पदार्थतावच्छेदकत्वमात्रं तन्त्रं न त्वेकपदार्थावच्छेदकत्वपर्यन्तं गौवरादिति भावः। **अयोग्यत्वात्** अन्वयशून्यत्वादनाकाङ्क्षत्वादिति यावत्।

वस्तुतः समभिव्याहृतपदार्थे विभक्त्यर्थान्वय इति व्युत्पत्तिर्लाघवान्न तु पदार्थतावच्छेदकावच्छिन्ने गौरवात्।

ननु विभक्तेः पदार्थतावच्छेदकधर्मव्याप्यसङ्ख्याबोधकत्वं द्वन्द्वादन्यत्र तथा व्युत्पत्तेरिति उभयगतपदार्थतावच्छेदके साहित्ये लक्षणेति चेत्, न। पदार्थतावच्छेदकधर्मसमानाधिकरण-स्वार्थबोधकत्वते विभक्तिव्युत्पत्तिर्लाघवात्, न तु सामानाधिकरण्ये नियमांशेऽपि प्रविशति गौरवात्।

नन्वेवं घटावानय पटञ्चेत्यत्र घटत्वसमानाधिकरणं द्वित्वं समभिव्याहृते पटेऽपीति तमादायान्वयबोधः स्यादिति चेत्, न। विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वं व्युत्पन्नम्।

न च घटावित्यत्र पटपदं प्रकृतिः। धवखदिरावित्यत्र धवपदं व्यवहितमपि विभक्तिसमभिव्याहृतमेव तदन्तर्भावेनैव समासस्य प्रातिपदिकत्वात् विभक्त्यर्थान्तर्भावेनैव नामार्थस्य क्रियान्वयित्वात्। विभक्तेरेकपदार्थमात्रगतसङ्ख्याभिधायकत्वं नानापदार्थगतसङ्ख्यान्वया-बोधकत्वञ्चेति चेत्, न। आद्ये एकमात्रपदयोर्वुत्पत्तावधिकत्वात् द्वितीयेऽन्वयाबोधकत्वे योग्यताविरहस्योपाधित्वात्।

न चैकधर्मावच्छेदकं विना यदि स्वरूपद्वये द्वित्वान्वयस्तदा धवञ्च खदिरञ्चेत्यत्रेव वाक्यभेदः स्यात्, द्वित्वविशिष्टैकार्थाप्रतिपादकत्वादिति वाच्यम्। आनयनान्वितद्वित्वविशिष्टैकार्थबोधकत्वात्। धव-खदिराविति च न वाक्यं क्रियायाः प्रत्येकमन्वये वाक्यभेद इत्यपि न लक्षणापक्षेऽपि प्रत्येकमेव क्रियान्वयित्वात् गमनादिक्रियाया व्यासज्यवृत्तित्वाभावात्। तद्राजानान्तु प्रत्येकं तेनैव बहुषु वर्त्तमानात्परस्याऋादेर्लोपो भवति 'तद्राजस्य बहुषु तेनैवेति वचनात् न त्वेकत्वबोधकात्।

ननु स्वार्थानवयितावच्छेदकपदार्थता-वच्छेदकावच्छिन्ने विभक्तेः स्वार्थसंख्याबोधकत्वमिति व्युत्पत्तिः द्वित्वान्वयितावच्छेदकश्चोभयवृत्तिधर्मो न च धबत्वादिकं तथेत्यस्वरसादाह - **वस्तुत इति**। उक्तव्युत्पत्तेर्गौरवग्रासेन समभिव्याहृतेत्याद्येव व्युत्पत्तिरिति भावः। **पदार्थतेति** । उक्तपदार्थतेत्यर्थः।

नियमेति। वस्तुतस्त्वाप इत्यादेरेकपाथ:परमाणावपि प्रयोगात् तद्गुणानादाय बहुवचनमुपपादनीयम्। न च प्रकृतौ लक्षणा, वृत्तिद्वयविरोधापत्ते:। न चाजहत्स्वार्था, उभयसाधारणधर्माप्रतीतिरिति गुणादीनादाय यत्परमाणोर्बहुत्वं तदेव परमाणुगतत्वेन भासत इति व्यक्तव्यं, ।

तथाच पदार्थतावच्छेदकव्याप्यसङ्ख्याबोधकत्वे व्यभिचार एव। न चाप इत्यादेर्बहव्य आप: बहवोदारा इत्यनुभवान्नैवमिति वाच्यम्। एकपाथ:परमाणावाप इति एते वयममी दारा इति प्रयोगानुपपत्ते:।

न च घटा इत्यत्राप्येवं प्रसङ्ग:। तत्रैकघटे घटा इत प्रयोगाभावेन नियमात् आप इति शब्दानां घटादिशब्दवैषम्यस्य सर्वसिद्धत्वात्। न चैकोऽयं द्वौ बहव इत्यपि स्यात्। एकत्वावरुद्धत्वेन निराकाङ्क्षत्वात्।

ननु यद्यप्यप्रतीयमानत्वमादाय बहुत्वं आप इत्यादौ तर्हि गुणानादायेति व्यर्थं घटादिकमादायेत्यपि स्यात् इति चेत्। न, न हीहापोदारा इत्यादौ घट-पटादयोऽपि येन तन्निबन्धनं बहुत्वं प्रतीयेत अपि त्ववयगुणादिकमादायेति दिक्।

प्रकृत्यर्थेति प्रकृत्यर्थे नैवान्वयोनाप्रकृत्यर्थेनेत्यर्थ:। दारा इत्यादिवत् तदादाय द्वित्वं प्रकृत्यर्थ एवान्वेतीत्यपि न तथा प्रयोगाभावात् प्रयोगमूलत्वादन्वयनियमस्येति भाव:।

समभिव्याहृतमेव प्रकृतिरेव, **एकपदेति** एकं यत्पदं तदर्थ इत्यर्थ:। एवमग्रेऽपि **एकमात्रेति**। यद्यपि मात्रान्तर्भाव आवश्यकस्तथापि बोधकत्वांशे तथा न तु पूर्वप्रतीके गतपर्यन्ते मात्रार्थान्वयोदारा इत्यादौ व्यभिचारादित्येकमात्रपदयोरित्युक्तं। **तद्राजानान्त्विति**। समाधिसौकर्यादुक्तं, आङ्गश्च वाङ्गश्च इत्यादिविग्रहेण द्वन्द्वेषु बहुषु वर्तमानत्वमस्त्वेवेति ध्येयम्।

अत एवाङ्गानामपत्यानि राजानो वा अङ्गा इत्युदाहरणं अङ्गानामपत्यं राजा वा आङ्ग इति प्रत्युदाहरणं वृत्तिकारो दर्शयति स्म, तस्मान्ननापदादप्युपस्थितेऽनेकत्र द्वित्वान्वय इति नानेकोपस्थित्यर्थं साहित्यलक्षणा। अत एव --

'चन्द्रे कलङ्कः सुजने दरिद्रता
विकासलक्ष्मीः कमलेषु चञ्चला।
मुखाप्रसादः स धनेषु सर्वदा
यशो विधातुः कथयन्ति खण्डितं'।।

इत्यादावेकैकस्मृत्यारूढनानापदजनितैकस्मृतिविषयेषु कलङ्कादिषु बहुत्वान्वयबोधः मेलकोपस्थापकस्य द्वन्द्वस्य तत्राभावात् तत्कल्पने मानाभावात् एकवचनान्तानां वाक्येऽनन्वयप्रसङ्गाच्च।

नन्वेवं धव-खदिरौ छिन्धीत्यत्र तयोश्चिदानुकूलव्यापारवत्त्वं साहित्यं न प्रतीयेतेति चेत्, न। द्वित्वान्वयबोधात्पूर्वं तन्न प्रतीयत एव तदुत्तरन्तु विभक्त्या क्रियापदेन च सम्भूय छिदानुकूलसजातीयविजातीयव्यापारप्रचयस्य तुल्य एव सम्बन्धो धवे खदिरे च बोध्यते यथा धवं छिन्धि खदिरञ्चेति समुच्चयेन। न चैवं द्वन्द्वसमानार्थत्वेन समुच्चयेऽपि समासः स्यादिति वाच्यम्। द्वन्द्वे युगपदुपस्थिते द्वये एकदा क्रियान्वयबोधे तात्पर्यन्तेन तत्र समासः समुच्चये क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्यमित्यसमासः। अन्वाचयेऽप्येवम्।

किञ्च यदि तुल्यव्यापारत्वेन साहित्येन द्वयोरुपस्थितिः पदार्थता च तदा तुल्यव्यापारौ सहितौ वा गच्छत इति धीः स्यात् । न तु चैत्र-मैत्राविति पदार्थतावच्छेदकरूपेण पदार्थे विभक्तेः क्रियापदस्य चान्वयबोधकत्वव्युत्पत्तेर्व्याप्तेश्च।

नानेकोपस्थितीति। न च युगपदधिकरणवचनत्वविरोधः। नानापदादपि युगपदुपस्थितेरेकत्वान्तरभावस्यातदर्थत्वादिति भावः।

यथा दध्युपघातकत्वेन काकादेरितरपदार्थान्वयः सहितावस्थचैत्र-मैतर्त्वेनोपस्थितौ प्रत्येकं द्वित्वान्वयानुपपत्तिर्वृत्तिद्वयविरोधश्च।

अपि च चैत्र-मैत्रौ गच्थ इत्यतर् गमनस्य व्यासज्यवृत्तित्वाभावात् चैत्रत्वेन गमनान्वयार्थं चैत्रपदात् चैत्रत्वेन द्वित्वान्वयार्थं मैत्रसहितचैत्रत्वेनोपस्थितौ युगपद्वृत्तिद्वयविरोधः सहितावस्थे च गमनकर्तृत्वाभावात् आख्यातार्थसङ्ख्यान्वयोऽपि न सहितावस्थे।

न च सहितत्वेनोपस्थिते पदारथैकदेशे चैत्रे मैत्रे च धात्वर्थगमनान्वय इति वाच्यम्। सहितो गच्छतीति धीप्रसङ्गात्।

न च धात्वर्थगमने आख्यातार्थद्वित्वान्वयः, सामानाधइकरण्यभङ्गप्रसङ्गात् सुबन्त-तिङन्तयोरेकसंख्याभिधायकत्वात्। एवं गर्गाभुञ्जत इत्यत्र भोजनस्यैककर्तृकत्वनियमात् अनेककर्तृकं भोजनं न सम्भवतीति तन्त्रवृत्त्या गर्गत्वेनोपस्थितेऽनेकत्र सुप्तिङर्थबहुत्वान्वयः, न तु सहितत्वेनोपस्थिते।

यत्तु तत्रापि धात्वर्थभोजनगतं बहुत्वमाख्यातेनोच्यत इति। तन्न। तिङन्त-सुबन्तयोः सामानाधिकरण्यानुपपत्तेः भोजनानां सहितत्वेनानुपस्थितेश्च। यदा चानुगतं रूपं विनैवैकैकपदात् स्व-स्व शक्त्योपस्थितेऽनेकत्र योग्यतया द्वित्व-बहुत्वान्वयस्तदा सुबन्त-तिङन्तसंख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः।

यत्तु साहित्यं नोभयानुगतं तुल्यव्यापारत्वादिकं तेन रूपेण धव-खदिरयोर्विभक्ति-धात्वर्थान्वयाप्रतीतेः। किन्तु प्रत्येकविलक्षणं स्वरूपद्वयमेव प्रत्येकाच्चोभयमन्यदेव भवति हि द्वयादन्य एकः धवो न धव खदिरौ तौ च न धव इत्यनुभवात्। तथा चैकमात्रवाचकेन द्वयमशक्यं लक्ष्यत इति न वृत्तिद्वयविरोधः।

न वृत्तिद्वयविरोध इति। न चैवं गङ्गातीरोपस्थितिरप्येवमस्तु। शुद्धपदार्थयोरेवमुपस्थितावपि गङ्गायाः सम्बन्धित्वेनानुपस्थितेरिति भावः।

धवपदस्य च स्वार्थनिरूप्यत्वमेव लक्ष्ये स्वरूपद्वये सम्बन्ध एकनिरूप्यत्वाद्द्वयस्य। अनुगतधर्मं विनापि धवपदादनेकोपस्थितिर्ध्रुवपदादिव चतुर्दशानाम्। योग्यतया विभक्त्यर्थस्य स्वरूपद्वये धात्वर्थस्य च प्रत्येकमन्वय इति, तन्न। उक्तरीत्या हि स्व-स्वशक्त्या नानापदजनितैकस्मृतिविषयेऽनेकत्र द्वित्वान्वयबोधसम्भवात् न तदर्थं साहित्यलक्षणा घटौ घटा इत्यत्र द्वित्व-बहुत्वान्वययोग्यानेकोपस्थितिः शक्तित एव तन्त्रवृत्त्या घटपदात् सम्भवतीति न तदर्थं लक्षणा। यथा ग्रहं सम्माष्टीत्यत्र ग्रहपादत्तन्त्रवृत्त्योपस्थितानेकग्रहे सम्मार्गान्वयः, तर्हि तत्रानेकग्रहस्वरूपमात्रज्ञानवदिहाप्यनेकघटस्वरूपधीः स्यात्। न तु तेषां सहितावस्थत्वधीरिति चेत्, न। तां विनापि द्वित्व-बहुत्वान्वययोग्योपस्थितेः। सहितावस्थत्वेनानेकस्य द्वित्व-बहुत्वान्वययोग्यतेति चेत्, न। प्रकृत्युपस्थितानेकत्वेनैव तद्योग्यत्वात् लाघवात्। भवत्वनेकत्र द्वित्वान्वयबोधस्तेषां साहित्यधीस्तल्लक्षणां विना न स्यादिति चेत्, न। विभक्त्यर्थ-धात्वर्थव्यापारन्वयबोधात्पूर्वमनेकत्र तुल्यव्यापारेवत्त्वस्याप्रतीतेः।

किञ्चैवं न विभक्त्यर्थद्वित्वबहुत्वान्वयानुपपत्त्या लक्षणा। किन्तु साहित्यप्रतीत्यनुरोधात्। न चैवमपि, धातुनैव तुल्यव्यापारवत्त्वस्य बोधनात् तदन्वयबोधात्पूर्वं तत्प्रतीत्यसिद्धेः। समाहारे तु पाणि-पादं पञ्चपूलीत्यादौ तावद्वृत्त्येकधर्माभिधानं लक्षणयैव तदेकत्वादेकवचनम्।

तदाहुः शाब्दिकाः -- समाहरणं समाहारोऽनेकस्यैकीकरणम् एको धर्म इति यावत्। स चैको धर्मः सेनावनादाविव द्वित्व-बहुत्वसङ्ख्यापेक्षाबुद्धिविशेषविषयत्वं वा। विरूपैकशेषे तु पितरावित्यत्रैकस्य पितृद्वयाभावात् अगत्या पितृपदेन जनकपदाम्पत्ये लक्षणा विभक्त्युपनीतञ्च द्वित्वं विरूपयोरेव माता-पित्रोरवगम्यते, सरूपस्य तु पितृद्वयस्य मातृद्वयस्य वैकं प्रत्यजनकत्वात्।

विरूपेति अत्र सर्वत्र पदान्तरविभक्त्यादिस्मृतौ तत एवार्थप्रत्ययः तदस्मृतौ लक्षणेति यदा लक्षणा तदा प्रकारोऽयं एकत्र च जनकावित्यर्थे जनकद्वयाभावाद्वस्तुगत्यैकोजनकः पुमानपरा स्त्रीभासते जनकत्वेन सामान्येन। यदा तु स्त्रीत्वं प्रकारस्तदापि ग्रन्थकृन्मते वृत्तिद्वयाविरोध एव। प्राचीनमते त्वेकशक्तेन द्वयमप्यशक्यं ध्रुवपदवत् प्रत्येकारेणोपतिष्ठत इत्येव सर्वत्र तत्त्वम्। पत्नीत्युपलक्षणं पतिरित्यपि द्रष्टव्यम्।

श्वशुराविति्यत्र श्वशुरपदे पत्नीजनकदाम्पत्ये लक्षणा पत्नीजनकद्वित्वञ्चोक्तन्यायात् पत्नीमाता-पित्रोरेव। ब्राह्मणावानयेत्यत्र दम्पतिपूजाप्रकरणे मानान्तराद्ब्राह्मण-ब्राह्मणीपरत्वावगमे 'पुमान् स्त्रियेति विरूपैकशेषत्वाद्ब्राह्मणपदे स्त्री-पुंसलक्षणैवानन्यगतिकत्वात्। पुंलिङ्गत्वन्तु पदार्थैकदेशगतमनूद्यते। स्त्रीपरत्वाज्ञाने च ब्राह्मणपदेन तन्त्रवृत्त्या पुंहयमेवोच्यते न तु स्त्री-पुंसौ सरूपैकशेषापेक्षया विरूपैकशेषस्य लाक्षणिकत्वेन जघन्यत्वात्।

यदि च सरूपैकशेषेऽपि लक्षणा तदाप्यौकारान्तपदात्सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् लिङ्गानुरोधात् ङीबाद्यर्थकल्पने मानाभावात् पुन्द्वयमेवावगम्यते, न तु स्त्री-पुंसौ। शिवौ नमस्कुर्य्यादित्यत्र नमस्यशिवान्तराभावाद् विरूपैकशेष इत्यगत्या शिवपदेन शिवश्च शिवा च लक्षणयोच्यते। भ्रातरौ पुत्राविति्यत्रापि मानान्तरात् स्त्रीपरत्वज्ञाने 'भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषवद्भ्रातृपेदन भ्रातृस्वसारौ पुत्रपदेन पुत्र-दुहितरौ लक्ष्येते। स्त्रीपरत्वाज्ञाने च तन्त्रवृत्त्योक्तयुक्त्या मातृद्वयं पुत्रद्वयमेवोच्यते।

नन्वेवं 'क्षौमे वसानावग्नीनादधीयातामित्यत्राप्यौकारान्तवसानपदात् सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् टावाद्यर्थकल्पने च हेत्वभावात् पुंद्वयबुद्धौ पुरुषद्वयविधिराधाने स्यात् वसानपदात्तन्त्रवृत्त्यापि स्त्री-पुंसयोर्ज्ञानासम्भवात्।

न चैवं 'पुमान् स्त्रियेति विरूपैकशेषोच्छेदः, यत्र तु मानान्तरात् स्त्रीपरत्वधीस्तत्र स्त्रीद्वितीयस्य प्रातिपदिकार्थत्वात्। उभयसमवेतद्वित्वस्य पुंस्यपि सम्भव इति विभक्त्या तङ्गतसङ्ख्याभिधाने विरूपैकशेषसम्भवात्। इह तु स्त्रिया उपनायकाभावात् द्वितीयत्वेन स्त्रिया अप्राप्तत्वात् वसानपदस्योक्तयुक्त्या तदुपस्थापकत्वाभावात् सरूपैकशेषतैव स्यादिति।

मैवम्। क्षौमे वसानावित्यत्र यत् कर्त्तव्यं तदनया सहेति विधिना अग्नपाधाने सहत्वेन प्राप्तया पत्न्यैव पुंसः सद्वितीयत्वात् न त्वप्राप्तेन पुमन्तरेण वाक्यभेदापत्तेः। पुंस्त्वन्तु विभक्त्या नामार्थगतमेवानूद्यते, न तु नामार्थैकदेशगतम् अन्यसहितावस्थपुमर्थस्यैव नामार्थत्वादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे समासवादः।

वाक्यभेदेति। पुमन्तरयोरुभयोर्विधेयतायां वाक्यभेदापत्तेरिति भावः।

नामार्थगतमिति। नामार्थप्राप्तं, स्वर्गकामपदान्नामार्थतया प्राप्तमात्रैकदेश एवानूद्यते सम्पूज्य द्विजदान्पत्यमित्ययत्र पतिशब्दादेकदेश एवाप्ततयैवानूद्यत इति भावः।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके समासवादालोकः।

अथाख्यातवादः

आख्यातस्य यत्नवाचकत्वादचेतने रथो गच्छतीत्यादौ आख्याते व्यापरलक्षणा। तथाहि पचतीत्यादावाख्यातस्य यत्नो वाच्यः पचति पाकं करोतीत्यादियत्नार्थककरोतिना सर्वाख्यातविवरणात्। वृद्धव्यवहारादिवद्बाधकाभावे विवरणादपि व्युत्पत्तेः। द्वन्द्वादिसमासस्य विग्रहेण विवरणेऽपि विग्रहार्थे न शक्तिरन्यलभ्यत्वात्। किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विना अनुपपत्तेरित्याचार्य्याः।

अत्र वदन्ति -- आख्यातस्य करोतेश्च न यत्नार्थत्वं । रथो गच्छति जानाति यतते निद्रातीत्यादौ धात्वर्थानुकूलयत्नाभावेऽप्याख्यातप्रयोगात् गमनं करोतीति करोतिना तत्राख्यातविवरणाच्च तत्र व्यापारस्य करोत्यर्थत्वे चेतनेऽपि तथा। न च तत्राख्यात-करोत्योर्गौणत्वम्, मुख्ये बाधकाभावात्। अत एव प्रश्नोत्तरयोर्न यत्नार्थत्वं, किन्तु कृञः क्रियावाचित्वमेव तेन किं करोतीति क्रियामात्रप्रश्ने पचति गच्छतीति-क्रियाविशेषेणोत्तरमपि समञ्जसम्भवति।

अथ क्रियाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यां घटाङ्कुरयोः कृताकृतव्यवहारात् तृजन्तकृढधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयवाचकत्वाच्च कृडो यत्नार्थत्वम् क्रियामात्रार्थत्वे कृजः क्रियाश्रयः कर्तृपदार्थः स्यात् तथा च कारकमात्रेऽतिप्रसङ्गः।

अथाख्यातवादालोकः।

विवरणादिति। तस्य प्रसिद्धार्थपदसामानाधिकरण्यरूपत्वादिति भावः।

अन्येति। शक्तिग्राहकमात्र एवानन्यलक्षभ्यत्वतर्कसहकारित्वादिति भावः।

एवञ्च कृजो यत्नार्थत्वे तेन चाख्यातविवरणात् तस्यापि यत्नोऽर्थः। तदुच्यते --

'कृताकृतविभागेन कर्तृरूपव्यवस्थया। यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना'।।

सैवाख्यातार्थो भावनोच्यते इति चेत्, न। वीजेनाङ्कुरः कृतः स्त्रगादिना सुखं मुखं कृतं बीजमङ्कुरं करोतीति यत्नं विनापि व्यवहारात्। कर्तृपदञ्च न यौगिकम् तथाहि कृजो यत्नार्थत्वे तृचश्च कृत्यर्थत्वे कर्त्तर्थत्वे वा धातु-प्रत्ययार्थयोः कृत्योः कृतिकर्त्रोर्वा परस्परमनन्वयः कृतौ कृतिजन्यत्वस्य तद्विषयत्वस्य चाभावात् कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वाच्च।

नन्वाख्यातस्यैव कृतिवाचकत्वे भावनाख्यातार्थी न स्यादित्यत आह - **पूर्वेति।** पूर्वपरीभूतव्यापारकदम्ब इत्यर्थः। तथा च पूर्वापरीभूतव्यापारकदम्बरूपधात्वर्थविषयतया फलभावकत्वेन सैव कृतिर्भावनेत्युच्यत इति भावः।

विभाग एवासिद्ध इत्याह - **बीजेनेति।**

द्वितीयं हेतुं दूषयति - **कर्तृपदमिति**। न तावदाश्रयत्वं तृजर्थः। पक्तेत्याद्भौ पाकाश्रयप्रतीत्यापत्तेः। अतएव कृत्याश्रयपर्यन्तं तृजर्थ, तथापि प्रातिपदिकयोरभेदरूपान्वयबोधकत्वनियमोनास्ति। अन्यथा पदयोरेव परस्परं तथा नियमव्युत्पत्तौ कर्तुरपि आख्यातवाच्यतापत्तिः। अप्रयोजकतया नेयं व्युत्पत्तिरिति यदि तदा प्रातिपदिकयोरपि तथा। अत एव गुण-गुणिनोः समवाय एव संसर्ग इत्युक्तम्।

नीलोघट इत्यादावित्येवं मतान्तरं मनसि कृत्याह - **कृत्योरिति।**

ननु प्रातिपदिकयोरभेद एव संसर्गः सामानाधिकरण्यात् एकसंख्याबोधकत्वस्य च सामानाधिकरण्यरूपत्वात्। न च गुणवाचिनीलादिपदोत्तरविभक्त्युपनीततद्वत्वं घटपदार्थे भासते। अप्रकृत्यार्तत्वात् नीलवत्परत्वे तु नीलवतोघटाभिन्नत्वेन द्वाभ्यामेकविषयत्वस्य विशिष्टबोधनसम्भवात्। न चैवमर्थपरत्वे विशेषणाविभक्तिः साधुत्वार्थमिति सिद्धान्तव्याघातः। नीलं घटमित्यादौ विशेषणाविभक्तिर्न कारकार्थिकेति तदर्थात्।

एवं कृजः क्रियार्थत्वे तृचश्च क्रियाश्रयवाचकत्वे तयोः परस्परमनन्त्रय एवेत्युभयदर्शने कर्तृपदं कर्मादिपदवद्रूढमेव। रूढिश्च कृत्याश्रये क्रियाश्रये वेत्यन्यदेतत्। तस्मात् कृताकृतविभागेन कर्तृरूपव्यवस्थया च न कृजो यत्नार्थत्वमिति।

किञ्चाख्यातस्य करोतेश्च न यत्नार्थत्वम् पाकाय यतते पाकं करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य वा प्रतीतेः प्रकृति-प्रत्यायार्थयोः साम्येनान्वयानुपपत्तेः पौनरुक्त्यात् एकत्रैव विध्यनुवाददोषाच्च।

ननु प्रकृतेस्तदर्थत्वेऽपि प्रत्ययस्य तदर्थत्वं न दोषाय। एको द्वौ बहवः इषिषिषतीत्यत्र च व्यभिचारात्।

प्रथमायाः साधुविभक्तेः सङ्ख्यावाचकत्वस्य सर्वमतसिद्धत्वात् आख्यातसङ्ख्याबोधनियमक-समानपदोपात्तभावनान्वयवदिहाप्रकृत्यर्थगतसङ्ख्याबोधनियमाभावादिति मुख्यसिद्धान्तसारागाह - **कृति-कर्त्रोर्वेति**।

प्रथम आह - **कृताविति**।

द्वितीय आह - **कृतीति**।

उभयेति । क्रियामात्राश्रयः कृत्याश्रयो वा कर्त्तेत्युभयमत इत्यर्थः।

कर्मादीति। कर्म-करणपदे अपि कृधातोः प्रत्ययान्तस्य रूपे तत्राप्यव्याप्त्यदितो योगमपहाय यथा केवलरूढिस्तथेहापि तत्रोणाद्यन्तवत्त्वेन योगाभावनिश्चयादिति भावः।

ननु न कलञ्जं भक्षयेदित्यत्र बलवदनिष्टाननुबन्धित्वान्वयवदिहापि आश्रयत्वमात्रं कृतोपस्थाप्यं कर्त्तेत्यत्र धातु-प्रत्ययार्थान्वयोऽस्तु कर्मादौ तु प्रत्यशक्त्यभावात् केवलरूढिवाद इत्यरुचेराह - **किञ्चेति।**

विशुद्धीति विशुद्धमाता-पितृजन्यसाङ्गवेदाध्येतरि शक्तं श्रोत्रियपदमेकशमात्रमेव शक्त्योपस्थापयतीत्यर्थः।

यत्तु द्वितीयसङ्ख्येच्छादिकल्पनवदिहापि द्वितीययत्नकल्पनमिति, तन्न। द्वितीयसङ्ख्येच्छा-यत्नाभावात्।

वस्तुतस्तु प्रत्येकं सामर्थ्यावधृतौ सम्भेदे तूभयोपस्थितेरावश्यकत्वेऽप्येकस्यानन्वयेऽप्यदोषात्। पाकाय यतते पाकं कुर्यादित्यत्र कृत्यर्थकाख्याते त्वयापि तथैवाङ्गीकारादिति चेत्, न। एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसङ्ख्यान्वयावगमयोग्यत्वात्। लडादेर्यत्ने सामर्थ्यानवधारणाल्लिडः पचेतेत्यत्र कृतौ सामर्थ्यावधारमाच्च।

अथायत्नार्थकधातुपराख्यातस्य यत्नार्थत्वं तेन यतत इत्यत्र नानन्वयः अचेतने चाख्यातप्रयोगो गौण एव।

यत्नत्वेति। ननु यत्नत्वं सामान्यमिति तदेव शक्यं सामान्यप्रमाणापक्षपातात् अन्यथा कार्यतापेक्षया घटत्वादेर्जातिरूपतया कर्तृजन्यतावच्छेदकत्वापत्तेः।

वस्तुतो व्यापारत्वं यत्नत्वं वा न शक्यं येनान्यतरत्र नियामकं चिन्त्येत। किन्त्वनुकूलत्वमात्पं तथाच चैत्र-रथयोरुभयत्र गमनानुकूलवाचित्वादित्यविशिष्टप्रत्येनानुकूलत्वेन च योग्यतावशादेकत्र यत्नोऽपरत्र प्रेरणाकर्षेणादि प्रतीयत इति। मैवं। अनुकूलत्वस्य विषयत्वरूपतया संसर्गत्वात्।

तथा च पाकविषयकयत्नवानित्यनुभवः सर्वसिद्धः स यत्नवाचकतया आख्यातस्य मयोच्यते। परेण तु पाकविषयकव्यापारवानित्यनुभवानन्तरं पाकविषयकयत्नवानित्यनुभव आक्षेपादित्युच्यते। तत्रानुभवद्वयकल्पनागौरवाद्व्यापारत्वस्य उपाधितया गौरवाच्च यत्न एव शक्यः।

न च व्यापारत्वस्य सामान्यतया द्वितीयं न गौरवं, लगोर्विशेष्यस्य सम्भवे सामान्यस्यापि गुरोस्त्यागात् द्वयोस्तुल्ययोः सामान्यादरात्। कार्यत्वे त्वनेकरूपत्वघटत्वाद्यवान्तरजात्यपेक्षया कार्यत्वसामान्यस्यैकतया लघोरौचित्यादित्यतो यत्नवाचकत्वे सिद्धेऽप्याख्यातसिद्धाद्धातूत्तर-विभक्तित्वादाक्षेपानुपपत्तेः।

न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता।

यद्वा अनुकूलयत्ने प्रवृत्तं पदं तदेकदेशेऽनुकूलमात्रे प्रयुज्यते विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत्। अचेतने च मध्यमपुरुषोत्तमपुरुषौ न भवत एवोपपदयोर्युष्मदस्मदोश्चेतनार्थत्वात्।

भवतु दा गौण एव लोकस्यापर्य्यनुयोज्यत्वादिति चेत्, न। अचेतने आख्यातस्य मुख्यत्वे बाधकाभावेन गौणत्वाभावात् तस्मादाख्यातस्यानुकूलत्वेन व्यापारो वाच्य इति भट्टाः। तेन चेतनाचेतनयोर्धात्वर्थानूकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव।

न चैवं पथिश्रमशयाने पचतीति स्यात् श्रमशान्तिद्वारा शयनस्य पाकानुकूलव्यापारत्वादिति वाच्यम्। तव प्रयत्नविशेषस्येवानुकूलव्यापारविशेषस्य वाच्यत्वात्। अन्यथा यत्नवाच्यत्वेऽपि तण्डुलानुकूलयत्नवति पचतीति स्यात्।

एवमचेतनेऽपि करोतिना आख्यातविवरणात् करोत्यर्थोऽपि व्यापारविशेष एव, कथं र्हि चैत्रः पचतीत्यत्र पाकानुकूलयत्नवत्प्रतीतिः, आक्षेपादिति चेत्, न। आख्यातार्थेन व्यापारेण सङ्ख्यया वा यत्नानाक्षेपात् तयोः प्रयत्नं विनापि सत्त्वात्।

नापि कर्त्रा, द्रव्यमात्रस्य कर्तृत्वात्, यत्नवतश्च कर्तृत्वेन आख्यातेन तदभिधाने यत्नस्याप्यभिधानात्। नापि धात्वर्थमात्रेण, तस्य प्रयत्नं विनापि सत्त्वात्।

नापि यत्नो धात्वर्थः, क्रियायास्तत्फलस्य वा धातुवाच्यत्वात्। अन्यथा पाक इत्यत्रापि यत्नानुभवप्रसङ्गादिति चेत्, न। धात्वर्थविशेषपाकादिना यत्नाक्षेपात्तस्य प्रयत्नं विनाऽनुपपत्तेः।

अथ पचतीत्यस्य पाकयत्नवानिति विवरणाद्यत्नार्थतेति चेत्, तर्हि कर्त्रर्थतापि स्यात्। न हि पाकयत्न इत्येव विवरणम्। पचतीत्यस्य तात्पर्यविवरणं तत् तच्चाक्षेपेण निर्वहतीति चेत् तुल्यं यत्नेऽपि।

ज्ञानद्वयकल्पनागौरवमेव दातुं शङ्कामुत्थापयति - **अथेति**।

कथं तर्हि रथो गच्छति विद्यते व्योमेति भावनानुभव इति चेत्, न कथञ्चित्, भावनायाधात्वर्थान्वयायोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति।

उच्यते। चैत्रः पचतीत्यत्र पाकाकूलयत्नानुभवाद्यत्न एवाख्यातार्थो लाघवात् न त्वनुकूलो व्यापारः यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गौरवात्।

न चाचेतनेऽपि आख्यातस्य मुख्यत्वार्थमनुगतो व्यापार एव शक्यः मुख्यत्वसम्भवे त्यागायोगादिति वाच्यम्। शक्तिग्राहकेन प्रमाणेन लघुनि शक्तिपरिच्छेदात् अचेतने प्रयोगस्य वृत्त्यन्तरेणापि सम्भवात् मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः।

एतेन व्यापारवाचकाख्यातस्य यत्नसाध्यार्थकपच्यादिधातूपसन्दानेन व्यापारविशेषयत्नोप-स्थापकत्वमिति निरस्तम्। लाघवेन यत्नस्यैव शक्यत्वात्।

ननु यत्नोनाख्यातार्थः पाकत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तमिति चेत्, न। चैत्रः पचतीत्यत्र चैत्रः पाकानुकूलवर्त्तमानयत्नवान् प्रतीयते, न च पाकस्य वर्त्तमानयत्नेन व्याप्तिरस्ति, अतीतानागते व्यभिचारात्।

न च धात्वर्थेनानुमिते यत्ने आख्यातेन वर्त्तमानत्वान्वयबोधः सम्भवति, यत्नस्यापदार्थत्वात् स्वार्थव्यापारस्य वर्त्तमानत्वबोधनेनाख्यातस्य पर्यवसितत्वाच्च।

अथ चैत्रः पाकानुकूलवर्त्तमानव्यापारवानिति शाब्दबोधानन्तरं चैत्रः पाकानुकूलवर्त्तमान यत्नवान् चेतनत्वे सति पाकानुकूलवर्तमानव्यापारवत्त्वात् मैत्रवत् अनुमानं विना च पाकयत्ने वर्त्तमानत्वज्ञानमाख्यातस्य यत्ने शक्तिभ्रमादिति चेत्, न। यत्नाभावकालेऽपि तज्जन्यव्यापारस्य वर्त्तमानतया व्यभिचारात्।

नन्विति। स्थूलकालोपाधिमादाय यत्ने वर्त्मानत्वं वाच्यं तथा च न व्यभिचार इत्यरुचेराह - **किञ्चेति**।

किञ्च व्यापारस्य वाच्यत्वं तल्लिङ्गकं वर्त्तमानयत्नानुमानमिति च कल्पनाद्वयाद्वरं यत्नवाच्यत्वं लाघवात्।

न चाचेतने आख्यातस्य व्यापारवाचकत्वावधारमात् एवं कल्पनेति युक्तम्, गौणतया शक्तिभ्रमेण वा तत्राख्यातादव्यापारावगमोपपत्तेः। यत्नविगमदशायां तज्जन्यव्यापारकाले पचतीत्यत्र वर्त्तमानव्यापाराभिधानमाख्यातेन लक्षणया यथा रथोच्छतीत्यत्र अतोऽन्यलभ्यत्वान्न तदनुरोधेन व्यापारे शक्तिः। अन्यथा तवापि यत्नकाले पचतीति न स्यात्। तस्माल्लडाख्यातं यत्नवाचकम् आख्यातत्वात् लिङादिवत् तर्कश्चोक्त एव।

एतेन फलानुकूलो व्यापारो धात्वर्थः आख्यातवाच्या सङ्ख्यैव तेन चैत्रः पचति रथो गच्छतीत्यत्र चैत्र-रथयोर्धात्वर्थानुकालव्यापारवत्त्वप्रतीतेर्मुख्य एव प्रयोगः, पचतीत्यत्र यत्नलाभो धात्वर्थेनाक्षेपादिति विक्लित्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति गुरुमतमपास्तम्। पचतीत्यस्य पाकानुकूलयत्न-वर्त्तमानत्वस्याक्षेपादलाभेनाख्यातार्थत्वात्।

यत्तु रत्नकोशकारोक्तं धात्वर्थो व्यापारः आख्यातार्थ उत्पादना सा चोत्पादकता सैव भावना पचतीत्यादौ आख्यातस्य पाकमुत्पादयतीति विवरणात्। धात्वर्थोत्पादना च चेतनाचेतनयोरिति सर्वत्राख्यातप्रयोगो मुख्य एव। यतते जानातीत्यादावपि यत्नं ज्ञानमुत्पादयतीत्यर्थात्। न तु व्यापारो यत्नो वाख्यातार्थः। यतत इत्यादौ मुख्यत्वे सति गौणत्वस्यान्याय्यत्वात् आख्यातार्थविवरणं करोत्यर्थोऽप्युत्पादकतैव पाकं करोतीत्यादौ करोतीत्यस्योत्पादयतीति विवरणात्। घटं करोतीत्यत्र कृञर्थ उत्पत्तिरेवावगम्यते।

वर्त्तमानव्यापारेति यदि गर्भं तेनायमर्थः। यदि वर्त्तमानव्यापारत्वप्रकारिका तत्र प्रतीतिः तदा लक्षणैव, परन्तु स्थूलकालमादाय यत्नगतमेव वर्त्तमानत्वं भासते अन्यथा क्षणस्यातीन्द्रयतया वर्तमानयत्नधीः क्वापि न स्यादेवेति भावः।

धात्वर्थेति। **धात्वर्थः**। अनुकूलव्यापार इत्यर्थः।

अत एव किं करोतीति सामान्येनोत्पादनाप्रश्ने पचतीति पाकोत्पादनाविशेषेणोत्तरमपि समञ्जसम्। चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादना चैत्रेणान्वेति। आख्यातार्थ उत्पादनानन्वितैवोत्पत्तेरुत्पत्त्यभावात्।

वस्तुतस्तूत्पादयतीत्यत्र धात्वर्थ एवोत्पादना अतोऽनुत्पादनपरधातूत्तरवर्त्तिन आख्यातस्यानन्यलभ्यतयोत्पादना वाच्या। पचतीत्यादौ यत्नलाभः पाकादिना धात्वर्थेनाक्षेपान्न तूत्पादनामात्रेण व्यभिचारादिति तदप्यत एव निरस्तम्।

पचतीत्यत्र यत्नप्रतीतेर्यत्न एवाख्यातार्थो लाघवान्न तूत्पादकत्वमुपाधितया गौरवात् पाकानुकूलवर्त्तमानयत्नस्याक्षेपादिनाप्यलाभाच्च।

वस्तुतस्तु चैत्रो जानातीच्छति यतत इत्यादौ ज्ञानादिमत्त्वं चैत्रस्य प्रतीयते न तूत्पादकत्वं अचेतनेऽपि ज्ञानोत्पादके शब्द-लिङ्गेन्द्रियादौ जानातीत्यादिप्रयोगप्रसङ्गात् घटं जानातीत्युक्ते घटज्ञानवान्न वेति संशयापत्तेश्च। अचेतनस्यापि ज्ञानोत्पादकत्वात्। शब्दादिकं ज्ञापयतीति चानुभवो न तु जानातीति तस्माल्लाघवात्पचति-पक्ष्यत्यपाक्षीदित्यत्रातीतानागतवर्त्तमानयत्नप्रतीतेश्च यत्न आख्यातवाच्यस्तेन यत्नस्य वर्त्तमानत्वादिकमाख्यातेनाभिधीयते प्रकारान्तरेण तदलाभात्। जानातीच्छति यतते निद्रातीत्यत्र धात्वर्थ एव यत्नादिश्चैत्रेणान्वेति यत्नादिमांश्चैत्रं इत्यनुभवात्। धात्वर्थे च यत्नादौ नाख्यातार्थयत्नान्वयः। यत्नादिविषयकयत्नस्याभावात् रथो गच्छतीत्यत्राख्याते व्यापारलक्षणा तेन गत्यनुकूलव्यापारवत्त्वमात्रं रथस्य प्रतीयते।

अलाभादिति। यद्यपि तन्मते शब्दानुपस्थापितेऽपि यत्ने तदर्थवर्त्तमानत्वान्वयः सम्भवो। न च प्रकृत्यर्थ एव प्रत्ययार्थभाननियमः। आख्यातसंख्यायामेव व्यभिचारात्, तथापि पूर्वत्र ज्ञानद्वयकल्पनागौरवमभिसन्धायैतदुक्तम्।

वस्तुतस्तु फलानुकूलव्यापारत्वस्य कारकमात्रसाधारण्यात् कर्तृत्वादिप्रतीत्यवैचित्र्यम्। न च विशेष्यत्वेन नियमः। कर्माक्यातेऽति प्रसङ्गादित्यपि द्रष्टव्यम्।

अथ पाकानुकूलैककृतिकाले पचतीतिवत्कृतेरत्ययेऽग्रिमकृतेरनुत्पादे च मध्येऽप्यपाक्षीत् पक्ष्यतीति च स्यात्। न च ध्रुवपदवत्कृतिप्रचयस्य शक्यत्वात् प्रचयस्य ध्वंसे प्रागभावे वा अपाक्षीत्पक्ष्यतीति प्रयोग इति वाच्यम्। एवं हि पचतीति न स्यादेव एकदा कृतिप्रचयस्यासत्त्वात्।

अथ भूत-भविष्यतोः कृत्यभावनिरूप्यत्वं कृतिकाले च कृत्यभावो नास्ति प्रतियोगिजातीयवत्यभावस्यासत्त्वादिति चेत्, न, प्रागभाव-प्रध्वंसयोः कृतिविशेषप्रतियोगित्वेन कृतिकालेऽपि सत्त्वात् तयोः सकलकृतिप्रतियोगिकत्वासम्भवात्।

ननु फलायोगव्यवच्छिन्ना कृतिः शक्या। अत एव पाकानुकूलतण्डुलक्रयकाले पचतीति न प्रयोगः, एवं चरमकृतिकाले पचति तत्प्रागभावकाले पक्ष्यति तद्ध्वंसकाले चापाक्षीदिति मुख्यप्रयोगः तत्पूर्वं पचतीति गौण एवेति चेत्, न। तर्हि मध्येऽपि पक्ष्यतीति स्यात् तदा चरमकृतेरनागतत्वात्, एवं व्यापारप्रचयस्याख्यातार्थत्वे धात्वर्थत्वे वा मध्ये पक्ष्यतीति स्यात् तदा चरमकृतेरनागतत्वात्, एवं व्यापारप्रचयस्याख्यातार्थत्वे धात्वर्थत्वे वा मध्ये पक्ष्यत्यपाक्षीदिति स्यात्।

कृत्यभावेति कृतिसामान्याभावेत्यर्थः।

प्रागभावेति। अत्र तदुपभयसामान्याभावादिति भावः। प्रारब्धपाकानुकूलकृतिप्रागभावध्वंसयो-र्यावत्तदुभयरूपत्वेन यावत्तदुभयाभावव्याप्यतदुभयसामान्या-भावरूपत्वेन वा अतीतानगतप्रतीतिरुपपाद्या अनग्यगतिकत्वादिति भावः।

सङ्केति। नन्वाख्यातस्य सङ्ख्यावाचकत्वे मानाभावः प्रतीतेः सुविभक्त्यर्थसङ्खयैवोपपत्तेः। न च विनिगमनाविरहः। प्रथमान्तकर्म-कर्त्रादिबोधकपदं विना आख्याताप्रयोगात्।

न च तिङन्तसमभिव्याहारनियमः। तत्र चैत्रो दण्डीत्यादावाख्यातेन विनापि सुविभक्त्या सङ्ख्योपस्थानादिति। मैवं। चन्द्रे कलङ्क इत्यादौ बहुत्वप्रत्यस्य आख्यातसङ्ख्याशक्तिं विनानुपपत्तेरिति।

ननु नामार्थे भावनान्वयेऽपि न सङ्ख्यान्वयः प्रथमोपस्थितसङ्ख्यान्वयेन तस्या निराकाङ्क्षत्वात्।

कर्त्तेति। कस्यचित् कारकस्य कर्त्ता वाच्यः कस्यचित् कर्मेति नियमोऽनुशासनपारतन्त्र्यात् त्वया वाच्यः सङ्ख्यावचनस्य एव सोऽस्तु लाघवात् अनुशासनस्य लक्षणायाप्युपपत्तेरिति भावः।

एकपदेति। भावनया सहेति शेषः । **प्रातिपदिकस्य** - प्रातिपदिकार्थस्य। उभयाकाङ्क्षायास्तन्त्रत्वादिति भावः। **सङ्ख्यापीति**। आश्रितवतीति शेषः।

तण्डुलमिति। द्वितीयातस्तण्डुलवृत्ति फलं तेन सममनुकुलव्यापारविशेषस्य धात्वर्थस्यान्वये तण्डुलवृत्तिफलानुकुलव्यापारोपस्थितौ तेन सहाख्यातार्थयत्नान्वये तज्जनकतया यत्नोपस्थितिः तेन सह चैत्रान्वये तादृशयत्नवांश्चैव इति प्रतीतिः। 'चैत्रेणेत्यत्र तृतीयातः समवेतकृचत्युपस्थितौ तया सह चैत्रान्वये चैत्रसमवेता कृतिरुपस्थिता तया सह धात्वर्थव्यापारान्वये चैत्रसमवेतप्रयत्नजन्यव्यापारोपस्थितिः जन्य - जनकभावस्य सम्बन्धत्वात्।

अस्य तादृशव्यापारेणाख्यातार्थफलभागित्वान्वये तादृशव्यापारजन्यफलभागी तण्डुल इत्यन्वयः। एतच्च फलस्य धातच्ववाच्यत्वपक्षे, यदा तु फलानुकुलव्यापार एव धात्वर्थस्तदा आश्रयत्वमात्रस्यैव द्वितीयार्थत्वं, तण्डुलाश्रितविक्लित्त्यनुकूलव्यापारविषयकयत्नवांश्चैव इति कर्तृलकारेण, चैत्रसमवेतकृतिविषयविक्लित्त्यनुकूलव्यापारविषया तण्डुला इति कर्मलकारेण प्रत्ययः। प्रत्यार्थस्तु परिशेषतो विषयत्वमात्रमिति वक्ष्यते।

तात्पर्येत्यापाततः। वस्तुतस्तु आख्यातोपस्थाप्यफलानुकूलव्यापारविशेष्य इति तत्त्वम्। व्यापारश्च व्यापारत्वेन यत्नत्वेन वा उपतिष्ठतां उभयथापि व्यापारोभयत्येव। यथाश्रुते इष्टसाधनत्वविशेषे धात्वर्थे लिङाख्यातसङ्ख्याबोधापत्तेरिति ध्येयम्।

भावनेति। सत्यन्तं भावलकारान्तधात्वर्थे। द्वितीयं क्रान्तादिपदोपस्थाप्ये गतमित्युभयमुपात्तमित्यर्थः।

न च प्रथमा न सङ्ख्यावाचिका किन्तु प्रयोगसाधुरिति वाच्यम्। चैत्र इदानीं राजेत्यत्र केवलादपि एकत्वप्रतीतेः। अन्यथा प्रथमोपस्थितसङ्ख्या कर्तृ कर्मान्वये सङ्ख्या न तिङर्थ इत्यपि कल्प्येतेति चेत्, न।

एकैव हि सङ्ख्या प्रथमाख्याताभ्यामभिधीयते समानाधिकरण्यानुरोधात् यथा चैत्रोदण्डीत्यत्र, अन्यथा त्वन्मतेऽप्याख्यातेन चैत्रसङ्ख्याभिधानात् प्रथमावाच्यसङ्ख्यान्वयश्चेत्रे न स्यात्। ओदनकामः पचेतेत्यत्र त्वयाप्येषैव गीतिरवगन्तव्या तत्र कर्त्तुरवाच्यत्वादिति वक्ष्यते।

अथ कर्त्ताप्याख्यातवाच्यः चैत्रः पचतीति समानाधिकरण्यात्। अन्यथा नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तकत्वेऽप्येकत्र वृत्त्यभावे सामानाधिकरण्यं न स्यादिति चेत्, न। नीलः पटश्चैत्रः पचति पच्यते तण्डुल इत्यादौ नाम्नोर्नामाख्यातयोर्वा एकसङ्ख्यावाचकत्वमेव हि शाब्दसामानाधिकरण्यं, न तु भिन्नप्रवृत्तिनिमित्तस्यैकत्रार्थे वृत्तिगौरवात् ओदनकामः पचेतेत्यादौ व्यभिचाराच्च। विध्याख्यातस्य हि कृतिशक्तस्य नामसामनाधिकरण्यं तयोरेकसङ्ख्याभिधायकत्वात् न त्वेककर्तृवाचकत्वेन। तत्रापि कर्तृवाच्यत्वे तस्येष्टसाधनत्वबोधने अप्रवृत्तिस्तस्यासाध्यत्वात्। अयोग्यतया कर्त्तारं विहाय कृतिविषये पाके पाकविषयकृतौ वेष्टसाधनतान्वये कर्त्तुरनन्वयादप्रतीतेश्च नाभिधेयत्वम्।

अन्यथेति। यदि न केवलं प्रथमाप्रयोग इत्यर्थः।

चन्द्रे कलङ्क इत्यादौ व्यभिचारं स्फुटतयोपेक्ष्य नियमपक्षेऽपि न दोष इत्याह - **एकैव हीति**। 'सामानाधिकरण्यात्' उभयपदार्थाभेदादित्यर्थः। अन्यथा भेदान्वयव्युत्पत्तिः न तु सुबन्त-तिङन्तयोरिति लङाख्यातादौ न धर्मिणि शक्तिः किन्तु धर्म एवेति भावः।

पाके। **पाकविषयकृताविति** सिद्धान्तभेदेन तत्राद्ये इष्टसाधनयागकर्त्ता स्वर्गकाम इत्यन्वये व्युत्पत्यन्वये व्युत्पत्तिविरहः एकस्वार्थान्वयमपरपदार्थे बोधयित्वा तद्विशिष्टापरपदार्थबोधनेऽसामर्थ्यात्, द्वितीयेऽपि तथा । *पदार्थः पदार्थेनान्वेति* इति व्युत्पत्तेरिति दूषणं स्फुटत्वान्नोक्तमित्यवधेयम्।

पचतीत्यस्य पाकयत्नवानिति विवरणात् कर्त्ता वाच्य इति चेत्, न। द्वन्द्वादिसमासस्य विग्रहेण विवरणेऽपि विग्रहार्थे शक्त्यभावेन व्यभिचारात् कर्त्तुरन्यलभ्यत्वेनावाच्यत्वस्थितौ विवरणस्य तात्पर्यविषयज्ञापकत्वात् कर्तृशक्तिभ्रममूलत्वाद्वा।

उच्यते। यत्राख्यातवाच्ये प्रचये एकैकस्य वर्त्तमानव्यवहारनिमित्तत्वं तत्र तावतां ध्वंसैः प्रागभावैश्च भूत-भविष्यद्व्यवहारः, न तु वर्त्तमानव्यवहारनिमित्तं किञ्चिदभावात्। चेतनाचेतनयोर्भोजन-गमनादौ तथैव प्रयोगात् प्रयोगे सति निमित्तानुसरणात् धातोराख्यातस्य वा पाकानुकूलव्यापारवाचकत्ववादिभिरप्यनन्यगतिकतया तथैव स्वीकाराच्च।

स्यादेतत् - चैत्रस्तण्डुलं पचति चैत्रेण पच्यते तण्डुल इत्यत्र कर्त्तरि कर्मणि चाख्यातार्थसंख्यान्वयात्कर्तृ-कर्मणौ अपि यत्न इव लकारवाच्ये तेन वाच्यगामिनी सङ्ख्येतिनियमो भवति। अन्यथा आक्षिप्तसङ्ख्येमात्रान्वये नियमो न स्यादिति वैयाकरणाः। तत्र। कर्तृगता सङ्ख्या यत्र वाच्या तत्र कर्त्रा तदन्वयः प्रतीयते इति तदुपपत्तेः।

कर्तृगतैव सङ्ख्या क्व वाच्येति चेत्, कर्त्ता क्व वाच्य इति तुल्यम्। यत्र कर्तृगता सङ्ख्या प्रतीयत इति चेत्, न। अन्योन्याश्रयात् । वाच्यत्वे तद्गतसङ्ख्याधीः तद्गतसङ्ख्याप्रतीत्या च तद्वाच्यतेति, यत्राख्यातेन कर्त्तृर्विवक्षा तत्र कर्त्ता वाच्य इति चेत्, न। यत्र कर्त्तृगतसङ्ख्या विवक्ष्या तत्र सा वाच्येति तुल्यम्। एवं कर्मापि न शक्यं किन्तु तद्गतसङ्ख्यैव, कर्तृ-कर्मणौ लकारवाच्ये इत्यस्यायमर्थः तद्गतसङ्ख्यावाच्येति।

सम्प्रदायस्तु सङ्ख्येयमात्रसाकाङ्क्षापि सङ्ख्या भावनान्वयिनैवान्वेति एकपदोपात्तत्वप्रत्यासत्तेः। भावना च व्यापारत्वेन शुद्धं प्रातिपदिकार्थमाकाङ्क्षति न तु कर्म-करणादि द्वितीयादिना तस्य व्यापारवत्त्वेनोपस्थितेः। अत एव कर्माद्यपि न व्यापारमाकाङ्क्षति। अतः प्रथमानिर्दिष्टेनैव भावनान्वयः प्रातिपदिकस्यापि क्रियान्वयार्थं व्यापाराकाङ्क्षितत्वात्। शुद्धश्चाग्निना चैत्रस्तण्डुलं पचतीत्यत्र कर्त्ता चैत्रेण पच्यते तण्डुल इत्यत्र कर्म अतस्तत्रैव भावनान्वय इति सङ्ख्यान्वयोऽपि तत्रैव। तदुक्तं,

'यं यं भावनानुधावति तं तं सङ्ख्यापीति स्थितिरिति।

स्यादेतत् चैत्रस्तण्डुलं पचतीत्यत्र भावनान्वयश्चैत्रे सम्भवति आश्रयत्वात्, चैत्रेण तण्डुलः पच्यते इत्यत्र भावनान्वयस्तण्डुलस्य न विषयतया यत्नस्य विक्लित्त्यनुकूलव्यापारविषयत्वात्। विषयत्वेनान्वये वा तण्डुलं पचतीत्यत्रापि तण्डुलस्य विषयत्वेन भावनान्वय इति तद्गतैव सङ्ख्या स्यात् नाश्रयतया तत्रावृत्तेश्चैत्रेऽपि न यत्नान्वयः तृतीयार्थयत्नेनावरुद्धत्वात् इत्यनन्वितैव तत्र भावना। अचेतने च भावनान्वयाभावात् कथं सङ्ख्यान्वयनियम इति न। यत्नविशेष्ये सङ्ख्यान्वयात्, चैत्रस्तण्डुलं पचतीत्यत्र तण्डुलस्य कर्मत्वेनान्वयात्तण्डुलवृत्ति-फलजनकव्यापारजनकयत्नाश्रयश्चैव इति प्रतीयते इति स एव विशेष्यः। चैत्रेण पच्यते तण्डुल इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तण्डुलः प्रतीयते इति यत्नस्य परम्परया तण्डुल एव विशेष्यः।

एवञ्च यद्यप्युभयत्रैव चैत्रः कर्त्ता तण्डुलः कर्म तथापि तन्विशेष्ये सङ्ख्यान्वयः। अचेतनेऽपि रथोग्रामं गच्छतीत्यत्र ग्रामवृत्तिगमनफलजनकव्यापाराश्रयो रथः प्रतीयते, रथेन गम्यते ग्राम इत्यत्र रथवृत्तिव्यापारजन्यफलाश्रयोग्राम इति तत्रापि विशेष्ये सङ्ख्यान्वयः।

न चैवं यत्नस्य व्यापारस्य च विशेष्ये सङ्ख्यान्वयः।

न चैवं यत्नस्य व्यापारस्य च विशेष्ये सङ्ख्यान्वये नियामकमननुगतमिति वाच्यम्। आख्याततात्पर्य्यविषयस्य विशेष्ये सङ्ख्यान्वयात् स च यत्नाव्यापारो वा। चैत्रेण सुप्यत इत्यत्र चैत्रो न भावनाविशेष्यः तृतीयार्थावरुद्धत्वात्। कर्म च तत्र नास्त्येवातो धात्वर्थ एव भावनाविशेष्यः फलत्वाद्विषयत्वाद्वेति तत्र सङ्ख्यान्वयः। द्विवचन-बहुवचनयोस्तत्रासाधुत्वमेव। तदुक्तम् --

'आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः'।।

इति । इदमेव च कर्त्तुः कर्मणश्चाक्षेपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथमान्तपदोपस्थाप्यत्वं न तु सङ्ख्यालिङ्ककानुमिति विषयत्वम् अनुमित्या सङ्ख्येयमात्रगतत्वेन सङ्ख्याप्रतीतेः।

वस्तुतः पचतीत्यत्र यत्नवतः शक्यत्वे धात्वर्थस्य विषयत्वेन साध्यत्वेन वा कृतावन्वयो न स्यादितरपदार्थविशेषणतयोपस्थिते पदार्थैकदेशे इतरपदार्थस्यानन्वयात्। राजपुरुषमानयेत्यत्र राज्ञ इवानयने पदार्थे पादार्थान्वयस्य व्युत्पत्तिसिद्धत्वात्। यत्नस्याश्रयान्वितत्वेनोपस्थित-स्येतरानाकाङ्क्षत्वात्। पाक-यत्नवतोरन्वये च यत्नवत्साध्यः पाकः पाकजनको यत्नवानिति धीः स्यात्, न तु पाक-यत्नयोर्विषय-विषयिभाव धीः। पाककर्त्ता इत्यत्रापि न पाकस्य कृतावन्वयधीः कृतेरपदार्थत्वात्। किन्तु कृत्याश्रयः पाकजनक इति प्रतीतिः।

अत एवापचत्यपि पाचकपदप्रयोगात् वुः कृतियोग्यता वाच्येति निरस्तम्। पाकस्य कृतावनन्वयप्रसङ्गादिति तत्र पाचकपदं गौणमेव।

ननु कर्तृ-कर्मणौ लकारवाच्ये तेनाभिहिते कर्त्तरि कर्मणि चानभिहिताधिकारीया कर्त्तृ-कर्मविभक्तिर्न भवति। किन्तु प्रथमैव लकारेण तयोरनभिधाने च चैत्रेण पचति तण्डुलः चैत्रः पच्येत आदेनमित्याद्यपि स्यादिति चेत्, न। कर्त्तृ-कर्मगतसङ्ख्याभिधानानभिधानाभ्यासे वाहितानभिहितकार्य्योपपत्तेः तादृशप्रयोगस्यासाधुत्वाच्च। साधुत्वे हि सत्यनुशासनं न त्वनुशासनानुरोधेन साधुत्वम् ग्रामग्रामादौ साधुत्वापत्तेः।

नवीनास्तु - सुपः प्रकृत्यर्थगतस्वार्थसङ्ख्याबोधकत्वं तिङः प्रथमान्तपदार्थगतसङ्ख्या-बोधकत्वमिति व्युत्पत्तिरेव व्युत्पत्तिश्च तत्स्वभावत्वं तच्च फलोन्नेयम्। प्रथमान्तपदार्थः कर्त्ता कर्म वा। अत एव चैत्रेण सुप्यते इत्यत्र प्रथमान्तपदाभावान्न सङ्ख्यान्वयः।

न च धात्वर्थे सङ्ख्यान्वयः, स्वापस्य द्वित्व-बहुत्वेऽपि द्विवचन-बहुवचनयोरभावात्सुप्यत इत्येव प्रयोगः स्यात्। अत एव स्वापमात्रावगमात् आख्यातार्थयत्न-सङ्ख्ययोरनन्वये आख्यातं

प्रयोगमात्रे साध्विति तिङं विना धातोः केवलस्यासाधुत्वात्। अतो न सङ्ख्यानुरोधेन कर्त्तृकर्मणी लकारवाच्ये।

वयन्तु ब्रूमः। चैत्रेण पच्यते तण्डुलः रथेन गम्यते ग्राम इत्यत्र तण्डुल-ग्रामौ कर्मणी प्रतीयेते अस्ति च तयोः परसमवेतक्रियाफलशालित्वं कर्मत्वं तच्चाख्यातवाच्यमेव। तण्डुलं पचतीत्यत्र द्वीतीयात इवान्यतः कर्मत्वालाभात्। तस्मात्कर्तृत्ववत्कर्मत्वमपि लकारवाच्यं तद्धर्मिणोः कर्त्तृकर्मणोरन्यत एव लाभादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे आख्यातवादः।

नचैवं चैत्रस्य मातेत्यादौ का गतिः। तत्रानन्यगतिकतया एकदेशान्वयस्वीकारात् पदार्थान्वये दम्भवति तदेकदेशान्वयस्याभावादिति व्युत्पत्तेः। पदविषये चान्वये अनन्यगतिकत्वादिति भावः।

पाचकपदं न वुण्पदमित्यर्थः। पाचकपदवाक्यत्वसिद्धान्तमाश्रित्य प्रकृतग्रन्थावतारात्।

यदुक्तं भट्टेन,

'पाकन्तु पचिरेवाह कर्त्तारं प्रत्ययोणकः।
पाकयुक्तः पुमान् कर्ता वाच्यो नैकस्य कस्यचित् ।।

इति। तत्रापि धर्मिणि न शक्तिः किन्तु कृतिमात्रे समवायः संसर्ग इति मतं प्रकृतं, कर्तृरूपवाच्यत्वे कृतियोग्य एव रूढ्या पचति पाचकपदस्य गौणत्वानुपपत्तेरिति ध्येयम्।

नवीनत्वोद्भावनं अस्वरसमाविष्कर्तुं, तद्बीजन्तु सामग्र्यभावादेव फलाभावे सम्भवति न स्वभाव एव मूलं सहकार्युच्छेदापत्तेः क्त्वान्तादिपदे व्यभिचारश्चेति।

'कर्तृत्ववत् कर्मत्वमपीति कृतिवदाश्रयत्वमपीत्यर्थः। पूर्वत्र समवायस्य संसर्गत्वादुत्तरत्र परसमवेतव्यापार-फलादीनां पदान्तरलभ्यत्वात् अनन्यलभ्यस्यैव पदार्थत्वात्। 'द्वितीयात इवेत्यत्र द्वितीयादावप्याश्रितत्वादिमात्रस्यैव तदर्थत्वात् अन्यस्य तत्र पदान्तरलभ्यत्वादिति भावः।

इति श्रीजयदेवमिश्रविरचिते तत्त्वचिन्तामण्यालोके

शब्दाख्यतुरीयखण्डालोके आख्यातवादालोकः।

अथ धातुवादः

धात्वर्थः फलमिति मण्डनाचार्य्याः। तथा हि पच्यर्थोविक्लित्तिर्लाघवान्न तु तत्फलको व्यापारोऽधः सन्तापनादिगौरवात् गमेरुत्तरसंयोगः पतेरधःसंयोगः त्यजेर्विभागोऽर्थो न तु तत्फलजनकः स्पन्दः। हन्तेरपि मरणमर्थः। न तु तत्फलजनको व्यापारः खड्गाभिधातादिः गौरवात्।

यजत्यर्थोऽपि देवतोद्देश्यकत्यागफलं स्वस्वत्वध्वंस एव। जुहोत्यर्थस्त्यागफलं प्रक्षेपः। ददात्यर्थः सम्प्रदानस्वीकारपूर्वकत्यागफलं स्वस्य स्वत्वध्वंसः परस्वत्वं वा न तु तत्तत्फलकत्यागो गौरवात्। न चैवं व्यापारविगमे फलदशायां पचति-गच्छति-ददातीत्यादिप्रयोगः स्यान्न त्वपाक्षीदित्यादिः व्यापारकाले च पचतीत्यादि न स्यादिति वाच्यम्। धात्वर्थआनुकूलव्यापारवर्त्तमानत्वमाख्यातार्थः तेन व्यापारकाले पचतीत्यादि भवति, न तु व्यापारविगमे।

न च स्पन्दजन्यसंयोग-विभागाश्रयत्वेनाकाशो गच्छति पतति त्यजतीति स्यात् विनश्यदवस्थे कर्मणि च न स्यात् संयोग-विभागाद्यभावादिति वाच्यम्। व्यापारवति व्यापारकाले आख्यातप्रयोगात्।

नन्वेवं धात्वर्थत्वेन फलं क्रिया तथा च तण्डुलं पचतीत्यादौ तण्डुलादेः कर्मतापि न स्याद्विक्लित्त्यादिरूपक्रियाजन्यफलशालित्वाभावादिति चेत्, न। परसमवेतव्यापारफलशालित्वं कर्म्मत्वं स च व्यापारो धात्वर्थ आख्यातार्थो वेत्युभयथापि परसमवेतव्यापारफलशालिनस्तण्डुलादेः कर्मत्वं विक्लित्त्यनुत्पादे व्यापारकाले पाको वर्त्तत इत्यत्र पाकपदे व्यापारलक्षणा लाघवेन विक्लित्तेः शक्यत्वात्। जानातीच्छति-यतते-विद्यते तिष्ठतीत्यादौ ज्ञानेच्छा-प्रयत्नसत्ता-गतिनिवृत्तिरेव धात्वर्थः। न ज्ञानादिफलं न वा ज्ञानाद्यनुकूलो व्यापारः ज्ञानादिमत्त्वमात्रप्रतीतेरिति।

अत्रोच्यते। ओदनकामः पचेतेत्यत्र विधिप्रयत्नेन धात्वर्थे प्रवृत्त्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वञ्च बोध्यते। न च फलेविक्लिपत्यादावोदनसाधनत्वं न वा फले प्रवृत्तिः सम्भवति, उपायमकृत्वा फलस्य साक्षात् कृत्या साधयितुमशक्यत्वात् उपायकृतिसाध्यमेव हि फलं न तु तदन्यकृतिसाध्यम् उपायकृतित एव तत्सिद्धेरधः सन्तापनादेः कृतिसाध्येष्टसाधनत्वं विना विक्लित्त्यर्थमप्रवृत्तेश्च। उपाय एवाधःसन्तापनादिर्वयापारः प्रवृत्तिविषयत्वात् कृतिसाध्यत्वेनेष्टसाधनत्वेन च विधिप्रत्ययेन बोध्यत इति फलानुकूलो व्यापार एव धात्वर्थः।

अथोपायस्य कृतिसाध्यत्वज्ञानं प्रवर्त्तकमिति सत्यं किन्तु विधिबोधितफलकृतिसाध्यत्वेन तदुपायकृतिसाध्यत्वमाक्षिप्यते तेन विना तदनुपपत्तेरिति चेत्, न। व्यवहारात्प्रवृत्तिजनके ज्ञाने विधिप्रत्ययस्य शक्तिग्रहात् प्रवृत्तिसाक्षादुपपादकविषयत्वात्कल्पनायाः।

एवं यजि-गमि-पचि-जुहोति-ददातीनामपि व्यापार एव वाच्यः फले प्रवृत्त्यसम्भवात्। तत्र पच्यर्थोऽधः सन्तापनमेव तच्च रूप-रस-गन्ध-स्पर्शपरावृत्तिफलाविनाभूतं, अधःसन्तापने च जातिविशेषो रूपादिपरावृत्तिजनकतावच्छेदकोऽवश्यं वाच्यः। अन्यथा फलार्थमधःसन्तापनेऽप्रवृत्तेः व्यापारस्यास्थातवाच्यत्वेऽपि विशेषस्यावश्यं वाच्यत्वात्। पच्यर्थे च फलं न विशेषणं न वोपलक्षणं लोकेऽधःसन्तापनविशेषस्य रूपादिपरावृत्त्यव्यभिचारेण व्यावर्त्त्याभावात्। वेदेऽधःसन्तापनमात्रं पाकपदार्थः कृष्णलं श्रपयेदित्यादौ फलाभावात्।

अस्तु वोपलक्षणं रूपादिपरावृत्तियोग्याधःसन्तापनं पाकपदार्थः योग्यता च सन्तापने कृष्णलादावप्यस्ति। गमेः स्पन्दविशेष एव वाच्यो न तूत्तरदेशसंयोगजनकत्वेन स्पन्दस्य वाच्यता सर्वस्पन्दानां तथात्वेन व्यावर्त्याभआवात्। स्पन्दे च विशेषः संयोग-विभागजनकतावच्छेदकः सर्वसिद्ध एव। त्यजेश्च कर्ममात्रं शक्यं न तु पूर्वदेशविभागफलककर्मत्वेन शक्यत्वं सर्वकर्मणां तथात्वेन व्यावर्त्त्याभावात्। त्यजतीति प्रयोगे च तद्बुद्धिर्निमित्तम्। पतत्यर्थोऽपि कर्मविशेष एव गुरुत्वासमवायिकारणप्रयोज्याधःसंयोगफलजनकः, फलन्तु कर्मविशेषपरिचायकमात्रम्। यजति-ददाति-जुहोतीनामिदं न ममेत्यादितत्तत्सङ्कल्पविशेषपूर्वस्त्याग एव वाच्यः सङ्कल्पे च विशेषस्तु

तत्तद्विशेषकृतस्तत्तत् फलविशेषजनकतावच्छेदको मानसप्रत्यक्षसिद्ध एव न तु तत्तत्फलजनक-सङ्कल्पविशेषे शक्तिः गौरवात्। देवतोद्देश्यकस्वस्वत्वध्वंसफलकत्यागत्वं सम्प्रदानस्वीकरणपूर्वक-स्वत्वध्वंसपरस्वत्वापत्तिफलजनकत्यागत्वं देवतोद्देश्यकप्रक्षेपकफलकत्यागत्वञ्च तत्तसङ्कल्पविशेष-परिचायकमात्रमिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डे धातुवादः।

अथ धातुवादालोकः

एवं पचतीत्यत्र द्वयी सिद्धान्तगतिः फलावच्छिन्नस्यैव व्यापारस्य प्रतीतेरव्यार्त्तकेनापि फलेनावच्छिन्न एव व्यापारो धात्वर्थो वाच्यः। अतएव त्यजि-गम्योर्विशेषः अन्यथा कर्ममात्रस्यैव संयोगविभागोभयजनकतायामपि तदुभयफलजनकत्वाप्रतिसन्धाने कर्ममात्रचवाचकयोस्तयोः पर्यायतापत्तेः। अतएव ब्रीहीन् प्रोक्षतीत्यत्र जलसंयोगे फले प्रोक्षणपदार्थैकदेशत्वमित्याशङ्क्य उपलक्षणतया समाहितमित्येका, अन्या च व्यापार एव वाच्यः अशक्यस्यापि फलस्य ज्ञानमात्रं तत्तत्प्रयोगो विनिगमकं फलोपस्थितिः द्वितीयादित आख्यातादितश्च क्वचिदिति।

इति महामहोपाध्यायतार्किकचूडामणिश्रीजयदेवमिश्रप्रकाशिते

शब्दचिन्तामण्यालोके धातुवादालोकः।

अथ उपसर्गवादः ।

उपसर्गास्तु द्योतकाः न वाचकाः। द्योतकत्वञ्च धातोरर्थविशेषे तात्पर्यग्राहकत्वं तदुपसन्दानेन तत्र शक्तिर्वा न तु धात्वर्थाभिधायकत्वं पौनरुक्त्यापत्तेः।

ननु प्रजयतीत्यादौ प्रकर्षस्य विजयते इत्यादावतिशयस्य अभ्यागच्छतीत्यादावाभिमुख्य-सामीप्ययोः प्रतीतावुपसर्गान्वय-व्यतिरेकानुविधानात् पदान्तरवदत्रापि शक्तिः।

न च प्रतिष्ठत इत्यत्र गतिधीर्न स्यात् प्रशब्दस्य प्रकर्षवाचित्वेनातिशयेन गमनार्थधीप्रसङ्गादिति वाच्यम्। धातोरिव तस्याप्यनेकार्थत्वात्।

न च धातोः सार्थकत्वं क्लृप्तमतस्तत्रानेकार्थता युक्ता उपसर्गे तु नैवमिति वाच्यम्। धातूनां बहुत्वान्न प्रकर्षवाचित्वं गौरवात् । किन्तु प्रशब्दस्यैकस्येति तस्यापि सार्थकत्वात्।

धातोरनेकार्थत्वं क्लृप्तं तदभियुक्तैर्नोपसर्गस्येति चेत्, न। तर्हि धातोर्नानार्थत्वे उपसर्गानुविधानमर्थविशेषे न स्यात् अक्षादिपदे तथा दर्शनात्।

उपसर्गस्यापि शक्तत्वे धात्वनुविधानं न स्यादिति चेत्, न। साधुत्वार्थं तत्र तदनुविधानं तेन विना प्रयोगाभावात् न तु शक्ये। धातोस्तु शक्तावेव तदपेक्षेति वैषम्यम्।

अथ प्रजयत्यभ्यागच्छतीत्यादौ सामान्यवाचकाद्धातोरेव प्रकर्ष-सामीप्यादिविशिष्टस्य विशेषस्योपस्थितिः। तात्पर्यग्राहकत्वमात्रमुपसर्गाणामिति चेत्, न। प्रकर्षादेर्विशेषस्याशक्यत्वेन तत्र लक्षणायां युगपद्वृत्तिद्वयापत्तेः।

एतेनाभ्यागच्छतीत्यादौ सामीप्यादिविशिष्टधात्वर्थप्रतीतेर्वाचकत्वमुपसर्गाणां, प्रतिष्ठत इत्यादौ धातोरेव गमनार्थत्वं तात्पर्य्यग्राहकस्तु प्रशब्दः। अन्यथा धातूपसर्गार्थयो-र्विरोधेनान्वयानुपपत्तेः।

एवं यत्र धातूपसर्गयोर्विरोधस्तत्र द्योतकत्वमन्यत्र वाचकत्वमिति मतमपास्तम्. अगमनविरोधिगमनस्यैव प्रशब्दार्थत्वात्।

अत्रोच्यते। आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वमतः प्रतिष्ठत इत्यत्र गमनं धात्वर्थ एव। प्रशब्दार्थत्वे भावनान्वयो न स्यात् प्रकृति-प्रत्यययोः सम्भूयान्वयबोधकत्वनियमात्। एवञ्च प्रोत्तरस्थत्वेन गमने शक्तिरिति प्रशब्दः शक्तावच्छेदको न शक्त इत्यौपसन्दानिकी शक्तिरेव द्योतकत्वम्। प्रकर्षाभिमुख्यसामीप्यादेरुपसर्गवाच्यत्वेऽपि तद्विशिष्टधात्वर्थान्वयः सम्भवत्येव भावनाया ओदनं पचतीत्यत्रौदनविषयकपाकान्वयवदिति यद्यपि, तथापि उपसर्गस्य शक्तावच्छेदकत्वं न शक्यत्वं गौरवात् तथा च प्रोत्तरजित्वेन प्रकृष्टजये शक्तिः। एवं हि क्लृप्तविशेष्यशक्तेर्विशेषणविषयत्वमात्रं कल्प्यते अन्यथा तु शक्त्यन्तरमेव।

अथ उपसर्गवादालोकः

प्रोत्तरस्थत्वेनेति। एतच्च गमनत्वप्रकारकप्रतीतिदार्ढ्येनोक्तम्। यदि गमनाभावाभावत्वप्रकारिका धीर्भवेत् तदा उपसर्गवाचकत्वपक्षेऽपि नान्वयानुपपत्तिः विशिष्टस्यार्थत्वादिति। न चैवं वृत्तिद्वयविरोधोच्छादः। वृत्तिद्वयेनोपस्थापन एव तद्विरोधात् न त्वेकया वृत्त्या एकया लक्षणयैवोपस्थापनादिति भावः।

वयन्तूपसर्गस्य वाचकत्वे निपातस्यानर्थकस्येति सूत्रं न क्रियेत अर्थवदादिसूत्रेणैव प्रातिपदिकत्वलाभात् प्रपञ्चकलभ्याया गौरवात् इति ब्रुमः।

इति महामहोपाध्यायतार्किकचूडामणिश्रीजयदेवमिश्रप्रकाशिते

शब्दचिन्तामण्यालोके उपसर्गवादालोकः।

न चैवं जिपूर्वप्रत्वेन तत्रैव शक्तिरस्त्विति वाच्यम्। धात्ववाच्यत्वे भावनानन्वयप्रसङ्गात् प्रतिष्ठत इत्यत्रोपसर्गस्य शक्त्यवच्छेदकत्वमात्रकल्पनाच्च।

अथ वा प्रतिष्ठत इत्यत्र विरोधिलक्षणया धातोर्गमनोपस्थितिः प्रशब्दस्तु तात्पर्य्यग्राहकः अनन्यलभ्यस्य शब्दार्थत्वात् प्रजयतीत्यादावपि विशेष्यवाचकस्य धातोर्विशिष्टे लक्षणा विशेष्याद्विशिषअटस्यान्यत्वात् प्रादेस्तात्पर्यग्राहकत्वम्।

न हि शक्तिं विनापि धातुतः प्रतीतिसम्भवे तत्कल्पनमर्हम्। अनन्यलभ्यस्य शब्दार्थत्वात् व्यतिसे इत्यादौ तु लुप्तः स्मृतो धातुरेवार्थप्रत्यायकः धातुलोपमजानतस्तत्रार्थप्रत्ययाभावादिति कृतं प्रसक्तानुप्रसक्त्या।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ

शब्दाख्य तुरीयखण्डे उपसर्गवादः।

अथ प्रमाणचतुष्टयप्रामाण्यवादः।

स्यादेतत्। तथापि सङ्केतग्रहे चेष्टातोऽप्यनुभवसम्भवाच्छब्दवत्सापि प्रमाणमतश्चत्वारि न प्रमाणानीति चेत्, उच्यते। शब्देन चेष्टायां सङ्केतग्रहाच्छब्दस्मृत्युपयोगिनी चेष्टा लिपिवत् शब्द एव प्रमाणमर्थे क्लृप्तत्वात्।

नन्वेवं सति कथमेड - मूकस्य व्यवहारस्तस्य शब्दास्मरणादिति चेत्, न। अव्युत्पन्नत्वाच्चेष्टायां तस्य तस्य शब्देन सङ्केतग्रहो न मानान्तरेणेति समयाग्रहाच्छब्दवत् चेष्टापि तं प्रति कुण्टितैव। व्यवहारस्तु एड-मूकस्यैतद्विषया मम प्रवृत्तिर्निवृत्तिर्वा एतस्याभिप्रेता यदा भवति तदा मामुद्दिश्यायमेतां चेष्टां करोति इत्यन्वय-व्यतिरेकाभ्यां व्याप्तिग्रहात्तथाभिप्रायमनुमाय प्रवृत्ति-निवृत्तौ। कशाङ्कुशाभिघातादिव करि-तुरगादेः।

न च कृतसमयापि चेष्टा अभिप्रायानुमापिकास्तु किं शब्दस्मरणेनेति वाच्यम्। अविनाभावाभावात्। न चैवं शब्देऽप्यभिप्रायानुमानादेव प्रवृत्त्याद्यस्त्विति वाच्यम्। शब्दादेव प्रत्येमीत्यनुव्यवसायात्तदनुभावकत्वे स्थिते तदनुकूलशक्तिकल्पनात्। एड-मूकादौ तु मानाभावात्तत्प्रवृत्तेरन्यथाप्युपपत्तेः। एवमन्यत्रापि शब्दप्रयोजकत्वे स्थिते तद्द्वारैव चेष्टायामनुभावकत्वं सम्भवतीति न सा पृथक् प्रमाणम्।

अथ प्रमाणचतुष्टयप्रामाण्यवादालोकः

ननु चेष्टा सङ्केतशब्दं स्मारयति न त्वनुमापयतीति न युक्तं तेन सह सम्बन्धाग्रहात् अर्थएन समं सङ्केतस्यैव सम्बन्धत्वात्। समं सम्बन्धग्रहे तत्सम्प्रणेऽपि सङ्केतबलाच्चोपजनितैवार्थोपस्थिति-रन्वयबोधाङ्गं प्राथमिकत्वात् न स्मृतशब्दजा विलम्बितत्वात्। अन्यथा अलौकिकस्वर्गादिपदस्यापि अर्थानुपस्थापकत्वं आवश्यकसङ्केतवाक्यादेव वाक्यार्थीभूततदर्थोपस्थितेः।

अथ वा स्मारयतु चेष्टा पदार्थानेव न तु शब्दांस्तथापि सा न प्रमाणम्, ऊद्ध्वार्ङ्गुलीकरणे यात्रां करिष्यसीत्यादिका कृत्यन्वयिनी प्रयोजकाभिप्रायं स्मारयन्ती प्रमाणमेव न। शङ्खध्वनौ यात्रां करिष्यसीत्यत्र शङ्खध्वनिवत्। ज्ञप्त्यन्वयिनी तु कारकेषु प्रातिपदिकार्थप्रधानक्रिया आनयनादिस्वरूपप्रधाना । तथा च गौरश्वः पुरुष इत्यादिपदैरिव स्वतन्त्रेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः प्रातिपदिकार्थे कर्म्मत्वादेरानयनादिष्ठतीतानागत-वर्त्तमानत्वस्य चान्वयप्रकारस्यानुपस्थितेः। पदैकदेशविभक्तिविशेषवच्चेष्टैकदेशविशेषात् प्रकरणादिविशेषाद्वा कर्मत्वादि-वर्त्तमानत्वादिस्मृतिनियम इति चेत्, न। कर्मत्वाद्यतीतत्वाद्युपस्थापकचेष्टैकदेशाभावात्। प्रकरणादयस्तु विषयविशेषे शब्दादीन्ननियमयन्ति न त्वन्वयप्रकारकर्मत्वादौ कालविशेषे वा प्रवर्त्तयन्ति। अन्यथा गौरश्व इत्यादावपि प्रकरणादिभिः कर्मत्वाद्युन्नीय विवक्षितार्थाध्यवसायः स्यात्। न हि चेष्टाकलापप्रकरणादयः कारकविशेषानाक्षेप्तुमलं न तु पदकदम्ब इत्यस्ति नियमः, तथा च कालसङ्ख्या-कर्मत्वादिप्रतिपादकविभक्त्यादिसमभिव्याहारवैयर्थ्यप्रसङ्गः।

यदि शब्दादर्थं प्रत्येमि इत्यनुव्यवसायो विनिगमक उक्तः सोऽपि चेष्टातोऽमुमर्थं प्रत्येमौत्यनुव्यवसायत्वेनानिर्णायक इत्यस्वरसादाह -- **अथ वेति**।

अत्रापि प्रमाणान्तरकल्पनागौरवमूलं, अत एव समयाधीनप्रवृत्तिकत्वं यदेव विभक्तिसमभिव्याहारसहकारितावच्छेदकत्वेनोक्तं तदेव विभाजकोपाधित्वेनोच्यतां अतो न विभागव्याघात इत्यपि निरस्तं, सति प्रमाणाभेदे अनुगमकगवेषणादिति।

इति महामहोपाध्याय-तार्किकचूडामणि-श्रीजयदेवमिश्रप्रकाशिते

शब्दचिन्तामण्यालोके प्रामाणचतुष्टयप्रामाण्यवादालोकः।

समाप्तश्च शब्दाख्यस्तुरीयः परिच्छेदः।

कथं तर्हि ततोऽर्थव्यवहारः संशयप्रतिभयोरन्यतरस्मात् चेष्टास्मारितशब्दानामपि कर्मत्वाद्यन्वयप्रकारोपस्थापकविभक्त्यादेरभावात्। कथमन्वयबोधकत्वमिति चेत्, न। विभक्त्यादिमतामेव शब्दानां स्मरणात् शब्दमात्रेण सङ्केताग्रहात्। नन्वपभ्रंशात् कथं वाक्यार्थधीः तत्रान्वयप्रकारोपस्थापकविभक्त्यादेरभावात्।

न च साधुशब्दस्मरणादिति वाच्यम्। साधुशब्दसङ्कथाविरहिणामपि पामराणामर्थप्रत्ययात् साधुपदमात्रस्मरणेऽपि कर्मत्वाद्युपस्थापकविभक्त्यादेरभावाच्चेति चेत्, न। यथा हि पदार्थशक्तत्वेन ज्ञातादपभ्रंशात्पदार्थोपस्थितिः तथा विभक्त्यर्थकर्मत्वादिशक्तत्वेन ज्ञातादपभ्रंशैकदेशात् तत्तत्स्वरावच्छिन्नात् कर्मत्वाद्युपस्थितिः।

अथ साधुशब्देऽन्वयप्रकारविभक्त्यादेः सहकारित्वं न तु चेष्टायां किन्तु तात्पर्यग्राहकत्वमात्रं सहकारीति चेत्, न, समयाधीनप्रवृत्तिकमानमात्रं प्रति तत्सहकारित्वात्। तद्विशेषशब्दस्य गुरुत्वादिति न सा प्रमाणान्तरम्। ऐतिह्यञ्चाप्तोक्तत्वेन शब्द एवान्तर्भवति। अर्थापत्त्यनुपलब्ध्योस्तु यथायथमन्तर्भावः प्रागेव चिन्तितः।

अतः सिद्धं चत्वारि प्रमाणानीत्युपरम्यते। धीराः कुशाग्रमतयो भवतः प्रणम्य मौलौ निधाय करवारिरुहे समीहे। वाणीयमर्थरहितापि विशृङ्खलापि सानुग्रहेण हृदयेन विलोकनीया।

इति महामहोपाध्यायश्रीमद्गङ्गेश्वरविरचिते तत्त्वचिन्तामणौ
शब्दाख्यतुरीयखण्डे प्रमाणचतुष्टयप्रामाण्यवादः समाप्तः।।
समाप्तश्च शब्दाख्यस्तुरीयः परिच्छेदः।

शब्दखण्डे तत्त्वचिन्तामणौ उल्लिखिताःग्रन्थाः, ग्रन्थकाराश्च।

गुरवः - २०१

जरन्मीमांसकाः - २४

प्राभाकराः - २६

मीमांसकाः - ८७

मीमांसकस्य - ३०४

शाब्दिकाः - ३७०

शब्दखण्डे तत्त्वचिन्तामणौ उद्धृतानि प्रमाणवचनानि।

अकुर्व्वन् विहितं कर्म्मे - १८७

अन्वयश्चानेकशब्दत्वमिति। (जैमिनिः) - २९८

अभियुक्ताश्च ये यत्र यन्निबद्धप्रयोजनाः।
ते तत्र गुणदोषाणां ज्ञाने चाधिकृता मताः।। - ३०२

अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः।। - २९८

अम्बुजो वेतसः। - २५८

आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः'।। - ३८५
इन्द्रमुपासीत - २५४

इन्द्रः सहस्राक्षः - २५४

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना।। - ३७४

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ।। - २६२

चन्द्रे कलङ्कः सुजने दरिद्रता विकासलक्ष्मीः कमलेषु चञ्चला।
मुखाप्रसादः स धनेषु सर्वदा यशो विधातुः कथयन्ति खण्डितम् ।। - ३६८

जातावस्तित्व-नास्तित्वे न हि कश्चिद्विवक्षति।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे।। - २७६
तत्र तत्त्वमभियोगात् स्यादिति। - ३०२

तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त ऋचः सामानि जज्ञिरे- ९६

तात्पर्य्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्य्यम् - ३१५

ददामि देयमित्येव यज्ञे यष्टव्यमित्यहम्। - २४२

दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् - १८५

दुःखेनात्यन्तं विमुक्तश्चरति न स पुनरावर्त्तते - २३७

द्वादशेऽहनि पिता नाम कुर्य्यादि - ३०२

नोपास्ते यश्च पश्चिमः - १८७

पश्यतः श्वेतमा रूपं हेषाशब्दञ्च शृण्वतः।
खुरविक्षेपशब्दञ्च श्वेतोऽस्वोधावतीति धीः ।। - २६३
पितृगतस्वर्गकामः - २३८

प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते - ९६

प्राथम्यादभिधातृत्वात्पर्य्योपगमादपि।
पदानामेव सा शक्तिर्व्वरमभ्युपगम्यताम् ।। - २६३

यज्ञयाचरतः कर्म्म कर्म्मग्रन्थिर्व्विलीयते।
यज्ञार्थात्कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः। (भगवद्गीता) - २४२

यत्परः शब्दः स शब्दार्थ इति न्यायात्। - ३२

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपपन्नं च तत् सुखं स्वःपदास्पदम् ।। - २५२

यं यं भावनानुधावति तं तं सङ्ख्यापीति स्थितिरिति। - ३८५

लघुनि शक्ये सम्भवत्यन्यलभ्यं गुरु न तथेति - २४७

वसन्ते सर्व्वसस्यानां जायते पत्रशातनम्।
मोदनमानाः प्रदृश्यन्ते यवाः कणिशशालिनः।। - २५८

वहारं गावोऽनुधावन्ति।। - २५८

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः।
तत्सम्बन्धवशप्राप्तस्यान्वयात् लक्षणोच्यते।। - ३०६

विशब्दो हि विशेषार्थः सिनोतिर्बन्ध उच्यते।
विशेषेण सिनोतीति विषयोऽतो नियामकः।। - २१७

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीतेव वेदस्यापि न तत् कुतः।। - २६

शास्त्रदेशितं फलं अनुष्ठातरीत्युत्सर्गः - २४३

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत्।

घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते।। - १०८

सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ।। - १८५

स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते - २३७

सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः।
क्रमेणार्थप्रतीतौ हि न स्याद्द्विवचनादिकम्।। - ३६१

संस्कार-शब्दशक्तिभ्यां विशिष्टानुभव (भाष्यम्) - २७१

स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा।

शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाः ।। (महाभागवतपुराण) - ९६

हिरण्मयौ प्राकाशावध्वर्यवेदक्षिणां ददाति - ३३१

शब्दखण्डे आलेकव्याख्यायाम् उल्लिखिताःग्रन्थाः, ग्रन्थकाराश्च।

आचार्यचरणैः ५४

आचार्य - ११

ईश्वरपरिच्छेदे - १११

कात्यायनसूत्रं - ३३१

ग्रन्थकृ २९, ७५,

त्रिसूत्रीनिबंधे - २४६

प्रत्यक्षपरिच्छेदे - ३८, १०७

मीमांसकः - ६, ११०, १११

वैशेषिकः - ५

सौगतः - ४

श्रीकरः - २६९

हेत्वाभासे परिच्छेदे - १११

शब्दखण्डे आलेकव्याख्यायाम् उद्धृतानि प्रमाणवचनानि।

अभिधां भावनामाहुरन्यामेव लिङादयः।

अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः।। (१४०)

असत्यपि प्रवृत्तिरिति। तस्मिन् सत्यपीत्यादिहेतुश्च साकलपूर्वादौ उक्तसाध्येषु यथायोगं हेतुद्वयमिति। - १४२

एतयैव निषादस्थपतिं याजयेदि ष्ठ ३५३

औदुम्बरी स्पष्ठैवोद्गायेदिति - २५८

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः।

सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ।। (१४०)

द्वादश द्वादशान्येभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इतरेभ्यः।
(कात्यायनसूत्रं) - ३३१

पदार्थः पदार्थेनान्वेति - ३८३

'परिषदि दत्तमदत्तमिति सूत्रेण - ३३१

पाकन्तु पचिरेवाह कर्त्तारं प्रत्ययोणकः।
पाकयुक्तः पुमान् कर्ता वाच्यो नैकस्य कस्यचित् ।। - ३८७

प्रयोगे स्वार्थादभिद्यमानरूपा निपाताः - ३५६

माहिय्येन करण्यान्तु रथकारः प्रजायते - ३३०

वास्तुमयं चरं निर्वपेदि - ३५३

वैश्या-शूद्रोस्तु राजन्यान्माहिय्यौ तौ सुतौ स्मृतौ।

वैश्यात्तु करणः शूद्र्यां -- ३३०

व्यभिचारश्चागमेतरप्रमाणगम्यं कारणत्वमपवदतीति । (त्रिसूत्रीनिबंधे) - २४६

सर्वा औदुम्बरी वेष्टयितव्येति - २५८

सर्वेषामर्द्धिनोमुख्या द्वितीयास्तु तदर्द्धिनः।
तृतीयिनस्ततीयास्तु श्चतुर्थास्त्वेकपादिनः'।। - ३३१

श्रोतरि तदभाव आकाङ्क्षेति। ५४

धर्मिकल्पनात इति न्यायात् । - २०३

निषादस्थपत्यधिकरण ५६

वीचीतरङ्गन्यायेन - १००

समं स्यादश्रुतत्वादितिन्यायेन - ३३१

विषयसूचिका

शब्दप्रामाण्यवादः	१- ४९
आकाङ्क्षावादः	५० - ६१
योग्यतावादः	६२ - ७१
आसत्तिवादः	७२ - ८१
तात्पर्यवादः	८२ - ९८
शब्दानित्यतावादः	९९ - १२३
उच्छन्नप्रच्छन्नवादः	१२४ - १४०
विधिवादः	१४१ - १९९
शक्तिवादः	२०० - २४३
अपूर्ववादः	२४४ - २६३
जातिशक्तिवादः	२६४ - ३३७
समासवादः	३३८ - ३७२
आख्यातवादः	३७३ - ३८८
धातुवादः	३८९ - ३९१
उपसर्गवादः	३९२ - ३९४
प्रमाणचतुष्टयप्रामाण्यवादः	३९५ - ३९७
अनुबन्धः	३९८ - ४०५
शब्दखण्डे तत्त्वचिन्तामणौ उल्लिखिताःग्रन्थाः, ग्रन्थकाराश्च।	३९८
शब्दखण्डे तत्त्वचिन्तामणौ उद्धृतानि प्रमाणवचनानि।	३९९ -४०२
शब्दखण्डे आलेकव्याख्यायाम् उल्लिखिताःग्रन्थाः, ग्रन्थकाराश्च।	४०३
शब्दखण्डे आलेकव्याख्यायाम् उद्धृतानि प्रमाणवचनानि।	४०४ - ४०५

Manuscripts of Aaloka of JAYADEVA:

SARASVATIMAHAL LIBRARY - TANJORE

1. T. ACC No. 6099 Paper Manuscript, Devanagari, Folios. 1 – 488 (Lines per folio 11) Complete Pratyaksha, Anumana and Sabda Khandas.

CENTRAL LIBRARY - MS. UNIVERSITY - BARODA.

2 B. - Acc. No. 11181, Paper Devanagari, Folios 1 - 94 (both sides)

Complete only Pratyaksha Pariccheda.

Government Oriental Manuscripts Library – CHENNAI

3 M – Acc. No. 1616, Paper, Devanagari, Pages 1 – 132.

Pratyaksha Pariccheda incomplete. Pramanyavada and Anyathakhyativada only.

ADYAR LIBRARY - CHENNAI

4 A1 - Acc No. 1599, Paper Manuscript, Devanagari, Folios. 1-72. (Lines per folio 8) Sabdakhanda (Complete)

5 A2 - Manuscript. - Acc. No. 1600, Paper Manuscript. Telugu, Folios. 2-24. (1st fol. Missing. Lines per folio 17). Sabdakhanda (incomplete)